I PROSTRATE BEFORE THE LOTUS-FEET OF LORD VIGHNESWARA, OFFSPRING OF UMA, THE CAUSE OF DESTRUCTION OF SORROW, WHO IS SERVED BY MAHABHUTAS (THE FIVE GREAT ELEMENTS OF THE UNIVERSE) ETC., WHO HAS THE FACE OF A TUSKER AND WHO CONSUMES THE ESSENCE OF KAPITTHA AND JAMBU FRUITS

## PREFACE

Brahma Rishi Vasishta was kulguru of Dasharatha Maha Raja of Ramayana. Sage Vashishta had 100 sons. All of them were killed by a Rakshasa influenced by Sage Vishwamitra. Sage Vashita could not retaliate as he was a Brahma Rishi who has conquered anger. In grief he tried to do suicide. After failing to end his life by many methods he came back home sadly. He heard a small voice telling the Vedas. There he found his eldest son Shakti's wife Adrisyanti. His daughter-in-law was pregnant and the small child inside her was chanting the Vedas. Parasara was born to Shakti posthumously. He performed a great sacrifice to destroy the Rakshasas, for a Rakshasa had killed his father. He became a Maha Rishi expert in astrology. The word Parasara means the vivifier of the dead. Once, while crossing a river, he calculated that a great person could be born now. He expressed his desire to the ferry girl, but she was reluctant. He convinced her that no blame would attach to her and that she would regain her virginity after the act. At last she consented, on the condition that the odor of fish that clung to her (for she had been born inside a fish), be changed to fragrance. This girl was none other than Satyavati, who was later married to King Shantanu. They were united in an islet in the middle of the river. This act was hidden from the prying eyes of the world, with the aid of a mist, created by the yogic powers of Parasara. A son was born immediately to her. Since this was a divine birth, the child grew to adulthood in minutes and after promising his mother that he would return whenever she had a need for him, left to study the scriptures with his father. This child was Vyasa, who later composed the Mahabharata. Since he was dark and born in an island he is also known as Krishna(dark)-Dwaipayana (born in an island). Sage Vyas's son is Sukha Brahma Rishi.

# Brihat Parasara Hora Sastra

## Contents


- Ch. 1. The Creation
- Ch. 2. Great Incarnations
- Ch. 3. Grah Characters and Description
- Ch. 4. Zodiacal Rashis Described
- Ch. 5. Special Lagnas
- Ch. 6. The Sixteen Divisions of a Rashi
- Ch. 7. Divisional Considerations
- Ch. 8. Drishtis of the Rashis
- Ch. 9. Evils at Birth
- Ch. 10. Antidotes for Evils
- Ch. 11. Judgement of Bhavas
- Ch. 12. Effects of Tanu Bhava
- Ch. 13. Effects of Dhan Bhava
- Ch. 14. Effects of Sahaj Bhava
- Ch. 15. Effects of Bandhu Bhava
- Ch. 16. Effects of Putr Bhava
- Ch. 17. Effects of Ari Bhava
- Ch. 18. Effects of Yuvati Bhava
- Ch. 19. Effects of Randhr Bhava
- Ch. 20. Effects of Dharm Bhava
- Ch. 21. Effects of Karm Bhava
- Ch. 22. Effects of Labh Bhava
- Ch. 23. Effects of Vyaya Bhava
- Ch. 24. Effects of the Bhava Lords
- Ch. 25. Effects of Non-Luminous Grahas
- Ch. 26. Evaluation of Drishtis of Grahas
- Ch. 27. Evaluation Of Strengths
- Ch. 28. Isht and Kasht Balas
- Ch. 29. Bhava Padas
- Ch. 30. Upa Pad
- Ch. 31. Argala, or Intervention from Grahas
- Ch. 32. Karakatwas of the Grahas
- Ch. 33. Effects of Karakāńś
- Ch. 34. Yoga Karakas
- Ch. 35. Nabhash Yogas
- Ch. 36. Many Other Yogas
- Ch. 37. Candr's Yogas
- Ch. 38. Sūrya's Yogas
- Ch. 39. Raj Yog
- Ch. 40. Yogas For Royal Association
- Ch. 41. Combinations for Wealth
- Ch. 42. Combinations for Penury
- Ch. 43. Longevity
- Ch. 44. Marak Grahas
- Ch. 45. Avasthas of Grahas
- Ch. 46. Dashas of Grahas
- Ch. 47. Effects of Dashas
- Ch. 48. Distinctive Effects of the Nakshatr Dasha, or of the Dashas of the Lords (Vimshottari) of various Bhavas
- Ch. 49. Effects of the Kaal Chakra
- Ch. 50. Effects of the Char etc. Dashas

- **Ch. 51. Working out of Antar Dashas of Grahas and Rashis in Vimshottari etc. Dasha systems**
- **Ch. 52. Effects of the Antar Dashas in the Dasha of Sūrya (Vimshottari)**
- **Ch. 53. Effects of the Antar Dashas in the Dasha of Candr**
- **Ch. 54. Effects of Antar Dashas in the Dasha of Mangal**
- **Ch. 55. Effects of the Antar Dashas in the Dasha of Rahu**
- **Ch. 56. Effects of the Antar Dashas in the Dasha of Guru**
- **Ch. 57. Effects of the Antar Dashas in the Dasha of Śani**
- **Ch. 58. Effects of the Antar Dashas in the Dasha of Budh**
- **Ch. 59. Effects of the Antar Dashas in the Dasha of Ketu**
- **Ch. 60. Effects of the Antar Dashas in the Dasha of Śukr**
- **Ch. 61. Effects of Pratyantar Dashas in Antar Dashas**
- **Ch. 62. Effects of Sukshmantar Dashas in Pratyantar Dashas**
- **Ch. 63. Effects of Prana Dashas in Sukshma Dashas**
- **Ch. 64. Effects of Antar Dashas in the Kala Chakra**
- **Ch. 65. Effects of Dashas of Rashis in the Ańśas of the Various Rashis**
- **Ch. 66. AshtakaVarg**
- **Ch. 67. Trikon Shodhana in the AshtakaVarg**
- **Ch. 68. Ekadhipatya Shodhana in the AshtakaVarg**
- **Ch. 69. Pinda Sadhana in the AshtakaVarg**
- **Ch. 70. Effects of the AshtakaVarg**
- **Ch. 71. Determination of Longevity through the AshtakaVarg**
- **Ch. 72. Aggregational AshtakaVarg**
- **Ch. 73. Effects of the Rays of the Grahas**
- **Ch. 74. Effects of the Sudarshana Chakra**
- **Ch. 75. Characteristic Features of Panchmahapurushas**
- **Ch. 76. Effects of the Elements**
- **Ch. 77. Effects of the Gunas**
- **Ch. 78. Lost Horoscopy**
- **Ch. 79. Ascetism Yogas**
- **Ch. 80. Female Horoscopy**
- **Ch. 81. Effects of Characteristic Features of Parts of Woman's body.**
- **Ch. 82. Effects of Moles, Marks, Signs etc. for Men and Women**
- **Ch. 83. Effects of Curses in the Previous Birth**
- **Ch. 84. Remedial Measures from the Malevolence of Grahas**
- **Ch. 85. Inauspicious Births**
- **Ch. 86. Remedies for Amavasya Birth**
- **Ch. 87. Remedies from Birth on Krishna Chaturdashi**
- **Ch. 88. Remedies from Birth in Bhadra and Inauspicious Yogas**
- **Ch. 89. Remedies from Nakshatra Birth**
- **Ch. 90. Remedies from Sankranti Birth**
- **Ch. 91. Remedies for Birth in Eclipses**
- **Ch. 92. Remedies from Gandanta Birth**
- **Ch. 93. Remedies for Abhukta Mula Birth**
- **Ch. 94. Remedies from Jyeshtha Gandanta Birth**
- **Ch. 95. Remedies from Birth of a Daughter after Three Sons**
- **Ch. 96. Remedies from Unusual Delivery**
- **Ch. 97. Conclusion**

सृष्टिक्रमकथनाध्यायः १

अथैकदा मुनिश्रेष्ठं त्रिकालज्ञं पराशरम्
पप्रच्छोपेत्य मैत्रेयः प्रणिपत्य कृताञ्जलिः १

भगवन् परमं पुण्यं गुह्यं वेदाङ्गमुत्तमम्
त्रिस्कन्धं ज्यौतिषं होरा गणितं संहितेति च २

एतेष्वपि त्रिषु श्रेष्ठा होरेति श्रूयते मुने
त्वत्तस्तां श्रोतुमिच्छामि कृपया वद मे प्रभो ३

कथं सृष्टिरियं जाता जगतश्च लयः कथम्
खस्थानां भूस्थतानां च सम्बन्धं वद विस्तरात् ४

## Ch. 1. The Creation

**1-4. Offering his obeisance to all-knowing Mahārśi Parāśara and with folded hands, Maitreya said: O venerable Mahārśi, Jyotishya, the supreme limb of the Vedas, has three divisions, viz. Horā, Ganita and Samhita. Among the said three divisions Horā, or the general part of Jyotishya is still more excellent. I desire to know of its glorious aspects from you. Be pleased to tell me, how this Universe is created? How does it end? What is the relationship of the animals, born on this earth, with the heavenly bodies? Please speak elaborately**

साधु पृष्टं त्वया विप्र लोकानुग्रहकारिणा
अथाहं परमं ब्रह्म तच्छक्तिं भारतीं पुनः ५

सूर्यं नत्वा ग्रहपतिं जगदुत्पत्तिकारणम्
वक्ष्यामि वेदनयनं यथा ब्रह्ममुखाच्छ्रुतम् ६

शान्ताय गुरुभक्ताय सर्वदा सत्यवादिने
आस्तिकाय प्रदातव्यं ततः श्रेयो ह्यवाप्स्यति ७

न देयं परशिष्याय नास्तिकाय शठाय वा
दत्ते प्रतिदिनं दुःखं जायते नात्र संशयः ८

**5-8. Mahārśi Parāśara answered. O Brahmin, your query has an auspicious purpose in it for the welfare of the Universe. Praying Lord Brahma and Śrī Saraswatī, his power (and consort) and Sun, the leader of the Planets and the cause of Creation, I shall proceed to narrate to you the science of Jyotishya, as heard through Lord Brahma. Only good will follow the teaching of this Vedic Science to the students, who are peacefully disposed, who honor the preceptors (and elders), who speak only truth and are God fe6thng. Woeful forever, doubtlessly, will it be to impart knowledge of this science to an unwilling student, to a heterodox and to a crafty person.**

एकोऽव्यक्तात्मको विष्णुरनादिः प्रभुरीश्वरः
शुद्धसत्वो जगत्स्वामी निर्गुणस्त्रिगुणान्वितः ६

संसारकारकः श्रीमान्निमित्तात्मा प्रतापवान्
एकांशेन जगत्सर्वं सृजत्यवति लीलया १०

त्रिपादं तस्य देवत्य ह्यमृतं तत्त्वदर्शिनः
विदन्ति तत्प्रमाणं च सप्रधानं तथैकपात् ११

व्यक्ताव्यक्तात्मको विष्णुर्वासुदेवस्तु गीयते
यदव्यक्तात्मको विष्णुः शक्तिद्वयसमन्वितः १२

**9-12. Śrī Vishnu, who is the Lord (of all matters), who has undefiled spirit, who is endowed with the three Gunas, although he transcends the grip of Gunas (Gunatita), who is the Author of this Universe, who is glorious, who is the Cause and who is endowed with valor, has no beginning. He authored the Universe and administers it with a quarter of his power. The other three quarters of Him, filled with nectar, are knowable only to the philosophers (of maturity). The Principal Evolver, who is both perceptible and imperceptible, is Vasudeva. The Imperceptible part of the Lord is endowed with dual powers, while the Perceptible with triple powers.**

व्यक्तात्मकस्त्रिभिर्युक्तः कथ्यतेऽनन्तशक्तिमान्
सत्त्वप्रधाना श्रीशक्तिर्भूशक्तिश्च रजोगुणा १३

शक्तिस्तृतीया या प्रात्का नीलाख्या ध्वान्तरूपिणी
वासुदेवश्चतुर्थोऽभूच्छ्रीशक्त्या प्रेरितो यदा १४

संकर्षणश्च प्रद्युम्नोऽनिरुद्ध इति मूर्तिधृक्
तमःशक्त्याऽन्विता विष्णुर्देवः संकर्षणाभिधः १५

**13-15. The three powers are Śrī Shakti (Mother Lakshmi) with Sattva-Gun, Bhū Shakti (Mother-Earth) with Rajo-Gun and Nīla Shakti with Tamo-Gun. Apart from the three, the fourth kind of Vishnu, influenced by Śrī Shakti and Bhoo Shakti, assumes the form of Shankarshan with Tamo-Gun, of Pradyumna with Rajo Guna and of Anirudh with Sattva Guna.**

प्रद्युम्नो रजसा शक्त्याऽनिरुद्धः सत्त्वया युतः
महान् संकर्षणाज्ञातः प्रद्युम्नाद्यदहंकृतिः १६

अनिरुद्धात् स्वयं जातो ब्रह्माहंकाकमूर्तिधृक्
सर्वषु सर्वशक्तिश्च स्वशक्त्याऽधिकया युतः १७

**16-17. Mahatatwa, Ahamkara and Ahamkara Murti and Brahma, are born from Shankarshana, Pradyumna and Anirudha, respectively. All these three forms are endowed with all the three Gunas, with predominance of the Guna due to their origin.**

अहंकारस्त्रिधा भूत्वा सर्वमेतदविस्तरात्
सात्त्विको राजसश्चैव तामसश्चेदहंकृतिः १८

देवा वैकारिकाज्ञातास्तैजसादिन्द्रियाणि च
तामसाच्चैव भूतानि खादीनि स्वस्वशक्तिभिः १९

**18-19. Ahamkara is of three classes, i.e. with Sattvic, Rajasic and Tamasic dispositions. Divine class, sensory organs and the five primordial compounds (space, air, fire, water and earth) are, respectively, from the said three Ahamkaras.**

श्रीशक्त्या सहितो विष्णुः सदा पाति जगत्त्रयम्
भूशक्त्या सृजते ब्रह्मा नीलशक्त्या शिवोऽत्ति हि २०

**20. Lord Vishnu, coupled with Śrī Shakti, rules over the three worlds. Coupled with Bhoo Shakti, He is Brahma causing the Universe. Coupled with Neel Shakti, He is Shiva, destroying the Universe.**

सर्वेषु चैव जीवेषु परमात्मा विराजते
सर्वं हि तदिदं ब्रह्मन् स्थितं हि परमात्मनि २१

सर्वेषु चैव जीवेषु स्थितंह्यंशद्वयं क्वचित्
जीवांशो ह्यधिकस्तद्वत् परमात्मांशकः किल २२

सूर्यादयो ग्रहाः सर्वे ब्रह्मकामद्विषादयः
एते चान्ये च बहवः परमात्मांशकाधिकाः २३

शक्तयश्च तथैतेषमधिकांशाः श्रियादयः
स्वस्वशक्तिषु चान्यासु ज्ञेया जीवांशकाधिकाः २४

**21-24. The Lord is in all beings and the entire Universe is in Him. All beings contain both Jivatma and Paramatmāńśas. Some have predominance of the former, while yet some have the latter in predominance. Paramatmāńśa is predominant in the Planets, viz. Sun etc. and Brahma, Shiva and others. Their powers or consorts too have predominance of Paramatmāńśa. Others have more of Jivatmāńśa.**

अथावतारकथनाध्यायः २

रामकृष्णादयो ये ये ह्यवतारा रमापतेः
तेऽपि जीवांशसंयुक्ताः किंवा ब्रूहि मुनिश्वर १

## Ch. 2. Great Incarnations

**1. Maitreya: O Mahārśi Parāśara, are the incarnations of Vishnu, viz. Śrī Rama, Śrī Krishna etc., endowed with Jivāńś?**

रामः कृष्णश्च भो विप्र नृसिंहः सूकरस्तथा
एते पूर्णावताराश्च ह्यन्ये जीवांशकान्विताः २

**2. Mahārśi Parashara: O Brahmin, the four incarnations, viz. Ram, Krishna, Narasimha and Varaha are wholly with** Paramatmāńś. The other incarnations (than these, out of the ten) have in them Jivāńś too.

अवताराण्यनेकानि ह्यजस्य परमात्मनः
जीवानां कर्मफलदो ग्रहरूपी जनार्दनः ३

दैत्यानां बलनाशाय देवानां बलवृद्धये
धर्मसंस्थापनार्थाय ग्रहाज्जाताः शुभाः क्रमात् ४

**3-4. The unborn Lord has many incarnations. He has incarnated, as the 9 (Nava) Planets to bestow on the living beings the results due to their 10ths. He is Janardana. He assumed the auspicious form of Planets to destroy the demons (evil forces) and sustain the divine beings.**

रामोऽवतारः सूर्यस्य चन्द्रस्य यदुनायकः
नृसिंहो भूमिपुत्रस्य बुद्धः सोमसुतस्य च ५

वामनो विबुधेज्यस्य भार्गवो भार्गवस्य च
कूर्मो भास्करपुत्रस्य सैंहिकेयस्य सूकरः ६

केतोर्मीनावतारश्च ये चान्ये तेऽपि खेटजाः
परात्मांशोऽधिको येषु ते सर्वे खेचराभिधाः ७

**5-7. From Sun came the incarnation of Rama, from Moon that of Krishna, from Mars that of Narasimha, from Mercury that of Buddha, from Jupiter that of Vamana, from Venus that of Parashurama, from Saturn that of Kurma (Tortoise), from Rahu that of Varaha (Pig) and from Ketu that of Pisces (Fish) occurred. Incarnations other than these also are through the Planets. The beings with more Paramatmāńś are called divine beings.**

जीवांशोह्यधिको येषु जीवास्ते वै प्रकीर्तिताः
सूर्यादिभ्यो ग्रहेभ्यश्च परमात्मांशनिःसृताः ८

रामकृष्णादयः सर्व ह्यवतारा भवन्ति वै
तत्रैव ते विलीयन्ते पुनः कार्योत्तर सदा ९

जीवांशनिःसृतास्तेषां तेभ्यो जाता नरादयः
तेऽपि तत्रैव लीयन्ते तेऽव्यक्ते समयन्ति हि १०

इदं ते कथितं विप्र सर्वं यस्मिन् भवेदिति
भूतान्यपि भविष्यन्ति तत्तज्ञानन्ति तद्विदः ११

विना तज्ज्यौतिषं नान्यो ज्ञातुं शक्नोति कर्हिचित्
तस्मादवश्यमध्येयं ब्राह्मणेश्च विशेषतः १२

यो नरः शास्त्रमज्ञात्वा ज्यौतिषं खलु निन्दति
रौरवं नरकं भुक्त्वा चान्धत्वं चान्यजन्मनि १३

**8-13. The beings with more Jivatmāńś are (mortal) beings. The high degree of Paramatmāńś from the Planets, viz. Sun etc. did incarnate, as Ram, Krishna etc. After completing the mission, the Paramatmāńśas (of the respective) Planets again merge (in the respective) Planets. The Jivatma portions from the Planets take births, as human beings and live their lives according to their 10ths and again merge in the Planets. And at the time of Great Destruction the Planets as well merge in Lord Vishnu. The one, who knows of all these, will become versed in the knowledge of the past, present and future. Without knowledge of Jyotishya these cannot be known. Hence, everyone should have knowledge of Jyotishya, particularly the Brahmin. The one, who, devoid of knowledge of Jyotishya, blames this Vedic Science will go to the hell called Raurava and will be reborn blind.**

अथ ग्रहगुणस्वरूपाध्यायः ३
कथितं भवता प्रेम्णा ग्रहावतरणं मुने
तेषां गुणस्वरूपाद्यं कृपया कथ्यतां पुनः १

## Ch. 3. Planet Characters and Description

**Maitreya: O Mahārśi, you have affectionately explained about the incarnations of Planets. Now kindly tell me in detail their characters and dispositions.**

शृणु विप्र प्रवक्ष्यामि भग्रहाणां परिस्थितिम्
आकाशे यानि दृश्यन्ते ज्योतिर्बिम्बात्यनेकशः २

तेषु नक्षत्रसंज्ञानि ग्रहसंज्ञानि कानिचित्
तानि नक्षत्रनामानि स्थिरस्थानानि यानि वै ३

**2-3. Parāśara: O Brahmin, listen to the account of placement of the heavenly bodies. Out of the many luminous bodies sighted in the skies some are stars, yet some are Planets. Those, that have no movements, are the Nakshatras (asterisms).**

गच्छन्तो भानि गृह्णन्ति सततं ये तु ते ग्रहः
भचक्रस्य नगाश्व्यंशा अश्विन्यादिसमाह्वयाः ४

तद्द्वादशविभागास्तु तुल्या मेषादिसंज्ञकाः
प्रसिद्धा राशयः सन्ति ग्रहास्त्वर्कादिसंज्ञकाः ५

राशीनामुदयो लग्नं तद्वशादेव जन्मिनाम्
ग्रहयोगवियोगाभ्यां फलं चिन्त्यं शुभाशुभम् ६

**4-6. Those are called Planets, which move through the Nakshatras (or stellar mansions) in the zodiac. The said zodiac comprises of 27 Nakshatras commencing from Ashvini. The same area is divided in 12 parts equal to 12 Rāśis commencing from Aries. The names of the Planets commence from Sun. The Rāśi rising is known, as Lagna. Based on Lagna and the Planets, joining and departing from each other, the natives good and bad effects are deducted.**

**Addition from Santhanam till Sloka 7. The names of the 27 Nakshatras are Ashvini, Bharani, Krittika, Rohini, Mrigasira, Ardra, Punarvasu, Pushya, Aslesha, Magha, Purvaphalguni, Uttaraphalguni, Hasta, Chitra, Swati, Vishaka, Anuradha, Jyeshtha, Mula, Purvashadh, Uttarashadh, Shravana, Dhanistha, Satabhisha, Purvabhadra, Uttarabhadra, Revati.**

**Lagna is a very important point in the horoscope. It is the Rāśi that rises in the East, on the latitude of birth. The apparent rising of a Rāśi is due to the rotation of the earth on its own axis at a rate of motion, causing every degree of the zodiac seemingly ascend on the eastern horizon. Approximately two hours are required for a Rāśi to pass via the horizon, thereby every degree taking four minutes to ascend. This duration, however, is actually dependent on the concerned latitude.**

**Actually Sun has no motion. His motion is an apparent one, as viewed from the rotating earth. Other Planets, including the nodes, have v6thed rates of motion. The average daily motions of the Planets, which are not, however standard, are, as follows: Sun 1, Moon 13-15, Mars30-45, Mercury 65-100, Venus 62-82, Jupiter 5-15, Saturn 2, Rahu/Ketu 3.**

**With such different motions, a Planet forms various Aspects with others. These Aspects through longitudinal distances have a great deal of utility in Jyotishya. This is what Mahārśi Parashara suggests to be considered.**

संज्ञा नक्षत्रवृन्दानां ज्ञेयाः सामान्यशास्त्रतः
एतच्छास्त्रानुसारेण राशिकेटफलं ब्रुवे ७

7. Details (of astronomical nature) of stars have to be understood by general rules, while I narrate to you about the effects of Planets and Rāśis.

यस्मिन् काले यतः खेटा यान्ति दृग्गणितैकताम्
तत एव स्फुटाः कार्याः दिक्कालौ च स्फुटौ विद ८

स्वस्वदेशोद्भवैः साध्यं लग्नं राश्युदयैः स्फुटम्
अथादौ वच्मि खेटानां जातिरूपगुणानहम् ९

8-9. The positions of the Planets for a given time be taken, as per Drikganit. And with the help of Rāśi durations, applicable to the respective places, Lagna at birth should be known. Now, I tell you about the castes, descriptions and dispositions of the Planets.

अथ खेटा रविश्चन्द्रो मङ्गलश्च बुधस्तथा
गुरुः शुक्रः शनी राहुः केतुश्चैते यथाक्रमम् १०

10. Names of Planets. The names of the nine Planets, respectively, are Sun, Moon, Mars, Mercury, Jupiter, Venus, Saturn, Rahu and Ketu.

तत्रार्कशनिभूपुत्राः क्षीणेन्दुराहुकेतवः
क्रूराः शेषग्रहा सौम्याः क्रूरः क्रूरयुतो बुधः ११

11. Benefics and Malefics. Among these, Sun, Saturn, Mars, decreasing Moon, Rahu and Ketu (the ascending and the descending nodes of Moon) are malefics, while the rest are benefics. Mercury, however, is a malefic, if he joins a malefic.

Addition from Santhanam till Sloka 12-13. When Moon is ahead of Sun, but within 120, she has medium strength. Between 120 to 240 she is very auspicious,( see Atishubhapred). From 240 to 0 she is bereft of strength. This is Yavana's view; vide P. 70 of my English Translation of Saravali. This view is, however, related to Moon's strength, or otherwise, while the waning Moon (Krishna Paksha, dark half) is a malefic and waxing Moon (Shukla Paksha, bright half) is a benefic. Should Moon be conjunct with a benefic, or receiving a Aspect from a benefic, she turns a benefic, even if in a waning state. As regards Mercury, we have clear instructions from Mahārśi Parashara, that he becomes a malefic, if he joins a malefic. If waning Moon and Mercury are together, both are benefics.

सर्वात्मा च दिवानाथो मनः कुमुदबान्धवः
सत्त्वं कुजो बुधैः प्रोक्तो बुधो वाणीप्रदायकः १२

देवेज्यो ज्ञानसुखदो भृगुर्वीर्यप्रदायकः
ऋषिभिः प्राक्तनैः प्रोक्तश्छायासूनुश्च दुःखदः १३

**12-13. Planet governances. Sun is the soul of all. Moon is the mind. Mars is ones strength. Mercury is speech-giver, while Jupiter confers Knowledge and happiness. Venus governs semen (potency), while Saturn denotes grief.**

रविचन्द्रौ तु राजानौ नेता ज्ञेयो धरात्मजः
बुधो राजकुमारश्च सचिवौ गुरुभार्गवौ १४

प्रेष्यको रविपुत्रश्च सेना स्वर्भानुपुच्छकौ
एवं क्रमेण वै विप्र सूर्यादीन् प्रविचिन्तयेत् १५

**14- 15. Planet cabinet. Of royal status are Sun and Moon, while Mars is the Army chief. Prince-apparent is Mercury. The ministerial Planets are Jupiter and Venus. Saturn is a servant. Rahu and Ketu form the Planet Army.**

रक्तश्यामो दिवाधीशो गौरगात्रो निशाकरः
नात्युच्चाङ्गः कुजो रक्तो दूर्वाश्यामो बुधस्तथा १६

गौरगात्रो गुरुर्ज्ञेयः शुक्रः श्यावस्तथैव च
कृष्णदेहो रवेः पुत्रो ज्ञायते द्विजसत्तम १७

**16-17. Complexions of Planets. Sun is blood-red. Moon is tawny. Mars, who is not very tall is blood-red, while Mercury's hue is akin to that of green grass. Tawny, v6thegated and dark are Jupiter, Venus and Saturn in their order.**

वह्न्यम्बुशिखिजा विष्णुविडौजः शचिका द्विज
सूर्यादीनां खगानां च देवा ज्ञेयाः क्रमेण च १८

**18. Deities of Planets. Fire (Agni) (?), Water (Varuna), Subrahmanya (Lord Shiva's son, following Ganesha), Maha Vishnu, Indra, Shachi Devi (the consort of Lord Indra) and Brahma (?) are the presiding deities of the 7 Planets in their order.**

क्लीवौ द्वौ सौम्यसौरी च युवतीन्दुभृगू द्विज
नराः शेषाश्च विज्ञेया भानुर्भौमो गुरुस्तथा १९

**19. Gender of the Planets. Mercury and Saturn are neuters. Moon and Venus are females, while Sun, Mars and Jupiter are males.**

अग्निभूमिनभस्तोयवायवः क्रमतो द्विज
भौमादीनां ग्रहाणां च तत्त्वानीति यथाक्रमम् २०

**20. Primordial compounds. Jupiter, Saturn, Mars, Venus and Mercury, respectively govern the Panchabhutas, space, air, fire, water and earth.**

गुरुशुक्रौ विप्रवर्णौ कुजार्कौ क्षत्रियौ द्विज
शशिसोम्यौ वैश्यवर्णौ शनिः शूद्रो द्विजोत्तम् २१

**21. Castes of Planets. Jupiter and Venus are Brahmins. Sun is a royal Planet, while Moon and Mercury belong to commercial community. Saturn rules the Sudras (4th caste).**

जीवसूर्येन्द्रवः सत्त्वं बुधशुक्रौ रजस्तथा
सूर्यपुत्रधरापुत्रौ तमःप्रकृतिकौ द्विज २२

**22. Nature of Planets. Sattvic Planets are the lumin6thes (Sun & Moon) and Jupiter, Venus and Mercury are Rajasik, while Mars and Saturn are Tamasic.**

मधुपिङ्गलदृक्सूर्यश्चतुरस्रः शुचिर्द्विज
पित्तप्रकृतिको धीमान् पुमानल्पकचो द्विज २३

**23. Description of Sun. Sun's eyes are honey-colored. He has a square body. He is of clean habits, bilious, intelligent and has limited hair (on his head).**

बहुवातकफः प्राज्ञश्चन्द्रो वृत्ततनुर्द्विज
शुभदृङ्मधुवाक्यश्च चञ्चलो मदनातुरः २४

**24. Description of Moon. Moon is very windy and phlegmatic. She is learned and has a round body. She has auspicious looks and sweet speech, is fickle-minded and very lustful.**

क्रूरो रक्तेक्षणो भौमश्चपलोदारमूर्तिकः
पित्तप्रकृतिकः क्रोधी कृशमध्यतनुर्द्विज २५

**25. Description of Mars. Mars has blood-red eyes, is fickle-minded, liberal, bilious, given to anger and has thin waist and thin physique.**

वपुःश्रेष्ठः श्लिष्टवाक्च ह्यतिहास्यरुचिर्बुधः
पित्तवान् कफवान् विप्र मारुतप्रकृतिस्तथा २६

**26. Description of Mercury. Mercury is endowed with an attractive physique and the capacity to use words with many meanings. He is fond of jokes. He has a mix of all the three humors.**

बृहद्गात्रो गुरुश्चैव पिङ्गलो मूर्द्धजेक्षणे
कफप्रकृतिको धीमान् सर्वशास्त्रविशारदः २७

**27. Description of Jupiter. Jupiter has a big body, tawny hair and tawny eyes, is phlegmatic, intelligent and learned in Shastras.**

सुखी कान्तवपु श्रेष्ठः सुलोचनो भृगोः सुतः
काव्यकर्ता कफाधिक्योऽनिलात्मा वक्रमूर्धजः २८

**28. Description of Venus. Venus is charming, has a splendorous physique, is excellent or great in disposition, has charming eyes, is a poet, is phlegmatic and windy and has curly hair.**

कृशदीर्घतनुः शौरिः पिङ्गदृष्ट्यनिलात्मकः
स्थूलदन्तोऽलसः पंगुः खररोमकचो द्विज २९

**29. Description of Saturn. Saturn has an emaciated and long physique, has tawny eyes, is windy in temperament, has big teeth, is indolent and lame and has coarse hair.**

धूम्राकारो नीलतनुर्वनस्थोऽपि भयंकरः
वातप्रकृतिको धीमान् स्वर्भानुस्तत्समः शिखी ३०

**30. Description of Rahu and Ketu. Rahu has smoky appearance with a blue mix physique. He resides in forests and is horrible. He is windy in temperament and is intelligent. Ketu is akin to Rahu.**

अस्थि रक्तस्तथा मज्जा त्वग् वसा वीर्यमेव च
स्नायुरेषामधीशाश्च क्रमात् सूर्यादयो द्विज ३१

**31. Primary ingredients (or Sapta Dhatus). Bones, blood, marrow, skin, fat, semen and muscles are respectively denoted by the Planets: Sun, Moon, Mars, Mercury, Jupiter, Venus and Saturn.**

देवालयजलं वह्निक्रीडादीनां तथैव च
कोशशय्योत्कराणान्तु नाथाः सूर्यादयः क्रमात् ३२

**32. Abodes of the Planets. Temple, watery place, place of fire, sport-ground, treasure-house, bed-room and filthy ground: these are, respectively, the abodes for the seven Planets from Sun onward.**

अयनक्षणवारर्तुमासपक्षसमा द्विज
सूर्यादीनां क्रमाज्ज्ञेया निर्विशंकं द्विजोत्तम ३३

**33. Planet periods. Ayan, Muhurta, a day (consisting day and night), Ritu, month, fortnight and year: these are the periods allotted to the Planets from Sun to Saturn.**

कटुक्षारतिक्तमिश्रमधुराम्लकषायकाः
क्रमेण सर्वे विज्ञेयाः सूर्यादीनां रसा इति ३४

**34. Tastes of the Planets. Pungent, saline, bitter, mixed, sweet, acidulous and astringent are, respectively, tastes lorded by Sun, Moon, Mars, Mercury, Jupiter, Venus and Saturn.**

बुधेज्यौ बलिनौ पूर्वे रविभौमौ च दक्षिणे
पश्चिमे सूर्यपुत्रश्च सितचन्द्रौ तथोत्तरे ३५

निशायां बलिनश्चन्द्रकुजसौरा भवन्ति हि
सर्वदा ज्ञो बली ज्ञेयो दिने शेषा द्विजोत्तम ३६

कृष्णे च बलिनः क्रूराः सौम्या वीर्ययुताः सिते
सौम्यायने सौम्यखेटो बली याम्यायनेऽपरः ३७

वर्षमासाहहोराणां पतयो बलिनस्तथा
शमंबुगुशुचंराद्या वृद्धितो वीर्यवत्तराः ३८

**35-38. Strengths of Planets. Strong in the East are Mercury and Jupiter. Sun and Mars are so in the South, while Saturn is the only Planet, that derives strength in the West. Moon and Venus are endowed with vigor, when in the North. Again, strong during night are Moon, Mars and Saturn, while Mercury is strong during day and night. The rest (i.e. Jupiter, Sun and Venus) are strong only in daytime. During the dark half malefics are strong. Benefics acquire strength in the bright half of the month. Malefics and benefics are, respectively, strong in Dakshinayan and Uttarayan. The Lords of the year, month, day and Hora (hour of Planet) are stronger than the other in ascending order. Again, stronger than the other in the ascending are Saturn, Mars, Mercury, Jupiter, Venus, Moon and Sun.**

सूर्यो जनयति स्थूलान् दुर्भगान् सूर्यपुत्रकः
क्षीरोपेतांस्तथा चन्द्रः कटुकाद्यान् धरासुतः ३९

पुष्पवृक्षं भृगोः पुत्रो गुरुज्ञौ सफलाफलौ
नीरसान् सूर्यपुत्रश्च एवं ज्ञेयाः खगा द्विज ४०

**39-40. Related to trees. Sun rules strong trees (i.e. trees with stout trunks), Saturn useless trees, Moon milky trees (and rubber yielding plants), Mars bitter ones (like lemon plants), Venus floral plants, Jupiter fruitful ones and Mercury fruitless ones.**

चित्रकन्था फणीन्द्रस्य केतोश्छिद्रयुतो द्विज
सीसं रहोर्नीलमणिः केतोर्ज्ञेयो द्विजोत्तम ४२

गुरोः पीताम्बरं विप्र भृगोः क्षौमं तथैव च
रक्तक्षौमं भास्करस्य इन्दोः क्षौमं सितं द्विज ४३

बुधस्य कृष्णक्षौमं तु रक्तवस्त्रं कुजस्य च
वस्त्रं चित्रं शनेर्विप्र पट्टवस्त्रं तथैव च ४४

**41-44. Other matters. Rahu rules the outcaste, while Ketu governs mixed caste. Saturn and the nodes indicate ant-hills. Rahu denotes multi-coloured clothes and Ketu rags. Lead and blue gem belong to Rahu and Ketu. Sun, Moon, Mars, Mercury, Jupiter, Venus and Saturn in their order govern red silken, white silken, red, black silken, saffron, silken and multi-coloured robes.**

भृगोर्ऋतुर्वसन्तश्च कुजभान्वोश्च ग्रीष्मकः
चन्द्रस्य वर्षा विज्ञेया शरच्चैव तथा विदः ४५
हेमन्तोऽपि गुरोर्ज्ञेयः शनेस्तु शिशिरो द्विज
अष्टौ मासाश्च स्वर्भानोः केतोर्मासत्रयं द्विज ४६

**45-46. Seasons of Planets. Vasanta, Greeshma, Varsh, Sarad, Hemanta and Sisir are the six Ritus (or seasons), respectively, governed by Venus, Mars, Moon, Mercury, Jupiter and Saturn. Rahu and Ketu denote 8 months and 3 months, respectively.**

राह्वारपंगुचन्द्रश्च विज्ञेया धातुखेचराः
मूलग्रहौ सूर्यशुक्रौ अपरा जीवसंज्ञकाः ४७

**47. Dhatu, Mool and Jiva Divisions. Dhatu Planets are Rahu, Mars, Saturn and Moon, while Sun and Venus are Mula Planets. Mercury, Jupiter and Ketu rule Jivas.**

ग्रहेषु मन्दो वृद्धोऽस्ति आयुर्वृद्धिप्रदायकः
नैसर्गिके बहुसमान् ददाति द्विजसत्तम ४८

**48. Age. Out of all the Planets Saturn is the eldest. He bestows maximum number of years in Naisargik Dasha.**

मेषो वृषो मृगः कन्या कर्को मीनस्तथा तुला
सूर्यादीनां क्रमादेते कथिता उच्चराशयः ४९

भागा दश त्रयोऽष्टाश्वस्तिथ्योऽत्ता भमिता नखाः
उच्चात् सप्तमभं नीचं तैरेवांशैः प्रकीर्तितम् ५०

**49-50. Exaltation and Debilitation. For the seven Planets, from Sun on, the exaltation Rāśis are, respectively, Aries, Taurus, Capricorn, Virgo, Cancer, Pisces and Libra. The deepest exaltation degrees are, respectively, 10, 3, 28, 15, 5, 27 and 20 in those Rāśis. And in the seventh Rāśi from the said exaltation Rāśi each Planet has its own debilitation. The same degrees of deep exaltation apply to deep fall.**

रवेः सिंहे नखांशाश्च त्रिकोणमपरे स्वभम्
उच्चमिन्दोर्वृषे त्र्यंशास्त्रिकोणमपरेंऽशकाः ५१

मेषेऽर्कांशास्तु भौमस्य त्रिकोणमपरे स्वभम्
उच्चं बुधस्य कन्यायामुक्तं पञ्चदशांशकाः ५२

ततः पञ्चांशकाः प्रोक्तं त्रिकोणमपरे स्वभम्
चापे दशांशा जीवस्य त्रिकोणमपरे स्वभम् ५३

तुले शुक्रस्य तिथ्यंशास्त्रिकोणमपरे स्वभम्
शनेः कुम्भे नखांशाश्च त्रिकोणमपरे स्वभम् ५४

**51-54. Additional Dignities. In Leo the first 20 degrees are Sun's Moolatrikona, while the rest is his own House. After the first 3 degrees of exaltation portion in Taurus, for Moon, the rest is her Moolatrikona. Marsh as the first 12 degrees in Aries, as Moolatrikona with the rest therein becoming simply his own House. For Mercury, in Virgo the first 15 degrees are exaltation zone, the next 5 degrees Moolatrikona and the last 10 degrees are own House. The first one third of Sagittarius is the Moolatrikona of Jupiter, while the remaining part thereof is his own House. Venus divides Libra into two halves keeping the first, as Moolatrikona and the second, as own House. Saturn's arrangements are same in Aquarius, as Sun has in Leo.**

त्रिकोणात् स्वात्सुखस्वाऽन्त्यधीधर्मायुःस्वतुङ्गपाः
सुहृदो रिपवश्चान्ये समाश्चोभयलक्षणाः ५५

**55. Natural Relationships. Note the Rāśis, which are the 2nd, 4th, 5th, 8th, 9th and 12th from the Moolatrikona of a Planet. The Planets ruling such Rāśis are its friends, apart from the Lord of its exaltation Rāśi. Lords other than these are its enemies. If a Planet becomes its friend as well, as its enemy (on account of the said two computations), then it is neutral, or equal.**

दशबन्ध्वायसहजस्वान्त्यस्थास्ते परस्परम्
तत्काले मित्रतां यान्ति रिपवोऽन्यत्र संस्थिताः ५६

**56. Temporary Relationships. The Planet, posited in the 2nd, 3rd, 4th, 10th, 11th, or the 12th from another, becomes a mutual friend. There is enmity otherwise. (This applies to a given Janm Kundali)**

तत्काले च निसर्गे च मित्रं चेदधिमित्रकम्
मित्रं मित्रसमत्वे तु शत्रुः शत्रुसमत्वके ५७

समो मित्ररिपुत्वे तु शत्रुत्वे त्वधिशत्रुता
एवं विविच्य दैवज्ञो जातकस्य फलं वदेत् ५८

**57-58. Compound Relationship. Should two Planets be naturally and tempor6thly friendly, they become extremely friendly. Friendship on one count and neutrality on another count make them friendly. Enmity on one count combined with affinity on the other turns into equality. Enmity and neutral-ship cause only enmity. Should there be enmity in both manners, extreme enmity is obtained. The astrologer should consider these and declare horoscope effects accordingly.**

स्वोच्चे शुभं फलं पूर्णं त्रिकोणे पादवर्जितम्
स्वर्क्षेऽर्धं मित्रगेहे तु पादमात्रं प्रकीर्तितम् ५९

पादार्धं समभे प्रोक्तं शून्यं नीचास्तशत्रुभे
तद्वदुष्टफलं ब्रूयाद् व्यत्ययेन विचक्षणः ६०

**59-60. Ratio of Effects. A Planet in exaltation gives fully good effects, while in Moolatrikona it is bereft of its auspicious effects by one fourth. It is half beneficial in its own House. Its beneficence is one fourth in a friendly Rāśi. In an equals Rāśi one eighth of auspicious disposition is useful. The good effects are nil in debilitation, or enemy's camp. Inauspicious effects are quite reverse with reference to what is stated.**

त्र्यंशाढ्यविश्वभागैश्च चतुर्भैः सहितो रविः
धूमो नाम महादोषः सर्वकर्मविनाशकः ६१

धूमो मण्डलतः शुद्धो व्यतीपातोऽत्र दोषदः
सषड्भोऽत्र व्यतीपातः परिवेषोऽतिदोषकृत् ६२

परिवेषश्च्युतश्चक्रादिन्द्रचापस्तु दोषदः
वित्र्यंशात्यष्टिभागाढ्यश्चापः केतुखगोऽशुभः ६३

एकराशियुतः केतुः सूर्यतुल्यः प्रजायते
अप्रकाशग्रहाश्चैते पापा दोषप्रदाः स्मृताः ६४

**61-64. Non-luminous Upa Grahas (Sub-Planets). Add 4 Rāśis 13 degrees and 20 minutes of arc to Sun's longitude at a given moment to get the exact position of the all inauspicious Dhoom. Reduce Dhoom from 12 Rāśis to arrive at Vyatipat. Vyatipat is also inauspicious. Add six Rāśis to Vyatipat to know the position of Prithvesh. He is extremely inauspicious. Deduct P6thvesh from 12 Rāśis to arrive at the position of Chap (Indra 2ndus), who is also inauspicious. Add 16 degrees 40 minutes to Chap, which will give Ketu (UpaKetu), who is a malefic. By adding a Rāśi to UpaKetu, you get the original longitude of Sun. These are the Planets, devoid of splendor, which are malefics by nature and cause affliction.**

सूर्येन्दुलग्नगेष्वेषु वंशायुर्ज्ञाननाशनम्
इति धूमादिदोषाणां स्थितिः पद्मासनोदिता ६५

**65. Effects of Sub-Planets. If one of these afflicts Sun, the natives dynasty will decline, while Moon and Lagna, respectively, associated with one of these, will destroy the longevity and wisdom. So declared Lord Brahma, the Lotus-Born.**

रविवारादिशन्यन्तं गुलिकादि निरूप्यते
दिवसानष्टधा भक्त्वा वारेशाद् गणयेत् क्रमात् ६६

अष्टमोंऽशो निरीशः स्याच्छन्यंशो गुलिकःस्मृतः
रात्रिमप्यष्टधा कृत्वा वारेशात् पञ्चमादितः ६७

गणयेदष्टमः खण्डो निष्पतिः परिकीर्तितः
श्न्यंशो गुलिकः प्रोक्तो रव्यंशः कालसंज्ञकः ६८

भौमांशो मृत्युरादिष्टो गुर्वंशो यमघण्टकः
सोम्यांशोऽर्धप्रहरकः स्वस्वदेशोद्भवः स्फुटः ६९

**66-69. Calculations of Gulika etc. The portions of Sun etc. up to Saturn denote the periods of Gulika and others. Divide the day duration (of any week day) into eight equal parts. The eighth portion is Lord-less. The seven portions are distributed to the seven Planets commencing from the Lord of the week day. Whichever portion is ruled by Saturn, will be the portion of Gulika. Similarly make the night duration into eight equal parts and distribute these, commencing from the Lord of the 5th (by) week. Here again, the eighth portion is Lord-less, while Saturn's portion is Gulika. Sun's portion is Kaal, Mars's portion is Mrityu, Jupiter's portion is Yamaghantak and Mercury's portion is Ardhaprahar. These durations differently apply to different places (commensurate with v6thable day and night durations).**

गुलिकेष्टवशाल्लग्नं स्फुटं यत् स्वस्वदेशजम्
गुलिकं प्रोच्यते तस्माज्जातकस्य फलं वदेत् ७०

**70. Gulika's Position. The degree, ascending at the time of start of Gulika's portion (as above), will be the longitude of Gulika at a given place. Based on this longitude only, Gulika's effects for a particular nativity be estimated.**

भांशपादसमैः प्राणैश्चराद्यर्कत्रिकोणभात्
उदयादिष्टकालान्तं यद्धं प्राणपदं हि तत् ७१

स्वेष्टकालं पलीकृत्य तिथ्याप्तं भादिकं च यत्
चरागद्विभसंस्थेऽर्के भनौ युङ् नवमे सुते ७२

स्फुटं प्राणपदाख्यं तल्लग्नं ज्ञेयं द्विजोत्तम
लग्नाद् द्विकोणे तुर्ये च राज्ये प्राणपदं तदा ७३

शुभं जन्म विजानीयात्तथैवैकादशेऽपि च
अन्यस्थाने स्थितं चेत् स्यात् तदा जन्माशुभं वदेत् ७४

**71-74. <u>Calculation of Pranapad</u>**. Convert the given time into Vighatis and divide the same by 15. The resultant Rāśi, degrees etc. be added to Sun, if he is in a Movable Rāśi, which will yield Pranapad. If Sun is in a Fixed Rāśi, add 240 degrees additionally and, if in a Dual Rāśi, add 120 degrees in furtherance to get Pranapad. The birth will be auspicious, if Pranapad falls in the 2nd, 5th, 9th, 4th, 10th, or 11th from the natal Lagna. In other Houses Pranapad indicates an inauspicious birth.

**<u>Notes by Santanam</u>**. Ardhaprahar, Yamaghantak, Mrityu, Kaal and Gulika are the 5 Kaal Velas, suggested by Mahārśi Parashara. The day duration, according to altitude, is divided into eight equal parts. The eighth portion is unlorded. The first portion is allotted to the weekday Lord. Other portions follow in the order of weekday Lords. We consider 5 portions of Planets, ignoring that of Moon and Venus. The portions of Sun, Mars, Mercury, Jupiter and Saturn are, respectively, called Kaal, Mrityu, Ardhaprahar, Yamaghantak and Gulika.

In the case of night the durations, or 1/8th parts are allotted in a different order. The first portion goes to the Planet, ruling the 5th weekday Lord, counted from the day in question. The others follow in the usual order. Here again, the 8th part is Lord-less. The portions of Planets from Kaal to Gulika are the same in nomenclature in the night also.

**<u>Jatakalankaram gives Rāśis of dignities for these UpaPlanets and Gulika etc.:</u>** Exaltation, Debilitation, Swakshetra (own Rāśi)) Dhoom: Leo, Aquarius, Capricorn; Vyatipat: Scorpio, Taurus, Gemini; Parivesh: Gemini, Sagittarius, Sagittarius; Indrachap: Sagittarius, Gemini, Cancer; UpaKetu: Aquarius, Leo, Cancer; Gulika: Aquarius; Yamaghantak: - Sagittarius; Ardhaprahar: - Gemini; Kaal: - Capricorn; Mrityu: Scorpio. From Sun to Saturn no one is exalted in the above-mentioned exaltation Rāśis, nor debilitated in the above-mentioned debilitation Rāśis. Out of the 5 Kaal Velas, viz. Gulika etc., four except Kaal (related to Sun) have their own Rāśi system in the respective Rāśis, ruled by their fathers. Gulika, son of Saturn, has Aquarius, as his own House. Jupiter's son, Yamaghantak, has it in Sagittarius. Ardhaprahar, Mercury's son, is in own Rāśi, if in Gemini. Mrityu, son of Mars, has Scorpio, as own House. It is not known, why Kaal, a son of Sun shifted to Capricorn, a Rāśi of his brother (Saturn), leaving his fathers Leo. Obviously, Saturn has given his Moolatrikona to his son Gulika, while he gave Capricorn (a secondary Rāśi) to his brother Kaal.

अथ राशिस्वरूपाध्यायः ४

अहोरात्रस्य पूर्वान्त्यलोपाद् होराऽवशिष्यते
तस्य विज्ञानमात्रेण जातकर्मफलं वदेत् १

यदव्यक्तात्मको विष्णुः कालरूपो जनार्दनः
तस्याङ्गानि निबोध त्वं क्रमान्मेषादिराशयः २

## Ch. 4. Zodiacal Rāśis Described

**1-2.** Importance of Hora. The word Hora is derived from Ahoratr after dropping the first and last syllables. Thus Hora (Lagna as) remains in between Ahoratr (i.e. day and night) and after knowing Hora the good and bad effects of a native be known. Śrī Vishnu, the Invisible is Time personified. His limbs are the 12 Rāśis, commencing from Aries.

मेषो वृषश्च मिथुनः कर्कसिंहकुमारिकाः
तुलालिऽश्च धनुर्नक्रे कुम्भो मीनस्ततः परम् ३

**3.** Names of Rāśis. The 12 Rāśis of the zodiac in order are Aries, Taurus, Gemini, Cancer, Leo, Virgo, Libra, Scorpio, Sagittarius, Capricorn, Aquarius and Pisces.

शीर्षानने तथा बाहू हृत्क्रोडकटिबस्तयः
गुह्योरुयुगले जानुयुग्मे वै जङ्घके तथा ४

**4-4**. Limbs of Kaal Purush. Kaal Purush (or Time personified) has his limbs, as under with reference to the 12 Rāśis, respectively: Head, face, arms, heart, stomach, hip, space below navel, privities, thighs, knees, ankles and feet.

चरणौ द्वौ तथा मेषात् ज्ञेयाः शीर्षादयः क्रमात्
चरस्थिरद्विस्वभावाः क्रूराक्रूरौ नरस्त्रियौ ५

**5-5.** Classification of Rāśis. Movable, Fixed and Dual are the names given to the 12 Rāśis in order. These are again known, as malefic and benefic, successively. Similarly are male and female. Aries, Leo and Sagittarius are bilious. Taurus, Virgo and Capricorn are windy. Gemini, Libra and Aquarius are mixed, while the rest are phlegmatic.

पित्तानिलत्रिधात्वैक्यश्लेष्मिकाश्च क्रियादयः
रक्तवर्णो बृहद्गात्रश्चतुष्पाद्रात्रिविक्रमी ६

पूर्ववासी नृपज्ञातिः शैलचारी रजोगुणी
पृष्ठोदयी पावकी च मेषराशिः कुजाधिपः ७

**6-7.** Aries described. The Aries is blood-red in complexion. It has a prominent (big) physique. It is a quadruped Rāśi and strong during night. It denotes courage. It resides in the East and is related to kings. It wanders in hills and predominates in Rajo-Gun (the second of the three constituent qualities and the cause of great activity in living beings). It rises with its back (a Prishtodaya Rāśi) and is fiery. Its ruler is Mars.

श्वेतः शुक्राधिपो दीर्घश्चतुष्पाच्छर्वरीबली
याम्येट् ग्राम्यो वणिग्भूमिरजः पृष्ठोदयो वृषः ८

**8.** Taurus described. Taurus complexion is white and it is lorded by Venus. It is long and is a quadruped Rāśi. It has strength in night and resides in the South. It represents villages and businessmen. An earthy Rāśi, Taurus rises with its back.

शीर्षोदयी नृमिथुनं सगदं च सवीणकम्
प्रत्यग्वायुर्द्विपाद्रात्रिबली ग्रामव्रजोऽनिली ९

**9-9.** Gemini described. The Rāśi Gemini rises with its head and represents a male and a female, holding a mace and lute. It lives in the West and is an airy Rāśi. It is a biped Rāśi as well and is strong in nights. It lives in villages and is windy in temperament. It has an even body with a green (grass like) hue. Its ruler is Mercury.

समगात्रो हरिद्वर्णो मिथुनाख्यो बुधाधिपः
पाटलो वनचारी च ब्राह्मणो निशि वीर्यवान् १०

बहुपादचरः स्थौल्यतनुः सत्त्वगुणी जली
पृष्ठोदयी कर्कराशिर्मृगांकाऽधिपतिः स्मृतः ११

**10-11.** Cancer described. The Rāśi Cancer is pale-red. It resorts to forests and represents Brahmins. It is strong in nights. It has many feet (i.e. it is a centipede Rāśi) and has a bulky body. It is Sattvic in disposition (seen in gods) and it is a watery Rāśi. It rises with its back and is ruled by Moon.

सिंहः सूर्याधिपः सत्त्वी चतुष्पात् क्षत्रियो वनी
शीर्षोदयी बृहद्गात्रःपाण्डुः पूर्वेड् द्युवीर्यवान् १२

**12.** Leo described. Leo is ruled by Sun and is Sattvic. It is a quadruped Rāśi and a royal Rāśi. It resorts to forests and rises with its head. It has a large, white body. It resides in the East and is strong during daytime.

पार्वतीयाथ कन्याख्या राशिर्दिनबलान्विता
शीर्षोदया च मध्यांगा द्विपाद्याम्यचरा च सा १३

सा सस्यदहना वैश्या चित्रवर्णा प्रभञ्जिनी
कुमारी तमसा युक्ता बालभावा बुधाधिपा १४

**13-14.** Virgo described. This Rāśi is a hill-resorter and is strong in daytime. It rises with its head and has a medium build. It is a biped Rāśi and resides in the South. It has grains and fire in its hands. It belongs to the business community and is v6thegated. It relates to hurricanes (Prabharanjani). It is a Virgin and is Tamasic (a disposition of demons). Its ruler is Mercury.

शीर्षोदयी द्युवीर्याढ्यस्तुलः कृष्णो रजोगुणी
पश्चिमो भूचरो घाती शूद्रो मध्यतनुर्द्विपात् १५

शुक्राऽधिपोऽथ स्वल्पांगो बहुपाद्ब्राह्मणो बिली
सौम्यस्थो दिनवीर्याढ्यः पिशंगो जलभूवः १६

**15-16.** Libra described. Libra is a Seershodaya Rāśi, rising with its head; Libra is strong in daytime. It is black in complexion and is predominant with Rajo-Gun. It relates to the western direction and resorts to land. It is destructive, or mischievous (Dhatin). It represents Sudras, or the 4th Varna. It has a medium build physique and is a biped Rāśi. Its Lord is Venus. Scorpio described. Scorpio has a slender physique and is a centipede Rāśi. It denotes Brahmins and resides in holes. Its direction is north and it is strong in daytime. It is reddish-brown and resorts to water and land. It has a hairy physique and is very sharp (or passionate). Mars is its ruler.

रोमस्वाढ्योऽतितीक्ष्णाग्रो वृश्चिकश्च कुजाधिपः
पृष्ठोदयी त्वथ धनुर्गुरुस्वामी च सात्त्विकः १७

पिंगलो निशिवीर्याढ्यः पावकः क्षत्रियो द्विपाद्
आदावन्ते चतुष्पादः समगात्रो धनुर्धरः १८

**17-18.** Sagittarius described. The Rāśi Sagittarius rises with its head and is lorded by Jupiter. It is a Sattvic Rāśi and is tawny in hue. It has strength in night and is fiery. A royal Rāśi, Sagittarius is biped in first half. Its second half is quadruped. It has an even build and adores an arch. It resides in the East, resorts to land and is splendorous.

पूर्वस्थो वसुधाचारी तेजस्वी ब्रह्मणा कृतः
मन्दाधिपस्तमी भौमी याम्येट् च निशि वीर्यवान् १९

पृष्ठोदयी बृहद्गात्रः कर्बुरो वनभूचरः
आदौ चतुष्पदोन्ते तु विपदो जलगो मतः २०

**19-20.** Capricorn described. Capricorn is lorded by Saturn and has predominance of Tamo-Gun (a disposition, seen in demons). It is an earthy Rāśi and represents the southern direction. It is strong in nights and rises with back. It has a large body. Its complexion is v6thegated and it resorts to both forests and lands. Its first half is quadruped and its second half footless, moving in water.

कुम्भः कुम्भी नरो बभ्रुवर्णो मध्यतनुर्द्विपात्
द्युवीर्यो जलमध्यस्थो वातशीर्षोदयी तमः २१

**21-21**. Aquarius described. The Rāśi Aquarius represents a man holding a pot. Its complexion is deep-brown. It has medium build and is a biped Rāśi. It is very strong in daytime. It resorts to deep water and is airy. It rises with its head and is Tamasic. It rules Sudras, the 4th Varna and the West. Its Lord is Saturn, Sun's offspring.

शूद्रः पश्चिमदेशस्य स्वामी दैवाकरिः स्मृतः
मीनौ पुच्छास्यसंलग्नौ मीनराशिर्दिवाबली २२

जली सत्त्वगुणाढ्यश्च स्वस्थो जलचरो द्विजः
अपदो मध्यदेही च सौम्यस्थो ह्युभयोदयी २३
सुराचार्याधिपश्चेति राशीनां गदिता गुणाः
त्रिंशद्भागात्मकानां च स्थूलसूक्ष्मफलाय च २४

**22-24.** Pisces described. Pisces resembles a pair of fish, one tailed with the head of the other. This Rāśi is strong at night. It is a watery Rāśi and is predominant with Sattva-Gun. It denotes resoluteness and is a water-resorter. It is footless and has a medium build. It rules the North and rises with both head and back. It is ruled by Jupiter. This is how the twelve Rāśis, each of 30 degrees extent, are described to evaluate gross and specific effects**.**

अथातः सम्प्रवक्ष्यामि शृणुष्व मुनिपुंगव
जन्मलग्नं च संशोध्य निषेकं परिशोधयेत् २५

तदहं संप्रवक्ष्यामि मैत्रेय त्वं विधारय
जन्मलग्नात् परिज्ञानं निषेकं सर्वजन्तु यत् २६

यस्मिन् भावे स्थितो मन्दस्तस्य मान्देर्यदन्तरम्
लग्नभाग्यान्तरं योज्यं यच्च राश्यादि जायते २७

मासादि तन्मितं ज्ञेयं जन्मतः प्राक् निषेकजम्
यद्यदृश्यदलेङ्गेशस्तदेन्दोर्भुक्तभागयुक् २८

तत्काले साधयेल्लग्नं शोधयेत् पूर्ववत्तनुम्
तस्माच्छुभाशुभं वाच्यं गर्भस्थस्य विशेषतः २९

शुभाशुभं वदेत् पित्रोर्जीवनं मरणं तथा
एवं निषेकलग्नेन सम्यग् ज्ञेयं स्वकल्पनात् ३०

**25-30. Nishek Lagna. O excellent of Brahmins, now is a step explained to arrive at the Nishek Lagna, when the natal Lagna is known. Note the angular distance between Saturn and Mandi (Gulika). Add this to the difference between the Lagna House (Madhya, or cusp) and the 9th House (cusp). The resultant product in Rāśis, degrees etc. will represent the months, days etc. that elapsed between Nishek and birth. At birth, if Lagna Lord is in the invisible half (i.e. from Lagna cusp to descendental cusp), add the degrees etc., Moon moved in the particular Rāśi, occupied by her, to the above-mentioned product. Then Lagna at Nishek can be worked out and the good and bad, experienced by the native in the womb, can be guessed. One can also guess with the help of Nishek Lagna effects, like longevity, death etc. of the parents.**

अथ विशेषलग्नाध्यायः ५

अथाहं सम्प्रवक्ष्यामि तवाग्रे द्विजसत्तम
भावहोराघटीसंज्ञलग्नानीति पृथक् पृथक् १

## Ch. 5. Special Lagnas

**1. Oh excellent of the Brahmins, I explain below again some special Lagnas, viz. House Lagna, Hora Lagna and Ghati Lagna.**

सूर्योदयं समारभ्य घटिकानां तु पंचकम्
प्रयाति जन्मपर्यन्तं भावलग्नं तदेव हि २

इष्टं घटयादिकं भक्त्वा पंचभिर्भादिजं फलम्
योज्यमौदयिके सूर्ये भावलग्नं स्फुटं च तत् ३

**2-3. House Lagna. From sunrise to the time of birth every 5 Ghatis (or 120 minutes) constitute one House Lagna. Divide the time of birth (in Ghatis, Vighatis etc.) from sunrise by 5 and add the quotient etc. to Sun's longitude, as at sunrise. This is called House Lagna.**

तथा सार्धद्विघटिकामितादर्कोदयाद् द्विज
प्रयाति लग्नं तन्नाम होरालग्नं प्रचक्षते ४

इष्टघटयादिकं द्विघ्नं पञ्चाप्तं भादिकं च यत्
योज्यमौदयिके भानौ होरालग्नं स्फुटं हि तत् ५

**4-5. Hora Lagna. Again from sunrise till the time of birth Hora Lagna repeats itself every 2 Ghatis (i. e. 60 minutes). Divide the time past up to birth from sunrise by 2 and add the quotient etc. in Rāśis, degrees and so on to the longitude of Sun, as at the sunrise. This will yield Hora Lagna in Rāśi, degrees etc.**

कथयामि घटीलग्नं शृनु त्वं द्विजसत्तम
सूर्योदयत् समारभ्य जन्मकालावधि क्रमात् ६

एकैकघटिकामानात् लग्नं यद्याति भादिकम्
तदेव घटिकालग्नं कथितं नारदादिभिः ७

राशयस्तु घटीतुल्याः पलार्धप्रमितांशकाः
योज्यमौदयिके भानौ घटीलग्नं स्फुटं हि तत् ८

**6-8.** Ghati Lagna (Ghatik Lagna). Now listen to the method of working out Ghati Lagna. This Lagna changes along with every Ghati (24 minutes) from the sunrise. Note birth time in Ghatis and Vighatis. Consider the number of Ghatis past, as number of Rāśis, or Ghati Lagnas. The Vighatis be divided by 2 to arrive at degrees and minutes of arc, past in the said Ghati Lagna. The product so arrived in Rāśis, degrees and minutes should be added to Sun's longitude, as at sunrise, to get the exact location of Ghati Lagna. So say Mahārśis, like Narada.

क्रमादेषां च लग्नानां भावकोष्ठं पृथक् लिखेत्
ये ग्रहा यत्र भे तत्र ते स्थाप्या राशिलग्नवत् ९

**9.** Use of Special Lagnas. Keeping the Planets at birth, as it is, prepare v6thous House Charts with respect to each special Lagna and analyze, as done for the natal Lagna.

वर्णदाख्यदशां भानां कथयाम्यथ तेऽग्रतः
यस्य विज्ञानमात्रेण वदेदायुर्भवं फलम् १०

ओजलग्नप्रसूतानां मेषादेर्गणयेत् क्रमात्
समलग्नप्रसूतानाम् मीनादेरपसव्यतः ११

मेषमीनादितो जन्मलग्नान्तं गणयेत् सुधीः
तथैव होरालग्नान्तं गणयित्वा ततः परम् १२

ओजत्वेन समत्वेन सजातीये उभे यदि
तर्हि संख्ये योजयीत वैजात्ये तु वियोजयेत् १३

**10-13.** Varnada Dasha. I now detail Varnada Dasha, just by knowing which one can deal with the longevity of a native. If the natal Lagna is an odd Rāśi, count directly from Aries to natal Lagna. If the natal Lagna is an even Rāśi, count from Pisces to the natal Lagna in the reverse order. Similarly, if the Hora Lagna is an odd one, count from Aries to Hora Lagna in direct order. If the Hora Lagna is an even one, count from Pisces to Hora Lagna in the reverse order. If both the products are odd Rāśis, or even Rāśis, then add both the figures. If one is odd and the other is even, then know the difference between the two products. If the latest product in this process is an odd one, count so many Rāśis from Aries in a direct manner; if an even one, count so many Rāśis from Pisces in reverse order. The Rāśi so known will be the Varnada for Lagna.

मेषमीनादितः पश्चाद्यो राशिः स तु वर्णदः
एतत्प्रयोजनं वक्ष्ये शृणु त्वं द्विजपुंगवः
होरालग्नभयोर्नेया सबलाद्वर्णदा दशा १४

यत्संख्ये वर्णदो लग्नात् तत्तत्संख्याक्रमेण तु
क्रमयुत्क्रमभेदेन दशा स्यादोजयुग्मयो १५

**14-15**. Effects of Varnada. Now listen to the use of the above. Out of the two, viz. natal Lagna and Hora Lagna, whichever is stronger, from there Varnada starts. If the natal Lagna is an odd Rāśi, the counting of Dashas is clockwise, otherwise anticlockwise. Lagna Dasha years will equal the number of Rāśis, intervening between the natal Lagna and Varnada. Similarly for other Houses.

पापदृष्टिः पापयोगो वर्णदस्य त्रिकोणके
यदि स्यात् तर्हि तद्राशिपर्यन्तं तस्य जीवनं १६

रुद्रशूले यथैवायुर्मरणादि निरूप्यते
तथैव वर्णदस्यपि त्रिकोणे पापसंगमे १७

वर्णदादपि भो विप्र लग्नवच्चिन्तयेत् फलम्
वर्णदात् सप्तमाद् भावात् कलत्रायुर्विचिन्तयेत् १८

एकादशादग्रजस्य तृतीयात्तु यवीयसः
सुतस्य पंचमे विद्यान्मातुश्चतुर्थभावत् १९

पितुश्च नवमाद् भावादायुरेवं विचिन्तयेत्
शूलराशिदशायां वै प्रवलायामरिष्टकम् २०

**16-20**. Effects of Varnada (cont.). Should a Kona from Lagnas Varnada be occupied, or aspected by a malefic, the native will live only up to the Dasha of the said Rāśi. Just, as the Rudra Planet in Sool Dasha is capable of causing evils, the above-mentioned Planets related to Varnadas Kona be treated. The Varnada Lagna be considered, as natal Lagna, while the 7th from Varnada will denote the longevity of the spouse, the 11th longevity of elder brothers and sisters, the 3rd longevity of younger brothers and sisters, the 5th the longevity of sons, the 4th longevity of mother and the 9th longevity of father. The Dasha of the Sool Rāśi will inflict greater evils.

एवं तन्वादिभावानां कर्तव्या वर्णदा दशा
पूर्ववच्च फलं ज्ञेयं देहिनां च शुभाशुभम् २१

ग्रहाणां वर्णदा नैव राशीनां वर्णदा दशा
कृत्वार्कधा राशिदशां क्रमादन्तर्दशां वदेत् २२

एवमन्तर्दशादिं च कृत्वा तेन फलं वदेत्
क्रमव्युत्क्रमभेदेन लिखेदन्तर्दशामपि २३

स्वस्वदेशोद्भवं लग्नं जन्मलग्नमिहोच्यते

भावहोरादिलग्नानां सर्वत्रैव समक्रिया २४

**21-24.** Effects of Varnada (cont.). Similar assessments be made with reference to the Varnada of each House, commencing the first, and the evils and goods due to a nativity be known. These Varnada Dashas are only for Houses (Rāśis) and not their occupants. The sub period of each Dasha will be one twelfth of the Dasha and the order will also be clockwise, or anti-clockwise, as explained earlier. The natal Lagna is to be calculated according to birth place, while House Lagna, Hora Lagna etc. are common to all places.

अथ षोडशवर्गाध्यायः ६
श्रुता ग्रहगुणास्त्वत्तस्तथा राशिगुण मुने
श्रोतमिच्छामि भावानां भेदांस्तान् कृपया वद १

## Ch. 6. The Sixteen Divisions of a Rāśi

**1.** O Mahārśi Parāśara, I have known from you about the Planets, Rāśis and their descriptions. I desire to know the details of v6thous divisions of a Rāśi, will you please narrate.

वर्गान् षोडश यानाह ब्रह्मा लोकपितामहः
तानहं सम्प्रवक्ष्यामि मैत्रेय श्रूयतामिति २

क्षेत्रं होरा च द्रेष्काणस्तुर्यांशः सप्तमांशकः
नवांशो दशमांशश्च सूर्याम्शः षोडशांशकः ३

विंशांशो वेदवाह्वंशो भांशस्त्रिंशांशकस्ततः
खवेदांशोऽक्षवेदांशः षष्ठ्यंशश्च ततः परम् ४

**2-4. Names of the 16 Vargaas**. Lord Brahma has described 16 kinds of Vargaas (Divisions) for each Rāśi. Listen to those. The names are Rāśi, Horā, Dreshkana, Chaturthāńśa, Saptāńśa, Navāmśa, Dashāńśa, Dvadashāńśa, Shodashāń, Vimshāń, Chaturvimshāń, Saptavimshāń, Trimshāńśa, Khavedāń, Akshavedāń and Shashtiāń.

तत्क्षेत्रं तस्य खेटस्य राशेर्यो यस्य नायकः
सूर्येन्द्वोर्विषमे राशौ समे तद्विपरीतकम् ५

पितरश्चन्द्रहोरेशा देवाः सूर्यस्य कीर्तिताः
राशेरर्द्धं भवेद्धोरा ताश्चतुर्विंशतिः स्मृता
मेषादि तासां होराणां परिवृत्तिद्वयं भवेत् ६

**5-6. Rāśi and Horā.** The Rāśi, owned by a Planet, is called its Kshetra. The first half of an odd Rāśi is the Hora, ruled by Sun. While the second half is the Hora of Moon. The reverse is true in the case of an even Rāśi. Half of a Rāśi is called Hora. These are totally 24, counted from Aries and repeated twice (at the rate of 12) in the whole of the zodiac.

राशित्रिभागाद्रेष्काणास्ते च षट्त्रिंशदीरिताः
परिवृत्तित्रयं तेषां मेषादेः क्रमशो भवेत् ७

स्वपंचनवमानां च राशीनां क्रमशश्च ते
नारदाऽगस्तिदुर्वासा द्रेष्काणेशाश्चरादिषु ८

**7-8. Dreshkana**. One third of a Rāśi is called Dreshkana. These are totally 36, counted from Aries, repeating thrice at the rate of 12 per round. The 1st, 5th and the 9th Rāśis from a Rāśi are its three Dreshkanas and are, respectively, lorded by Narada, Agasthya and Durvash.

स्वर्क्षादिकेन्द्रपतयस्तुर्यांशेशाः क्रियादिषु
सनकश्च सनन्दश्च कुमारश्च सनातनः ९

**9. Chaturthāńśa.** The Lords of the 4 Kendras from a Rāśi are the rulers of respective Chaturthāńśa of a Rāśi, commencing from Aries. Each Chaturthāńśa is one fourth of a Rāśi. The deities, respectively, are Sanak, Sanand, Kumar and Sanatan.

सप्तांशपास्त्वोजगृहे गणनीया निजेशतः
युग्मराशौ तु विज्ञेयाः सप्तमर्क्षादिनायकात् १०

क्षारक्षीरौ च दध्याज्यौ तथेक्षुरससम्भवः
मद्यशुद्धजलावोजे समे शुद्धजलादिकाः ११

**10-11. Saptāńśa.** The Saptāńśa (one seventh of a Rāśi) counting commences from the same Rāśi in the case of an odd Rāśi. It is from the seventh Rāśi thereof, while an even Rāśi is considered. The names of the seven divisions in odd Rāśis are Kshaar Ksheer, Dadhi, Ghrith, Ikshu, Ras, Madhya and Suddh Jal. These designations are reversed for an even Rāśi.

नवांशेशाश्चरे तस्मात्स्थिरे तन्नवमादितः
उभये तत्पंचमादेरिति चिन्त्यं विचक्षणैः
देवा नृराक्षसाश्चैव चरादिषु गृहेषु च १२

**12. Navāmśa.** The Navāmśa calculation are for a Movable Rāśi from there itself, for a Fixed Rāśi from the 9th thereof and for a Dual Rāśi from the 5th thereof. They go by designations Deva (divine), Manushya (human) and Rakshasa (devilish) in a successive and repetitive order for a Movable Rāśi. (Manushya, Rakshasa and Deva are the order for a Fixed Rāśi, while Rakshasa, Manushya and Deva are a Dual Rāśis order)

दशमांशाः स्वतश्चौजे युग्म तन्नवमात् स्मृताः
दश पूर्वादिदिक्पाला इन्द्राऽग्नियमराक्षसाः १३

वरुणो मारुतश्चैव कुबेरेशानपद्मजाः
अनन्तश्च क्रमादोजे समे वा व्युत्क्रमेण तु १४

**13-14. Dashāńśa.** Starting from the same Rāśi for an odd Rāśi and from the 9th with reference to an even Rāśi, the 10 Dashāńśas, each of 3 degrees, are reckoned. These are presided over by the ten rulers of the cardinal directions, viz. Indra, Agni, Yama, Rakshasa, Varuna, Vayu, Kuber, Isan, Brahma and Ananth in case of an odd Rāśi. It is in the reverse order, that these presiding deities are reckoned, when an even Rāśi is given.

द्वादशांशस्य गणना तत्तत्क्षेत्राद्विनिर्दिशेत्
तेषामधीशाः क्रमशो गणेशाऽश्वियमाहयाः १५

**15. Dvadashāńśa.** The reckoning of the Dvadashāńśa (one twelfth of a Rāśi, or 2 degrees each) commences from the same Rāśi. In each Rāśi the presidentship repeats thrice in the order of Ganesh, Ashvini Kumar, Yama and Sarpa for the 12 Dvadashāńśaas.

अजसिंहाऽश्वितो ज्ञेया षोडशांशाश्चरादिषु
अजविष्णू हरः सूर्यो ह्योजे युग्मे प्रतीपकम् १६

**16. Shodashāńś (or Kalāńś).** Starting from Aries for a Movable Rāśi, from Leo for a Fixed Rāśi and from Sagittarius for a Dual Rāśi, the 16 Shodashāńśas (16th part of a Rāśi, i.e. of 1–5230) are regularly distributed. The presiding deities of these repeat in the order Brahma, Vishnu, Shiva and Sun four times in the case of an odd Rāśi. It is reverse in the case of an even Rāśi, that these ruling deities are understood.

अथ विंशतिभागानामधिपा ब्रह्मणोदिताः
क्रियाच्चरे स्थिरे चापान् मृगेन्द्राद् द्विस्वभावके १७

काली गौरी जया लक्ष्मीविजया विमला सती
तारा ज्वालामुखी श्वेता ललिता बगलामुखी १८

प्रत्यङ्गिरा शची रौद्री भवानी वरदा जया
त्रिपुरा सुमुखी चेति विषमे परिचिन्तयेत् १९

समराशौ दया मेधा छिन्नशीर्षा पिशाचिनी
धूमावती च मातङ्गी बाला भद्राऽरुणानला २०

पिङ्गला छुच्छुका घोरा वाराही वैष्णवी सिता
भुवनेशी भैरवी च मङ्गला ह्यपराजिता २१

**17-21. Vimshāńś.** From Aries for a Movable Rāśi, from Sagittarius for a Fixed Rāśi and from Leo for a Common Rāśi: this is how the calculations of Vimshāńśas (1/20th of a Rāśi, or 1030 each) are to commence. The presiding deities of the 20 Vimshāńśas in an odd Rāśi are, respectively: Kali, Gauri, Jaya, Lakshmi, Vijaya, Vimal, Sati, Tara, Jvalamukhi, Sveta, Lalita, Bagalamukhi, Pratyangir, Shachi, Raudri, Houseni, Varad, Jaya, Tripura and Sumukhi. In an even Rāśi these 20 deities, respectively, are Daya, Megha, Chinnasi, Pisachini, Dhumavathi, Matangi, Bala, Bhadr, Arun, Anal, Pingal, Chuchchuk, Ghora, Vaarahi, Vaishnavi, Sita, Bhuvanesv6th, Bhairavi, Mars and Aparajit.

सिद्धांशकानामधिपाः सिंहादोजभगे ग्रहे
कर्काद्युग्मभगे खेटे स्कन्दः पर्शुधरोऽनलः २२

विश्वकर्मा भगो मित्रो मयोऽन्तकवृषध्वजाः
गोविन्दो मदनो भीमः सिंहादौ विषमे क्रमात्
कर्कादौ समभे भीमाद्विलोमेन विचिन्तयेत् २३

**22-23. Chaturvimshāńś.** The Chaturvimshāńś (1/24th part of a Rāśi, or 1:15 each) distribution commences from Leo and Cancer, respectively, for an odd and an even Rāśi. In the case of an odd Rāśi the ruling deities repeat twice in the order of Skand, Parusdhar, Anal, Vishwa10th, Bhag, Mitr, Maya, Antaka, Vrisha-Dwaja, Govinda, Madan and Bhima. Reverse these from Bhima twice to know the deities for the Chaturvimshāńś in an even Rāśi.

भांशाधिपाः क्रमाद्स्रयमवह्निपितामहाः
चन्द्रेशादितिजीवाहिपितरो भगसंज्ञिताः २४

अर्यमार्कत्वष्ट्टमरुच्छक्राग्निमित्रवासवाः
निर्ऋत्युदकविश्वेऽजगोविन्दो वसवोऽम्बुपः २५

ततोऽजपादहिर्बुध्यः पूषा चैव प्रकीर्तिताः
नक्षत्रेशास्तु भांशेशा मेषादिचरभक्रमात् २६

**24-26. Saptavimshāńś (Nakshatraāńś, or Bhāńś).** The Saptavimshāńś Lords are, respectively, the presiding deities of the 27 Nakshatras, as under: Dastra (Ashvini Kumar), Yama, Agni, Brahma, Moon, Isa, Adhiti, Jiva, Ahi, Pitar, Bhag, Aryama, Sun, Tvasht, Marut, Chakragni, Mitr, Vasava, Rakshasa, Varuna, Vishwadeva, Govinda, Vasu, Varuna, Ajap, Ahirbuddhnya and Pushya. These are for an odd Rāśis. Count these deities in a reverse order for an even Rāśi. The Saptavimshāńś distribution commences from Aries and other Movable Rāśis for all the 12 Rāśis.

त्रिंशांशेशाश्च विषमे कुजार्किज्यज्ञभार्गवाः
पंचपंचाष्टसप्ताक्षभागानां व्यत्ययात् समे २७

वह्निः समीरशक्रौ च धनदो जलदस्तथा
विषमेषु क्रमाज्ज्ञेयाः समराशौ विपर्ययात् २८

**27-28. Trimshāńśa.** The Trimshāńśa Lords for an odd Rāśi are Mars, Saturn, Jupiter, Mercury and Venus. Each of them in order rules 5, 5, 8, 7 and 5 degrees. The deities, ruling over the Trimshāńśaas, are, respectively, Agni, Vayu, Indra, Kuber and Varuna. In the case of an even Rāśi the quantum of Trimshāńśa, Planet lordship and deities get reversed.

चत्वारिंशद्विभागानामधिपा विषमे क्रियात्
समभे तुलतो ज्ञेयाः स्वस्वाधिपसमन्विताः २९

विष्णुश्चन्द्रो मरीचिश्च त्वष्टा धाता शिवो रविः
यमो यक्षश्च गन्धर्वः कालो वरुण एव च ३०

**29-30. Khavedāńś (1/40th part of a Rāśi).** For odd Rāśis count from Aries and for an even Rāśi from Libra in respect of Khavedāńśas (each of 45 of arc). Vishnu, Moon, M6thchi, Tvasht, Dhata, Shiva, Ravi, Yama, Yaksh, Gandharv, Kaal and Varuna repeat successively, as presiding deities, in the same order for all Rāśis.

तथाक्षवेदभागानामधिपाश्चरभे क्रियात्
स्थिरे सिंहाद् द्विभेचापात् विधीशविष्णवश्चरे ३१

ईशाच्युतसुरज्येष्ठा विष्णुकेशाः स्थिरे द्विभे
देवाः पंचदशावृत्त्या विज्ञेया द्विजसत्तम ३२

**31-32. Akshavedāńś (1/45th part of a Rāśi).** Aries, Leo and Sagittarius are the Rāśis, from which the distributions, respectively, commence for Movable, Immovable and Common Rāśis. In Movable Rāśis Brahma, Shiva and Vishnu; in Immovable Rāśis Shiva, Vishnu and Brahma and in Common Rāśis Vishnu, Brahma and Shiva repeat 15 times the presidentship over these Akshavedāńśas.

राशीन् विहाय खेटस्य द्विघ्नमंशाद्यमर्कहृत्
शेषं सैकं तद्राशेर्भपाः षष्ट्यंशापाः स्मृताः ३३

घोरश्च राक्षशो देवः कुबेरो यक्षकिन्नरौ
भ्रष्टः कुलघ्नो गरलो वह्निर्माया पुरीषकः ३४

अपाम्पतिर्मरुत्वांश्च कालः सर्पामृतेन्दुकाः
मृदुः कोमलहेरम्बब्रह्मविष्णुमहेश्वराः ३५

देवार्द्रौ कलिनाशश्च क्षितीशकमलाकरौ
गुलिको मृत्युकालश्च दावाग्निर्घोरसंज्ञकः ३६

यमश्च कण्टकसुधाऽमृतौ पूर्णनिशाकरः
विषदग्धकुलान्तश्च मुख्यो वंशक्षयस्तथा ३७

उत्पातकालसौम्याख्याः कोमलः शीतलाभिधः
करालदंष्ट्रचन्द्रास्यौ प्रवीणः कालपावकः ३८

दण्डभृन्निर्मलः सौम्यः क्रूरोऽतिशीतलोऽमृतः
पयोधिभ्रमणाख्यौ च चन्द्ररेखा त्वयुग्मपाः ३९

समे भे व्यत्ययाज्ज्ञेयाः षष्ट्यंशेशाः प्रकीर्तिताः
षष्ट्यांशस्वामिनस्त्वोजे तदीशादव्यत्पयः समे ४०

शुभषष्ट्यंशसंयुक्ता ग्रहाः शुभफलप्रदाः
क्रूरषष्ट्यंशसंयुक्ता नाशयन्ति खचारिणः ४१

**33-41. <u>Shashtiāńś (1/60th part of a Rāśi, or half a degree each).</u>** To calculate the Shashtiāńś Lord ignore the Rāśi position of a Planet and take the degrees etc. it traversed in that Rāśi. Multiply that figure by 2 and divide the degrees by 12. Add 1 to the remainder, which will indicate the Rāśi, in which the Shashtiāńś falls. The Lord of that Rāśi is the Planet, ruling the said Shashtiāńś. In odd Rāśis the names of Shashtiāńśas are **1. Ghora, 2. Rakshasa, 3. Deva, 4. Kuber, 5. Yaksh, 6. Kindar, 7. Bhrasht, 8. Kulaghna, 9. Garal, 10. Vahni, 11. Maya, 12. Purishak, 13. Apampathi, 14. Marutwan, 15. Kaal, 16. Sarpa, 17. Amrit, 18. Indu, 19. Mridu, 20. Komal, 21. Heramba, 22. Brahma, 23. Vishnu, 24. Maheshwara, 25. Deva, 26. Ardr, 27. Kalinas, 28. Kshitees, 29. Kamalakar, 30. Gulika, 31. Mrityu, 32. Kaal, 33. Davagni, 34. Ghora, 35. Yama, 36 Kantak, 37. Suddh, 38. Amrit, 39. PurnaMoon, 40. Vishadagdha, 41. Kulanas, 42. Vamshakshaya, 43. Utpat, 44. Kaal, 45. Saumya, 46. Komal, 47. Sheetal, 48. Karaladamshtr, 49. Moonamukhi, 50. Praveen, 51. Kaalpavak, 52. 2ndnayudh, 53. Nirmal, 54. Saumya, 55. Krur, 56. Atisheetal, 57. Amrit, 58. Payodhi, 59. Brahman, 60. MoonaRekha (InduRekha).** The reverse is the order for even Rāśis in so much, as these names are cased. Planets in benefic Shashtiāńśas produce auspicious, while the opposite is true in case of Planets in malefic Shashtiāńśas.

वर्गभेदानहं वच्चये मैत्रेय त्वं विधारय
षड्वर्गाः सप्तवर्गाश्च दिग्वर्गा नृपवर्गकाः ४२

भवन्ति वर्गसंयोगे षडवर्गे किंशुकादयः
द्वाभ्यां किंशुकनामा च त्रिभिर्व्यञ्जनमुच्यते ४३

चतुर्भिश्चामराख्यं च छत्रं पञ्चभिरेव च
षड्भिः कुण्डलयोगः स्यान्मुकुटाख्यं च सप्तभिः ४४

सप्तवर्गेऽथ दिग्वर्गे पारिजातादिसंज्ञकाः
पारिजातं भवेद्द्वाभ्यामुत्तमं त्रिभिरुच्यते ४५

चतुर्भिर्गोपुराख्यं स्याच्छरैः सिंहासनं तथा
पारावतं भवेत् षड्भिर्देवलोकं च सप्तभिः ४६

वसुभिर्ब्रह्मलोकाख्यं नवभिः शक्रवाहनम्
दिग्भिः श्रीधामयोगः स्यादथ षोडशवर्गके ४७

भेदकं च भवेद्द्वाभ्यां त्रिभिः स्यात् कुसुमाख्यकम्
चतुर्भिर्नागपुष्पं स्यात् पंचभिः कन्दुकाह्वयम् ४८

केरलाख्यं भवेत् षड्भिः सप्तभिः कल्पवृक्षकम्
अष्टभिश्चन्दनवं नवभिः पूर्णचन्द्रकम् ४९

दिग्भिरुच्चैःश्रवा नाम रुद्रैर्धन्वन्तरिर्भवेत्
सूर्यकान्तं भवेद् सूर्यैर्विश्वैः स्याद्विद्रुमाख्यकम् ५०

शक्रसिंहासनं शक्रैर्गोलोकं तिथिभिर्भवेत्
भूपैः स्त्रीवल्लभाख्यं स्याद्वर्गा भेदैरुदाहृताः ५१

स्वोच्चमूलत्रिकोणस्वभवनाधिपतेः शुभाः
स्वारूढात् केन्द्रनाथानां वर्गा ग्राह्याः सुधीमता ५२

अस्तंगता ग्रहजिता नीचगा दुर्बलाश्च ये
शयनादिगतास्तेभ्य उत्पन्ना योगनाशकाः ५३

**42-53. <u>Varga Classification</u>.** Maitreya, explained now are the sum effects of classifications of different divisions (or Vargaas, so far narrated). These are four kinds, viz. Shad Varga, Sapth Varga, Dasha Varga and Shodasha Varga. In the Shad Varga classification the Varga designations are Kimshuk, Vyanjan, Chamar, Chatr and Kundal, according to a Planet being in 2 to 6 combinations of good Vargaas. Next is the Sapth Varga, in which these classifications continue in the same manner up to six combinations of good Vargaas, the 7th additional Varga getting classified, as Mukut. In the Dasha Varga scheme the designations commence from Parijata etc., such as 2 good Vargaas - Parijatha, 3 Uttama, 4 Gopur, 5 Leoasan, 6 Paravata, 7 Devaloka, 8 Brahmaloka, 9 Sakravahana and 10 Vargaas - Shridham. In the Shodasha Varga scheme the combinations of Vargaas go with designations thus: two good Vargaas - Bhedak, 3 Kusum, 4 Nagapushpa, 5 Kanduk, 6 Kerala, 7 Kalpa Vriksha, 8 Chandan Vana, 9 Purnachandra, 10 Uchchaisrava, 11 Dhanvantara, 12 Sunkant, 13 Vidrum, 14 Chakra-Leoasan, 15 Golok and 16 Vargaas - Śrī Vallbha. In these divisions the divisions, falling in the Planets exaltation Rāśi, Moolatrikona Rāśi, own Rāśi and the Rāśis, owned by the Lord of a Kendra from the Arudha Lagna, are all to be considered (as good Vargaas). The divisions of a combust Planet, defeated Planet, weak Planet and a Planet in bad Avasthas, like Sayan, be all ignored to be auspicious, for these destroy the good Yogas.

अथ वर्गविवेकाध्यायः ७

अथ षोडशवर्गेषु विवेकं च वदाम्यहम्
लग्ने देहस्य विज्ञानं होरायां सम्पदादिकम् १

द्रेष्काणे भ्रातृजं सौख्यं तुर्यांशे भाग्यचिन्तनम्
पुत्रपौत्रादिकानां वै चिन्तनं सप्तमांशके २

नवमांशे कलत्राणां दशमांशे महत्फलम्
द्वादशांशे तथा पित्रोश्चिन्तनं षोडशांशके ३

सुखाऽसुखस्य विज्ञानं वाहनानां तथैव च
उपासनाया विज्ञानं साध्यं विंशतिभागके ४

विद्याया वेदबाह्वंशे भांशे चैव बलाऽबलम्
त्रिंशांशके रिष्टफलं खवेदांशे शुभाऽशुभम् ५

अक्षवेदांशके चैव षष्ट्यंशेऽखिलमीक्षयेत्
यत्र कुत्रापि सम्प्राप्तः क्रूरषष्ट्यंशकाधिपः ६

तत्र नाशो न सन्दे हो गर्गादीनां वचो यथा
यत्र कुत्रापि सम्प्राप्तः कलांशाधिपतिः शुभः ७

तत्र वृद्धिश्च पुष्टिश्च गर्गादिनां वचो यथा
इति षोडशवर्गाणां भेदास्ते प्रतिपादिताः ८

## Ch. 7. Divisional Considerations

**1-8. Use of the 16 Divisions**. Now I will explain the use of these sixteen divisions. The physique from Lagna, wealth from Hora, happiness through co-born from Dreshkana, fortunes from Chaturthāńśa, sons and grandsons from Saptāńśa, spouse from Navāmśa, power (and position) from Dashāńśa, parents from Dvadashāńśa, benefits and adversities through conveyances from Shodashāńś, worship from Vimshāńś, learning from Chaturvimshāńś, strength and weakness from Saptavimshāńś, evil effects from Trimshāńśa, auspicious and inauspicious effects from Khavedāńś and all indications from both Akshavedāńś and Shashtiāńś: these are the considerations to be made through the respective Vargaas. The House, whose Lord is in a malefic Shashtiāńś, will diminish; so say Garga and others. The House, whose Lord is in a benefic Shodashāńś, flourish. This is how the 16 Vargaas are to be evaluated.

उदयादिषु भावेषु खेटस्य भवनेषु वा
वर्गविंशोपकं वीक्ष्य ज्ञेयं तेषां शुभाऽशुभम् ९

अथातः सम्प्रवक्ष्यामि वर्गविंशोपकं बलम्
यस्य विज्ञानमात्रेण विपाकं दृष्टिगोचरम् १०

गृहविंशोपकं वीक्ष्यं सूर्यादीनां खचारिणाम्
स्वगृहोच्चे बलं पूर्णं शून्यं तत्सप्तमस्थिते ११

ग्रहस्थितिवशाज्ज्ञेयं द्विराश्यधिपतिस्तथा
मध्येऽनुपाततो ज्ञेयं ओजयुग्मर्क्षभेदतः १२

**9-12**. After assessing the 20 point strength of the ascending degree, of other Houses and of the Planets, the good and bad effects be declared. I explain below the method of knowing the Vimsopak strength (20 point strength), just by knowing which an idea of the results of actions of this birth and of former birth will clearly emerge. The Planets from Sun on get full strength, when in exaltation, or in own Rāśi and are bereft of strength, when in the 7th (from exaltation). In between the strength be known by the rule of three process. In the case of a Planet, owning two Rāśis, distinction of placement in odd/even Rāśi identical with own Rāśi be made.

सूर्यहोराफलं दद्युर्जीवार्कवसुधात्मजाः
चन्द्रास्फुजिदर्कपुत्राश्चन्द्रहोराफलप्रदाः १३

फलद्वयं बुधो दद्यात् समे चान्द्रं तदन्यके
रवेः फलं स्वहोरादौ फलहीनं विरामके १४

मध्येऽनुपातात् सर्वत्र द्रेष्काणेऽपि विचिन्तयेत्
गृहवत् तुर्यभागेपि नवांशादावपि स्वयम् १५

सूर्यः कुजफलं धत्ते भार्गवस्य निशापतिः
त्रिंशांशके विचिन्त्यैवमत्रापि गृहवत् स्मृतम् १६

**13-16<u>. Horā, Dreshkana and Trimshāńśa Effects</u>.** Jupiter, Sun and Mars give (pronounced) effects in the Hora of Sun. Moon, Venus and Saturn do so, when in Moon's Horas; Mercury is effective in both the Horas. In the case of an even Rāśi the Hora of Moon will be powerful in effects, while Sun's Hora in an odd Rāśi will be so. Full, medium and nil will be the effects, respectively, in the beginning middle and the end of a Hora. Similar applications be made for a Dreshkana, Turyāńśa, Navāmśa etc. As for Trimshāńśa effects, Sun is akin to Mars and Moon is akin to Venus. The effects, applicable to Rāśi, will apply to Trimshāńśa.

लग्नहोरादृकाणांकभागसूर्यका इति
त्रिंशांशकश्च षड्वर्गा अत्र विंशोपकाः क्रमात् १७

रमनेत्राब्धिपंचाश्विभूमयः सप्तवर्गके
ससप्तमांशके तत्र विश्वकाः पंच लोचनम् १८

त्रयः सार्द्धं द्वयं सार्द्धवेदा द्वौ रात्रिनायकः
स्थूलं फलं च संस्थाप्य तत्सूक्ष्मं च ततस्ततः १९

**17-19. <u>Vimshopaka Bala.</u>** The Shad Vargaas consist of Rāśi, Hora, Dreshkana, Navāmśa, Dvadashāńśa and Trimshāńśa. The full Bala for each of the divisions, respectively, are 6, 2, 4, 5, 2 and 1. This is the Vimshopaka Bala, relating to Shad Varga division. Adding the Saptāńśa to the Shad Vargaas, we get Sapta Varga, the Vimshopaka Bala for which is 5, 2, 3, 2, 4, 2 and 1. These are gross strengths, while subtle ones should be understood by exact positions.

दशवर्गी दिगंशाढ्याः कलांशाः षष्टिभागकाः
त्रयं क्षेत्रस्य विज्ञेयाः पंचषष्ट्यंशकस्य च २०

**20.** Add Dashāńśa, Shodashāńś and Shashtiāńś to the said Sapta Varga Divisions to get the scheme of Dasha Varga. The Vimshopaka Bala in this context is 3 for Rāśi, 5 for Shashtiāńś and for the other 8 divisions 1 each.

सार्द्धैकभागाः शेषाणां विश्वकाः परिकीर्तिता
अथ वक्ष्ये विशेषेण बलं विंशोपकाह्वयम्  २१

क्रमात् षोडशवर्गाणां क्षेत्रादीनां पृथक् पृथक्
होरात्रिंशांशदृक्काणे कुचन्द्रशशिनः क्रमात्  २२

कलांशस्य द्वयं ज्ञेयं त्रयं नन्दांशकस्य च
क्षेत्रे सार्द्धं च त्रितयं वेदाः षष्ट्यंशकस्य हि  २३

अर्द्धमर्धं तु शेषाणां ह्येतत् स्वीयमुदाहृतम्
पूर्णं विंशोपकं विंशो धृतिः स्यादधिमित्रके  २४

मित्रे पंचदश प्रोक्तं समे दश प्रकीर्तितम्
शत्रौ सप्ताधिशत्रौ च पंचविंशोपकं भवेत्  २५

**21-25**. When the 16 divisions (Shodash Varga Scheme) are considered together, the Vimshopaka score goes thus: Hora 1, Trimsāṅś 1, Dreshkana 1, Shodashāṅś 2, Navāmśa 3, Rāśi 3, Shashtiāṅś 4 and the rest of the nine divisions each a half. The Vimshopaka Bala remains as 20, only when the Planet is in own House Vargaas. Otherwise, the total strength from 20 declines to 18 in Pramudit Vargaas, to 15 in Shant Vargaas, to 10 in Svasth divisions, to 7 in Duhkhit Vargaas and to 5 in Khal Vargaas. (These figures are called Varga Vishwa)

वर्गविश्वाः स्वविश्वघ्नाः पुनर्विंशतिभाजिताः
विश्वाफलोपयोग्यं तत्पञ्चोनं फलदो न हि  २६

तदूर्ध्वं स्वल्पफलदं दशोर्ध्वं मध्यमं स्मृतम्
तिथ्यूर्ध्वं पूर्णफलदं बोध्यं सर्वं खचारिणाम्  २७

**26-27. Vimshopaka Proportional Evaluation.** Multiply the figure due to full strength for the division by the Varga Vishwa and divide by 20 to get the exact strength of the Planet. If the total is below 5, the Planet will not be capable of giving auspicious results. If it is above 5, but below 10, the Planet will yield some good effects. Later on up to 15 it is indicative of mediocre effect. A Planet with above 15 will yield wholly favourable effects.

अथाऽन्यदपि वक्ष्येऽहं मैत्रेय त्वं विधारय
खेटाः पूर्णफलं दद्युः सूर्यात् सप्तमके स्थिताः  २८

फलाभावं विजानीयात् समे सूर्यनभश्चरे
मध्येऽनुपातात् सर्वत्र ह्युदयास्तविंशोपकाः  २९

**28-29.** Other Sources of Strength. Maitreya, there are other kinds of sources, as I explain below. Planets in the 7th from Sun will be fully effective. One with an identical longitude in comp6thson to Sun's will destroy the good effects. Rule of three process be applied to the Planet in between these positions.

वर्गविंशोपकं ज्ञेयं फलमस्य द्विजर्षभ
यच्च यत्र फलं बुद्ध्वा तत्फलं परिकीर्तितम्  ३०

वर्गविंशोपकं चादावुदयास्तमतः परम्
पूर्णं पूर्णेतिपूर्णंस्यात् सर्वदैवं विचिन्तयेत्  ३१

हीनं हीनेतिहीनं स्यात् स्वल्पेल्पात्यल्पकं स्मृतम्
मध्यं मध्येतिमध्यं स्याद्यावत्तस्य दशास्थितिः  ३२

**30-32. Dasha effects with Vimshopaka Bala.** Maitreya, after assessing the Vimshopaka Bala through the v6thous divisions, the rising and setting of the Planets be considered. The Vimshopaka Bala is classified under Purna, AtiPurna, Madhya, AtiMadhya, Heen, AtiHeen, Swalpa and AtiSwalp. Thus should be classified the Vimshopaka Bala and the Dasha period results declared accordingly.

अथाऽन्यदपि वक्ष्यामि मैत्रेय शृणु सुव्रत्
लग्नतुर्यास्तवियतां केन्द्रसंज्ञा विशेषतः ३३

द्विपंचरन्ध्रलाभानां ज्ञेयं पणफराभिधम्
त्रिषष्ठभाग्यरिष्फानामापोक्लिममिति द्विज ३४

लग्नात् पंचमभाग्यस्य कोणसंज्ञा विधीयते
षष्ठाष्टव्ययभाबानां दुःसंज्ञास्त्रिकसंज्ञकाः ३५

चतुरस्त्रं तुर्यरन्ध्रं कथयन्ति द्विजोत्तम
स्वस्थादुपचयर्क्षाणि त्रिषडायाम्बराणि हि ३६

**33-36. <u>Kendras, Konas etc. defined</u>.** O Maitreya, listen to other matters, which I am explaining. The Kendras are specially known, as Lagna (the ascendent), 4th House, 7th House (the descendant) and 10th House (mid-heaven). 2nd, 5th, 8th and 11th House are Panapharas (succedents), while 3rd, 6th, 9th and 12th House are called Apoklimas (cadents). 5th and 9th House are known by the name Kona (or trine). Evil Houses, or Dusthana Houses are 6th, 8th and 12th House. Chaturasras are 4th and 8th House. 3rd, 6th, 10th and 11th House are Upachaya Houses.

तनुर्धनं च सहजो बन्धुपुत्रारयस्तथा
युवतीरन्ध्रधर्माख्यकर्मालाभव्ययाः क्रमात् ३७

संक्षेपेणैतदुदितमन्यद् बुद्ध्यनुसारतः
किञ्चिद्विशेषं वक्ष्यामि यथा भह्ममुखाच्छ्रुतम् ३८

**37-38<u>. Names of Houses</u>.** 1st, 2nd, 3rd, 4th, 5th, 6th, 7th, 8th, 9th, 10th, 11th and 12th are in order the Houses. I explained these briefly and leave it to you to grasp more, according to your intelligence. As delivered by Lord Brahma, some further information is added thus (i.e. in the following verses).

नवमेऽपि पितुर्ज्ञानं सूर्याच्च नवमेऽथवा

यत्किञ्चिद्दशमे लाभे तत्सूर्याद्दशमे भवे ३९

तुर्ये तनौ धने लाभे भाग्ये यच्चिन्तनं च तत्
चन्द्रात्तुर्ये तनौ लाभे भग्ये तच्चिन्तयेद् ध्रुवम् ४०

लग्नाद् दुश्चिक्यभवने यत्कुजाद्विक्रमेऽखिलम्
विचार्यं षष्ठभावस्य बुधात् षष्ठे विलोकयेत् ४१

पुत्रस्य च गुरोः पुत्रे जायायाः सप्तमे भृगोः
अष्टमस्य व्ययस्यापि मन्दान्मृत्यौ व्यये तथा ४२

यद्भावाद्यत्फलं चिन्त्यं तदीशात्तत्फलं विदुः
ज्ञेयं तस्य फलं तद्धि तत्र चिन्त्यं शुभाऽशुभम् ४३

**39-43. <u>Indications from Houses</u>.** 9th House and the 9th from Sun deal with ones father. Whatever effects are to be known from the 10th and 11th House, be also known from similar Houses, counted from Sun. Whatever results are to be known from 4th, 1st, 2nd, 11th and 9th should also be known from the 4th of Moon, from Cancer Rāśi itself and from the 2nd, 11th and 9th from Moon, respectively. Whatever has to be known through 3rd House, be also analyzed through the 3rd from Mars. The 6th from Mercury be also considered in regard to indications, derivable from 6th House. The 5th from Jupiter, the 7th from Venus and both the 8th and 12th from Saturn stand for consideration, respectively, in respect of offspring, spouse and death. The Lord of the House is equally important, when estimating the indications of a particular House.

अथ राशिदृष्टिकथनाध्यायः ८

अथ मेषादिराशीनां चरादीनां पृथक् पृथक्
दृष्टिभेदं प्रवक्ष्यामि श्रृणु त्वं द्विजसत्तम १

राशयोऽभिमुखं विप्र तथा पश्यन्ति पार्श्वभे
यथा चरः स्थिरानेवं स्थिरः पश्यति वै चरान् २

द्विस्वभावो विनाऽत्मानां द्विस्वभावान् प्रपश्यति
समीपस्थं परित्यज्य खेटास्तत्र गतास्तथा ३

## Ch. 8. Aspects of the Rāśis

**1-3. Rāśi Aspects.** O Maitreya, now detailed are the Aspects, emanating from the Rāśi Aries etc. Every Movable Rāśi aspects the 3 Fixed Rāśis, leaving the Fixed Rāśi adjacent to it. Every Fixed Rāśi gives Aspect to the 3 Movable Rāśis, barring the adjacent Movable Rāśi. And a Common Rāśi gives a Aspect to the other three Common Rāśis. The Planet in a Rāśi gives the same Aspect, as the Rāśi (in which the Planet is) does.

चरेषु संस्थिताः खेटाः पश्यन्ति स्थिरसङ्गतान्
स्थिरेषु संस्थिता एवं पश्यन्ति चरसंस्थितान् ४

उभयस्थास्तु सूर्याद्या पश्यन्त्युभयसंस्थितान्
निकटस्थं विना खेटाः पश्यन्तीत्ययमागमः ५

**4-5. Aspects of the Planets.** A Planet in a Movable Rāśi gives a Aspect to the other 3 Fixed Rāśis, leaving the Fixed Rāśi next to it. A Planet in a Fixed Rāśi does not give a Aspect to the next Movable Rāśi, but the remaining 3 Movable Rāśis. The one in a Common Rāśi gives a Aspect to the remaining 3 Common Rāśis. Simultaneously a Planet in the Rāśi, that receives a Aspect, is also subjected to the Aspect concerned.

दृष्टिचक्रमहं वक्ष्ये ययावद् ब्रह्मणोदितम्

तस्य विन्यासमात्रेण दृष्टिभेदः प्रकाश्यते ६

प्राचि मेषवृषौ लेख्यौ कर्कसिंहौ तथोत्तरे
तुलाऽली पश्चिमे विप्र मृगकुम्भौ च दक्षिणे ७

ईशकोणे तु मिथुनं वायव्ये कन्यकां तथा
नैर्ऋत्यां चापमालिख्य वह्निकोणे झषं लिखेत् ८

एवं चतुर्भुजाकारं वृत्ताकारमथापि वा
दृष्टिचक्रं प्रविन्यस्यैवं ततो दृष्टिं विचारयेत् ९

**6-9. Diagram of Aspects.** As depicted by Lord Brahma, I now narrate the diagram of Aspects, so that Aspects are easily understood by a mere sight of the diagram. Draw a square, or a circle marking the 8 directions (4 corners and 4 quarters thereof). Mark the zodiacal Rāśis, as under: Aries and Taurus in East, Gemini in the North-East, Cancer and Leo in the North, Virgo in the North-West, Libra and Scorpio in the West, Sagittarius in the South-West, Capricorn and Aquarius in the South and Pisces in the South-East.

अथारिष्टाध्यायः ९

आदौ जन्माङ्गतो विप्र रिष्टाऽरिष्टं विचारयेत्
ततस्तन्वादिभावानां जातकस्य फलं वदेत् १

## Ch. 9. Evils at Birth

**1.** O Brahmin, first of all estimate the evils and checking factors thereof through Lagna and then declare the effects of the 12 Houses.

चतुर्विंशतिवर्षाणि यावद् गच्छन्ति जन्मतः
जन्मारिष्टं तु तावत् स्यादायुर्दायं न चिन्तयेत् २

**2.** Evils, causing premature end, exist up to the 24th year of ones age. As such, no definite calculation of life span should be made till such year of age.

षष्ठाष्टरिष्फगश्चन्द्रः क्रूरैः खेटैश्च वीक्षितः
जातस्य मृत्युदः सद्यस्त्वष्टर्षैः शुभेक्षितः ३

शशिवन्मृत्युदाः सौम्याश्चेद्वक्राः क्रूरवीक्षिताः
शिशोर्जातस्य मासेन लग्ने सौम्यविवर्जिते ४

यस्य जन्मनि धीस्थाः स्युः सूर्यार्कीन्दुकुजाभधाः
तस्य त्वाशु जनित्री च भ्राता च निधनं व्रजेत् ५

पापेक्षितो युतो भौमो लग्नगो न शुभेक्षितः
मृत्युदस्त्वष्टमस्थोऽपि सौरेणार्केण वा युतः ६

**<u>3-6. Short-life Combinations (up to Sloka 23).</u>** Should Moon be in 6th, 8th, or 12th House and receives a Aspect from a malefic, the child will die soon. If in the process there be a Aspect from a benefic, it may live up to 8. If a benefic is retrograde in 6th, 8th, or 12th House, receiving a Aspect from a malefic, death will occur within a month of birth. This is true, only when Lagna is not occupied by a benefic. Should 5th House be occupied by Saturn, Mars and Sun jointly, (early) death of mother and brother will come to pass. Mars, placed in 1st, or in 8th House and be conjunct with Saturn, or Sun, or receiving a Aspect from a malefic, being bereft of a Aspect from a benefic, will prove a source of (immediate) death.

चन्द्रसूर्यग्रहे राहुश्चन्द्रसूर्ययुतो यदि

सौरिभौमेक्षितं लग्नं पक्षमेकं स जीवति ७

कर्मस्थाने स्थितः सौरिः शत्रुस्थाने कलानिधिः
क्षितिजः सप्तमस्थाने सह मात्रा विपद्यते ८

लग्ने भास्करपुत्रश्च निधने चन्द्रमा यदि
तृतीयस्थो यदा जीवः स याति यममन्दिरम् ९

होरायां नवमे सूर्यः सप्तमस्थः शनैश्चरः
एकादशे गुरुः सुक्रो मासमेकं स जीवति १०

व्यये सर्वे ग्रहा नेष्टाः सूर्येशुक्रेन्दुराहवः
विशेषान्नाशकर्तारो दृष्ट्या वा भङ्गकारिणः ११

**7-11.** If Saturn and Mars give a Aspect to Lagna, as the lumin6thes are conjunct with Rahu (elsewhere), the child will live a fortnight. Immediate death of the child along with its mother will occur, if Saturn is in 10th House, Moon in 6th House and Mars in 7th House. One will immediately go to the abode of Yama, if Saturn is in 1st House, while Moon and Jupiter are in their order in 8th and 3rd House. Only a month will be the span of ones life, who had Sun in 9th House, Mars in 7th House and Jupiter and Venus in 11th House. All Planets (any Planet) in 12th House will be the source of a short life, specifically the lumin6thes, Venus and Rahu. But the Aspect of these four Planets (on 12th House) will counteract such evils.

पापान्वितः शशी धर्मे द्यूनलग्नगतो यदि
शुभैरवेक्षितयुतस्तदा मृत्युप्रदः शिशोः १२

**12.** Moon is capable of causing early end, if she is with a malefic in 7th, 8th, or 1st House and unrelated to a benefic.

सन्ध्यायां चन्द्रहोरायां गण्डान्ते निधनाय वै
प्रत्येकं चन्द्रपापैश्च केन्द्रगैः स्याद्विनाशनम् १३

**13.** Early death will come to pass, if there be a birth in the morning, or evening junctions, or in a Hora, ruled by Moon, or in Gandanta, while Moon and malefics occupy Kendras from Lagna**.**

रवेस्तु मण्डलार्द्धास्तात् सायं संध्या त्रिनाडिका
तथैवार्द्धोदयात् पूर्वं प्रातः संध्या त्रिनाडिका १४

**14. <u>Definition of Sandhya</u>.** 3 Ghatis before the sight of the semi disc (half) of the rising Sun and a similar duration, following Sun's set, are called, as morning twilight and evening twilight, respectively.

चक्रपूर्वापरार्द्धेषु क्रूरसौम्येषु कीटभे
लग्नगे निधनं याति नाऽत्र कार्या विचारणा १५

**15. <u>Early Death.</u>** Should all the malefics be in the oriental half, while benefics are in the occidental half, early death of one born in Scorpio will follow. In this case there is no need of any rethinking.

व्ययशत्रुगतैः क्रूरैर्मृत्युर्द्रव्यगतैरपि
पापमध्यगते लग्ने सत्यमेव मृतिं वदेत् १६

**16.** Malefic in 12th and 6th House, or in 8th and 2nd House, while Lagna is hemmed between other malefics, will bring early death.

लग्नसप्तमगौ पापौ चन्द्रोऽपि क्रूरसंयुतः
यदा नावेक्षितः सौम्यैः शीघ्रान्मृत्युर्भवेत्तदा १७

**17.** Malefics, occupying 1st and 7th House, while Moon is conjunct with a malefic with no relief from a benefic, will also cause premature death.

क्षीणे शशिनि लग्नस्थे पापैः केन्द्राष्टसंस्थितैः
यो जातो मृत्युमाप्नोति स विप्रेश न संशयः १८

**18.** Early death will be inflicted on the native, if decreasing Moon is in 1st House, while malefics capture 8th House and a Kendra. There is no doubt about that**.**

पापयोर्मध्यगश्चन्द्रो लग्नाष्टान्तिमसप्तमः
अचिरान्मृत्युमाप्नोति यो जातः स शिशुस्तदा १९

**19.** Moon in 1st, 8th, 12th, or 7th House and hemmed between malefics will confer premature death**.**

पापद्वयमध्यगते चन्द्रे लग्नसमाश्रिते
सप्ताष्टमेन पापेन मात्रा सह मृतः शिशुः २०

**20.** Should Moon be in 1st House, hemmed between malefics, while 7th, or 8th House has a malefic in it, he will face immediate death along with his mother.

शनैश्चरार्कभौमेषु रिष्फधर्माष्टमेषु च
शभैरवीन्दयमाणेषु यो जातो निधनंगतः २१

**21.** Should Saturn, Sun and Mars be in 12th, 9th and 8th House without Aspect from a benefic, the child will face instant death.

यद्रेष्काणे च यामित्रे यस्य स्याद्दारुणो ग्रहः
त्तीणचन्द्रो विलग्नस्थः सद्यो हरति जीवितम् २२

**22.** With a malefic in 7th House, or in the rising Dreshkana, while decreasing Moon is in 1st House, death be experienced early.

ग्रापोक्लिमस्थिताः सर्वे ग्रहा बलविवर्जिताः
षरामासं व द्विमासं व तस्यायुः समुदाहृतम् २३

**23.** The life span of the child will be either 2 months, or 6 months only, if all Planets devoid of strength are relegated to Apoklima Houses.

त्रिभिः पापग्रहैः सूतौ चन्द्रमा यदि दृश्यते
मातृनाशो भवेत्तस्य शुभर्दृष्टे शुभं वदेत् २४

**24.** **<u>Evils to Mother (up to Sloka 33).</u>** The mother of the native will incur evils (will die soon), if Moon at birth receives a Aspect from three malefics. Benefics, giving a Aspect to Moon, will bring good to the mother.

धने राहुर्बुधः शुक्रः सौरिः सूर्यो यदा स्थितः
तस्य मातुर्भवेन्मृत्युर्मृते पितरि जायते २५

**25.** Should 2nd House be occupied by Rahu, Mercury, Venus, Sun and Saturn, the child's birth has been after its fathers death, while even the mother will face early death.

पापात्सप्तमरन्ध्रस्थे चन्द्रे पापसमन्विते
बलिभिः पापकैर्दृष्टे जातो भवति मातृहा २६

**26.** If Moon is in the 7th, or the 8th from a malefic, be herself with a malefic and receives a Aspect from a strong malefic, predict mothers end to be early.

उच्चस्थो वाऽथ नीचस्थः सप्तमस्थो यदारविः
पानहीनो भवेद्वाल ग्रजात्तीरेण जीवति २७

**27.** The child will not live on mothers milk, but on that of she-goat, if Sun is exalted, or debilitated in 7th House.

चन्द्राच्चतुर्थगः पापो रिपुक्षेत्रे यदा भवेत्

तदा मातृवधं कुर्यात् केन्द्रे यदि शुभो न चेत् २८

**28.** Should a malefic be in the 4th, identical with an inimical Rāśi, counted from Moon, while there is no benefic in a Kendra, the child will lose its mother in a premature manner**.**

द्वादशे रिपुभावे च यदा पापग्रहो भवेत्
तदा मातुर्भयं विद्याच्चतुर्थे दशमे पितुः २९

**29**. Malefics in 6th and 12th House will bring evils to mother. The child's father will receive similar effects, if 4th and 10th House are captured by malefics**.**

लग्ने क्रूरो व्यये क्रूरो धने सौम्यस्तथैव च
सप्तमे भवने क्रूरः परिवारक्षयंकरः ३०

**30.** Mercury in 2nd House, while malefics occupy 1st and 12th House: this Yoga will destroy the entire family**.**

लग्नस्थे च गुरौ सौरौ धने राहौ तृतीयगे
इति चेज्जन्मकाले स्यान्माता तस्य न जीवति ३१

**31.** Jupiter, Saturn and Rahu, respectively, posited in 1st, 2nd and 3rd House will cause mothers death early**.**

क्षीणचन्द्रात्त्रिकोणस्थैः पापैः सौम्यविवर्जितैः
माता परित्यजेद्बालं षण्मासाच्च न संशयः ३२

**32.** Doubtlessly the mother will give up the child, if it has malefics in Konas, counted from the decreasing Moon. No benefic shall be conjunct with the said malefics**.**

एकांशकस्थौ मन्दारौ यत्र कुत्रस्थितौ यदा
शशिकेन्द्रगतौ तौ वा द्विमातृभ्यां न जीवति ३३

**33.** If Mars and Saturn are together in a Kendra with reference to Moon and occupy one and the same Navāmśa, the child will have two mothers. Yet it will be short-lived**.**

लग्ने सन्दो मदे भौमः षष्ठस्थाने च चन्द्रमाः
इति चेज्जन्मकाले स्यात् पिता तस्य न जीवति ३४

**34. Evil to Father (up to Sloka 42).** Ones father will incur early death, if Saturn, Mars and Moon in their orders are in 1st, 7th and 6th House**.**

लग्ने जीवो धने मन्दरविभौमबुधास्तथा
विवाहसमये तस्य बालस्य म्रियते पिता ३५

**35.** The native will at the time of his marriage lose his father, if Jupiter is in 1st House, while Saturn, Sun, Mars and Mercury are together in 2nd House**.**

सूर्यः पापेन संयुक्तो ह्यथवा पापमध्यगः
सूर्यात् सप्तमगः पापस्तदा पितृवधो भवेत् ३६

**36**. Early loss of father will take place, if Sun is with a malefic, or is hemmed between malefics, as there is another malefic in the 7th from Sun.

सप्तमे भवने सूर्यः कर्मस्थो भूमनन्दनः
राहुर्व्यये च यस्यैव पिता कष्टेन जीवति ३७

**37.** Remote will be the possibility of ones father sustaining, if Sun is in 7th, while Mars is in 10th and Rahu is in 12th House.

दशमस्थो यदा भौमः शत्रुक्षेत्रसमाश्रितः
म्रियते तस्य जातस्य पिता शीघ्रं न संशयः ३८

**38.** Early and troubled will be ones fathers death, if Mars is in 10th House identical with his enemy Rāśi.

रिपुस्थाने यदा चन्द्रो लग्नस्थाने शनैश्चरः
कुजश्च सप्तमे स्थाने पिता तस्य न जीवति ३९

**39.** Moon in 6th House, Saturn in 1st House and Mars in 7th House: this array of heavenly bodies at birth will not ensure a long span of life for the father.

भौमांशकस्थिते भानौ शनिना च निरीक्षिते
प्राग्जन्मनो निवृत्तिः स्यान्मृत्युर्वाऽपि शिशोः पितुः ४०

**40.** If Sun receives a Aspect from Saturn and be in Aries, or in Scorpio Navāmśa, the father would have given up the family before birth of the child, or would have passed away.

चतुर्थे दशमे पापौ द्वादशे च यदा स्थितौ
पितरं मातरं हत्वा देशाद्देशान्तरं व्रजेत् ४१

**41.** If 4th, 10th and 12th House are all occupied by malefics, both the parents will leave the child to its own fate and wander from place to place.

राहुजीवौ रिपुक्षेत्रे लग्ने वाऽथ चतुर्थके
त्रयोविंशतिमे वर्षे पुत्रस्तातं न पश्यति ४२

**42**. The father will not see the native till his (the natives) 23rd year, if Rahu and Jupiter are together in an inimical Rāśi identical with 1st, or 4th House.

भानुः पिता च जन्तूनां चन्द्रो माता तथैव च
पापदृष्टियुतो भानुः पापमध्यगतोऽपि वा ४३

पित्ररिष्टं विजानीयाच्छिशोर्जातस्य निश्चितम्
भानोः षष्ठाष्टमर्क्षस्थैः पापैः सौम्यविवर्जितैः
सुखभावगतैर्वाऽपि पित्ररिष्टं विनिर्दिशेत् ४४

एवं चन्द्रात् स्थितैः पापैर्मातु कष्टं विचारयेत्
बलाऽबलविवेकेन कष्टं वा मृत्युमादिशेत् ४५

**43-45.** Parents. Sun is the indicator of father for all beings, while the mother is indicated by Moon. Should Sun receive a Aspect from one, or more malefics, or be hemmed between them, this will cause evils to father. Similarly Moon be considered in respect of mother. Malefics in the 6th, the 8th, or the 4th from Sun will bring inauspicious results about the father. Malefics in such places from Moon will be adverse for the mother. The strength, or otherwise of the occupants concerned be suitably estimated.

अथाऽरिष्टभंगाध्यायः १०

इत्यरिष्टं मया प्रोक्तं तद्भङ्गश्चापि कथ्यते
यत् समालोक्यं जातानां रिष्टाऽरिष्टं वदेद्बुधः १

## Ch. 10. Antidotes for Evils

**1.** Those are the evils (due to a native). I now narrate the antidotes for such evils as well, which will be helpful to assess the extent of inauspiciousness.

एकोऽपि ज्ञार्यशुक्राणां लग्नात् केन्द्रगतो यदि
अरिष्टं निखिलं हन्ति तिमिरं भास्करो यथा २

**2.** Should one among Mercury, Jupiter and Venus be in an angle from Lagna, all evils are destroyed, as Sun eliminates darkness.

एक एव बली जीवो लग्नस्थो रिष्टसंचयम्
हन्ति पापक्षयं भक्त्या प्रणाम इव शूलिनः ३

**3.** Just as a single reverential obeisance before Lord Shiva, the Trident holder frees one from all sins, a single, but strong Jupiter in Lagna will ward off all the evils**.**

एक एव विलग्नेशः केन्द्रसंस्थो बलान्वितः
अरिष्टं निखिलं हन्ति पिनाकी त्रिपुरं यथा ४

**4.** Lagna Lord is singly capable of counteracting all evils, if he is strongly placed in an angle, just as Lord Shiva, the holder of the Bow destroyed the three cities, built of gold, silver and iron for the demons by Maya**.**

शुक्लपक्षे क्षपाजन्म लग्ने सौम्यनिरीक्षिते
विपरीतं कृष्णपक्षे तथारिष्टविनाशनं ५

**5.** All evils are destroyed, if a benefic aspects Lagna of one born during the night in the bright half. Similarly a malefics Aspect on Lagna of one born during day time in the dark half.

व्ययस्थाने यदा सूर्यस्तुलालग्ने तु जायते
जीवेत् स शतवर्षाणि दीर्घायुर्बालको भवेत् ६

**6.** Sun in 12th will confer a hundred-year life span on one born in Libra Lagna.

गुरुभौमौ यदा युक्तौ गुरुदृष्टोऽथवा कुजः
हत्वाऽरिष्टमशेषं च जनन्याः शुभकृद्भवेत् ७

**7.** It will prove auspicious for the mother as well as the native, if Mars joins, or is aspected by Jupiter**.**

चतुर्थदशमे पापः सौम्यमध्ये यदा भवेत्
पितुः सौख्यकरो योगः शुभैः केन्द्रत्रिकोणगैः ८

सौम्यान्तरगतैः पापैः शुभैः केन्द्रत्रिकोणगैः
सद्यो नाशयतेऽरिष्टं तद्भावोत्थफलं न तत् ९

**8.** If malefics are surrounded by benefics, while angles, or trines are themselves benefic-occupied, evils disappear soon. Not only this, evils will not follow from the Houses concerned

अथ भावविवेकाध्यायः ११
अरिष्टं तत्प्रभङ्गं च श्रुतं त्वत्तो मया मुने
कस्माद् भावात् फलं किं किं विचार्यमिति मे वद १

देहं रूपं च ज्ञानं च वर्णं चैव बलाबलम्
सुखं दुःखं स्वभावञ्च लग्नभावान्निरीक्षयेत् २

## Ch. 11. Judgment of Houses

**1-2.** O Mahārśi Parashara, I have come to know of the evils and antidotes thereof from you. Please tell me, what is to be deduced from each House. Indications of 1st House. Mahārśi Parashara replies. Physique, appearance, intellect (or the organ of intelligence, i.e. brain), complexion of the body, vigor, weakness, happiness, grief and innate nature are all to be guessed through the ascending Rāśi.

धनधान्यं कुटुम्बांश्च मृत्युजालममित्रकम्
धातुरत्नादिकं सर्वं धनस्थानान्निरीक्षयेत् ३

**3.** Indications of 2nd House. Wealth, grains (food etc.), family, death, enemies, metals, precious stones etc. are to be understood through 2nd House.

विक्रमं भृत्यभ्रात्रादि चोपदेशप्रयाणकम्
पित्रोर्वै मरणं विज्ञो दुश्चिक्याच्च निरीक्षयेत् ४

**4.** Indications of 3rd House. From 3rd House know of the following: valor, servants (attending etc.), brothers, sisters etc., initiatory instructions (Upadesha), journey and parents death.

वाहनान्यथ बन्धूंश्च मातृसौख्यादिकान्यपि
निधि क्षेत्रं गृहं चापि चतुर्थात् परिचिन्तयेत् ५

**5.** Indications of 4th House. Conveyances, relatives, mother, happiness, treasure, lands and buildings are to be consulted through 4th House.

यन्त्रमन्त्रौ तथा विद्यां बुद्धेश्चैव प्रबन्धकम्
पुत्रराज्यापभ्रंशादीन् पश्येत् पुत्रालयाद् बुधः ६

**6.** Indications of 5th House. The learned should deduce from 5th House amulets, sacred spells, learning, knowledge, sons, royalty (or authority), fall of position etc.

मातुलान्तकशंकानां शत्रूंश्चैव व्रणादिकान्
सपत्नीमातरं चापि षष्ठभावान्निरीक्षयेत् ७

**7.** Indications of 6th House. Maternal uncle, doubts about death, enemies, ulcers, step-mother etc. are to be estimated from 6th House.

जायामध्वप्रयाणं च वाणिज्यं नष्टवीक्षणम्
मरणं च स्वदेहस्य जायाभावान्निरीक्षयेत् ८

**8.** Indications of 7th House. Wife, travel, trade, loss of sight, death etc. be known from 7th House.

आयु रणं रिपुं चापि दुर्गं मृतधनं तथा
गत्यनुकादिकं सर्वं पश्येद्रन्ध्राद्विचक्षणः ९

**9. Indications of 8th House.** 8th House indicates longevity, battle, enemies, forts, wealth of the dead and things, that have happened and are to happen (in the past and future births).

भाग्यं श्यालं च धर्मं च भ्रातृपत्न्यादिकांस्तथा
तीर्थयात्रादिकं सर्वं धर्मस्थानान्निरीक्षयेत् १०

**10. <u>Indications of 9th House.</u>** Fortunes, wife's brother, religion, brothers wife, visits to shrines etc. be known from 9th House.

राज्यं चाकाशंवृत्तिं च मानं चैव पितुस्तथा
प्रवासस्य ऋणस्यापि व्योमस्थानान्निरीक्षणम् ११

**11. <u>Indications of 10th House</u>.** Royalty (authority), place, profession (livelihood), honour, father, living in foreign lands and debts are to be understood from 10th House.

नानावस्तुभवस्यापि पुत्रजायादिकस्य च
आयं वृद्धिं पशूनां च भवस्थानान्निरीक्षणम् १२

**12. <u>Indications of 11th House</u>.** All articles, sons wife, income, prosperity, quadrupeds etc. are to be understood from 11th House**.**

व्ययं च वैरिवृत्तान्तरिःफमन्त्यादिकं तथा
व्ययाच्चैष हि ज्ञातव्यमिति सर्वत्र धीमता १३

**13. <u>Indications of 12th House.</u>** From 12th House, one can know about expenses, history of enemies, ones own death etc.

यो यो शुभैर्युतो दृष्टो भावो वा पतिदृष्टयुक्
युवा प्रवृद्धो राज्यस्थः कुमारो वाऽपि यत्पतिः १४

तदीक्षणवशात् तत्तद्भावसौख्यं वदेद् बुधः
यद्यद् भावपतिर्नष्टस्त्रिकेशाद्यैश्च संयुतः १५

भावं न वीक्षते सम्यक् सुप्तो वृद्धोमृतोऽथवा
पीडितो वाऽस्य भावस्य फलं नष्टं वदेद् ध्रुवम् १६

**14-16. <u>Prosperity, or Annihilation of a House</u>.** Predict prosperity of the House, which is conjunct with, or aspected by a benefic. Also, when its Lord is in Yuvavastha, or Prabuddhavastha, or in Kismaravastha, or in 10th House, the Houses well-being is indicated. The House, which is not aspected by its Lord, or, whose Lord is with a malefic Planet, or with one of the Lords of evil and such other Houses (i.e. 3rd, 6th, 8th, 11th and 12th), or is defeated in a war between Planets, or is in one of the three Avasthas, viz, Vriddhavastha, Mritavastha and Suptavastha.

अथ तनुभावफलाध्यायः १२

सपापो देहपोऽष्टारिव्ययगो देहसौख्यहृत्
केन्द्रे कोणे स्थितोऽङ्गेशः सदा देहसुखं दिशेत् १

लग्नपोऽस्तङ्गतो नीचे शत्रुभे रोगकृद् भवेत्
शुभाः केन्द्रत्रिकोणस्था सर्वरोगहराः स्मृताः २

## Ch. 12. Effects of 1st House

**1-2.** Physical comforts. Should Lagna Lord be conjunct with a malefic, or be in 8th, 6th, or 12th, physical felicity will diminish. If he is in an angle, or trine there will be at all times comforts of the body. If Lagna Lord is in debilitation, combustion, or enemy Rāśi, there will be diseases. With a benefic in an angle, or trine all diseases will disappear. Lagnas angles (i.e. 4th, 7th, or the 10th), or its trine (5th, 9th), containing a benefic, is a powerful remedy for all, related to health.

लग्ने चन्द्रेऽथव क्रूरग्रहैर्दृष्टेऽथवा युते
शुभदृष्टिविहीने च जन्तोर्देहसुखं न हि ३

**3.** There will not be bodily health, if Lagna, or Moon be aspected by, or conjunct with a malefic, being devoid of a benefics Aspect.

लग्ने सौम्ये सुरूपः स्यात् क्रूरेरूपविवर्जितः
सौम्यखेटैर्युते दृष्टे लग्ने देहसुखान्वितः ४

**4. Bodily Beauty.** A benefic in Lagna will give a pleasing appearance, while a malefic will make one bereft of good appearance. Felicity of the body will be enjoyed, if Lagna is aspected by, or conjunct with a benefic.

लग्नेशो ज्ञा गुरुर्वाऽपि शुक्रो वा केन्द्रकोणगः
दीर्घायुर्धनवान् जातो बुद्धिमान् राजवल्लभः ५

लग्नेशे चरराशिस्थे शुभग्रहनिरीक्षिते
कीर्तिश्रीमान् महाभोगी देहसौख्यसमन्वितः ६

बुधो जीवोऽथवा शुक्रो लग्ने चन्द्रसमन्वितः
लग्नात् केन्द्रगतो वाऽपि राजलक्षणसंयुतः ७

**5-7. Other Benefits.** If Lagna Lord, Mercury, Jupiter, or Venus be in an angle, or in a trine, the native will be long lived, wealthy, intelligent and liked by the king. Fame, wealth, abundant pleasures and comforts of the body will be acquired, if Lagna Lord is in a Movable Rāśi and be aspected by a benefic Planet. One will be endowed with royal marks (of fortune), if Mercury, Jupiter, or Venus be in Lagna along with the Moon, or be in angle from Lagna. If Mercury, Jupiter, or Venus be in 4th, 7th, or 10th from Lagna, or be in the company of Moon in Lagna, the native will enjoy royal fortunes.

ससौरे सकुजे वापि लग्ने मेषे वृषे हरौ
राश्यंशसदृशौ गात्रे स जातो नालवेष्टितः ८

**8. Coiled Birth.** If there be a birth in one of Aries, Taurus and Leo Lagnas, containing either Saturn, or Mars, the birth of the child is with a coil around a limb. The corresponding limb will be in accordance with the Rāśi, or Navāmśa, rising.

चतुष्पदगतो भानुः परे वीर्यसमन्विताः

द्विस्वभावगता जातौ यमलाविति निर्दिशेत् ९

**9. Birth of Twins.** The native, who has Sun in a quadruped Rāśi, while others are in Dual Rāśis with strength, is born, as one of the twins.

रवौन्दू एकभावस्थावेकांशकसमन्वितौ
त्रिमात्रा च थिभिर्मासैः पित्रा भ्रात्रा च पोषितः १०

**10. To Be Nurtured by Three Mothers.** If Sun and Moon join in one and the same House and fall in one Navāmśa, the native will be nurtured by three different mothers for the first three months from its birth and will later on be brought up by its father and brother**.**

एवमेव फलं वाच्यं चन्द्रादपि सदा बुधैः
अथ जातनरस्याङ्गे व्रणचिह्नादिकं ब्रुवे ११

**11. Important.** The learned in Jyotishya should base the effects on Moon also, as are applicable to Lagna. Now explained are clues to know of ulcers, identity marks etc. on ones person.

शिरो नेत्रे तथ कर्णौ नासिके च कपोलकौ
हनूर्मुखं च लग्नाद्या तनावाद्यदृकाणके १२

मध्यद्रेष्काणगे लग्ने कण्ठोंऽसौ च भुजौ तथा
पार्श्वे च हृदये क्रोडे नाभिश्चेति यथाक्रमम् १३

वस्तिर्लिङ्गगुदे मुष्कावूरू जानू च जंघके
पादश्चेत्युदितैर्वाममङ्गं ज्ञेयं तृतीयके १४

**12-14. Decanates and Bodily Limbs.** Head, eyes, ears, nose, temple, chin and face is the order of limbs, denoted (by the v6thous Houses), when the first decanate of a Rāśi ascends. In the case of the second decanate ascending the order is neck, shoulder, arm, side, heart, stomach and navel. The order for the third decanate ascending is pelvis, anus/penis, testicles, thigh, knee, calf and foot. The portion already risen indicates left side of the body (while the one yet to rise, i.e. the invisible half, denotes the right side of the body).

यस्मिन्नङ्गे स्थितः पापो व्रणं तत्र समादिशेत्
नियतं सबुधैः क्रूरैः सौम्यैर्लक्ष्म वदेद् बुधः १५

**15. Limbs Affected.** The limb, related to a malefic by occupation, will have ulcers, or scars, while the one, related to a benefic, will have a mark (like moles etc).

**Also see Sloka 6, Ch. 4 of Saravali, which states, that a malefic, or a benefic, if be in own Rāśi, or Navāmśa, the effects will be right from birth. In other cases it will be in the course of ones life, that these effects will come to pass)**

अथ धनभावफलाध्यायः १३

धनभावफलं वच्मि शृणु त्वं द्विजसत्तम
धनेशो धनभावस्थः केन्द्रकोणगतोऽपि वा १

धनवृद्धिकरो ज्ञेयस्त्रिकस्थो धनहानिकृत्
धनदश्च धने सौम्यः पापो धनविनाशकृत् २

धनाधिपो गुरुर्यस्य धनभावगतो भवेत्
भौमेन सहितो वाऽपि धनवान् स नरो भवेत् ३

## Ch. 13. Effects of 2nd House

**1-3. Combinations for Wealth.** O excellent of the Brahmins, listen to me, speaking on the effects of 2nd House. If the Lord of 2nd is in 2nd, or is in an angle, or in trine, he will promote ones wealth (or monetary state). Should he be in 6th/8th/12th, financial conditions will decline. A benefic in 2nd will give wealth, while a malefic instead will destroy wealth.One will be wealthy, if Jupiter is in 2nd, as the Lord of 2nd, or is with Mars.

धनेशे लाभभावस्थे लाभेशे वा धनं गते

तावुभौ केन्द्रकोणस्थौ धनवान् स नरो भवेत् ४

**4.** If 2nd Lord is in 11th, while the Lord of 11th in 2nd, wealth will be acquired by the native. Alternately these two Lords may join in an angle, or in a trine.

धनेशे केन्द्रराशिस्थे लाभेशे तत्त्रिकोणगे
गुरुशुक्रयुते दृष्टे धनलाभमुदीरयेत् ५

**5.** If the Lord of 2nd is in an angle, while 11th Lord is in a trine thereof, or is aspected by, or conjunct with Jupiter and Venus, the subject will be wealthy.

धनेशो रिपुभावस्थो लाभेशस्तद्गतो यदि
धनायौ पापयुक्तौ वा दृष्टौ निर्धन एव सः ६

धनलाभाधिपावस्तौ पापग्रहसमन्वितौ
जन्मप्रभृतिदारिद्र्यं भिक्षान्नं लभते नरः ७

**6-7. Yogas for Poverty.** One will be penniless, if the Lord of 2nd House is in an evil House, while the Lord of 11th House is also so placed and 2nd House is occupied by a malefic. There will be penury right from birth and the native will have to beg even for his food, if the Lords of 2nd and 11th House are both combust, or with malefics.

षष्ठेऽष्टमे व्यये वाऽपि धनलाभाधिपौ यदि
लाभे कुजोधने राहू राजदण्डाद् धनक्षयः ८

**8. Loss of Wealth through the King**. Should the Lords of 2nd and 11th House be relegated to 6th, 8th, or 12th House, while Mars is in 11th House and Rahu is in 2nd House, the native will lose his wealth on account of royal punishments.

लाभे जीवे धने शुक्रे धनेशे शुभसंयुते
व्यये च शुभसंयुक्ते धर्मकार्ये धनव्ययः ९

**9. Expenses on Good Accounts.** When Jupiter is in 11th, Venus is in 2nd and a benefic is placed in 12th House, while 2nds Lord is conjunct with a benefic, there will be expenses on religious, or ch6thtable grounds.

स्वभोच्चस्थे धनाधीशे जातको जनपोषकः
परोपकारी ख्यातश्च विज्ञेयो द्विजसत्तम १०

स्थिते पारावतांशादौ धनेशे शुभसंयुते
तद्गृहे सर्वसम्पत्तिर्विनायासेन जायते ११

**10-11. Fame etc**. If 2nds Lord is in own Rāśi, or is exalted, the native will look after his people, will help others and also will become famous. Effortless Aquisition. If 2nds Lord is conjunct with a benefic and is in a good division, like Paravatāńś, there will be effortlessly all kinds of wealth in the natives family. (Paravatāńśdau of the text denotes Paravat, or such other higher Vargaas: 2nds Lord should be in Paravatāńś, or in Devalokāńśa, Brahmalokāńśa, Sakravahanāńś, or Sridhamāńś in the Dash Varga scheme)

नेत्रेशे बलसंयुक्ते शोभनाक्षो भवेन्नरः
षष्ठाष्टमव्ययस्थे च नेत्रवैकल्यवान् भवेत् १२

**12. Eyes.** If 2nd Lord is endowed with strength, the native will possess beautiful eyes. Should the said Planet be in 6th, 8th, or 12th House, there will be disease, or deformity of eyes.

धनेशे पापसंयुक्ते धने पापसमन्विते
पिशुनोऽसत्यवादी च वातव्याधिसमन्वितः १३

**13. Untruthful Person.** If 2nd House and its Lord are conjunct with malefics, the native will be a talebearer, will speak untruth and will be afflicted by windy diseases.

अथ सहजभावफलाध्यायः १४

अथ विक्रमभावस्य फलं वक्ष्यामि भो द्विज

सहजे सौम्ययुग्दृष्टे भ्रातृमान् विक्रमी नरः १

## Ch. 14. Effects of 3rd House

**1.** O Brahmin, I now tell you about 3rd House. Should 3rd House be conjunct with, or aspected by a benefic, the native will be endowed with co-born and be courageous.

स भौमो भ्रातृभावेशो भ्रातृभावं प्रपश्यति
भ्रातृक्षेत्रगतो वाऽपि भ्रातृभावं विनिर्दिशेत् २

**2.** If 3rds Lord along with Mars aspects 3rd House, the native will enjoy good results, due to 3rd House. Alternatively these two Planets may be in 3rd itself.

पापयोगेन तौ पापक्षेत्रयोगेन वा पुनः
उत्पाट्य सहजान् सद्यो निहन्तरौ न संशयः ३

**3.** Destruction at once of co-born will come to pass, if the said 2 Planets are together with a malefic, or in a Rāśi, owned by a malefic**.**

स्त्रीग्रहो भ्रातृभावेशः स्त्रीग्रहो भ्रातृभावगः
भगिनी स्यात् तथा भ्राता पुंगृहे पुंग्रहो यदि ४

**4. Female and Male Co-born.** If 3rds Lord is a female Planet, or, if 3rd House be occupied by female Planets, one will have sisters, born after him. Similarly male Planets and male Rāśis denote younger brothers. Should it be of mixed nature, co-born of both sexes will be obtained. These effects be declared after assessing the strength and weakness of the concerned**.**

मिश्रे मिश्रफलं वाच्यं बलाबलविनिर्णयात्
मृतौ कुजतृतीयेशौ सहोदरविनाशकौ ५

केन्द्रत्रिकोणगे वाऽपि स्वोच्चमित्रस्ववर्गगे
कारके सहजेशे या भ्रातृसौख्यं विनिर्दिशेत् ६

**5-6.** Should 3rds Lord and Mars be together in 8th House, destruction of co-born will result. Happiness in this respect will come to pass, if Mars, or 3rds Lord is in an angle, or in a trine, or in exaltation, or friendly divisions.

भ्रातृभे बुधसंयुक्ते तदीशे चन्द्रसंयुते
कारके मन्दसंयुक्ते भगिन्येकाग्रतो भवेत् ७

पश्चात् सहोदरोऽप्येकस्तृतीयस्तु मृतो भवेत्
कारके राहुसंयुक्ते सहजेशे तु नीचगे ८

पश्चात् सहोदराभावं पूर्वं तु तत्त्रयं वदेत्
भ्रातृस्थानाधिपे केन्द्रे कारके तत्त्रिकोणगे ९

जीवेन सहिते चोच्चे ज्ञेया द्वादश सोदराः
तत्र ज्येष्ठद्वियं तद्वज्ञातकाच्च तृतीयकम् १०

सप्तमं नवमं चैव द्वादशं च मृतं वदेत्
शेषाः सहोदराः षड् वै भवेयुर्दीर्घजीवनाः ११

**7-11. Number of Brothers and Sisters. If Mercury is in 3rd House, while 3rds Lord and Moon are together, as the indicator (Mars) joins Saturn, the effects are: there occurred the birth of an elder sister and there will be younger brothers. Furthermore, the third brother will die. Should Mars be conjunct with Rahu, while 3rds Lord is in his debilitation Rāśi, there will be loss of younger brothers and/or sisters, while three elder brothers and/or sisters were attained by the native. If 3rds Lord is in an angle, while the significator (Mars) is exalted in a trine and be conjunct with Jupiter, 12 will be the number of total co-born. Out of these two elders and the 3rd, the 7th, the 9th and the 12th of the younger co-born will be shortlived, while six of the said twelve will be longlived.**

व्ययेशेन युतो भौमो गुरुणा सहितोऽपि वा
भ्रातृभावे स्थिते चन्द्रे सप्तसंख्यास्तु सोदराः १२

भ्रातृस्थाने शशियुते केवलं पुङ्ग्रहेक्षिते
सहजा भ्रातरो ज्ञेयाः शुक्रयुक्तेक्षितेऽन्यथा १३

**12-13. There will be 1 co-born, if 12ths Lord (some texts read, as 11ths Lord) joins Mars and Jupiter, while 3rd House is occupied by Moon. If Moon is lonely placed in 3rd House with Aspect of male Planets, there will be younger brothers, while the Aspect of Venus denotes younger sisters.**

अग्रे जातं रविर्हन्ति पृष्ठे जातं शनैश्चरः
अग्रजं पृष्ठजं हन्ति सहजस्थो धरासुतः १४

**14. Adverse Planets. Sun in 3rd House will destroy the preborn. The afterborn will be destroyed, if Saturn is found in 3rd House. In the same situation Mars will destroy both the preborn and later-born.**

एतेषां विप्र योगानां बलाबलविनिर्णयात्
भ्रातृणां भगिनीनां वा जातकस्य फलं वदेत् १५

**15. After estimating the strength and weakness of such Yogas, the effects, related to brothers and sisters, be announced.**

अथ सुखभावफलाध्यायः १५
उक्तं तृतीयभावस्य फलं संक्षेपतो मया
सुखभावफलं चाऽथ कथयामि द्विजोत्तम १

## Ch. 15. Effects of 4th House

**1.** O excellent of the Brahmins, thus have been briefly told the effects of 3rd House. Now listen to the results, related to 4th House.

सुखेशे सुखभावस्थे लग्नेशे तद्गतेऽपि वा
शुभदृष्टे च जातस्य पूर्णं गृहसुखं वदेत् २

**2. Housing Comforts.** One will have residential comforts in full degree, if 4th is occupied by its Lord, or by Lagnas Lord and be aspected by a benefic.

स्वगेहे स्वांशके स्वोच्चे सुखस्थानाधिपो यदि
भूमियानगृहादीनां सुखं वाद्यभवं तथा ३

**3. Miscellaneous.** Should 5ths Lord be in his own House, or in own Navāmśa, or in exaltation, the native will be endowed with comforts, related to lands, conveyances, houses etc. and musical instruments.

कर्माधिपेन संयुक्ते केन्द्रे कोणे गृहाधिपे
विचित्रसौधप्राकारैर्मण्डितं तद्गृहं वदेत् ४

**4. Housing Comforts.** If 10ths Lord joins 4ths Lord in an angle, or in a trine, the native will acquire beautiful mansions.

बन्धुस्थानेश्वरे सौम्ये शुभग्रहयुतेक्षिते
शशिजे लग्नसंयुक्ते बन्धुपूज्यो भवेन्नरः ५

**5. Relatives.** Should Mercury be in Lagna, while 4ths Lord, being a benefic, is aspected by another benefic, the native will be honoured by his relatives.

मातुःस्थाने शुभयुते तदीशे स्वोच्चराशिगे
कारके बलसंयुक्ते मातुर्दीर्घायुरादिशेत् ६

**6. Long-living Mother.** If 4th House is occupied by a benefic, while its Lord is in his exaltation Rāśi, as the indicator of mother is endowed with strength, the native will have a long-living mother.

सुखेशे केन्द्रभावस्थे तथ केन्द्रस्थितो भृगुः
शशिजे स्वोच्चराशिस्थे मातुः पूर्णं सुखं वदेत् ७

**7. Happiness of Mother.** The natives mother will be happy, if 4ths Lord is in an angle, while Venus is also in an angle, as Mercury is exalted.

सुखे रवियुते मन्दे चन्द्रे भाग्यगते सति
लाभस्थानगतो भौमो गोमहिष्यादिलाभकृत् ८

**8. Quadrupeds.** Sun in 4th, Moon and Saturn in 9th and Mars in 11th House; this Yoga will confer cows and buffaloes on the native.

चरगेहसमायुक्ते सुखे तद्राशिनायके
षष्ठे व्यये स्थिते भौमे नरः प्राप्नोति मूकताम् ९

**9. Dumbness.** Should 4th House be a Movable one, while its Lord and Mars are together in 6th, or 8th House, the native will be dumb**.**

लग्नस्थानाधिपे सौम्ये सुखेशे नीचराशिगे
कारके व्ययभावस्थे सुखेशे लाभसङ्गते १०

द्वादशे वत्सरे प्राप्ते वाहनस्य सुखं वदेत्
वाहने सूर्यसंयुक्ते स्वोच्चे तद्भावनायके ११

शुक्रेण संयुते वर्षे द्वात्रिंशे वाहनं भवेत्
कर्मेशेन युते बन्धुनाथे तुङ्गांशसंयुते १२

द्विचत्वारिंशके वर्षे नरो वाहनभाग् भवेत्
लाभेशे सुखराशिस्थे सुखेशे लाभसंयुते १३

द्वादशे वत्सरे प्राप्ते जातो वाहनभाग् भवेत्
शुभं शुभत्वे भावस्य पापत्वे फलमन्यथा १४

**10-14. Conveyances.** If Lagnas Lord is a benefic, while 4ths Lord is in fall, or in 11th House and the significator (Venus) is in 12th House, the native will obtain conveyances in his 12th year. Should Sun be in 4th House, as 4ths Lord is exalted and be with Venus, one will acquire conveyances in his 32nd year. It will be in the 42nd year, that one will be endowed with conveyances, if 4ths Lord joins 10ths Lord in his (4th Lords) exaltation Navāmśa. An exchange between 11ths and 4ths Lords will confer conveyances in the 12th year. A benefic, related to 4th House (and to its Lord), will bring with him auspicious effects (regarding conveyances), while a malefic will produce only malefic effects (in respect of conveyances). Should a benefic be in 4th, aspect 4th, or in conjunct with the Lord of 4th, or a Aspect on the Lord of 4th House, then the native will be happy with conveyances and be free from accidents and dangers. A malefic, replacing the said benefic, will cause losses, concerning vehicles and reduce one to severe accidents.

अथ पञ्चमभावफलाध्यायः १६
अथ पञ्चमभावस्य कथयामि फलं द्विज
लग्नपे सुतभावस्थे सुतपे च सुते स्थिते १

केन्द्रत्रिकोणसंस्थे वा पूर्णं पुत्रसुखं वदेत्
षष्ठाष्टमव्ययस्थे तु सुताधीशे त्वपुत्रता २

सुतेशेस्तंगते वाऽपि पापाक्रान्ते च निर्बले
तदा न जायते पुत्रो जातो वा म्रियते ध्रुवम् ३

## Ch. 16. Effects of 5th House

**1-3.** O Brahmin, now I tell you the effects, related to 5th House. If the Lords of Lagna and 5th are in their own Rāśis, or in an angle, or in a trine, one will enjoy thorough happiness through his children. Should 5ths Lord be in 6th, 8th, or 12th House, there will be no offspring. Should the Lord of 5th be combust, or be with malefics and be weak, there will be no children; even, if per chance issues are obtained, they will only quit the world soon. The Conjunct of 5ths Lord with Lagnas Lord in a good House will ensure early obtainment of children apart from happiness through them. If they join in an evil House, they will prove a defect in this respect.

षष्ठस्थाने सुताधीशे लग्नेशे कुजसंयुते
म्रियते प्रथमापत्यं काकबन्ध्या च गेहिनी ४

**4.** If 5ths Lord is in 6th House, as Lagnas Lord is conjunct with Mars, the native will lose his very first child, whereafter his female will not be fertile to yield an offspring.

सुताधीशो हि नीचस्थो व्ययषष्ठाष्टमस्थितः
काकबन्ध्या भवेन्नारी सुते केतुबुधौ यदि ५

**5**. Should 5ths Lord be in fall in 6th, 8th, or 12th House, while Mercury and Ketu are in 5th House, the natives wife will give birth to one child only.

सुतेशो नीचगो यत्र सुतस्थानं न पश्यति
तत्र सौरिबुधौ स्यातां काकबन्ध्यात्वमाप्नुयात् ६

**6.** If 5ths Lord is in fall and be not in Aspect to 5th, while Saturn and Mercury are in 5th, the natives wife will give birth to one child only.

भाग्येशो मूर्तिवर्ती चेत् सुतेशो नीचगो यदि
सुते केतुबुधौ स्यातां सुतं कष्टाद् विनिर्दिशेत् ७

**7.** Should 9ths Lord be in Lagna, while 5ths Lord is in fall and Ketu is in 5th along with Mercury, obtainment of progeny will be after a great deal of ordeal.

षष्ठाष्टमव्ययस्थो वा नीचो वा शत्रुराशिगः
सुतेशश्च सुते तस्य कष्टात् पुत्रं विनिर्दिशेत् ८

**8.** If 5ths Lord is in 6th, 8th, or 12th House, or be in an inimical Rāśi, or be in fall, or in 5th itself, the native will beget issues with difficulty**.**

पुत्रभावे बुधक्षेत्रे मन्दक्षेत्रेऽथवा पुनः
मन्दे मान्दियुतै दृष्टे तदा दत्तादयः सुताः ९

**9.** Should 5th House be owned by Saturn, or Mercury and be occupied, or aspected by Saturn and Mandi, one will have adopted issues.

रविचन्द्रौ यदैकस्थावेकांशकसमन्वितौ
त्रिमातृभिरसौ याद्वा द्विपित्राऽपि च पोषितः १०

**10**. Should Sun and Moon be together in a Rāśi and in the same Navāmśa, the native will be brought up by three mothers, or two fathers.

पञ्चमे षड्ग्रहैर्युक्ते तदीशे व्ययराशिगे
लग्नेशेन्दू बलाढयौ चेत् तदा दत्तसुतोद्भवः ११

**11**. Adopted issue is indicated, if 5th is tenanted by six Planets, while its Lord is in 12th House and Moon and Lagna are endowed with strength.

सुते ज्ञजीवशुक्रैश्च सबलैरवलोकिते
भवन्ति बहवः पुत्राः सुतेशे हि बलान्विते १२

**12.** There will be many children, if 5ths Lord is strong, while 5th is aspected by strong Mercury, Jupiter and Venus.

सुतेशे चन्द्रसंयुक्ते तद्द्रेष्काणगतेऽपि वा

तदा हि कन्यकोत्पत्तिः प्रवदेद् दैवचिन्तकः १३

**13**. If 5ths Lord is with Moon, or is in her Decanate, the native will beget daughters**.**

सुतेशे चरराशिस्थे राहुणा सहिते विधौ
पुत्रस्थानः गते मन्दे परजातं वदेच्छिशुम् १४

**14.** If 5ths Lord is in a Movable Rāśi, while Saturn is in 5th, as Rahu is with Moon, the child (so born) is of questionable birth.

लग्नादष्टमगे चन्द्रे चन्द्रादष्टमगे गुरौ
पापग्रहैर्युते दृष्टे परजातो न संशयः १५

**15.** Undoubtedly the native is born of others loins, if Moon is in the 8th from Lagna, while Jupiter is in the 8th from Moon. Malefics Aspect, or Conjunct is essential in this Yoga**.**

पुत्रस्थानाधिपे स्वोच्चे लग्नाद्वा द्वित्रिकोणगे
गुरुणा संयुते दृष्टे पुत्रभाग्यमुपैति सः १६

**16**. If 5ths Lord is exalted, or be in 2nd, 5th, or 9th House, or be conjunct with, or aspected by Jupiter, obtainment of children will be there.

त्रिचतुःपापसंयुक्ते सुते सौम्याविवर्जिते
सुतेशे नीचराशिस्थे नीचसंस्थौ भवेच्छिशुः १७

**17.** One will obtain children, that will indulge in mean deeds, if 5th is occupied by three, or four malefics, while 5ths Lord is in fall. A benefic (including Mercury) in 5th is excluded in the said combination.

पुत्रस्थानं गते जीवे तदीशे भृगुसंयुते
द्वात्रिंशे च त्रयस्त्रिंशे वत्सरे पुत्रसंभवः १८

**18.** If 5th is occupied by Jupiter, while its Lord is with Venus, one will obtain an offspring in his 32nd, or 33rd year.

सुतेशे केन्द्रभावस्थे कारकेण समन्विते
षड्त्रिंशे त्रिंशदब्दे च पुत्रोत्पत्तिं विनिर्दिशेत् १९

**19.** Should 5ths Lord be in an angle along with Jupiter, the Karak, one will beget a child at the age of 30, or 36.

लग्नाद् भाग्यगते जीवे जीवाद् भाग्यगते भृगौ
लग्नेशे भृगुयुक्ते वा चत्वारिंशे सुतं वदेत् २०

**20.** If Jupiter is in 9th House, while Venus is in the 9th from Jupiter along with Lagnas Lord, one will beget a child at the age of 40.

पुत्रस्थानं गते राहौ तदीशे पापसंयुते
नीचराशिगतो जीवो द्वात्रिंशे पुत्रमृत्युदः २१

**21.** The native will at the age of 32 lose his child, if Rahu is in 5th, 5ths Lord is in Conjunct with a malefic and Jupiter is in debilitation.

जीवात् पञ्चमगे पापे लग्नात् पञ्चमगेऽपि च
षड्त्रिंशे च त्रयस्त्रिंशे चत्वारिंशे सुतक्षयः २२

**22.** There will be loss of children at 33 and 36, if a malefic is in the 5th from Jupiter, while another is in the 5th from Lagna.

लग्ने मान्दितमायुक्ते लग्नेशे नीचराशिगे
षड्पञ्चाशत्तमेऽब्दे च पुत्रशोकसमाकुलः २३

**23.** Should Mandi be in Lagna, while Lagnas Lord is in fall, grief on account of loss of child at the age of 56 will come to pass.

चतुर्थे पापसंयुक्ते षष्ठभावे तथैव हि
सुतेशे परमोच्चस्थे लग्नेशेन समन्विते २४

कारके शुभसंयुक्ते दशसंख्यास्तु सूनवः
परमोच्चगते जीवे धनेशे राहुसंयुते २५

भाग्येशे भाग्यसंयुक्ते संख्याता नव सूनवः
पुत्रभाग्यगते जीवे सुतेशे बलसंयुते २६

धनेशे कर्मभावस्थे वसुसंख्यास्तु सूनवः
पञ्चमात् पञ्चमे मन्दे सुतस्थे च तदीश्वरे २७

सूनवः सप्तसंख्यश्च द्विगर्भे यमलौ वदेत्
वित्तेशे पञ्चमस्थाने सतस्थे च सुताधिपे २८

जायन्ते षट् सुतास्तस्य तेषां च त्रिप्रजामृतिः
मन्दात् पञ्चमगे जीवे जीवात् पञ्चमगे शनौ २९

सुतभे पापसंयुक्ते पुत्रमेकं विनिर्दिशेत्
पञ्चमे पापयुक्ते वा जीवात् पञ्चमगे शनौ ३०

पत्नयन्तरे पुत्रलाभं कलत्रत्रयभाग् भवेत्
पञ्चमे पापसंयुक्ते जीवात् पञ्चमगे शनौ ३१

लग्नेशे धनभावस्थे सुतेशो भौमसंयुतः
जातं जातं शिशुंहन्ति दीर्घायुश्च स्वयं भवेत् ३२

**24-32. Number of Children.** There will be 10 sons, if 4th House and 6th House are occupied by malefics, while 5ths Lord is in deep exaltation, joining Lagnas Lord, as Jupiter is with another benefic. Nine will be the number of sons, that one will beget, if Jupiter is in deep exaltation, as Rahu is with 2nds Lord and 9th is occupied by its own Lord. There will be eight sons, if Jupiter is in 5th, or 9th House, while 5ths Lord is endowed with strength and 2nds Lord is in 10th House. Saturn in 9th House, while 5ths Lord is in 5th itself, gives 7 sons, out of which twins will be born twice. If 5ths Lord is in 5th in Conjunct with 2nds Lord, there will be birth of 7 sons, out of which 3 will pass away. Only one son is denoted, if there be a malefic in 5th House, while Jupiter is in the 5th from Saturn, or vice versa. If 5th House has a malefic in it, or, if Saturn is in the 5th from Jupiter, the native will beget offspring only through his second, or third wife. Should 5th be occupied by a malefic, while Jupiter is conjunct with Saturn in 5th House, as Lagnas Lord is in 2nd House and 5ths Lord is conjunct with Mars, one will live long, but lose his children one after the other, as they are born.

अथ षष्ठभावफलाध्यायः १७

अथ विप्र फलं वक्ष्ये षष्ठभावसमुद्भवम्
देहे रोगव्रणाद्यं तत् श्रूयतामेकचेतसा १

## Ch. 17. Effects of 6th House

**1**. O Brahmin, following are the effects, produced by 6th House, relating to diseases, ulcers etc. Listen to this attentively.

षष्ठाधिपः स्वगेहे वा देहे वाऽप्यष्टमे स्थितः
तदा व्रणो भवेद्देहे षष्ठराशिसमाश्रते २

**1.** Ulcers/Bruises. Should 6ths Lord be in 6th itself, or in Lagna, or 8th, there will be ulcers, or bruises on the body. The Rāśi, becoming 6th House, will lead to the knowledge of the concerned limb**.**

एवं पित्रादिभावेशास्तत्तत्कारकसंयुताः
व्रणाधिपयुताश्चापि षष्ठाष्टमयुता यदि ३

तेषामपि व्रणं वाच्यमादित्ये न शिरोव्रणम्
इन्दुना च मुखे कण्ठे भौमेन ज्ञेन नाभिषु ४

गुरुणा नासिकायां च भृगुणा नयने पदे
शनिना राहुणा कुक्षौ केतुना च तथा भवेत् ५

**3-5. Relatives Affected.** The Karak of a relative, or the Lord of such a House, joining 6ths Lord, or being in 6th, or 8th House, indicates ulcers/bruises to such a relative, like father. Sun with such lordship and in such a House denotes such affectation of head, Moon of the face, Mars of the neck, Mercury of the navel, Jupiter of the nose, Venus of the eyes, Saturn of the feet and the Rahu and Ketu of the abdomen.

लग्नाधिपः कुजक्षेत्रे बुधभे यदि संस्थितः
यत्र कुत्र स्थितो ज्ञेन वीक्षितो मुखरुक्प्रदः ६

**6. Facial Diseases.** Should Lagnas Lord be in a Rāśi of Mars, or of Mercury and has a Aspect on Mercury, there will be diseases of the face.

लग्नाधिपौ कुजबुधौ चन्द्रेण यदि संयुतौ
राहुणा शनिना सार्द्धं कुष्ठं तत्र विनिर्दिशेत् ७

लग्नाधिपं विना लग्ने स्थितश्चेत्तमसा शशी
श्वेतकुष्ठं तदा कृष्णकुष्ठं च शनिना सह ८

**7-8. Leprosy.** Mars, or Mercury, having ownership of the ascending Rāśi and joining Moon, Rahu and Saturn, will cause leprosy. If Moon is in Lagna, which is not however Cancer, and be with Rahu, there will occur white leprosy. Saturn in place of Rahu will cause black leprosy, while Mars similarly will afflict one with blood-leprosy.

कुजेन रक्तकुष्ठं स्यात्तत्तदेवं विचारयेत्
लग्ने षष्ठाष्टमाधोशौ रविणा यदि संयुतौ ९

ज्वरगण्डः कुजे ग्रन्थिः शस्त्रव्रणमथापि वा
बुधेन पित्तं गुरुणा रोगाभावं विनिर्दिशेत् १०

स्त्रीभिः शुक्रेण शशिना वायुना संयुतो यदि
गण्डश्चाण्डालतो नाभौ तमःकेतुयुते भयम् ११

चन्द्रेण गण्डः सलिलैः कफश्लेष्मादिना भवेत्

एवं पित्रादिभानां तत्तत्कारकयोगतः १२

**9-12. Diseases in General**. When Lagna is occupied by the Lords of 6th and 8th House along with Sun, the native will be afflicted by fever and tumors. Mars, replacing Sun, will cause swelling and hardening of the blood vessels and wounds and hits by weapons. Mercury so featuring will bring in bilious diseases, while Jupiter in similar case will destroy any disease. Similarly Venus will cause diseases through females, Saturn windy diseases, Rahu danger through low-caste-men and Ketu navel diseases. Moon in Conjunct with the Lords of 6th and 8th House will inflict dangers through water and phlegmatic disorders. Similar estimates be made from the respective significators and Houses for relatives, like father.

गण्डं तेषां वदेदेवमुह्यमत्र मनीषिभिः
रोगस्थानगते पापे तदीशे पापसंयुते १३

राहुणा संयुते मन्दे सर्वदा रोगसंयुतः
रोगस्थानगते भौमे तदीशे रंध्रसंयुते १४

षड्वर्षे द्वादशे वर्षे ज्वररोगी भवेन्नरः
षष्ठस्थानगते जीवे तद्गृहे चन्द्रसंयुते १५

द्वाविंशैकोनविंशेऽब्दे कुष्ठरोगं विनिर्दिशेत्
रोगस्थानं गतो राहुः केन्द्रे मान्दिसमन्विते १६

लग्नेशे नाशराशिस्थे षड्विंशे च्चयरोगता
व्ययेशे रोगराशिस्थे तदीशे व्ययराशिगे १७

त्रिंशद्वर्षैकोनवर्षे गुल्मरोगं विनिर्दिशेत्
रिपुस्थेनगते चन्द्रे शशिना संयुते सति १८

पञ्चपञ्चाशदब्देषु रक्तकुष्ठं विनिर्दिशेत्
लग्नेशे लग्नराशिस्थे मन्दे शत्रुसमन्विते १९

**13-19 TIMING OF ILLNESS**. The native will be afflicted by illness throughout life, if Saturn is with Rahu, while 6th Lord and 6th House are conjunct with malefics. One will suffer from (severe) fever at the age of 6 and at the age of 12, if Mars is in 6th, while 6th Lord is in 8th. If the Moon is in Sagittarius/Pisces, while Jupiter is in 6th from Lagna, one will suffer from leprosy at the age of 19 and 22. If Rahu is in 6th, Lagna Lord is in 8th and Mandi is in an angle, consumption will trouble the native at the age of 26. Spleen disorders will be experienced at the age of 29 and 30, if the Lords of 6th and 12th are in exchange of their Rāśis. Saturn and Moon together in 6th will inflict blood-leprosy at the age of 45. If Saturn is with an inimical planet, while Lagna Lord is in Lagna itself, windy disorders (like rheumatism) will trouble the native at the age of 59.

एकोनषष्टिवर्षे तु वातरोगार्दितो भवेत्
रंध्रेशे रिपुराशिस्थे व्ययेशे लग्नसंस्थिते २०

चन्द्रे षष्ठेश्संयुक्ते वसुवर्षे मृगाद्भयम्
षष्ठाष्टमगतो रहुस्तस्मादष्टगते शनौ २१

जातस्य जन्मतो विप्र प्रथमे च द्वितीयके
वत्सरेऽग्निभयं तस्य त्रिवर्षे पक्षिदोषभाक् २२

**20-22. <u>Unfortunate years</u>.** Should Moon be conjunct with 6th Lord, while the 8th Lord is in 6th and the 12th Lord is in Lagna, the native will be troubled by animals at the age of eight. O Brahmin, if Rahu is in 6th, while Saturn is in 8th from the said Rahu, the child will have danger through fire at the age of 1 and 2, while in 3rd year birds will bring some evils**.**

षष्ठाष्टमगते सूर्ये तद्व्यये चन्द्रसंयुते
पंचमे नवमेऽब्दे तु जलभीतिं विनिर्दिशेत् २३

अष्टमे मन्दसंयुक्ते तस्माद्वा द्वादशे कुजः
त्रिंशाब्दे दशमेऽब्दे तु स्फोटकादि विनिर्दिशेत् २४

रंध्रेशे राहुसंयुक्ते तदंशे रंध्रकोणगे
द्वाविंशेऽष्टादशे वर्षे ग्रन्थिमेहादिपीडनम् २५

**23-25<u>. Unfortunate years (continued).</u>** Danger through water will have to be feared during 5th and 9th years, if Sun is in 6th, or 8th, while Moon is in 12th from the said Sun. Saturn in 8th, as Mars is in 7th, all cause small-pox in 10th year and in 30th year of age. If 8th Lord joins Rahu in an angle/trine from 8th House and be in 8th in Navamsa, the subject will be troubled by swelling of blood vessels, urinary disorders etc. during the 18th year and the 22nd year.

लाभेशे रिपुभावस्थे रोगेशे लाभराशिगे
एकत्रिंशत्समे वर्षे शत्रुमूलाद्धनव्ययः २६

**26.** Loss through enemies. Loss of wealth will come to pass during the 31st year, if 11th and 6th Lords exchange their Rāśis.

सुतेशे रिपुभावस्थे षष्ठेशे गुरुसंयुते
व्ययेशे लग्नभावस्थे तस्य पुत्रो रिपुर्भवेत् २७

**27. <u>Inimical sons.</u>** Ones own sons will be his enemies, if 5th Lord is in 6th, while 6th Lord is with Jupiter. Simultaneously 12th Lord should be in Lagna**.**

लग्नेशे षष्ठराशिस्थे तदीशे षष्ठराशिगे
दशमैकोनविंशेऽब्दे शुनकाद्भीतिरुच्यते २८

**28. <u>Fear from dogs.</u>** There will be fear from dogs during the 10th and 19th year, if the Lagna Lord and the 6th Lord are in exchange**.**

अथ जायाभावफलाध्यायः १८

जायाभावफलं वक्ष्ये शृणु त्वं द्विजसत्तम
जायाधिपे स्वभे स्वोच्चे स्त्रीसुखं पूर्णमादिशेत् १

## Ch. 18. Effects of 7th House

**1**. O excellent of the Brahmins, listen to me, detailing the effects of the 7th House. If 7th Lord is in his own Rāśi, or in exaltation, one will derive full happiness through his wife (and marriage).

कलत्रपो विना स्वर्क्षं व्ययषष्ठाष्टमस्थितः
रोगिणीं कुरुते नारीं तथा तुङ्गादिकं विना २

**2. Sick wife.** Should 7th Lord be in 6th, 8th, or 12th, the wife will be sickly. This however does not apply to own House, or exaltation placement, as above.

सप्तमे तु स्थिते शुक्रेऽतीवकामी भवेन्नरः
यत्रकुत्रस्थिते पापयुते स्त्रीमरणं भवेत् ३

**3. Excessive Libidinousness/Death of Wife.** If Venus is in 7th, the native will be exceedingly libidinous. If Venus conjunct a malefic in any House, it will cause loss of wife.

जायाधीशः शुभैर्युक्तो दृष्टो वा बलसंयुतः
तदा जातो धनी मानी सुखसौभाग्यसंयुतः ४

नीचे शत्रुगृहेऽस्ते वा निर्बले च कलत्रपे
तस्यापि रोगिणी भार्या बहुभार्यो नरो भवेत् ५

**4-5. The 7th lord.** Should 7th Lord be endowed with strength and be conjunct with, or be aspected by a benefic, the native will be wealthy, honourable, happy and fortunate. Conversely, if 7th Lord is in fall, or is combust, or is in an enemy Rāśi, one will acquire sick wives and many wives.

मन्दभे शुक्रगेहे वा जायाधीशे शुभेक्षिते
स्वोच्चगे तु विशेषेण बहुभार्यो नरो भवेत् ६

**6. Plurality of wives** If 7th Lord is in a Rāśi of Saturn, or of Venus and be aspected by a benefic, there will be many wives. Should 7th Lord be particularly in exaltation, the same effects will come to pass.

वन्ध्यासङ्गो मदे भानौ चन्द्रे राशिसमस्त्रियः
कुजे रजस्वलासङ्गो वन्ध्यासङ्गश्च कीर्तितः ७

बुधे वेश्या च हीना च वणिक् स्त्री वा प्रकीर्तिता
गुरौ ब्राह्मणभार्या स्याद्गर्भिणीसङ्ग एव च ८

**7-8. Miscellaneous matters.** The native will befriend barren females, if Sun is in 7th. Moon therein will cause association with such female, as corresponding to the Rāśi, becoming 7th. Mars, placed in 7th, will denote association with marriageable girls (those with menses), or with barren females. Mercury indicates harlots, mean females and females, belonging to traders community. Wife of a Brahmin, or a pregnant female will be in the natives association, if Jupiter is in 7th. Base females and females, having attained their courses, are denoted by Saturn, Rahu/Ketu in 7th.

हीना च पुष्पिणी वाच्या मन्दराहुफणीश्वरैः
कुजेऽथ सुस्तनी मन्दे व्याधिदौर्बल्यसंयुता ९

**9**. Mars denotes a female with attractive breasts. Saturn indicates sick and weak spouse. Jupiter will bring a spouse with hard and prominent breasts. Venus will bring one with bulky and excellent breasts.

कठिनोर्ध्वकुचार्ये च शुक्रे स्थूलोत्तमस्तनी
पापे द्वादशकामस्थे क्षीणचन्द्रस्तु पञ्चमे १०

जातश्च भार्यावश्यः स्यादिति जातिविरोधकृत्
जामित्रे मन्दभौमे च तदीशे मन्दभूमिजे ११

वेश्या वा जारिणी वाऽपि तस्य भार्या न संशयः
भौमांशकगते शुक्रे भौमक्षेत्रगतेऽथवा १२

भौमयुक्ते च दृष्टे वा भगचुम्बनभाग् भवेत्
मन्दांशकगते शुक्रे मन्दक्षेत्रगतेऽपि च १३

**10-13.** Malefics in 12th and 7th, while decreasing Moon is in 5th denote, that the native will be controlled by spouse, who will be inimical to the race (or family). If 7th House is occupied, or owned by Saturn/Mars, the native will beget a harlot, as his spouse, or he will be attached to other illegally. Should Venus be in a Navamsa of Mars,

मन्दयुक्ते च दृष्टे च शिश्नचुम्बनतत्परः
दारेशे स्वोच्चराशिस्थे मदे शुभसमन्विते १४

लग्नेशो बलसंयुक्तः कलत्रस्थानसंयुतः

तद्भार्या सद्गुणोपेता पुत्रपौत्रप्रवर्धिनी १५

**14-15. <u>Worthy spouse</u>.** or in a Rasi of Mars, or receive a Aspect from, or be conjunct with Mars, the native will kiss the private parts of the female. If Venus is so related to Saturn, the native will kiss the private parts of the male. The native will beget a spouse endowed with (the seven principal) virtues, who will expand his dynasty by sons and grandsons, if the 7th Lord is exalted, while 7th is occupied by strong Lagna Lord and a benefic.

कलत्रे तत्पतौ वापि पापग्रहसमन्विते
भार्याहानिं वदेत् तस्य निर्बले च विशेषतः १६

**16. <u>Evils to spouse</u>.** If 7th House, or its Lord is conjunct with a malefic the natives wife will incur evils, especially, if 7th House, or its Lord is bereft of strength.

षष्ठाष्टमव्ययस्थाने मन्देशो दुर्बलो यदि
नीचराशिगतो वापि दारनाशं विनिर्दिशेत् १७

**17. <u>Loss of spouse</u>.** If 7th Lord is devoid of strength and is relegated to 6th, 8th, or 12th, or, if 7th Lord is in fall, the natives wife will be destroyed (i.e. she will die early).

कलत्रस्थानगे चन्द्रे तदीशे व्ययराशिगे
कारको बलहीनश्च दारसौख्यं न विद्यते १८

**18. <u>Lack of conjugal felicity</u>.** If Moon is in 7th, as 7th Lord is in 12th and the Karaka (indicator Venus) is bereft of strength, the native will not be endowed with marital happiness.

सप्तमेशे स्वनीचस्थे पापर्क्षे पापसंयुते
सप्तमे क्लीबराश्यंशे द्विभार्यो जातको भवेत् १९

कलत्रस्थानगे भौमे शुक्रे जातमित्रगे शनौ
लग्नेशे रन्ध्रराशिस्थे कलत्रत्रयवान् भवेत् २०

द्विस्वभावगते शुक्रे स्वोच्चे तद्राशिनायके
दारेशे बलसंयुक्ते बहुदारसमन्वितः २१

**19-21. Plurality of wives.** One will have two wives, if 7th Lord is in fall, or in a malefic Rāśi along with a malefic, while 7th House, or the 7th Navamsa belong to a eunuch planet. If Mars and Venus are in 7th, or, if Saturn is 7th, while the Lord of Lagna is in 8th, the native will have 3 wives. There will be many wives, if Venus is in a Dual Rāśi, while its Lord is in exaltation, as 7th Lord is endowed with strength.

दारेशे शुभराशिस्थे स्वोच्चस्वर्क्षगतो भृगुः
पञ्चमे नवमेऽब्दे तु विवाहः प्रायशो भवेत् २२

**22. Timing of marriage (upto Sloka 34).** If 7th Lord is in a benefics House (or in 9th, as Subha Rāśi so means), while Venus is exalted, or is in own Rāśi, the native will marry at the age of 5, or 9.

दारस्तानं गते सूर्ये तदीशे भृगुसंयुते
सप्तमैकादशे वर्षे विवाहः प्रायशो भवेत् २३

**23**. If Sun is in 7th, while his depositor is conjunct with Venus, there will be marriage at 7th, or 11th year of age.

कुटुम्बस्थानगे शुक्रे दारेशे लाभराशिगे
दशमे षोडशाऽब्दे च विवाहः प्रायशो भवेत् २४

**24.** Venus in 2nd, while 7th Lord is in 11th will give marriage at the age of 10, or 16.

लग्नकेन्द्रगते शुक्रे लग्नेशे मन्दराशिगे
वत्सरैकादशे प्राप्ते विवाहं लभते नरः २५

**25.** Marriage will take place during the 11th year, if Venus is in an angle from Lagna, while Lagna Lord is in Capricorn, or Aquarius**.**

लग्नात् केन्द्रगते शुक्रे तस्मात् कामगते शनौ
द्वादशैकोनविंशे च विवाहः प्रायशो भवेत् २६

**26.** The native will marry at 12, or l9, if Venus is in an angle from the Lagna, while Saturn is in 7th counted from Venus.

चन्द्राज्जामित्रगे शुक्रे शुक्राज्जामित्रगे शनौ
वत्सरेऽष्टादशे प्राप्ते विवाहं लभते नरः २७

**27.** Should Venus be in 7th from Moon, while Saturn is in 7th from Venus, marriage will be in the 18th year**.**

धनेशे लाभराशिस्थे लग्नेशे कर्मराशिगे
अब्दे पञ्चदशे प्राप्ते विवाहं लभते नरः २८

**28.** Marriage will be in the 15th year, if 2nd Lord is in 11th, while Lagna Lord is in 10th.

धनेशे लाभराशिस्थे लाभेशे धनराशिगे
अब्दे त्रयोदशे प्राप्ते विवाहं लभते नरः २९

**29.** An exchange between the Lords of 2nd and 11th will bring marriage 13 years after birth**.**

रन्ध्राज्जामित्रगे शुक्रे तदीशे भौमसंयुते
द्वाविंशे सप्तविंशेऽब्दे विवाहं लभते नरः ३०

**30.** Ones 22nd/27th year will confer marriage, if Venus is in 7th from the 8th House (i.e. 2nd from Lagna), while his depositor is conjunct with Mars.

दारांशकगते लग्ननाथे दारेश्वरे व्यये
त्रयोविंशे च षड्विंशे विवाहं लभते नरः ३१

**31.** Should 7th Lord be in 12th, while the natal Lord is in 7th in Navamsa, marriage will be in 23rd/26th year of age.

रन्ध्रेशे दारराशिस्थे लग्नांशे भृगुसंयुते
पञ्चविंशे त्रयस्त्रिंशे विवाहं लभते नरः ३२

**32.** Either the 25th year, or the 33rd year will bring marriage, if 8th Lord is in 7th, as Venus is in Navamsa Lagna.

भाग्याद्भाग्यगते शुक्रे तद्द्वये राहुसंयुते
एकत्रिंशात्त्रयस्त्रिंशे दारलाभं विनिर्दिशेत् ३३

**33.** Should Venus be in 9th from 9th (i.e. in 5th House), while Rahu is in one of the said Houses (i.e. in 5th/9th), marriage will take place during 31st, or 33rd year.

भाग्याज्जामित्रगे शुक्रे तद्द्यूने दारनायके
त्रिंशे वा सप्तविंशाब्दे विवाहं लभते नरः ३४

**34.** The native will marry at 30, or 27, if Venus is in Lagna, while the 7th Lord is in 7th itself.

दारेशे नीचराशिस्थे शुक्रे रन्ध्रारिसंयुते
अष्टादशे त्रयस्त्रिंशे वत्सरे दारनाशनम् ३५

मदेशे नाशराशिस्थे व्ययेशे मदराशिगे
तस्य चैकोनविंशाब्दे दारनाशं विनिर्दिशेत् ३६

कुटुम्बस्थानगो राहुः कलत्रे भौमसंयुते
पाणिग्रहे च त्रिदिने सर्पदष्टे वधूमृतिः ३७

रन्ध्रस्थानगते शुक्रे तदीशे सौरिराशिगे
द्वादशैकोनविंशाब्दे दारनाशं विनिर्दिशेत् ३८

लग्नेशे नीचराशिस्थे धनेशे निधनं गते
त्रयोदशे तु सम्प्राप्ते कलत्रस्य मृतिर्भवेत् ३९

**35-39. Timing of wife's death.** Loss of wife will occur in the 18th year, or 33rd year of age of the native, if 7th Lord is in fall, while Venus is in 8th. One will lose his spouse in his 19th year, if 7th Lord is in the 8th, while 12th Lord is in 7th. The natives wife will die within three days of marriage due to snake bite, if the native has Rahu in 2nd and Mars in 7th. If Venus is in 8th, while his depositor is in a Rāśi of Saturn, death of wife will take place during the natives 12th, or 21st year of age. Should the ascendat Lord be in his Rāśi of debilitation, as 2nd Lord is in 8th, loss of wife will occur in the 13th year of age.

शुक्राज्जामित्रगे चन्द्रे चन्द्राज्जामित्रगे बुधे
रन्ध्रेशे सुतभावस्थे प्रथमं दशमाब्दिकम् ४०

द्वाविंशे च द्वितीयं च त्रयस्त्रिंशे तृतीयकम्
विवाहं लभते मर्त्यो नाऽत्र कार्या विचारणा ४१

**40-41. Three marriages.** Should Moon be in 7th from Venus, while Mercury is in 7th from Moon and 8th Lord is in 5th (from the Lagna), there will be marriage in 10th year followed by another in the 22nd year and yet another in the 33rd year.

षष्ठे च भवने भौमः सप्तमे राहुसंस्थितिः
अष्टमे च यदा सौरिस्तस्य भार्या न जीवति ४२

**42. Death of wife.** If 6th, 7th and 8th are in their order occupied by Mars, Rahu and Saturn, the natives wife will not live (long).

अथ आयुर्भावफलाध्यायः १९

आयुर्भावफलं चाऽथ कथयामि द्विजोत्तम
आयुःस्थानाधिपः केन्द्रे दीर्घमायुः प्रयच्छति १

## Ch. 19. Effects of 8th House

**1. Long Life.** O excellent of the Brahmins, listen to me speak on the effects of 8th House. If 8ths Lord is in an angle, long life is indicated.

आयुस्थानाधिपः पापैः सह तत्रैव संस्थितः
करोत्यल्पायुषं जातं लग्नेशोऽप्यत्र संस्थितः २

**2. Short Life.** Should 8ths Lord join Lagnas Lord, or a malefic and be in 8th itself, the native will be short lived.

एवं हि शनिना चिन्ता कार्या तर्कैर्विचक्षणैः
कर्माधिपेन च तथा चिन्तनं कार्यमायुषः ३

**3. Saturn and 10ths Lord about Longevity.** Similarly consider Saturn and 10ths Lord in the matter of longevity. 10ths Lord is in 8th along with a malefic Planet and/or Lagnas Lord.

षष्ठे व्ययेऽपि षष्ठेशो व्ययाधीशो रिपौ व्यये
लग्नेऽष्टमे स्थितो वाऽपि दीर्घमायुः प्रयच्छति ४

स्वस्थाने स्वांशके वाऽपि मित्रेशे मित्रमन्दिरे
दीर्घायुषं करोत्येव लग्नेशोऽष्टमपः पुनः ५

लग्नाष्टमपकर्मेशमन्दाः केन्द्रत्रिकोणयोः
लाभे वा संस्थितास्तद्वद् दिशेयुर्दीर्घमायुषम् ६

एवं बहुविधा विद्वन्नायुर्योगाः प्रकीर्तिताः
एषु यो बलवांस्तस्याऽनुसारादायुरादिशेत् ७

**4-7. Long Life.** There will be long life, if 6ths Lord is in 12th, or, if 6ths Lord is in 6th, as 12ths Lord is in 12th, or, if 6ths Lord and 12ths Lord are in Lagna and 8th. If the Lords of 5th, 8th and 1st House are in own Navāmśaas, own Rāśis, or in friendly Rāśis, the native will enjoy a long span of life. Should the Lords of Lagna, 8th and 10th House and Saturn are all disposed severally in an angle, in a trine, or in 11th House, the subject will live long. Like these, there are many other Yogas, dealing with the issue of longevity. The strength and weakness of the Planets

concerned be estimated in deciding longevity

अष्टमाधिपतौ केन्द्रे लग्नेशे बलवर्जिते
विंशद्वर्षाण्यसौ जीवेद् द्वात्रिंशत्परमायुषम्  ८

रन्ध्रेशे नीचराशिस्थे रन्ध्रे पापग्रहैर्युते
लग्नेशे दुर्बले जन्तुरल्पायुर्भवति ध्रुवम्  ९

रन्ध्रेशे पापसंयुक्ते रन्ध्रे पापग्रहैर्युते
व्यये क्रूरग्रहाक्रान्ते जातमात्रं मृतिर्भवेत्  १०

केन्द्रत्रिकोणगाः पापाः शुभाः षष्ठाष्टगा यदि
लग्ने नीचस्थरन्ध्रेशो जातः सद्यो मृतो भवेत्  ११

पञ्चमे पापसंयुक्ते रन्ध्रेशे पापसंयुते
रन्ध्रे पापग्रहैर्युक्ते स्वल्पमायुः प्रजायते  १२

रन्ध्रेशे रन्ध्रराशिस्थे चन्द्रे पापसमन्विते
शुभदृष्टिविहीने च मासान्ते च मृतिर्भवेत्  १३

**8-13. Short Life.** Ones span of life will be between 20 and 32 years, if Lagnas Lord is weak, while 8ths Lord is an angle. The native will only be short-lived, if 8ths Lord is in fall, while 8th House has a malefic in it and 1st House is bereft of strength. Death will be instant at birth, if 8th House, 8ths Lord and 12th House are all conjunct malefics. Malefics in angles and/or trines and benefics in 6th and/or 8th House, while 1st House has in it 8ths Lord in fall: this Yoga will cause immediate end. If 5th and 8th House and 8ths Lord are all conjunct malefics, the life span will be very brief. Within a month of birth, death will befall the child, if 8ths Lord is in 8th itself, while Moon is with malefics and be bereft of beneficial Aspect**.**

लग्नेशे स्वोच्चराशिस्थे चन्द्रे लाभसमन्विते
रन्ध्रस्थानगते जीवे दीर्घमायुर्न संशयः  १४

लग्नेशोऽतिबली दृष्टः केन्द्रसंस्थैः शुभग्रहैः
धनैः सर्वगुणैः सार्धं दीर्घमायुः प्रयच्छति  १५

**14-15. Long Life (again).** One will be long-lived, if Lagnas Lord is in exaltation, while Moon and Jupiter are, respectively, in 11th and 8th House. If Lagnas Lord is exceedingly strong and receives a Aspect from a benefic, which is placed in an angle, the person concerned will be wealthy, virtuous and long-lived.

अथ भाग्यभावफलाध्यायः २०
अथ भाग्यभावं विप्र फलं वक्ष्ये तवाऽग्रतः
सबलो भाग्यपे भाग्ये जातो भाग्ययुतो भवेत् १

## Ch. 20. Effects of 9th House

**(1) Combinations for Fortunes.** O Brahmin, now listen to the effects of 9th House. One will be fortunate (or affluent), if 9ths Lord is in 9th House with strength.

भाग्यस्थानगते जीवे यदीशे केन्द्रसंश्रस्थिते
लग्नेशे बलसंयुक्ते बहुभाग्ययुतो भवेत् २

**(2)** Should Jupiter be in 9th House, while 9ths Lord is in an angle and Lagnas Lord is endowed with strength, one will be extremely fortunate.

भाग्येशे बलसंयुक्ते भाग्ये भृगुसमन्विते
लग्नात् केन्द्रगते जीवे पिता भाग्यसमन्वितः ३

**3. Fortunate (Affluent) Father**. If 9ths Lord is with strength, as Venus is in 9th, while Jupiter is in an angle from 1st House, the natives father is fortunate.

भाग्यस्थानाद् द्वितीये वा सुखे भौमसमन्विते
भाग्येशे नीचराशिस्थे पिता निर्धन एव हि ४

**4. Indigent Father.** If 9ths Lord is debilitated, while the 2nd and/or the 4th from 9th House is occupied by Mars, the natives father is poor.

भाग्येशे परमोच्चस्थे भाग्यांशे जीवसंयुते
लग्नाच्चतुष्टये शुक्रे तत्पिता दीर्घजीवनः ५

**5. Long-living Father**. Should 9ths Lord be in deep exaltation, while Venus is in an angle from 1st House and Jupiter is in the 9th from Navāmśa Lagna, the father of the native will enjoy a long span of life.

भाग्येशे केन्द्रभावस्ये गुरुणा च निरीक्षिते
तत्पिता वाहनैर्युक्तो राजा वा तत्समो भवेत् ६

**6. Royal Status for Father.** If 9ths Lord is an angle and receives a Aspect from Jupiter, the natives father will be a king endowed with conveyances, or be equal to a king.

भाग्येशे कर्मभावस्थे कर्मेशे भाग्यराशिगे
शुभदृष्टे धनाढ्यश्च कीर्तिमांस्तत्पिता भवेत् ७

**7. Wealthy and Famous Father.** Should 9ths Lord be in 10th House, while 10ths Lord receives a Aspect from a benefic the natives father will be very rich and famous.

परमोच्चांशगे सूर्ये भाग्येशे लाभसंस्थिते
धर्मिष्ठो नृपवात्सल्यः पितृभक्तो भवेन्नरः ८

लग्नात्त्रिकोणगे सूर्ये भाग्येशे सप्तमस्थिते
गुरुणा सहिते दृष्टे पितृभक्तिसमन्वितः ९

**8-9. Virtuous and Devoted to Father.** Should Sun be in deep exaltation, as 9ths Lord is in 11th House, the native will be virtuous, dear to the king and devoted to father. If Sun is in a trine from Lagna, while 9ths Lord is in 7th in conjunct with, or receiving a Aspect from Jupiter, the native will be devoted to his father.

भाग्येशे धनभावस्थे धनेशे भाग्यराशिगे
द्वात्रिंशात्परतो भाग्यं वाहनं कीर्तिसम्भवः १०

**10. Fortunes etc.** Acquisition of fortunes, conveyances and fame will follow the 32nd year of age, if 9ths Lord is in 2nd, while 2nds Lord is in 9th.

लग्नेशे भाग्यराशिस्थे षष्ठेशेन समन्विते
अन्योन्यवैरं ब्रुवते जनकः कुत्सितो भवेत् ११

**11. Inimical to Father**. There will be mutual enmity between the father and the native, if Lagnas Lord is in 9th House, but with the Lord of 6th. Further, the natives father will be of contemptible disposition.

कर्माधिपेन सहितो विक्रमेशोऽपि निर्बलः
भाग्यपो नीचमूढःस्थो योगो भिक्षाशनप्रदः १२

**12. Begged Food.** If 10ths Lord and 3rds Lord are bereft of strength, while 9ths Lord is in fall, or combust the native will go begging for his food.

षष्ठाष्टमव्यये भानू रन्ध्रेशे भाग्यसंयुते
व्ययेशे लग्नराशिस्थे षष्ठेशे पञ्चमे स्थिते १३

जातस्य जननात्पूर्वं जनकस्य मृतिर्भवेत्
रन्ध्रस्थानगते सूर्ये रन्ध्रेशे भाग्यभावगे १४

जातस्य प्रथमाब्दे तु पितुर्मरणमादिशेत्
व्ययेशे भाग्यराशिस्थे नीचांशे भाग्यनायके १५

तृतीये षोडशे वर्षे जनकस्य मृतिर्भवेत्
लग्नेशे नाशराशिस्थे रन्ध्रेशे भानुसंयुते १६

द्वितीये द्वादशे वर्षे पितुर्मरणमादिशेत्
भाग्याद्रन्ध्रगते राहौ भाग्याद्भाग्यगते रवौ १७

षोडशेऽष्टादशे वर्षे जनकस्य मृतिर्भवेत्
राहुणा सहिते सूर्ये चन्द्राद्भाग्यगते शनौ १८

सप्तमैकोनविंशाब्दे तातस्य मरणं ध्रुवम्
भाग्येशे व्ययराशिस्थे व्ययेशे भाग्यराशिगे १९

वदाब्धिमितवर्षाच्च पितुर्मरणमादिशेत्

रव्यंशे च स्थिते चन्द्रे लग्नेशे रन्ध्रसंयुते २०

पञ्चत्रिंशैकचत्वारिंशद्वर्षे मरणं पितुः
पितृस्थानाधिपे सूर्ये मन्दभौमसमन्विते २१

पञ्चाशद्वत्सरे प्राप्ते जनकस्य मृतिर्भवेत्
भाग्यात् सप्तमगे सूर्ये भ्रातृसप्तमगस्तमः २२

षष्ठेऽब्दे पञ्चविंशाब्दे पितुर्मरणमादिशेत्
रन्ध्रजामित्रगे मन्दे मन्दाज्जामित्रगे रवौ २३

त्रिंशैकविंशे षड्विंशे जनकस्य मृतिर्भवेत्
भाग्येशे नीचराशिस्थे तदीशे भाग्यराशिगे २४

षड्विंशेऽब्दे त्रयस्त्रिंशे पितुर्मरणमादिशेत्
एवं जातस्य दैवज्ञो फलं ज्ञात्वा विनिर्दिशेत् २५

**13-25. Combinations for Fathers Death.** The father of the native would have passed away prior to the natives birth, if Sun is in 6th, 8th, or 12th House, as 8ths Lord is in 9th House, 12ths Lord is in 1st House and 6ths Lord is in 5th House. Should Sun be in 8th House, while 8ths Lord is in 9th, the natives father will pass away within a year of his birth. If the Lord of 12th House is in 9th House, while 9ths Lord is in its debilitation Navāmśa, the natives father will face his end during the 3rd, or the 16th year of the native. Death of father will occur in the 2nd, or the 12th year, if Lagnas Lord is in 8th House, as 8ths Lord is with Sun. Should Rahu be in the 8th from 9th, as Sun is in the 9th from 9th, death of father will take place in the 16th, or the 18th year of the native. If Saturn is in the 9th from Moon, as Sun is with Rahu, the natives father will die in the 7th, or the 19th year of the native. The native in his 44th year will lose his father, if 9ths Lord is in 12th, as 12ths Lord is in 9th. If Lagnas Lord is in 8th House, as Moon is in Sun's Navāmśa, the native in his 35th, or 41st year will lose his father. One will lose his father in the 50th year, if Sun, being the Lord of 9th, is conjunct Mars and Saturn. If Sun is in the 7th from 9th House, as Rahu is in the 7th from 3rd House, the 6th, or 25th year of the native will be fatal for father. If Saturn is in the 7th from 8th House, as Sun is in the 7th from Saturn, the ages of 21, 26, or 30 will be fatal for the father. If 9ths Lord is in its debilitation Rāśi, while his depositor is in 9th House, the native will lose his father at the age of 26, or 30. Thus the Jyotishyais may know the effects.

परमोच्चांशगे शुक्रे भाग्येशेन समन्विते
भ्रातृस्थाने शनियुते बहुभाग्याधिपो भवेत्  २६

**26. <u>Fortunes.</u> One will enjoy abundant fortunes, if Venus is in deep exaltation and be in the company of 9ths Lord, as Saturn is in 3rd.**

गुरुणा संयुते भाग्ये तदीशे केन्द्रराशिगे
विंशद्वर्षात् परं चैव बहुभाग्यं विनिर्दिशेत्  २७

परमोच्चांशगे सौम्ये भाग्येशे भाग्यराशिगे
षट्त्रिंशाच्च परं चैव बहुभाग्यं विनिर्दिशेत्  २८

**27-28. <u>Fortunate Periods</u>. Abundant fortunes be acquired after the 20th year, if 9th has Jupiter in it, as its Lord is in an angle from Lagna. Should Mercury be in his deep exaltation, as 9ths Lord is in 9th itself, abundant fortunes will be earned after the 36th year.**

लग्नेशे भाग्यराशिस्थे भाग्येशे लग्नसंयुते
गुरुणा संयुते द्यूने धनवाहनलाभकृत्  २९

**29. Should Lagnas Lord be in 9th, as 9ths Lord is in Lagna and Jupiter is in 7th, there will be gains of wealth and conveyances.**

भाग्याद्भाग्यवतो राहुस्तदीशे निधनं गते
भाग्येशे नीचराशिस्थे भाग्यहीनो भवेन्नरः  ३०

**30. <u>Lack of Fortunes</u>. If Rahu is in the 9th from 9th House, as his depositor is in 8th House and 9ths Lord is in fall, the native be devoid of fortunes.**

भाग्यस्थानगते मन्दे शशिना च समन्विते
लग्नेशे नीचराशिस्थे भिक्षाशी च नरो भवेत्  ३१

**31. <u>Food by Begging</u>. Should Saturn be in 9th House along with Moon, as Lagnas Lord is in fall, the native will acquire food by begging.**

एवं भाग्यफलं विप्र  संक्षेपात् कथितं मया
लग्नेशभाग्यभावेशस्थित्याऽन्यदपि निर्दिशेत्  ३२

**32. O Brahmin, these are the effects related to 9th House. I have explained briefly. These may be estimated with the help of the state of the Lords of Lagna and 9th House and in other manners as well.**

अथ कर्मभावफलाध्यायः २१
कर्मभावफलं चाऽथ कथयामि तवाग्रतः
शृणु मैत्रेय तत्त्वेन ब्रह्मगर्गादिभाषितम् १

## Ch. 21. Effects of 10th House

**1. I now explain the effects of 10th House. Listen to these, o Maitreya, in the words of Brahma, Garga and others.**

सबले कर्मभावेशे स्वोच्चे स्वांशे स्वराशिगे
जातस्तातसुखेनाढ्यो यशस्वी शुभकर्मकृत् २

**2. Paternal Happiness. If 10ths Lord is strong and in exaltation, or in its own Rāśi/Navāmśa, the native will derive extreme paternal happiness, will enjoy fame and will perform good deeds.**

कर्माधिपो बलोनश्चेत् कर्मवैकल्यमादिशेत्
सैहिः केन्द्रत्रिकोणस्थो ज्योतिष्टोमादियागकृत् ३

**3. If 10ths Lord is devoid of strength, the native will face obstructions in his work. If Rahu is in an angle, or in a trine, he will perform religious sacrifices, like Jyotishyatoma.**

कर्मेशे शुभसंयुक्ते शुभस्थानगते तथा
राजद्वारे च वाणिज्ये सदा लाभोऽन्यथान्यथा ४

**4. If 10ths Lord is with a benefic, or be in an auspicious House, one will always gain through royal patronage and in business. In a contrary situation, only opposite results will come to pass.**

दशमे पापसंयुक्ते लाभे पापसमन्विते
दुष्कृतिं लभते मर्त्यः स्वजनानां विदूषकः ५

**5. Should 10th and 11th House be both occupied by malefics, the native will indulge only in bad deeds and will defile his own men.**

कर्मेशे नाशराशिस्थे राहुणा संयुते तथा
जनद्वेषी महामूर्खो दुष्कृतिं लभते नरः ६

**6. If the Lord of 10th House is relegated to 8th House along with Rahu, the native will hate others; be a great fool and will do bad deeds.**

कर्मेशे द्यूनराशिस्थे मन्दभौमसमन्विते
द्यूनेशे पापसंयुते शिश्नोदरपरायणः ७

**7. If Saturn, Mars and 10ths Lord are in 7th, as 7ths Lord is with a malefic, the native will be fond of carnal pleasures and of filling his belly.**

तुङ्गराशिं समाश्रित्य कर्मेशे गुरुसंयुते
भाग्येशे कर्मराशिस्थे मानैश्वर्यप्रतापवान् ८

लाभेशे कर्मराशिस्थे कर्मेशे लग्नसंयुते
तावुभौ केन्द्रगौ वापि सुखजीवनभाग् भवेत् ९

कर्मेशे बलसंयुक्ते मीने गुरुसमन्विते
वस्त्राभरणसौख्यादि लभते नात्र संशयः १०

**8-10** Should 10ths Lord be in exaltation and be in the company of Jupiter, as 9ths Lord is in 10th the native will be endowed with honour, wealth and valor. One will lead a happy life, if 11ths Lord is in 10th and 10ths Lord is in Lagna, or, if the Lord of 10th House is conjunct with the Lord of 11th House in an angle. Should 10ths Lord in strength be in Pisces along Jupiter, the native will doubtless obtain robes, ornaments and happiness.

लाभस्थानगते सूर्ये राहुभौमसमन्विते
रविपुत्रेण संयुक्ते कर्मच्छेत्ता भवेन्नरः ११

**11.** Should Rahu, Sun, Saturn and Mars be in 11th House, the native will incur cessation of his duties.

मीने जीवे भृगुयुते लग्नेशे बलसंयुते
स्वोच्चराशिगते चन्द्रे सम्यग्ज्ञानार्थवान् भवेत् १२

**12.** One will be learned and wealthy, if Jupiter is in Pisces along with Venus, while Lagnas Lord is strong and Moon is in exaltation.

कर्मेशे लाभराशिस्थे लाभेशे लग्नसंस्थिते
कर्मराशिस्थिते शुक्रे रत्नवान् स नरो भवेत् १३

**13**. Should 10ths Lord be in 11th, while 11ths Lord is in 1st House and Venus is in 10th, the native will be endowed with precious stones.

केन्द्रत्रिकोणगे कर्मनाथे स्वोच्चसमाश्रिते
गुरुणा सहिते दृष्टे स कर्मसहितो भवेत् १४

**14.** If the 10ths Lord is exalted in an angle, or a trine and is conjunct with Jupiter, or receives a Aspect from Jupiter, one will be endowed with deeds.

कर्मेशे लग्नभावस्थे लग्नेशेन समन्विते
केन्द्रत्रिकोणगे चन्द्रे सत्कर्मनिरतो भवेत् १५

**15**. Should 10ths Lord be in Lagna along with Lagnas Lord, as Moon is in an angle, or in a trine, the native will be interested in good deeds.

कर्मस्थानगते मन्दे नीचखेचरसंयुते
कर्मांशे पापसंयुक्ते कर्महीनो भवेन्नरः १६

**16.** If Saturn is in 10th House along with a debilitated Planet, while 10th House in the Navāmśa Kundali is occupied by a malefic, the native will be bereft of acts.

कर्मेशे नाशराशिस्थे रन्ध्रेशे कर्मसंस्थिते
पापग्रहेण संयुक्ते दुष्कर्म निरतो भवेत् १७

**17.** One will indulge in bad acts, if 10ths Lord is in 8th House, while 8ths Lord is in 10th House with a malefic.

कर्मेशे नीचराशिस्थे कर्मस्थे पापखेचरे
कर्मभात्कर्मगे पापे कर्मवैकल्यमादिशेत् १८

**18.** Obstructions to the natives acts will crop up, if 10ths Lord is in fall, as both 10th House and the 10th from 10th House have malefic occupations.

कर्मस्थानगते चन्द्रे तदीशे तत्त्रिकोणगे
लग्नेशे केन्द्रभावस्थे सत्कीर्तिसहितो भवेत् १९

लाभेशे कर्मभावस्थे कर्मेशे बलसंयुक्ते
देवेन्द्रगुरुणा दृष्टे सत्कीर्तिसहितो भवेत् २०

कर्मस्थानाधिपे भाग्ये लग्नेशे कर्मसंयुते
लग्नात् पञ्चमगे चन्द्रे ख्यातनामा नरो भवेत् २१

**19-21. Combinations for Fame.** One will be endowed with fame, if Moon is in 10th House, while 10ths Lord is in a trine from 10th House and Lagnas Lord is in Lagnas angle. Similar effects will come to pass, if 11ths Lord is in 10th House, while 10ths Lord is strong and gives a Aspect to Jupiter. Fame will come to the native, if 10ths Lord is in 9th House, as Lagnas Lord is in 10th House and Moon is in 5th House.

इति कर्मफलं प्रोक्तं संक्षेपेण द्विजोत्तम
लग्नकर्मेशसम्बन्धादूह्यमन्यदपि स्वयम् २२

**22. O excellent of the Brahmins, thus have been told about the effects of 10th House in a brief manner. Other related effects be guessed by you based on the relationship of the Lords of Lagna and of 10th House.**

अथ लाभभावफलाध्यायः २२
लाभभावफलञ्चाथ कथयामि द्विजोत्तम
श्रूयतां जातको लोके यच्छुभत्वे सदा सुखी १

## Ch. 22. Effects of 11th House

**1.** O excellent of the Brahmins, I now explain effects relating to 11th House, the auspiciousness of which House will make one happy at all times.

लाभाधिपो यदा लाभे तिष्ठेत् केन्द्रत्रिकोणयोः
बहुलाभं तदा कुर्यादुच्चे सूर्यांशगोऽपि वा २

**2.** Should 11ths Lord be in 11th itself, or be in an angle, or in a trine from Lagna, there will be many gains. Similarly, if 11ths Lord is exalted, though in combustion there will be many gains.

लाभेशे धनराशिस्थे धनेशे केन्द्रसंस्थिते
गुरुणा सहिते भावे गुरुलाभं विनिर्दिशेत् ३

**3.** If 11ths Lord is in 2nd House, while 2nds Lord is in an angle along with Jupiter, the gains will be great.

लाभेशे विक्रमे भावे शुभग्रहसमन्विते
षट्त्रिंशे वत्सरे प्राप्ते सहस्रद्वयनिष्कभाक् ४

**4.** If 11ths Lord is in 3rd House, while 11th House is occupied by a benefic, the native will gain 2000 Nishkas in his 36th year.

केन्द्रत्रिकोणगे लाभनाथे शुभसमन्विते
चत्वारिंशे तु सम्प्राप्ते सहस्रार्धसुनिष्कभाक् ५

**5.** If 11ths Lord is conjunct with a benefic in an angle, or in a trine, the native will acquire 500 Nishkas in his 40th year.

लाभस्थाने गुरुयुते धने चन्द्रसमन्विते
भाग्यस्थानगते शुक्रे षट्सहस्राधिपो भवेत् ६

**6.** The native will own 6000 Nishkas, if 11th House is occupied by Jupiter, while 2nd House and 9th House are, respectively, taken over by Moon and Venus by position.

लाभाच्च लाभगे जीवे बुधचन्द्रसमन्विते
धनधान्याधिपः श्रीमान्रत्नाद्याभरणैर्युतः ७

**7.** Should Jupiter, Mercury and Moon be in the 11th from 11th, the native will be endowed with wealth, grains, fortunes, diamonds, ornaments etc.

लाभेशे लग्नभावस्थे लग्नेशे लाभसंयुते
त्रयस्त्रिंशे तु सम्प्राप्ते सहस्रनिष्कभाग् भवेत् ८

**8.** One will gain 1000 Nishkas in his 33rd year, if 11ths Lord is in Lagna and Lagnas Lord is in 11th House.

धनेशे लाभराशिस्थे लाभेशे धनराशिगे
विवाहात्परतश्चैव बहुभाग्यं समादिशेत् ९

**9**. If 11ths Lord is in 2nd House, as 2nds Lord is in 11th House, one will amass abundant fortunes after marriage.

भ्रातृपे लाभराशिस्थे लाभेशे भ्रातृसंस्थिते
भ्रातृभावाद्धनप्राप्तिदिव्याभरणसंयुतः १०

**10.** If 11ths Lord is in 3rd House, as 3rds Lord is in 11th House, one will gain wealth through co-borns and will be endowed with excellent ornaments

लाभेशे नीचभेऽस्ते वा त्रिके पापसमन्विते
कृते भूरिप्रयत्नेऽपि नैव लाभः कदाचन ११

**11**. There will be no gains in spite of numerous efforts, if 11ths Lord is in fall, in combustion, or be in 6th, 8th, or 12th House with a malefic.

अथ व्ययभावफलाध्यायः २३
अथाह व्ययभावस्य कथयामि फलं द्विज
व्ययेशे शुभसंयुक्ते स्वभे स्वोच्चगतेऽपि वा १

व्यये च शुभसंयुक्ते शुभकार्ये व्ययस्तदा
चन्द्रो व्ययाधिपो धर्मलाभमन्त्रेषु संस्थितः २

स्वोच्चे स्वर्क्षे निजांशे वा लाभधर्मात्मजांशके
दिव्यागारादिपर्यंको दिव्यगन्धैकभोगवान् ३

परार्ध्यरमणो दिव्यवस्त्रमाल्यादिभूषणः
परार्ध्यवित्तसंयुतो विज्ञो दिनानि नयति प्रभुः ४

## Ch. 23. Effects of 12th House

**1-4.** O Brahmin, now I tell you about the effects of 12th House. There will be expenses on good accounts, if 12ths Lord is with a benefic, or in his own House, or exalted, or, if a benefic occupies 12th. One will own beautiful houses and beds and be endowed with superior scented articles and pleasures, if Moon happens to be 12ths Lord and be exalted, or be in its own Rāśi and/or Navāmśa, or in 11th/9th/5th House in Rāśi/Navāmśa. The said native will live with rich clothes and ornaments, be learned and Lordly.

एवंस्वशत्रुनीचांशेऽष्टमांशे वाऽष्टमे रिपौ
संस्थितः कुरुते जातं कान्तासुखविवर्जितम् ५

व्ययाधिक्यपरिक्लान्तं दिव्यभोगनिराकृतम्

स हि केन्द्रत्रिकोणस्थः स्वस्त्रियाऽलंकृतः स्वयम् ६

**5-6.** And, if 12ths Lord is in 6th, or 8th House, or be in enemy Navāmśa, in debilitation Navāmśa, or in 8th House in Navāmśa, one will be devoid of happiness from wife, be troubled by expenses and deprived of general happiness. If he be in an angle, or trine, the native will beget a spouse.

यथा लग्नात् फलं चैतदात्मनः परिकीर्तितम्
एवं भ्रात्रादिभावेषु तत्तत्सर्वं विचारयेत् ७

**7.** Just as these effects are derived from 1st House in regard to the native, similar deductions be made about co-borns etc. from 3rd and other Houses.

दृश्यचक्रार्धगाः खेटाः प्रत्यक्षफलदायकाः
अदृश्यार्धगताः खेटाः परोक्षे फलदाः स्मृताः ८

**8.** Planets placed in the visible half of the zodiac will give explicit results, while the ones in the invisible half will confer secret results.

व्ययस्थानगतोः राहुर्भौमार्किरविसंयुतः
तदीशेऽप्यर्कसंयुक्ते नरके पतनं भवेत् ९

**9.** If Rahu is in 12th along with Mars, Saturn and Sun, the native will go to hell. Similar effect will occur, if 12ths Lord is with Sun.

व्ययस्थानगते सौम्ये तदीशे स्वोच्चराशिगे
शुभयुक्ते सुभैर्दृष्टे मोक्षः स्यान्नात्र संशयः १०

**10.** If there is a benefic in 12th, while its Lord is exalted, or is conjunct with, or receives a Aspect from a benefic, one will attain final emancipation.

व्ययेशे पापसंयुक्ते व्यये पापसमन्विते
पापग्रहेण संदृष्टे देशाद्देशान्तरं गतः ११

**11.** One will wander from country to country, if 12ths Lord and 12th House are with malefics and 12ths Lord gives a Aspect to, or receives a Aspect from malefics**.**

व्ययेशे शुभराशिस्थे व्ययर्क्षे शुभसंयुते
शुभग्रहेण संदृष्टे स्वदेशात् सञ्चरो भवेत् १२

**12.** One will move in his own country, if 12ths Lord and 12th House are with benefics and 12ths Lord gives a Aspect to, or receives a Aspect from benefics**.**

व्यये मन्दादिसंयुक्ते भूमिजेन समन्विते
सुभदृष्टेर्न सम्प्राप्तिः पापमूलाद्धनार्जनम् १३

**13.** Earnings will be through sinful measures, if 12th is occupied by Saturn, or Marsetc. and is not receiving a Aspect from a benefic.

लग्नेशे व्ययराशिस्थे व्ययेशे लग्नसंयुते
भृगुपुत्रेण संयुक्ते धर्ममूलाद्धनव्ययः १४

**14**. If Lagnas Lord is in 12th, while 12ths Lord is in Lagna with Venus, expenses will be on religious grounds.

अथ भावेशफलाध्यायः २४

लग्नेशे लग्नगे देहसुखभाग् भुजविक्रमी
मनस्वी चञ्चलश्चैव द्विभार्यो परगोऽपि वा १

## Ch. 24. Effects of the House Lords

### 1. Effects of Lagnas Lord in Various Houses (up to Sloka 12).

Should Lagnas Lord be in Lagna itself, the native will be endowed with physical happiness and prowess. He will be intelligent, fickle-minded, will have two wives and will unite with other females.

लग्नेशे धनगे बालो लाभवान् पण्डितः सुखी
सुशीलो धर्मविन्मानी बहुदारगुणैर्युतः २

**2.** If the Lagnas Lord is in 2nd, he will be gainful, scholarly, happy, endowed with good qualities, be religious, honourable and will have many wives.

लग्नेशे सहजे जातः सिंहतुल्यपराक्रमी
सर्वसम्पद्युतो मानी द्विभार्यो मतिमान् सुखी ३

**3.** If Lagnas Lord is in 3rd House, the native will equal a lion in valor, be endowed with all kinds of wealth, be honourable, will have two wives, be intelligent and happy.

लग्नेशे सुखगे बालः पितृमातृसुखान्वितः
बहुभ्रातृयुतः कामी गुणरूपसमन्वितः ४

**4**. If Lagnas Lord is in 4th House, the native will be endowed with paternal and maternal happiness, will have many brothers, be lustful, virtuous and charming.

लग्नेशे सुतगे जन्तोः सुतसौख्यं च मध्यमम्
प्रथमापत्यनाशः स्यान्मानी क्रोधी नृपप्रियः ५

**5.** If Lagnas Lord is in 5th House, the native will have mediocre progenic happiness, will lose his first child, be honourable, given to anger and be dear to king.

लग्नेशे षष्ठगे जातो देहसौख्यविवर्जितः
पापाढ्ये शत्रुतः पीडा सौम्यदृष्टिविवर्जिते ६

**6.** If Lagnas Lord is in 6th House and related to a malefic the native will be devoid of physical happiness and will be troubled by enemies, if there is no benefic Aspect.

लग्नेशे सप्तमे पापे भार्या तस्य न जीवति
शुभेऽटनो दरिद्रो वा विरक्तो वा नृपोऽपि वा ७

**7.** If Lagnas Lord is a malefic and is placed in 7th House, the natives wife will not live (long). If the Planet in question is a benefic, one will wander aimlessly, face penury and be dejected. He will alternatively become a king (if the said Planet is strong).

लग्नेशेऽष्टमगे जातः सिद्धविद्याविशारदः
रोगी चौरो महाक्रोधी द्यूती च परदारगः ८

**8.** If Lagnas Lord is in 8th House, the native will be an accomplished scholar, be sickly, thievish, be given to much anger, be a gambler and will join others wives.

लग्नेशे भाग्यगे जातो भाग्यवाञ्जनवल्लभः
विष्णुभक्तः पटुर्वाग्मी दारपुत्रधनैर्युतः ९

**9.** If Lagnas Lord is in 9th House, the native will be fortunate, dear to people, be a devotee of Śrī Vishnu, be skilful, eloquent in speech and be endowed with wife, sons and wealth**.**

लग्नेशे दशमे जातः पितृसौख्यसमन्वितः
नृपमान्यो जने ख्यातः स्वार्जितस्वो न संशयः १०

**10.** If Lagnas Lord is in 10th House, the native will be endowed with paternal happiness, royal honour, fame among men and will doubtlessly have self-earned wealth**.**

लग्नेशे लाभगे जातः सदा लाभसमन्वितः
सुशीलः ख्यातकीर्तिश्च बहुदारगुणैर्युतः ११

**11.** If Lagnas Lord is in 11th House, the native will always be endowed with gains, good qualities, fame and many wives.

लग्नेशे व्ययभावस्थे देहसौख्यविवर्जितः
व्यर्थव्ययी महाक्रोधी शुभदृग्योगवर्जिते १२

**(12)** If Lagnas Lord is in 12th House and is devoid of benefic Aspect and/or Conjunct, the native will be bereft of physical happiness, will spend unfruitfully and be given to much anger.

धनेशे लग्नगे जातः पुत्रवान् धनसंयुतः
कुटुम्बकण्टकः कामी निष्ठुरः परकार्यकृत् १३

**13. Effects of 2nds Lord in Various Houses (up to Sloka 24).**

If 2nds Lord is in 1st House, the native will be endowed with sons and wealth, be inimical to his family, lustful, hard-hearted and will do others jobs.

धनेशे धनगे जातो धनवान् गर्वसंयुतः
द्विभार्यो बहुभार्यो वा सुतहीनः प्रजायते १४

**14.** If 2nds Lord is in 2nd House, the native will be wealthy, proud, will have two, or more wives and be bereft of progeny.

धनेशे सहजे जातो विक्रमी मतिमान् गुणी
कामी लोभी शुभाढ्ये च पापाढ्ये देवनिन्दकः १५

**15.** If 2nds Lord is in 3rd House, the native will be valorous, wise, virtuous, lustful and miserly; all these, when related to a benefic. If related to a malefic, the native will be a heterodox.

धनेशे सुखभावस्थे सर्वसम्पतसमन्वितः
गुरुणा संयुते स्वोच्चे राजतुल्यो नरो भवेत् १६

**16.** If 2nds Lord is in 4th House, the native will acquire all kinds of wealth. If 2nds Lord is exalted and is conjunct with Jupiter, one will be equal to a king.

धनेशे सुतभावस्थे जातो धनसमन्वितः
धनोपार्जनशीलाश्च जायन्ते तत्सुता अपि १७

**17.** If 2nds Lord is in 5th House, the native will be wealthy. Not only the native, but also his sons will be intent on earning wealth**.**

धनेशे रिपुभावस्थे सशुभे शत्रुतो धनम्
सपापे शत्रुतो हानिर्जंघावैकल्यवान् भवेत् १८

**18.** If 2nds Lord is in 6th House along with a benefic, the native will gain wealth through his enemies; if 2nds Lord is conjunct with a malefic, there will be loss through enemies apart from mutilation of shanks.

धनेशे सप्तमे जातः परदाररतो भिषक्
पापेक्षितयुते तस्य भार्या च व्यभिचारिणी १९

**19.** If 2nds Lord is in 7th House, the native will be addicted to others wives and he will be a doctor. If a malefic is related to the said placement by conjunct with 2nds Lord, or by Aspect, the natives wife will be of questionable character.

धनेशेऽष्टमगे जातो भूरिभूमिधनैर्युतः
पत्नीसुखं भवेत् स्वल्पं ज्येष्ठभ्रातृसुखं न हि २०

**20**. If 2nds Lord is in 8th House, the native will be endowed with abundant land and wealth. But he will have limited m6thtal felicity and be bereft of happiness from his elder brother.

धनेशे धर्मभावस्थे धनवानुद्यमी पटुः
बाल्ये रोगी सुखी पश्चात् तीर्थधर्मव्रतादिकृत् २१

**21.** If 2nds Lord is in 9th House, the native will be wealthy, diligent, skilful, sick during childhood and will later on be happy and will visit shrines, observing religious code etc.

धनेशे कर्मगे जातः कामी मानी च पण्डितः
बहुदार्यधनैर्युक्तः किञ्च पुत्रसुखोज्झितः २२

**22.** If 2nds Lord is in 10th House, the native will be libidinous, honourable and learned; he will have many wives and much wealth, but he will be bereft of filial happiness.

धनेशे लाभभावस्थे सर्वलाभसमन्वितः

सदोद्योगयुतो मानी कीर्तिमान् जायते नरः २३

**23.** If 2nds Lord is in 11th House, the native will have all kinds of wealth, be ever diligent, honourable and famous.

धनेशे व्ययभावस्थे साहसी धनवर्जितः
परभाग्यरतस्तस्य ज्येष्ठापत्यसुखं नहि २४

**24.** If 2nds Lord is in 12th House, the native will be adventurous, be devoid of wealth and be interested in others wealth, while his eldest child will not keep him happy.

लग्नगे सहजाधीशे स्वभुजार्जितवित्तवान्
सेवाज्ञः साहसी जातो विद्याहीनोऽपि बुद्धिमान् २५

**25. Effects of 3rds Lord in Various Houses (up to Sloka 36).**

If 3rds Lord is in 1st House, the native will have self-made wealth, be disposed to worship, be valorous and be intelligent, although devoid of learning.

द्वितीये सहजाधीशे स्थूलो विक्रमवर्जितः
स्वल्पारम्भी सुखी न स्यात् परस्त्रीधनकामुकः २६

**26.** If 3rds Lord is in 2nd House, the native will be corpulent, devoid of valor, will not make much efforts, be not happy and will have an eye on others wives and others wealth.

सहजे सहजाधीशे सहोदरसुखान्वितः
धनपुत्रयुतो हृष्टो भुनक्ति सुखमद्भुतम् २७

**27**. If 3rds Lord is in 3rd House, the native will be endowed with happiness through co-born and will have wealth and sons, be cheerful and extremely happy.

सुखस्थे सहजाधीशे सुखी च धनसंयुतः
मतिमान् जायते बालो दुष्टभार्यापतिश्च सः २८

**28**. If 3rds Lord is in 4th House, the native will be happy, wealthy and intelligent, but will acquire a wicked spouse.

सुतस्थे सहजाधीशे पुत्रवान् गुणसंयुतः
भार्या तस्य भवेत् क्रूरा क्रूरग्रहयुतेक्षिते २९

**29.** If 3rds Lord is in 5th House, the native will have sons and be virtuous. If in the process 3rds Lord be conjunct with, or receives a Aspect from a malefic, the native will have a formidable wife**.**

षष्ठभावे तृतीयेशे भ्रातृशत्रुर्महाधनी
मातुलैश्च समं वैरं मातुलानीप्रियो नरः ३०

**30.** If 3rds Lord is in 6th House, the native will be inimical to his co-born, be affluent, will not be well disposed to his maternal uncle and be dear to his maternal aunt**.**

सप्तमे सहजाधीशे राजसेवापरो नरः
बाल्ये दुःखी सुखी चान्ते जायते नाऽत्र संशयः ३१

**31.** If 3rds Lord is in 7th House, the native will be interested in serving the king. He will not be happy during boyhood, but the end of his life he will be happy**.**

अष्टमे सहजाधीशे जातश्चौरो नरो भवेत्
दासवृत्त्योपजीवी च राजद्वारे मृतिर्भवेत् ३२

**32.** If 3rds Lord is in 8th House, the native will be a thief, will derive his livelihood serving others and will die at the gate of the royal palace**.**

नवमे सहजाधीशे पितुः सुखविवर्जितः
स्त्रीभिर्भाग्योदयस्तस्य पुत्रादिसुखसंयुतः ३३

**33.** If 3rds Lord is in 9th House, the native will lack paternal bliss, will make fortunes through wife and will enjoy progenic and other pleasures**.**

दशमे सहजाधीशे जातः सर्वसुखान्वितः
स्वभुजार्जितवित्तश्च दुष्टस्त्रीभरणे रतः ३४

**34.** If 3rds Lord is in 10th House, the native will have all lands of happiness and self-made wealth and be interested in nurturing wicked females.

लाभगे सहजाधीशे व्यापारे लाभवान् सदा
विद्याहीनोऽपि मेधावी साहसी परसेवकः ३५

**35.** If 3rds Lord is in 11th House, then native will always gain in trading, be intelligent, although not literate, be adventurous and will serve others**.**

व्ययस्थे सहजाधीशे कुकार्ये व्ययकृज्जनः
पिता तस्य भवेत् क्रूरः स्त्रीभिर्भाग्योदयस्तथा ३६

**36**. If 3rds Lord is in 12th, the native will spend on evil deeds, will have a wicked father and will be fortunate through a female**.**

सुखेशे लग्नगे जातो विद्यागुणविभूषितः
भूमिवाहनसंयुक्तो मातुः सुखसमन्वितः ३७

**37. Effects of 4ths Lord in Various Houses (up to Sloka 48).**

If 4ths Lord is in 1st House, the native will be endowed with learning, virtues, ornaments, lands, conveyances and maternal happiness.

सुखेशे धनगे जातो भोगी सर्वधनान्वितः
कुटुम्बसहितो मानी साहसी कुहकान्वितः ३८

**38.** If 4ths Lord is in 2nd House, the native will enjoy pleasures, all kinds of wealth, family life and honour and be adventurous. He will be cunning in disposition.

सुखेशे सहजे जातो विक्रमी भृत्यसंयुतः
उदारोऽरुग् गुणी दाता स्वभुजार्जितवित्तवान् ३९

**39.** If 4ths Lord is in 3rd House, the native will be valorous, will have servants, be liberal, virtuous and ch6thtable and will possess self-earned wealth. He will be free from diseases.

सुखेशे सुखभावस्थे मन्त्री सर्वधनान्वितः
चतुरः शीलवान् मानी ज्ञानवान् स्त्रीप्रियः सुखी ४०

**40**. If 4ths Lord is in 4th, the native will be a minister and will possess all kinds of wealth. He will be skilful, virtuous, honourable, learned, happy and be well disposed to his spouse.

सुखेशे पुत्रभावस्थे सुखी सर्वजनप्रियः
विष्णुभक्तो गुणी मानी स्वभुजार्जितवित्तवान् ४१

**41.** If 4ths Lord is in 5th House, the native will be happy and be liked by all. He will be devoted to Śrī Vishnu, be virtuous, honourable and will have self-earned wealth.

सुखेशे रिपुभावस्थे मातुः सुखविवर्जितः
क्रोधी चोरोऽभिचारी च स्वेच्छाचारश्च दुर्मनाः ४२

**42**. If 4ths Lord is in 6th House, the native will be devoid of maternal happiness, be given to anger, be a thief and a conjurer, be independent in action and be indisposed.

सुखेशे सप्तमे जातो बहुविद्यासमन्वितः
पित्रार्जितधनत्यागी सभायां मूकवद् भवेत् ४३

**43.** If 4ths Lord is in 7th House, the native will be endowed with a high degree of education, will sacrifice his patrimony and be akin to the dumb in an assembly.

सुखेशे रन्ध्रभावस्थे गृहादिसुखवर्जितः

पित्रोः सुखं भवेदल्पं जातः क्लीबसमो भवेत् ४४

**44.** If 4ths Lord is in 8th House, the native will be devoid of domestic and other comforts, will not enjoy much parental happiness and be equal to a neuter.

सुखेशे भाग्यभावस्थे जातः सर्वजनप्रियः
देवभक्तो गुणी मानी भवेत् सर्वसुखान्वितः ४५

**45.** If 4ths Lord is in 9th House, the native will be dear to one and all, be devoted to God, be virtuous, honourable and endowed with every land of happiness.

सुखेशे कर्मभावस्थे राजमान्यो नरो भवेत्
रसायनी महाहृष्टो सुखभोगी जितेन्द्रियः ४६

**46.** If 4ths Lord is in 10th House, the native will enjoy royal honors, be an alchemist, be extremely pleased, will enjoy pleasures and will conquer his five senses.

सुखेशे लाभगे जातो गुप्तरोगभयान्वितः
उदारो गुणवान् दाता परोपकरणे रतः ४७

**47.** If 4ths Lord is in 11th House, the native will have fear of secret disease, he will be liberal, virtuous, ch6thtable and helpful to others.

सुखेशे व्ययभावस्थे गृहादिसुखवर्जितः
जातो दुर्व्यसनी मूढः सदाऽलस्यसमन्वितः ४८

**48.** If 4ths Lord is in 12th House the native will be devoid of domestic and other comforts, will have vices and be foolish and indolent.

सुतेशे लग्नगे जातो विद्वान् पुत्रसुखान्वितः
कदर्यो वक्रचित्तश्च परद्रव्यापहारकः ४९

**49. Effects of 5ths Lord in Various Houses (up to Sloka 60).**

If 5ths Lord is in Lagna, the native will be scholarly, be endowed with progenic happiness, be a miser, be crooked and will steal others wealth.

सुतेशे धनगे जातो बहुपुत्रो धनान्वितः
कुटुम्बपोषको मानी स्त्रीप्रियः सुयशा भुवि ५०

**50**. If 5ths Lord is in 2nd House, the native will have many sons and wealth, be a pater familias, be honourable, be attached to his spouse and be famous in the world.

सुतेशे सहजे भावे जायते सोदरप्रियः
पिशुनश्च कदर्यश्च स्वकार्यनिरतः सदा ५१

**51**. If 5ths Lord is in 3rd, the native will be attached to his co-born, be a tale bearer and a miser and be always interested in his own work.

सुतेशे सुखभावस्थे सुखी मातृसुखान्वितः
लक्ष्मीयुक्तः सुबुद्धिश्च राज्ञोऽमात्योऽथवा गुरुः ५२

**52.** If 5ths Lord is in 4th House, the native will be happy, endowed with maternal happiness, wealth and intelligence and be a king, or a minister, or a preceptor.

सुतेशे सुतभावस्ते शुभाढये पुत्रवान् नरः
पापाढयेऽपत्यहीनोऽसौ गुणवान् मित्रवत्सलः ५३

**53.** If 5ths Lord is in 5th House, the native will have progeny, if related to a benefic; there will be no issues, if malefic is related to 5ths Lord, placed in 5th House. 5ths Lord in 5th House will, however, make one virtuous and dear to friends.

सुतेशे रिपुभावस्थे पुत्रः शत्रुसमो भवेत्
मृतापत्योऽथवा जातो दत्तक्रीतसुतोऽथवा ५४

**54.** If 5ths Lord is in 6th House, the native will obtain such sons, who will be equal to his enemies, or will lose them, or will acquire an adopted, or purchased son.

सुतेशे सप्तमे मानी सर्वधर्मसमन्वितः
पुत्रादिसुखयुक्तश्च परोपकरणे रतः ५५

**55**. If 5ths Lord is in 7th House, the native will be honourable, very religious, endowed with progenic happiness and be helpful to others.

सुतेशे रन्ध्रभावस्थे स्वल्पपुत्रसुखान्वितः
कासश्वाससमायुक्तः क्रोधी च सुखवर्जितः ५६

**56.** If 5ths Lord is in 8th House, the native will not have much progenic happiness, be troubled by cough and pulmonary disorders, be given to anger and be devoid of happiness.

सुतेशे भाग्यगे पुत्रो भपो वा तत्समो भवेत्
स्वयं वा ग्रन्थकर्ता च विख्यातः कुलदीपकः ५७

**57**. If 5ths Lord is in 9th House, the native will be a prince, or equal to him, will author treatises, be famous and will shine in his race**.**

सुतेशे राज्यभावस्थे राजयोगो हि जायते
अनेकसुखभोगी च ख्यातकीर्तिर्नरो भवेत् ५८

**58.** If 5ths Lord is in 10th House, the native will enjoy a Raja Yoga and various pleasures and be very famous.

सुतेशे लाभगे जातो विद्यावान् जनवल्लभः
ग्रन्थकर्ता महादक्षो बहुपुत्रधनान्वितः ५९

**59**. If 5ths Lord is in 11th House, the native will be learned, dear to people, be an author of treatises, be very skilful and be endowed with many sons and wealth.

सुतेशे व्ययभावस्थे जातः पुत्रसुखोज्झितः
दत्तपुत्रयुतो वाऽसौ क्रीतपुत्रान्वितोऽथवा ६०

**60.** If 5ths Lord is in 12th House, the native will be bereft of happiness from his own sons, will have an adopted, or purchased son.

षष्ठेशे लग्नगे जातो रोगवान् कीर्तिसंयुतः
आत्मशत्रुर्धनी मानी साहसी गुणवान् नरः ६१

**<u>61. Effects of 6ths Lord in Various Houses (up to Sloka 72).</u>**

If 6ths Lord is in 1st House, the native will be sickly, famous, inimical to his own men, rich, honourable, adventurous and virtuous.

षष्ठेशे धनभावस्थे साहसी कुलविश्रुतः
परदेशी सुखी वक्ता स्वकर्मनिरतः सदा ६२

**62.** If 6ths Lord is in 2nd House, the native will be adventurous, famous among his people, will live in alien countries, be happy, be a skilful speaker and be always interested in his own work.

षष्ठेशे सहजः जातः क्रोधी विक्रमवर्जितः
भ्राता शत्रुसमस्तस्य भृत्यश्चोत्तरदायकः ६३

**63**. If 6ths Lord is in 3rd House, the native will be given to anger, be bereft of courage, inimical to all of his co-born and will have disobedient servants.

षष्ठेशे सुखभावस्थे मातुः सुखविवर्जितः
मनस्वी पिशुना द्वेषी चलचित्तोऽतिवित्तवान् ६४

**64.** If 6ths Lord is in 4th House, the native will be devoid maternal happiness, be intelligent, be a tale bearer, be jealous, evil-minded and very rich.

षष्ठेशे सुतगो यस्य चलं तस्य धनादिकम्
शत्रुता पुत्रमित्रैश्च सुखी स्वार्थी दयान्वितः ६५

**65**. If 6ths Lord is in 5th House, the native will have fluctuating finances. He will incur enmity with his sons and friends. He will be happy, selfish and kind**.**

षष्ठेशे रिपुभावस्थे वैरं स्वज्ञातिमण्डलात्
अन्यैः सह भवेन् मैत्री सुखं मध्यं धनादिजम् ६६

**66.** If 6ths Lord is in 6th House, the native will have enmity with the group of his kinsmen, but be friendly to others and will enjoy mediocre happiness in matters, like wealth.

षष्ठेशे दारभावस्थे जातो दारसुखोज्झितः
कीर्तिमान् गुणवान् मानी साहसी धनसंयुतः ६७

**67.** If 6ths Lord is in 7th House, the native will be deprived of happiness through wedlock. He will be famous, virtuous, honourable, adventurous and wealthy.

षष्ठेशेऽष्टमगे जातो रोगी शत्रुर्मनीषिणाम्
परद्रव्याभिलाषी च परदाररतोऽशुचिः ६८

**68.** If 6ths Lord is in 8th House, the native will be sickly, inimical, will desire others wealth, be interested in others wives and be impure.

षष्ठेशे भाग्यगे जातः काष्ठपाषाणविक्रयी
व्यवहारे क्वचिद्धानिः क्वचिद्वृद्धिश्च जायते ६९

**69.** If 6ths Lord is in 9th House, the native will trade in wood and stones (Pashan also means poison) and will have fluctuating professional fortunes.

षष्ठेशे दशमे भावे मानवः कुलविश्रुतः
अभक्तश्च पितुर्वक्ता विदेशे च सुखी भवेत् ७०

**70**. If 6ths Lord is in 10th House, the native will be well known among his men, will not be respectfully disposed to his father and will be happy in foreign countries. He will be a gifted speaker.

षष्ठेशे लाभगे जातः शत्रुतो धनमाप्नुयात्
गुणवान् साहसी मानी किन्तु पुत्रसुखोज्झितः ७१

**71.** If 6ths Lord is in 11th House, the native will gain wealth through his enemies, be virtuous, adventurous and will be somewhat bereft of progenic happiness**.**

षष्ठेशे व्ययभावस्थे व्यसने व्ययकृत् सदा
विद्वद्द्वेषी भवेज्जातो जीवहिंसासु तत्परः ७२

**72**. If 6ths Lord is in 12th House, the native will always spend on vices, be hostile to learned people and will torture living beings**.**

दारेशे लग्नगे जातः परदारेषु लम्पटः
दुष्टो विचक्षणोऽधीरो जनो वातरुजान्वितः ७३

**73. Effects of 7ths Lord in Various Houses (up to Sloka 84).**

If 7ths Lord is in 1st House, the native will go to others wives, be wicked, skilful, devoid of courage and afflicted by windy diseases.

दारेशे धनगे जातो बहुस्त्रीभिः समन्वितः
दारयोगाद्धनाप्तिश्च दीर्घसूत्री च मानवः ७४

**74**. If 7ths Lord is in 2nd House, the native will have many wives, will gain wealth through his wife and be procrastinating in nature.

दारेशे सहजे जातो मृतापत्यो हि मानवः
कदाचिज्जायते पुत्री यत्नात् पुत्रोऽपि जीवति ७५

**75.** If 7ths Lord is in 3rd House, the native will face loss of children and sometimes with great difficulty there will exist a living son. There is also the possibility of birth of a daughter.

दारेशे सुखभावस्थे जाया नास्य वशे सदा
स्वयं सत्यप्रियो धीमान् धर्मात्मा दन्तरोगयुक् ७६

**76.** If 7ths Lord is in 4th House, the wife of the native will not be under his control. He will be fond of truth, intelligent and religious. He will suffer from dental diseases.

दारेशे पञ्चमे जातो मानि सर्वगुणान्वितः
सर्वदा हर्षयुक्तश्च तथा सर्वधनाधिपः ७७

**77.** If 7ths Lord is in 5th House, the native will be honourable, endowed with all (i.e. seven principal) virtues, always delighted and endowed with all kinds of wealth.

दारेशे रिपुभावस्थे भार्या तस्य रुजान्विता
स्त्रिया सहाऽथ वा वैरं स्वयं क्रोधी सुखोज्झितः ७८

**78.** If 7ths Lord is in 6th House, the native will beget a sickly wife and he will be inimical to her. He will be given to anger and will be devoid of happiness.

दारेशे सप्तमे भावे जातो दारसुखान्वितः
धीरो विचक्षणो धीमान् केवलं वातरोगवान् ७९

**79**. If 7ths Lord is in 7th House, the native will be endowed with happiness through wife, be courageous, skilful and intelligent, but only afflicted by windy diseases.

दारेशे मृत्युभावस्थे जातो दारसुखोज्झितः
भार्याऽपि रोगयुक्ताऽस्य दुःशीलाऽपि न चानुगा ८०

**80**. If 7ths Lord is in 8th House, the native will be deprived of m6thtal happiness. His wife will be troubled by diseases, be devoid of good disposition and will not obey the native**.**

दारेशे धर्मभावस्थे नानास्त्रीभिः समागमः
जायाहृतमना जातो बह्वारम्भकरो नरः ८१

**81.** If 7ths Lord is in 9th House, the native will have union with many women, be well disposed to his own wife and will have many undertakings.

दारेशे कर्मभावस्थे नास्य जाया वशानुगा
स्वयं धर्मरतो जातो धनपुत्रादिसंयुतः ८२

**82**. If 7ths Lord is in 10th House, the native will beget a disobedient wife, will be religious and endowed with wealth, sons etc.

दारेशे लाभभावस्थे दारैरर्थसमागमः
पुत्रादिसुखमल्पं च जनः कन्याप्रजो भवेत् ८३

**83.** If 7ths Lord is in 11th House, the native will gain wealth through his wife, be endowed with less happiness from sons etc. and will have daughters**.**

दारेशे व्ययगे जातो दरिद्रः कृपणोऽपि वा
भार्यापि व्ययशीलाऽस्य वस्त्राजीवी नरो भवेत् ८४

**84.** If 7ths Lord is in 12th House, the native will incur penury, be a miser and his livelihood will be related to clothes. His wife will be a spendthrift**.**

अष्टमेशे तनौ जातस्तनुसौख्यविवर्जितः
देवानां ब्राह्मणानां च निन्दको व्रणसंयुतः ८५

**85. Effects of 8ths Lord in Various Houses (up to Sloka 96).**

If 8ths Lord is in 1st House, the native will be devoid of physical felicity and will suffer from wounds. He will be hostile to gods and Brahmins.

अष्टमेशे धने बाहुबलहीनः प्रजायते

धनं तस्य भवेत् स्वल्पं नष्ट वित्तं न लभ्यते ८६

**86.** If 8ths Lord is in 2nd House, the native will be devoid of bodily vigor, will enjoy a little wealth and will not regain lost wealth**.**

रन्ध्रेशे सहजे भावे भ्रातृसौख्यं न जायते
सालस्यो भृत्यहीनश्च जायते बलवर्जितः ८७

**87**. If 8ths Lord is in 3rd House, the native will be devoid of fraternal happiness, be indolent and devoid of servants and strength**.**

रन्ध्रेशे सुखभावस्थे मातृहीनो भवेच्छिशुः
गृहभूमिसुखैर्हीनो मित्रद्रोही न संशयः ८८

**88.** If 8ths Lord is in 4th House, the child will be deprived of its mother. He will be devoid of a house, lands and happiness and will doubtlessly betray his friends.

रन्ध्रेशे सुतभावस्थे जडबुद्धिः प्रजायते
स्वल्पप्रज्ञो भवेज्जतो दीर्घायुश्च धनान्वितः ८९

**89**. If 8ths Lord is in 5th House, the native will be dull witted, will have limited number of children, be long-lived and wealthy.

रन्ध्रेशे रिपुभावस्थे शत्रुजेता भवेज्जनः
रोगयुक्तशरीरश्च बाल्ये सर्पजलाद् भयम् ९०

**90**. If 8ths Lord is in 6th House, the native will win over his enemies, be afflicted by diseases and during childhood will incur danger through snakes and water.

रन्ध्रेशे दारभावस्थे तस्य भार्याद्वयं भवेत्
व्यापारे च भवेद्धानिस्तस्मिन् पापयुते ध्रुवम् ९१

**91.** If 8ths Lord is in 7th House, the native will have two wives. If 8ths Lord is conjunct with a malefic in 7th House, there will surely be downfall in his business**.**

रन्ध्रेशे मृत्युभावस्थे जाता दीर्घायुषा युतः
निर्बले मध्यमायुः स्याच्चौरो निन्द्योऽन्यनिन्दकः ९२

**92.** If 8ths Lord is in 8th House, the native will be long-lived. If the said Planet is weak, being in 8th House, the longevity will be medium, while the native will be a thief, be blameworthy and will blame others as well.

अष्टमेशे तपःस्थाने धर्मद्रोही च नास्तिकः
दुष्टभार्यापतिश्चैव परद्रव्यापहारकः ९३

**93.** If 8ths Lord is in 9th House, the native will betray his religion, be a heterodox, will beget a wicked wife and will steal others wealth.

रन्ध्रेशे कर्मभावस्ते पितृसौख्यविवर्जितः
पिशुनः कर्महीनश्च यदि नैव शुभेक्षिते ९४

**94.** If 8ths Lord is in 10th House, the native will be devoid of paternal bliss, be a talebearer and be bereft of livelihood. If there is a Aspect in the process from a benefic, then these evils will not mature.

रन्ध्रेशे लाभभावस्थे सपापे धनवर्जितः
बाल्ये दुःखी सुखी पश्चात् दीर्घायुश्च शुभान्विते ९५

**95**. If 8ths Lord along with a malefic is in 11th House, the native will be devoid of wealth and will be miserable in boyhood, but happy later on. Should 8ths Lord be conjunct with a benefic and be in 11th House, the native will be long-lived.

रन्ध्रेशे व्ययभावस्थे कुकार्ये व्ययकृत् सदा
अल्पायुश्च भवेज्जातः सपापे च विशेषतः ९६

**96.** If 8ths Lord is in 12th House, the native will spend on evil deeds and will incur a short life. More so, if there be additionally a malefic in the said House.

भाग्येशे लग्नगे जातो भाग्यवान् भूपवन्दितः
सुशीलश्च सुरूपश्च विद्यावान् जनपूजितः ९७

**97. Effects of 9ths Lord in Various Houses (up to Sloka 108).**

If 9ths Lord is in Lagna, the native will be fortunate, will be honoured by the king, be virtuous, charming, learned and honoured by the public.

भाग्येशे धनभावस्थे पण्डितो जनवल्लभः
जायते धनवान् कामी स्त्रीपुत्रादिसुखान्वितः ९८

**98**. If 9ths Lord is in 2nd House, the native will be a scholar, be dear to all, wealthy, sensuous and endowed with happiness from wife, sons etc.

भाग्येशे भ्रातृभावस्थे जातो भ्रातृसुखान्वितः
धनवान् गुणवांश्चापि रूपशीलसमन्वितः ९९

**99.** If 9ths Lord is in 3rd House, the native will be endowed with fraternal bliss, be wealthy, virtuous and charming.

भाग्येशे तुर्यभावस्थे गृहयानसुखान्वितः
सर्वसम्पत्तियुक्तश्च मातृभक्तो भवेन्नरः १००

**100**. If 9ths Lord is in 4th House, the native will enjoy houses, conveyances and happiness, will have all kinds of wealth and be devoted to his mother.

भाग्येशे सुतभावस्थे सुतभाग्यसमन्वितः
गुरुभक्तिरतो धीरो धर्मात्मा पण्डितो नरः १०१

**101.** If 9ths Lord is in 5th House, the native will be endowed with sons and prosperity, devoted to elders, bold, ch6thtable and learned.

भाग्येशे रिपुभावस्थे स्वल्पभाग्यो भवेन्नरः
मातुलादिसुखैर्हीनः शत्रुभिः पीडितः सदा १०२

**102.** If 9ths Lord is in 6th House, the native will enjoy meager prosperity, be devoid of happiness from maternal relatives and be always troubled by enemies.

भाग्येशे दारभावस्थे दारयोगात् सुखोदयः
गुणवान् कीर्तिमांश्चापि जायते द्विजसत्तमः १०३

**103**. O Brahmin, If 9ths Lord is in 7th House, the native beget happiness after marriage, be virtuous and famous.

भाग्येशे मृत्युभावस्थे भाग्यहीनो नरो भवेत्
ज्येष्ठभ्रातृसुखं नैव तस्य जातस्य जायते १०४

**104**. If 9ths Lord is in 8th House, the native will not be prosperous and will not enjoy happiness from his elder brother.

भाग्येशे भाग्यभावस्थे बहुभाग्यसमन्वितः
गुणसौन्दर्यसम्पन्नो सहजेभ्यः सुखं बहु १०५

**105.** If 9ths Lord is in 9th House, the native will be endowed with abundant fortunes, virtues and beauty and will enjoy much happiness from co-born.

भाग्येशे कर्मभावस्थे जातो राजाऽथ तत्समः
मन्त्री सेनापतिर्वाऽपि गुणवान् जनपुजितः १०६

**106.** If 9ths Lord is in 10th House, the native will be a king, or equal to him, or be a minister, or an Army chief, be virtuous and dear to all.

भाग्येशे लाभभावस्थे धनलाभो दिने दिने

भक्तो गुरुजनानां च गुणवान् पुण्यवानपि १०७

**107.** If 9ths Lord is in 11th House, the native will enjoy financial gains day by day, be devoted to elders, virtuous and meritorious in acts.

भाग्येशो व्ययभावस्थो भाग्यहानिकरो नृणाम्
शुभकार्ये व्ययो नित्यं निर्धनोऽतिथिसङ्गमात् १०८

**108.** If 9ths Lord is in 12th House, the native will incur loss of fortunes, will always spend on auspicious acts and will become poor on account of entertaining guests.

कर्मेशे लग्नगे जातो विद्वान् ख्यातो धनी कवीः
बाल्ये रोगी सुखी पश्चाद् धनवृद्धिर्दिने दिने १०९

**109. Effects of 10ths Lord in Various Houses (up to Sloka 120).**

If 10ths Lord is in 1st House, the native will be scholarly, famous, be a poet, will incur diseases in boyhood and be happy later on. His wealth will increase day by day.

राज्येशे धनभावस्थे धनवान् गुणसंयुतः
राजमान्यो वदान्यश्च पित्रादिसुखसंयुतः ११०

**110.** If 10ths Lord is in 2nd House, the native will be wealthy, virtuous, honoured by the king, ch6thtable and will enjoy happiness from father and others.

कर्मेशे सहजे जातो भ्रातृभृत्यसुखान्वितः
विक्रमी गुणसम्पन्नः वाग्मी सत्यरतो नरः १११

**111**. If 10ths Lord is in 3rd House, the native will enjoy happiness from brothers and servants, be valorous, virtuous, eloquent and truthful**.**

कर्मेशे सुखभावस्थे सुखी मातृहिते रतः
यानभूमिगृहाधीशो गुणवान् धनवानपि ११२

**112.** If 10ths Lord is in 4th House, the native will be happy, be always interested in his mothers welfare, will

Lord over conveyances, lands and houses, be virtuous and wealthy.

कर्मेशे सुतभावस्थे सर्वविद्यासमन्वितः
सर्वदा हर्षसंयुक्तो धनवान् पुत्रवानपि ११३

**113.** If 10ths Lord is in 5th House, the native will be endowed with all kinds of learning, he will be always delighted and he will be wealthy and endowed with sons.

कर्मेशे रिपुभावस्थे पितृसौख्यविवर्जितः
चतुरोऽपि धनैर्हीनः शत्रुभिः परिपीडितः ११४

**114.** If 10ths Lord is in 6th House, the native will be bereft of paternal bliss. Although he may be skilful, he will be bereft of wealth and be troubled by enemies.

राज्येशे दारभावस्थे जातो दारसुखान्वितः
मनस्वी गुणवान् वाग्मी सत्यधर्मरतः सदा ११५

**115.** If 10ths Lord is in 7th House, the native will be endowed with happiness through wife, be intelligent, virtuous, eloquent, truthful and religious**.**

कर्मेशे रन्ध्रभावस्थे कर्महीनो भवेन्नरः
दीर्घायुरप्यसौ जातः परनिन्दापरायणः ११६

**116**. If 10ths Lord is in 8th House, the native will be devoid of acts, long-lived and intent on blaming **others.**

राज्येशे भाग्यभे जातो राजा राजकुलोद्भवः
तत्समोऽन्यकुलोत्पन्नो धनपुत्रादिसंयुतः ११७

**117.** If 10ths Lord is in 9th House, one born of royal scion will become a king, whereas an ordinary native will be equal to a king. This placement will confer wealth and progenic happiness etc.

कर्मेशे राज्यभावस्थे सर्वकर्मपटुः सुखी
विक्रमी सत्यवक्ता च गुरुभक्तिरतो नरः ११८

**118.** If 10ths Lord is in 10th House, the native will be skilful in all jobs, be valorous, truthful and devoted to elders.

राज्येशे लाभभावस्थे जातो धनसुतान्वितः
हर्षवान् गुणवांश्चापि सत्यवक्ता सदा सुखी ११९

**119.** If 10ths Lord is in 11th House, the native will be endowed with wealth, happiness and sons. He will be virtuous, truthful and always delighted.

राज्येशे व्ययभावस्थे तस्य राजगृहे व्ययः
शत्रुतोऽपि भयं नित्यं चतुरश्चापि चिन्तितः १२०

**120.** If 10ths Lord is in 12th House, the native will spend through royal abodes, will have fear from enemies and will be worried in spite of being skilful.

लाभेशे लग्नगे जातः सात्त्विको धनवान् सुखी
समदृष्टिः कविर्वाग्मी सदा लाभसमन्वितः १२१

**121. Effects of 11ths Lord in Various Houses (up to Sloka 132).**

If 11ths Lord is in 1st House, the native will be genuine in disposition, be rich, happy, even-sighted, be a poet, be eloquent in speech and be always endowed with gains.

लाभेशे धनभावस्थे जातः सर्वधनान्वितः
सर्वसिद्धियुतो दाता धार्मिकश्च सुखी सदा १२२

**122.** If 11ths Lord is in 2nd House, the native will be endowed with all kinds of wealth and all kinds of accomplishments, ch6thtable, religious and always happy.

लाभेशे सहजे जातः कुशलः सर्वकर्मसु
धनी भ्रातृसुखोपेतः शूलरोगभयं क्वचित् १२३

**123.** If 11ths Lord is in 3rd House, the native will be skilful in all jobs, wealthy, endowed with fraternal bliss and may sometimes incur gout pains.

लाभेशे सुखभावस्थे लाभो मातृकुलाद् भवेत्
तीर्थयात्राकरो जातो गृहभूमिसुखान्वितः १२४

**124.** If 11ths Lord is in 4th House, the native will gain from maternal relatives, will undertake visits to shrines and will possess happiness of house and lands.

लाभेशे सुतभावस्थे भवन्ति सुखिनः सुताः
विद्यवन्तोऽपि सच्छीलाः स्वयं धर्मरतः सुखी १२५

**125**. If 11ths Lord is in 5th House, the native will be happy, educated and virtuous. He will be religious and happy.

लाभेशे रोगभावस्थे जातो रोगसमन्वितः
क्रूरबुद्धिः प्रवासी च शत्रुभि परिपीडितः १२६

**126**. If 11ths Lord is in 6th House, the native will be afflicted by diseases, be cruel, living in foreign places and troubled by enemies.

लाभेशे दारभावस्थे लाभो दारकुलात् सदा
उदारश्च गुणी कामी जनो भार्यावशानुगः १२७

**127**. If 11ths Lord is in 7th House, the native will always gain through his wifes relatives, be liberal, virtuous, sensuous and will remain at the command of his spouse.

लाभेशे रन्ध्रभावस्थे हानिः कार्येषु जायते
तस्यायुश्च भवेद्दीर्घं प्रथमं मरणं स्त्रियः १२८

**128.** If 11ths Lord is in 8th House, the native will incur reversals in his undertakings and will live long, while his wife will predecease him**.**

लभेशे भाग्यभावस्थे भाग्यवान् जायते नरः
चतुरः सत्यवादी च राजपुज्यो धनाधिपः १२९

**129.** If 11ths Lord is in 9th House, the native will be fortunate, skilful, truthful, honoured by the king and be affluent.

लाभेशे कर्मभावस्थे भूपवन्द्यो गुणान्वितः
निजधर्मरतो धीमान् सत्यवादी जितेन्द्रियः १३०

**130**. If 11ths Lord is in 10th House, the native will be honoured by the king, be virtuous, attached to his religion, intelligent, truthful and will subdue his senses.

लाभेशे लाभभावस्थे लाभः सर्वेषु कर्मसु
पाण्डित्यं च सुखं तस्य वर्द्धते च दिने दिने १३१

**131.** If 11ths Lord is in 11th House, the native will gain in all his undertakings, while his learning and happiness will be on the increase day by day.

लाभेशे व्ययभावस्थे सत्कार्येषु व्ययः सदा
कामुको बहुपत्नीको म्लेच्छसंसर्गकारकः १३२

**132.** If 11ths Lord is in 12th House, the native will always depend on good deeds, be sensuous, will have many wives and will befriend barb6thans.

व्ययेशे लग्नगे जातो व्ययशीलो जनो भवेत्
दुर्बलः कफरोगी च धनविद्याविवर्जितः १३३

**133. Effects of 12ths Lord in Various Houses (up to Sloka 144).**

If 12ths Lord is in 1st House, the native will be a spendthrift, be weak in constitution, will suffer from phlegmatic disorders and be devoid of wealth and learning.

व्ययेशे धनभावस्थे शुभकार्ये व्ययः सदा
धार्मिकः प्रियवादी च गुणसौख्यसमन्वितः १३४

**134.** If 12ths Lord is in 2nd House, the native will always spend on inauspicious deeds, be religious, will speak sweetly and will be endowed with virtues and happiness.

व्ययेशे सहजे जातो भ्रातृसौख्यविवर्जितः
भवेदन्यजनद्वेषी स्वशरीरस्य पोषकः १३५

**135**. If 12ths Lord is in 3rd House, the native will be devoid of fraternal bliss, will hate others and will promote self-nourishment.

व्ययेशे सुखभावस्थे मातुः सुखविवर्जितः
भूमियानगृहादीनां हानिस्तस्य दिनेदिने १३६

**136.** If 12ths Lord is in 4th House, the native will be devoid of maternal happiness and will day by day accrue losses with respect to lands, conveyances and houses**.**

व्ययेशे सुतभावस्थे सुतविद्याविवर्जितः
पुत्रार्थे च व्ययस्तस्य तीर्थाटनपरो नरः १३७

**137**. If 12ths Lord is in 5th House, the native will be bereft of sons and learning. He will spend, as well as visit shrines in order to beget a son.

व्ययेशे रिपुभावस्थे जातः स्वजनवैरकृत्
क्रोधी पापी च दुःखी च परजायारतो नरः १३८

**138.** If 12ths Lord is in 6th House, the native will incur enmity with his own men, be given to anger, be sinful, miserable and will go to others wives**.**

व्ययेशे दारभावस्थे व्ययो दारकृतः सदा
तस्य भार्यासुखं नैव बलविद्याविवर्जितः १३९

**(139)** If 12ths Lord is in 7th House, the native will incur expenditure on account of his wife, will not enjoy conjugal bliss and will be bereft of learning and strength.

व्ययेशे मृत्युभावस्थे जातो लाभान्वितः सदा
प्रियवाङ् मध्यमायुश्च सम्पूर्णगुणसंयुतः १४०

**140**. If 12ths Lord is in 8th House, the native will always gain, will speak affably, will enjoy a medium span of life and be endowed with all good qualities.

व्ययेशे भाग्यभावस्थे गुरुद्वेषी भवेन्नरः
मित्रैरपि भवेद्वैरं स्वार्थसाधनतत्परः १४१

**141**. If 12ths Lord is in 9th House, the native will dishonour his elders, be inimical even to his friends and be always intent on achieving his own ends.

व्ययेशे राज्यभावस्थे व्ययो राजकुलाद्भवेत्
पितृतोऽपि सुखं तस्य स्वल्पमेव हि जायते १४२

**142.** If 12ths Lord is in 10th House, the native will incur expenditure through royal persons and will enjoy only moderate paternal bliss**.**

व्ययेशे लाभभावस्थे लाभे हानिः प्रजायते
परेण रक्षितं द्रव्यं कदाचिल्लभते नरः १४३

**143.** If 12th Lord is in 11th House, the native will incur losses, be brought up by others and will sometimes gain through others.

व्ययेशे व्ययभावस्थे व्ययाधिक्यं हि जायते
न शरीरसुखं तस्य क्रोधी द्वेषपरो नृणाम् १४४

**144.** If 12ths Lord is in 12th House, the native will only face heavy expenditure, will not have physical felicity, be irritable and spiteful.

इति ते कथितं विप्र भावेशानां च यत् फलम्
बलाबलविवेकेन सर्वेषं तत्समादिशेत् १४५

द्विराशीशस्य खेटस्य विदित्वोभयथा फलम्
विरोधे तुल्यफलयोर्द्वयोर्नाशः प्रजायते १४६

विभिन्नयोस्तु फलयोर्द्वयोः प्राप्तिर्भवेद्ध्रुवम्
ग्रहे पूर्णबले पुर्णमर्धमर्धबले फलम् १४७

पादं हीनबले खेटे ज्ञेयमित्थं बुधैरिति
उक्तं भावस्थितानां ते भावेशानां पलं मया १४८

**145-148. <u>Miscellaneous</u>.** O Brahmin, those are the effects of House Lords, which are to be deduced, considering their strengths and weaknesses. In the case of a Planet, owning two Houses, the results are to be deducted based on its two lordships. If contrary results are thus indicated, the results will be nullified, while results of v6thed nature will come to pass. The Planet will yield full, half, or a quarter of the effects according to its strength being full, medium and negligible, respectively. Thus I have told you about the effects, due to House Lords in various Houses.

अथाऽप्रकाशग्रहफलाध्यायः २५
रव्यादिसप्तखेटानां प्रोक्तं भावफलं मया
अप्रकाशग्रहाणां च फलानि कथयाम्यहम् १

## Ch. 25. Effects of Non-Luminous Planets

**1**. Thus I have explained the effects of the seven Planets, viz. Sun, Moon, Mars, Mercury, Jupiter, Venus, Saturn, Rahu and Ketu. Now I tell you about the effects of non-luminous Planets.

शूरो विमलनेत्रांशः सुस्तब्धो निर्घृणः खलः
मूर्तिस्थे धूमसंज्ञे च गादःरोषो नरः सदा २

**2**. Effects of Dhum in Various Houses (up to Sloka 13). If Dhum is in Lagna, the native will be valiant, endowed with beautiful eyes, stupefied in disposition, unkind, wicked and highly short-tempered.

रोगी धनी तु हीनाङ्गो राज्यापहृतमानसः
धूमे द्वितीये संप्राप्ते मन्दप्रज्ञो नपुंसकः ३

**3.** If Dhum is in 2nd House, the native will be sickly, wealthy, devoid of a limb, will incur humiliation at royal level, be dull witted and be a eunuch.

मतिमान् शौर्यसम्पन्न इष्टचितः प्रियंवदः
धूमे सहजभावस्थे जनाढ्यो धनवान् भवेत् ४

**4.** Dhum is in 3rd House, the native will be intelligent, very bold, delighted, eloquent and be endowed with men and wealth.

कलत्राङ्गपरित्यक्तो नित्यं मनसि दुःखितः
धूमे चतुर्थे सम्प्राप्ते सर्वशास्त्रार्थचिन्तकः ५

**5.** If Dhum is in 4th House, the native will be grieved on account of being given up by his female, but will be learned in all Shastras.

स्वल्पापत्यो धनैर्हीनो धूमे पञ्चमसंस्थिते
गुरुत सर्वभत्तं च सुहृन्मन्त्रविवर्जितः ६

**6.** If Dhum is in 5th House, the native will have limited progeny, be devoid of wealth, be great, will eat anything and be bereft of friends and Mantras.

बलवाञ्छत्रुवधको धूमे च रिपुभावगे
बहुतेजोयुतः रव्यातः सदा रोगविवर्जितः ७

**7.** If Dhum is in 6th House, the native will be strong, will conquer his enemies, be very brilliant, famous and free from diseases.

निर्धनः सततं कामी परदारेषु कोविदः
धूमे सप्तमगे जातो निस्तेजाः सर्वदा भवेत् ८

**8.** If Dhum is in 7th House, the native will be penniless, be ever sensuous, skilful in going to others females and be always devoid of brilliance.

विक्रमेण परित्यक्तः सोत्साहो सत्यसङ्गरः
अप्रियो निष्ठुरः स्वार्थी धूमे मृत्युगते सति ९

**9.** If Dhum is in 8th House, the native will be bereft of courage, but be enthusiastic, be truthful, disagreeable, hardhearted and selfish.

सुतसौभाग्यसम्पन्नो धनी मानी दयान्वितः
धर्मस्थाने स्थिते धूमे धर्मवान् बन्धुवत्सलः १०

**10.** If Dhum is in 9th House, the native will be endowed sons and fortunes, be rich, honourable, kind, religious and well disposed to his relatives.

सुतसौभाग्यसंयुक्तः सन्तोषी मतिमान् सुखी
कर्मस्थे मानवो नित्यं धूमे सत्यपदस्थितः ११

**11**. If Dhum is in 10th House, the native will be endowed with sons and fortunes, be delighted, intelligent, happy and truthful.

धनधान्यहिरण्याढ्यो रूपवांश्च कलान्वितः
धूमे लाभगते चैव विनीतो गीतकोविदः १२

**12.** If Dhum is in 11th House, the native will be endowed with wealth, grains and gold, be beautiful, will have knowledge of arts, be modest and be skilful in singing.

पतितः पापकर्मा च धूमे द्वादशसङ्गते
परदारेषु संसक्तो व्यसनी निर्घृणः शठः १३

**13.** If Dhum is in 12th House, the native will be morally fallen, will indulge in sinful acts, be interested in others wives, addicted to vices, unkind and crafty.

लग्ने पाते च सम्प्राप्ते जातको दुःखीपीडितः
क्रूरो घातकरो मूर्खो द्वेषी बन्धुजनस्य च १४

**14. Effects of Vyatipat in Various Houses (up to Sloka 25).** If Vyatipat (also known in short, as Pat) is in 1st House, the native will be troubled by miseries, be cruel, will indulge in destructive acts, be foolish and will be disposed to his relatives.

जिह्मोऽतिपित्तवान् भोगी धनस्थे पातसंज्ञके
निर्घृणश्चाऽकृतज्ञश्च दुष्टात्मा पापकृत्तथा १५

**15**. If Vyatipat is in 2nd House, the native will be morally crooked, be bilious, will enjoy pleasures, be unkind, but grateful, be wicked and sinful.

स्थिरप्रज्ञो रणी दाता धनाढ्यो राजवल्लभः
सम्प्राप्ते सहजे पाते सेनाधीशो भवेन्नरः १६

**16.** If Vyatipat is in 3rd House, the native will be firm in disposition, be a warrior, be liberal, very rich, dear to the king and be head of an Army**.**

बन्धव्याधिसमायुक्तः सुतसौभाग्यवर्जितः
चतुर्थगो यदा पातस्तदा स्यान्मनुजश्च सः १७

**17.** If Vyatipat is in 4th House, the native will be endowed with relatives etc., but not sons and fortunes.

दरिद्रो रूपसंयुक्तः पाते पञ्चमगे सति
कफपित्तानिलैर्युक्तो निष्ठुरो निरपत्रपः १८

**18**. If Vyatipat is in 5th House, the native will be poor, be charming in appearance, will have imBalaances of phlegm, bile and wind, be hard-hearted and shameless.

शत्रुहन्ता सुपुष्टश्च सर्वास्त्राणां च चालकः
कलासु निपुणः शान्तः पाते शत्रुगते सति १९

**19.** If Vyatipat is in 6th House, the native will destroy his enemies, be physically mighty, skilful in use of all kinds of weapons and in arts and be peaceful in disposition**.**

धनदारसुतैस्त्यक्तः स्त्रीजितो दुःखसंयुतः
पाते कलत्रगे कामी निर्लज्जः परसौहृदः २०

**20.** If Vyatipat is in 7th House, the native will be bereft of wealth, wife and sons, will subdue to females, be miserable, sensuous, shameless and friendly to others**.**

विकलाक्षो विरूपश्च दुर्भगो द्विजनिन्दकः
मृत्युस्थाने स्थिते पाते रक्तपीडापरिप्लुतः २१

**21**. If Vyatipat is in 8th House, the native will have deformity of eyes, be ugly, unfortunate, spiteful to Brahmins and be troubled by disorders of blood.

बहुव्यापारको नित्यं बहुमित्रो बहुश्रुतः
धर्मभे पातखेटे च स्त्रीप्रियश्च प्रियंवदः २२

**22.** If Vyatipat is in 9th House, the native will have many kinds of business and many friends; he will be very learned, well disposed to his wife and he will be eloquent.

सश्रीको धर्मकृछान्तो धर्मकार्येषु कोविदः
कर्मस्थे पातसंज्ञे हि महाप्राज्ञो विचक्षणः २३

**23**. If Vyatipat is in 10th House, the native will be religious, peaceful, skilful in religious acts, very learned and far-sighted.

प्रभूतधनवान् मानी सत्यवादी दृढव्रतः
अश्वढ्यो गीतसंसक्तः पाते लाभगते सति २४

**24.** If Vyatipat is in 11th House, the native will be extremely opulent, be honourable, truthful, firm in policy, endowed with many horses and be interested in singing.

कोपी च बहुकर्माढयो व्यंगो धर्मस्य दूषकः
व्ययस्थाने गते पाते विद्वेषी निजबन्धुषु २५

**25.** If Vyatipat is in 12th House, the native will be given to anger, associated with many activities, disabled, irreligious and hate his own relatives.

विद्वान् सत्यरतः शान्तो धनवान् पुत्रवाञ्छुचिः
परिधौ तनुगे दाता जायते गुरुवत्सलः २६

**26. <u>Effects of Paridhi (or Prithvesh) in Various Houses (up to Sloka 37).</u>**

If P6thdhi is in 1st House, the native will be learned, truthful, peaceful, rich, endowed with sons, pure, ch6thtable and dear to elders.

ईश्वरो रूपवान् भोगी सुखी धर्मपरायणः
धनस्थे परिधौ जातः प्रभुर्भवति मानवः २७

**27.** If Parithdhi is in 2nd House, the native will be wealthy, charming, will enjoy pleasures, be happy, very religious and be a Lord.

स्त्रीवल्लभः सुरूपांगो देवस्वजनसंगतः
तृतीये परिधौ भृत्यो गुरुभक्तिसमन्वितः २८

**28.** If Parithdhi is in 3rd House, the native will be fond of his wife, be very charming, pious, well disposed to his men, be a servant and be respectful of his elders.

परिधौ सुखभावस्थे विस्मितं त्वरिमंगलम्
अक्रूरं त्वथ सम्पूर्णं कुरुते गीतकोविदम् २९

**29.** If Parithdhi is in 4th House, the native will be wonder-struck, helpful to enemies as well, kind, endowed with everything and be skilful in singing.

लक्ष्मीवान् शीलवान् कान्तः प्रियवान् धर्मवत्सलः
पञ्चमे परिधौ जातः स्त्रीणां भवति वल्लभः ३०

**30**. If Parithdhi is in 5th House, the native will be affluent, virtuous, splendorous, affectionate, religious and dear to his wife.

व्यक्तोऽर्थपुत्रवान् भोगी सर्वसत्त्वहिते रतः
परिधौ रिपुभावस्थे शत्रुहा जायते नरः ३१

**31.** If Parithdhi is in 6th House, the native will be famous and wealthy, be endowed with sons and pleasures, be helpful to all and will conquer his enemies.

स्वल्पापत्यः सुखैर्हीनो मन्दप्रज्ञः सुनिष्ठुरः
परिधौ द्यूनभावस्थे स्त्रीणां व्याधिश्च जायते ३२

**32.** If Parithdhi is in 7th House, the native will have limited number of children, be devoid of happiness, be of mediocre intelligence, very hard-headed and will have a sickly wife.

अध्यात्मचिन्तकः शान्तो दृढकायो दृढव्रतः
धर्मवांश्च ससत्त्वश्च परिधौ रन्ध्रसंस्थिते ३३

**33.** If Parithdhi is in 8th House, the native will be spiritually disposed, peaceful, strong-bodied, firm in decision, religious and gentle.

पुत्रान्वितः सुखी कान्तो धनाढयो लौल्यवर्जितः
परिधौ धर्मगे मानी स्वल्पसन्तुष्टमानसः ३४

**34.** If Parithdhi is in 9th House, the native will be endowed with sons, be happy, brilliant, very affluent, be devoid of excessive passion, be honourable and be happy with even a iota.

कलाभिज्ञस्तथा भोगी दृढकायो ह्यमत्सरः
परिधौ दशमे प्राप्ते सर्वशास्त्रार्थपारगः ३५

**35.** If Parithdhi is in 10th House, the native will be versed in arts, will enjoy pleasures, be strong-bodied and be learned in all Shastras.

स्त्रीभोगी गुणवांश्चैव मतिमान् स्वजनप्रियः
लाभगे परिधौ जातो मन्दाग्निरूपपद्यते ३६

**36**. If Parithdhi is in 11th House, the native will enjoy pleasures through women, be virtuous, intelligent, dear to his people and will suffer disorders of digestive fire.

व्ययस्थे परिधौ जातो व्ययकृत् मानवः सदा
दुःखभाग् दुष्टबुद्धिश्च गुरुनिन्दापरायणः ३७

**37**. If Parithdhi is in 12th House, the native will always be a spendthrift, be miserable, firm and will dishonour elders.

धनधान्यहिरण्याढ्यः कृतज्ञः सम्मतः सताम्
सर्वदोषपरित्यक्तश्चापे तनुगते नरः ३८

**38. Effects of Chap (Indr dhanus, or Kodanda, up to Sloka 49).**

If Chap is in 1st House, the native will be endowed with wealth, grains and gold, be grateful, agreeable and devoid of all actions.

प्रियंवदः प्रगल्भाढ्यो विनीतो विद्ययाऽन्वितः
धनस्थे चापखेटे च रूपवान् धर्मतत्परः ३९

**39**. If Chap is in 2nd House, the native will speak affably, be very rich, modest, learned, charming and religious.

कृपणोऽतिकलाभिज्ञश्चौर्यकर्मरतः सदा
सहजे धनुषि प्राप्ते हीनाङ्गो गतसौहृदः ४०

**40**. If Chap is in 3rd House, the native will be a miser, be versed in many arts, will indulge in thieving, be devoid of some limb and be unfriendly.

सुखी गोधनधान्याद्यै राजसन्मानपूजितः
कार्मुके सुखसंस्थे तु नीरोगो तनु जायते ४१

**41.** If Chap is in 4th House, the native will be happy, endowed with quadrupeds, wealth, grains etc., be honoured by the king and be devoid of sickness.

रुचिमान् दीर्घदर्शी च देवभक्तः प्रियंवदः
चापे पञ्चमगे जातो विवृद्धः सर्वकर्मसु ४२

**42.** If Chap is in 5th House, the native will be splendorous, far-sighted, pious, affable and will acquire prosperity in all his undertakings.

शत्रुहन्ताऽतिधर्तश्च सुखी प्रीतिरुचिः शुचिः
षष्ठस्थानगते चापे सर्वकर्मसमृद्धिभाक् ४३

**43**. If Chap is in 6th House, the native will destroy his enemies, be happy, affectionate, pure and will achieve plentifulness in all his undertakings.

ईश्वरो गुणसम्पूर्णः शास्त्रबिद्धार्भिकः प्रियः
चापे सप्तमभावस्थे भवतीति न संशयः ४४

**44**. If Chap is in 7th House, the native will be wealthy, endowed with all virtues, learned in Shastras, religious and agreeable.

परकर्मरतः क्रूरः परदारपरायणः
अष्टमस्थानगते चापे जायते विकलांगकः ४५

**45**. If Chap is in 8th House, the native will be interested in others [213] jobs, be cruel, interested in others wives and have a defective limb.

तपस्वी व्रतचर्यासु निरतो विद्ययाऽधिकः
धर्मस्थे जायते चापे मानवो लोकविश्रुतः ४६

**46.** If Chap is in 9th House, the native will perform penance, will take to religious observations, be highly learned and be famous among men.

बहुपुत्रधनैश्वर्यो गोमहिष्यादिमान् भवेत्
कर्मभे चापसंयुक्ते जायते लोकविश्रुतः ४७

**47.** If Chap is in 10th House, the native will be endowed with many sons, abundant wealth, cows, buffaloes etc. and will be famous among men.

लाभगे चपखेटे च लाभयुक्तो भवेन्नरः
निरोगो दृढकोपाग्निर्मन्त्रस्त्रीपरमास्त्रवित् ४८

**48.** If Chap is in 11th House, the native will gain many treasures, will be free from diseases, very fiery in disposition, affectionate to his wife and will have knowledge of Mantras and weapons.

खलोऽतिमानी दुर्बुद्धिर्निर्लज्जो व्ययसंस्थिते
चापे परस्त्रीसंयुक्तो जायते निर्धनः सदा ४९

**49.** If Chap is in 12th House, the native will be wicked, very honourable, evil in disposition, shameless, will go to others females and be ever poor.

कुशलः सर्वविद्यासु सुखी वाङ्निपुणः प्रियः
तनौ शिखिनि सञ्जातः सर्वकामान्वितो भवेत् ५०

**50. Effects of Dhwaj (Sikhi, or UpaKetu) in Various Houses (up to Sloka 61).**

If Dhwaj is in 1st House, the native will be skilful in all branches of learning, be happy, efficient in speech, agreeable and be very affectionate.

वक्ता प्रियंवदः कान्तो धनस्थानगते ध्वजे
काव्यकृत् पण्डितो मानी विनीतो वाहनान्वितः ५१

**51.** If Dhwaj is in 2nd House, the native will be a good and affable speaker, be splendorous, will write poetry, be scholarly, honourable, modest and endowed with conveyances**.**

कदर्यः क्रूरकर्ता च कृशाङ्गो धनवर्जितः
सहजस्थे तु शिखिनि तीव्ररोगी प्रजायते ५२

**52**. If Dhwaj is in 3rd House, the native will be miserly, cruel acts, thin-bodied, poor and will incur severe diseases.

रूपवान् गुणसम्पन्नः सात्त्विकोऽपि स्तुतिप्रियः
सुखसंस्थे तु शिखिनि सदा भवति सौख्यभाक् ५३

**53.** If Dhwaj is in 4th House, the native will be charming, very virtuous, gentle, interested in Vedic Knowledge and be always happy.

सुखी भोगी कलाविज्ञ पञ्चमस्थानगे ध्वजे
युक्तिज्ञो मतिमान् वाग्मी गुरुभक्तिसमन्वितः ५४

**54.** If Dhwaj is in 5th House, the native will be happy, will enjoy pleasures, be versed in arts, skilled in expedients, intelligent, eloquent and will respect elders.

मातृपक्षक्षयकरः शत्रुहा बहुवान्धवः
रिपुस्थाने ध्वजे प्राप्ते शूरः कान्तो विचक्षणः ५५

**55.** If Dhwaj is in 6th House, the native will be ominous for material relatives, will win over his enemies, be endowed with many relatives, valiant, splendorous and skilful.

द्यूतक्रीडाष्वभिरतः कामी भोगसमन्वितः
ध्वजे तु सप्तमस्थाने वेश्यासु कृतसौहृदः ५६

**56**. If Dhwaj is in 7th House, the native will be interested in gambling, be sensuous, will enjoy pleasures and will befriend prostitutes.

नीचकर्मरतः पापो निर्लज्जो निन्दकः सदा
मृत्युस्थाने ध्वजे प्राप्ते गतस्त्र्यपरपक्षकः ५७

**57**. If Dhwaj is in 8th House, the native will be interested in base acts, be sinful, shameless, will blame others, will lack in m6thtal happiness and will take others side.

लिङ्गधारी प्रसन्नात्मा सर्वभूतहिते रतः
धर्मभे शिखिनि प्राप्ते धर्मकार्येषु कोविदः ५८

**58**. If Dhwaj is in 9th House, the native will wear badges, be delighted, helpfully disposed to all and he will be skilled in religious deeds.

सुखसौभाग्यसम्पन्नः कामिनीनां च वल्लभः
दाता द्विजैः समायुक्तः कर्मस्थे शिखिनि द्विज ५९

**59.** O Brahmin, if Dhwaj is in 10th House, the native will be endowed with happiness and fortunes, be fond of females, be ch6thtable and will befriend Brahmins.

नित्यलाभः सुधर्मी च लाभे शिखिनि पूजितः
धनाढ्यः सुभगः शूरः सुयज्ञश्चाति कोविदः ६०

**60.** If Dhwaj is in 11th House, the native will ever acquire gains, be very religious, honourable, affluent, fortunate, valiant and skilled in sacrificial rites.

पापकर्मरतः शूरः श्रद्धाहीनोऽघृणो नरः
परदाररतो रौद्रः शिखिनि व्ययगे सति ६१

**61.** If Dhwaj is in 12th House, the native will be interested in sinful acts, be valiant, untrustworthy, unkind, interested in others females and be short-tempered.

रोगार्त्तः सततं कामी पापात्माधिगतः शठः
तनुस्थे गुलिके जातः खलभावोऽतिदुःखितः ६२

**62. Effects of Gulika in Various Houses (up to Sloka 73).**

If Gulika is in 1st House, the native will be afflicted by diseases, be lustful, sinful, crafty, wicked and very miserable.

विकृतो दुःखितः क्षुद्रो व्यसनी च गतत्रपः

धनस्थे गुलिके जातो निःस्वो भवति मानवः ६३

**63.** If Gulika is in 2nd House, the native will be unsightly in appearance, miserable, mean, given to vices, shameless and penniless.

चार्वङ्गो ग्रामपः पुण्यसंयुक्तः सज्जनप्रियः
सहजे गुलिके जातो मानवो राजपूजितः ६४

**64.** If Gulika is in 3rd House, the native will be charming in appearance, will head a village, be fond of virtuous men and be honoured by the king.

रोगी सुखपरित्यक्तः सदा भवति पापकृत्
गुलिके सुखभावस्थे वातपित्ताधिको भवेत् ६५

**65.** If Gulika is in 4th House, the native will be sickly, devoid of happiness, sinful and afflicted due to windy and billious excesses.

विस्तुतिर्विधनोऽल्पायुर्द्वेषी क्षुद्रो नपुंसकः
गुलिके सुतभावस्थे स्त्रीजितो नास्तिको भवेत् ६६

**66**. If Gulika is in 5th House, the native will not be praise-worthy, be poor, short-lived, spiteful, mean, be a eunuch, be subdued by his wife and be a heterodox.

वीतशत्रुः सुपुष्टाङ्गो रिपुस्थाने यमात्मजे
सुदीप्तः सम्मतः स्त्रीणां सोत्साहः सुदृढो हितः ६७

**67.** If Gulika is in 6th House, the native will be devoid of enemies, be strong-bodied, splendorous, liked by his wife, enthusiastic, very friendly and helpful in disposition.

स्त्रीजितः पापकृज्जारः कृशाङ्गो गतसौहृदः
जीवितः स्त्रीधनेनैव गुलिके सप्तमस्थिते ६८

**68.** If Gulika is in 7th House, the native will subdue to his spouse, be sinful, will go to others females, be emaciated, devoid of friendship and will live on his wifes wealth.

क्षुधालुर्दुःखित क्रूरस्तीक्ष्णरोषोऽतिनिर्घृणः
रन्ध्रगे गुलिके निःस्वो जायते गुणवर्जितः ६९

**69.** If Gulika is in 8th House, the native will be troubled by hunger, be miserable, cruel, very much short-tempered, very unkind, poor and bereft of good qualities.

बहुक्लेशः कृशतनुर्दुष्टकर्मातिनिर्घृणः
गुलिके धर्मगे मन्दः पिशुनो बहिराकृतिः ७०

**70.** If Gulika is in 9th House, the native will undergo many ordeals, be emaciated, will perform evil acts, be very unkind, sluggish and be a talebearer**.**

पुत्रान्वितः सुखी भोक्ता देवाग्नयर्चनवत्सलः
दशमे गुलिके जातो योगधर्माश्रितः सुखी ७१

**71.** If Gulika is in 10th House, the native will be endowed with sons, be happy, will enjoy many things, be fond of worshipping gods and fire and will practice meditation and religion**.**

सुस्त्रीभोगी प्रजाध्यक्षो बन्धूनां च हिते रतः
लाभस्थे गुलिके जातो नीचाङ्ग सार्वभौमकः ७२

**72.** If Gulika is in 11th House, the native will enjoy women of class, be a leader of men, be helpful to his relatives, be short stature and be an emperor**.**

नीचकर्माश्रितः पापो हीनाङ्गो दुर्भगोऽलसः
व्ययगे गुलिके जातो नीचेषु कुरुते रतिम् ७३

**73**. If Gulika is in 12th House, the native will indulge in base deeds, be sinful, defective-limbed, unfortunate, indolent and will join mean people.

लग्ने प्राणपदे क्षणो रोगि भवति मानवः
मूकोन्मत्तो जडाङ्गस्तु हीनाङ्गो दुःखितः कृशः ७४

**74**__**. Effects of Pranapads**__ Position with reference to Lagna and in Various Houses (up to Sloka 85). If Pranapad is in 1st House, the native will be weak, sickly, dumb, lunatic, dull witted, defective-limbed, miserable and emaciated.

बहुधान्यो बहुधनो बहुभृत्यो बहुप्रजः
धनस्थानस्थिते प्राणे सुभगो जयते नरः ७५

**75.** If Pranapad is in 2nd House, the native will be endowed with abundant grains, abundant wealth, abundant attendants, abundant children and be fortunate.

हिंस्रो गर्वसमायुक्तो निष्ठुरोऽतिमलिम्लुचः
तृतीयगे प्राणपदे गुरुभक्तिविवर्जितः ७६

**76**. If Pranapad is in 3rd House, the native will be injurious (or mischievous), proud, hard-hearted, very dirty and be devoid of respect for elders.

सुखस्थे तु सुखी कान्तः सुहृद्रमासु वल्लभः
गुरौ परायणः शीतः प्राणे वै सत्यतत्परः ७७

**77.** If Pranapad is in 4th House, the native will be happy, friendly, attached to females and elders, soft and truthful.

सुखभाक् सुक्रियोपेतस्त्वपचारदयान्वितः
पञ्चमस्थे प्राणपदे सर्वकामसमन्वितः ७८

**78.** If Pranapad is in 5th House, the native will be happy, will do good acts, be kind and very affectionate.

बन्धुशत्रुवशस्तीक्ष्णो मन्दाग्निर्निर्दयः खलः
षष्ठे प्राणपदे रोगी वित्तपोऽल्पायुरेव च ७९

**79.** If Pranapad is in 6th House, the native will be subdued by his relatives and enemies, be sharp, will have defective digestive fire, be wicked, sickly, affluent and short-lived.

ईर्ष्यालु सततं कामी तीव्ररौद्रवपुर्नरः
सप्तमस्थे प्राणपदे दुराराध्यः कुबुद्धिमान् ८०

**80.** If Pranapad is in 7th House, the native will be green-eyed, ever libidinous, fierce in appearance, be not worth respect and be ill-disposed.

रोगसन्तापिताङ्गश्च प्राणपादेऽष्टमे सति
पीडितः पार्थिवैर्दुःखैर्मृत्यबन्धुसुतोद्भवैः ८१

**81.** If Pranapad is in 8th House, the native will be afflicted by diseases, be troubled and will incur misery on account of the king, relatives, servants and sons**.**

पुत्रवान् धनसम्पन्नः सुभगः प्रियदर्शनः
प्राणे धर्मस्थिते भृत्यः सदाऽदुष्टो विचक्षणः ८२

**82**. If Pranapad is in 9th House, the native will be endowed with sons, be very rich, fortunate, charming, will serve others and be not wicked, but be skilful.

वीर्यवान् मतिमान् दक्षो नृपकार्येषु कोविदः
दशमे वै प्राणपदे देवार्चनपरायणः ८३

**83**. If Pranapad is in 10th House, the native will be heroic, intelligent, skilful, be an expert in carrying out royal orders and will worship gods.

विख्यातो गुणवान् प्राज्ञो भोगीध नसमन्वितः

लाभस्थानस्थिते प्राणे गौराङ्गो मातृवत्सलः ८४

84 If Pranapad is in 11th House, the native will be famous, virtuous, learned, wealthy, fair-complexioned and attached to mother.

क्षुद्रो दुष्टस्तु हीनाङ्गो विद्वेशी द्विजबन्धुषु
व्यये प्राणे नेत्ररोगी काणो वा जायते नरः ८५

**85.** If Pranapad is in 12th House, the native will be mean, wicked, defective-limbed, will hate Brahmins and relatives and suffer from eye diseases, or be one-eyed.

इत्यप्रकाशखेटानां फलान्युक्तानि भूसुर
तथा यानि प्रकाशानां सूर्यादीनां खचारिणाम् ८६

तानि स्थितिवशात्तेषां स्फुटदृष्टिवशात् तथा
बलाऽबलविवेकेन वक्तव्यानि शरीरिणाम् ८७

**86-87**. O Brahmin, these are the effects for Dhum etc. Before declring these results, the effects of Sun and other Planets should be wisely conceived by their positions, relations and Aspects apart from their strength, or weakness.

अथ ग्रहस्फुटदृष्टिकथनाध्यायः २६
भगवन् कतिधा दृष्टिर्बलं कतिविधं तथा
इति मे संशयो जातस्तं भवान् छेत्तुमर्हति १

## Ch. 26. Evaluation of Aspects of Planets

**1. O Glorious, it is said, that Aspects (of Planets) and their strengths are to be known in deciding the effects. How many kinds are these? Please clarify doubts.**

एका राशिवशाद् दृष्टिः पूर्वमुक्ता च या द्विज
अन्या खेटस्वभावोत्था स्फुटा तां कथयाम्यहम् २

त्रिदशे च त्रिकोणे च चतुरस्रे च सप्तमे
पादवृद्धया प्रपश्यन्ति प्रयच्छन्ति फलं तथा ३

पूर्णं च सप्तमं सर्वे शनिजीवकुजाः पुनः
विशेषतश्च त्रिदशत्रिकोणचतुरष्टमान् ४

इति सामान्यतः पूर्वैराचार्यैः प्रतिपादिता
स्फुटान्तरवशाद्या च दृष्टिः साऽतिस्फुटा यथा ५

**2-5. Aspects of the Planets.** O Brahmin, I have earlier stated Aspects, based on Rāśis. The other kind is between Planets, which I detail below. 3rd and 10th, 5th and 9th, 4th and 8th and lastly 7th. On these places the Aspects increase gradually in slabs of quarters, i.e ¼, , ¾ and full. The effects will also be proportionate. All Planets give a Aspect to the 7th fully. Saturn, Jupiter and Marshave special Aspects, respectively, on the 3rd and the 10th, the 5th and the 9th and the 4th and the 8th. The ancient preceptors have explained these, which ordinary. By subtle mathematical calculations these Aspects will have to be clearly understood, as under.

दृश्याद् विशोध्य द्रष्टारं षड्राशिभ्योऽधिकान्तरम्
दिगभ्यः संशोध्य तद्भागा द्विभक्ता दृक् स्फुटा भवेत् ६

पञ्चाधिके विना राशिं भागाद्विघ्नाश्च दृक् स्फुटा
वेदाधिके त्यजेद् भूताद् भागा दृष्टिः त्रिभाधिके ७

विशोध्यार्णवतो द्वाभ्यां लब्धं त्रिंशद्युतं च दृक्
द्व्यधिके तु विना राशिं भागास्तिथियुतास्तथा ८

**6-8. Evaluation of the Aspects of the Planets.** Deduct the longitude of the Planet (or House), that receives a Aspect, from that of the Planet, which gives the Aspect. If the sum exceeds six Rāśis, deduct the sum again from 10 Rāśis. Convert the latter sum into degrees and divide by two. The resultant product is Aspect Kona (or aspectual angle). If the difference is in excess of 5 Rāśis, ignore the Rāśis and multiply the degrees etc. by 2, which is the value of the Aspect. If the difference is in excess of 4 Rāśis, deduct it from 5 Rāśis, and the resultant degees etc. become the Aspect value. If the difference is in excess of 3 Rāśis, deduct it from 4 Rāśis and (increase 30 by) halve the product to get the Aspect value. If the difference is above 2 Rāśis, ignore the Rāśis and add 15 to the degrees etc. to get the Aspect value. If it is in excess of one Rāśi, ignore the Rāśis and divide the degrees by 2 to get the Aspect value.

रूपाधिके विना राशिं भागा द्वयाप्ताश्च दृग् भवेत्
एवं राश्यादिके शेषे शनौ द्रष्टरि भो द्विज ९

एकभे नवभे भागा भुक्ता भोग्या द्विसंगुणाः
द्विभेंऽशार्धोनिताः षष्टिरष्टभे खाग्नियुग् लवाः १०

**9-10. Special consideration for Saturn's Aspects.**

O Brahmin, if Saturn is the Planet, that gives a Aspect, find out the difference between him and the Planet, that receives the Aspect; if the sum is above 1 Rāśi, multiply the degrees etc. by 2 to get the Aspect value. If the sum is above nine Rāśis, the degrees to elapse be doubled to get the Aspect value. If the sum is above 2 Rāśis, the degrees etc. be halved and deducted from 60. If the sum exceeds 8 Rāśis, add to the degrees etc. a figure of 30 to get the Aspect value. In other cases, the sums be processed, as explained earlier.

त्रिसप्तभे तु भौमस्य षष्टिरत्र लवोनिता
सार्धांशास्तिथिसंयुक्ता द्विभे रूपं सदाऽङ्गभे ११

**11. Special consideration for Mars's Aspects.**

Deduct the longitude of Marsfrom that of the Planet, that receives the Aspect. If the sum is 3 Rāśis & c, or 7 Rāśis & c, the degrees etc. be reduced from 60. If it is above 2 Rāśis, the degrees etc. be increased by half of it and superadd 15. If the sum is 6 Rāśis, one Rup is the value.

त्रिसप्तभे तु जीवस्य भागार्धं शरवेदयुक्
द्विगुणैस्तु लवैश्चोनाः खरसाश्चतुरष्टभे १२

एवं रव्यादिखेटानां स्फुटा दृष्टिः प्रजायते
तद्वशादेव भावानां जातकस्य फलं वदेत् १३

**12-13 Special consideration for Jupiter's Aspects.**

Deduct the longitude of Jupiter from that of the Planet, that receives the Aspect from Jupiter. If the resultant sum is 3 Rāśis & c, or 7 Rāśis & c, halve the degrees etc. and increase it by 15. It the sum is 4 Rāśis & c, or 8 Rāśis & c, the degrees etc. be subtracted from 60. This will be the Aspect value. The sum, being in conformity with others than these, be treated, as stated earlier.

अथ स्पष्टबलाध्यायः २७
अथ स्पष्टबलं वक्ष्ये स्थानकालादिसम्भवम्
नीचोनां खचरं भार्धाधिक चक्राद् विशोधयेत् १

## Ch. 27. Evaluation Of Strengths

**Shad Bala consists of the following:** Sthan Bala (positional), Dig Bala (directional), Kaal Bala (Temporal), inclusive of Ayan Bala (equinoctial), Chesht Bala (motional), Naisargika Bala (natural), Drik Bala (aspectual). These strengths are computed for the seven Planets from Sun to Saturn. The nodes are not considered.

**Sthan Bala comprises of the following considerations**: Uchch Bala (exaltation), Sapt Vargaaj Bala (strength accruing out of positions in Rāśi, Hora, Dreshkan, Saptāṅś, Navāmśa, Dvadashāṅś and Trimshāṅś), OjhayugmaRāśiāṅś Bala (acquired by placement in odd, or even Rāśi and in odd, or even Navāmśa), Kendradi Bala (due to placement in Kon, or Panaphara, or Apoklima House), Dreshkan Bala (due to placement in first, second, or third decanate of a Rāśi).

**Kaal Bala comprises of the following subdivisions:** Nathonnata Bala (diurnal and nocturnal), Paksh Bala (fortnight), Tribhag Bala (due to day/night being made in 3 parts), Varsh, Maas, Dina and Hora Bala (Varsh - astrological year, Maas - month, Dina - weekday and Hora - planetary hour), Ayan Bala (equinoctial), Yudhdh Bala (due to partaking in war between Planets).

1- **Sthan Bala (up to Sloka 6).** Firstly Uchch Bala. Now about the strengths by classes positional, temporal etc. Deduct from the longitude of the Planet its (deep) debilitation point. If the sum is less than 6 Rāśis, consider it, as it is; if it exceeds 6 Rāśis, deduct the same from 12 Rāśis. The sum so got be converted into degrees etc. and divided by 3, which is the Planets Uchch Bala in Virupas.

भागीकृत्य त्रिभिर्भक्तं लब्धमुच्चबलं भवेत्
स्वत्रिकोणस्वगेहाधिमित्रमित्रसमारिषु २

अधिशत्रुगृहे चापि स्थितानां क्रमशो बलम्
भूताब्धयः खाग्निनखास्तिथ्यो दश युगाः कराः ३

एवं होराद्रकाणाद्रिभागांकद्वादशांशजम्
त्रिंशांशजं तदैक्यञ्च सप्तवर्गसमुद्भवम् ४

2-4. **Sapt Vargaj Bal**. If a Grah is in its Mooltrikon Rashi, it gets 45 Virupas, in Svasth Rashi 30 Virupas, in Pramudit Rashi 20 Virupas, in Shant Rashi 15 Virupas, in Din Rashi 10 Virupas, in Duhkhit Rashi 4 Virupas and in Khal Rashi 2 Virupas. Similarly these values occur for the other 6 divisional occupations, viz. Hora, Dreshkan, Saptans, Navans, Dvadashans and Trimshans. When all these are added together the Grah's Sapt Vargaj Bal emerges. 4½. OjhayugmaRashians Bal. Each of Sukr and Candr in even Rashis and others in odd Rashis acquire a quarter of Rupa. These are applicable to such Navansas also

शुक्रेन्दू समभांशेऽन्ये विषमेऽङ्घ्रिमितं बलम्
केन्द्रादिषुस्थिताः खेटाः पूर्णाऽर्धाऽङ्घ्रिमितं क्रमात् ५

5. **Kendradi Bala.** A Planet in a Kon gets full strength, while one in Panaphara House gets half and the one in Apoklima House gets a quarter, as Kendradi Bala.

आद्यमध्यावसानेषु द्रेष्काणेषु स्थिताः क्रमात्
पुंनपुंसकयोषाख्या दद्युरङ्घ्रिमितं बलम् ६

6. **Dreshkan Bala**. Male, female and hermaphrodite Planets, respectively, get a quarter Rupa according to placements in the first, second and third decanates.

सूर्यात् कुजात् सुखं जीवाज्ज्ञाच्चाऽस्तं लग्नमार्क्रितः
दशमं च भृगोश्चन्द्राद् हित्वा षड्भाधिके सति ७

**7-7. Dig Bala.** Deduct 4th House (Nadir) from the longitudes of Sun and Mars, 7th House from that of Jupiter and Mercury, 10th House from that of Venus and Moon and lastly Lagna from that of Saturn. If the sum is above 180 degrees, deduct the sum from 360. The sum arrived in either way be divided by 3, which will be Dig Bala of the Planet.

चक्राद् विशोध्य तद्भागास्त्रिभिर्भक्ताश्च दिग्बलम्
इष्टाधटि निशीथात्तन्नतं त्रिंशच्चयुतं नतम् ८

चन्द्रभौमशनीनां च नतं द्विघ्नं कलादिकम्
षष्टिशुद्धं तदन्येषां सदा रूपं बुधस्य हि ९

**8-9. Kaala Bala (up to Sloka 17). Firstly Nathonnata Bala**. Find out the difference between midnight and the apparent birth time, which is called Unnata. Deduct Unnata from 30 Ghatis to obtain Nata. Double the Nata in Ghatis, which will indicate identical Nata Bala for Moon, Mars and Saturn. Deduct the Nata from 60 to know the Unnata Bala of Sun, Jupiter and Venus. Mercury, irrespective of day and night, gets full Nathonnata Bala.

अथ पक्षबलं वक्ष्ये सूर्ये चन्द्राद् विशोध्य च
षड्भाधिके विशोध्यार्काद् भागीकृत्य त्रिभिर्भजेत् १०

पक्षजं बलमिन्दुज्ञशुक्रेज्यानां तु षष्टितः
विशोध्य तब्दलं ज्ञेयं पापानां पक्षसंभवम् ११

**10-11. Paksh Bala.** Deduct from Moon's longitude that of Sun. If the sum exceeds 6 Rāśis, deduct the same from 12. The product so obtained be converted into degrees etc. and divided by 3, which will indicate the Paksh Bala of each of the benefic Planets. The Paksh Bala of benefic should be deducted from 60, which will go to each malefic, as Paksh Bala.

दिनत्र्यंशेषु सौम्यार्कशनीनां निद्त्रिभागके
चन्द्रशुक्रकुजानां च बलं पूर्णं सदा गुरोः १२

**12. Tribagh Bala.** One Rupa is obtained by Mercury in the first 1/3 part of day time, by Sun in the second 1/3 part of the day and by Saturn in the last 1/3 part of the day. Similarly Moon, Venus and Mars get full Bala in the first, second and last 1/3 parts of the night. Jupiter gets this Bala at all times.

वषमासदिनेशानां तिथ्यस्त्रिंशच्छरार्णवाः
होरेशस्य बलं षष्टिरुक्तं नैसर्गिकं पुरा १३

**13. Varsh-Maas-Dina-Hora Bala.** 15, 30, 45 and 60 Virupas are in order given to Varsh Lord, Maas Lord, Dina Lord and Hora Lord. Naisargika Bala has already been explained.
The Varsh Lord is the Lord of the day, on which the astrological year of birth starts. To calculate this we first need the number of days, past from the beginning of Creation, the Ahargan. According to late Rev. Ebenezer Burgess, who translated Sun Sid2ndta in English, as on January 1, 1860, the number of days, past from the beginning of Creation are 714,404,108,573. Divide the number of days, past from the day of Creation till the day of birth, by 60. Reject remainder and multiply the quotient by 3. Increase the post-multiplied product by 1 and divide by 7. The remainder will indicate the week day, on which the astrological year, giving birth to the native, opened. Remainder 1 indicates Sunday, 2 Monday and so on.

**Maasa Lord.** Divide the same Ahargan by 30 and the quotient indicates months, passed from Creation to birth. The completed months be multiplied by 2 and increased by 1. The latter sum should be divided by 7 and the remainder indicates, on which day the birth month began. Continuing with the same case, we divide 65295 by 30. Quotient is 2176. This sum multiplied by 2 and increased by 1 denotes 4353. Dividing 4353 by 7, we get a remainder of 6, denoting Friday. That is, the month of birth began on Friday and the Maas Bala goes to Venus, the Lord of Friday.

**Dina Lord.** Though the week day of birth can be known from ephemeris, or perpetual calendars, we better adopt the method prescribed, which will confirm, if the Ahargan followed is correct. The number of days, as arrived above, indicating Ahargan, be divided by 7 and the remainder will indicate the week day of birth.

**Hora Bala.** Hora means planetary hour. Each day from sunrise to sunrise is divided into 24 equal parts of one hour. These Horas are ruled by the 7 Planets from Sun to Saturn. The first Hora of the day is ruled by the Lord of the week day. The 2nd one is ruled by the Lord of the 6th week day, counted from the first ruler. The 3rd Hora is ruled by the Lord of the 6th week day, counted from the 2nd Hora Lord. Similarly it proceeds in the same manner, till the first Hora of the next day is taken over by the Lord of that day himself. Whichever Planet rules the birth Hora, gets the Hora Bala. Horas are to be calculated for mean local time and not standard time of births.

तन्मानां सप्तहृत्षष्टिरेकाद्येकोत्तरैर्हता
शमंबुगुशुचंरादिखेटानां क्रमतो द्विज १४

**14. Naisargika Bala.** Divide one Rupa by 7 and multiply the resultant product by 1 to 7 separately, which will indicate the Naisargika Bala, due to Saturn, Mars, Mercury, Jupiter, Venus, Moon and Sun, respectively.

पञ्चाब्धयः सुराः सूर्याः खराडकांशाः क्रमादमी
सायनग्रहदोराशितुल्यखराडयुतिश्च स १५

भागादिकहतादेष्यात् त्रिंशल्लब्धयुता लवाः
स्वमृणं तुलमेषादौ शनीन्द्वोश्च त्रिराशिषु १६

तथारार्केज्यशुक्राणां व्यस्तं ज्ञस्य सदा धनम्
तद्भागाश्च त्रिभिर्भक्ता ज्ञेयमायनजं बलम् १७

**15-17. Ayan Bala.** 45, 33 and 12 are the Khandas for calculating Ayan Bala. Add Ayanāńś to the Planet and find out the Bhuja (distance from the nearest equinox). Add the figure, corresponding to the Rāśi (of the Bhuja) to the Bhuja. The degrees etc. of the Bhuja should be multiplied by the figure, corresponding to the highest of the left out Khandas and divided by 30. Add the resultant product to the sum, obtained earlier. Convert this to Rāśi, degrees, minutes and seconds. If Moon and Saturn are in Libra, or ahead, add to this 3 Rāśis and, if in Aries to Virgo, reduce from this 3 Rāśis. Similarly it is reverse for Sun, Mars, Venus and Jupiter. For Mercury 3 Rāśis are always additive. The resultant sum in Rāśi, degrees and minutes be divided by 3 to get the Ayan Bala in Rupas.

**Notes by Santanam**. Ayan Bala can be found out on the following simple formula: Ayan Bala = 60*(23-27 + Kranti)/(46-54) = (23-27 ± Kranti)*1.2793. The following points have to be remembered in respect of Krantis. When Moon, or Saturn have southern Kranti, or, when Sun, Mars, Jupiter, or Venus have northern Kranti, take plus. In a contrary situation in respect of these 6 Planets, take minus. As far as Mercury is concerned, it is always plus. Krantis (or declinations) can be ascertained from a standard modern ephemeris.
Sun's Ayan Bala is again multiplied by 2 whereas for others the product arrived in Virupas is considered, as it is.

यद्रवेरायनं वीर्यं चेष्टाख्यं तावदेव हि
विधोः पक्षबलं यावत् तावच्चेष्टाबलं स्मृतम् १८

**18. Motional Strength for Sun and Moon.** Sun's Chesht Bala will correspond to his Ayan Bala. Moon's Paksh Bala will itself be her Chesht Bala.

पापदृक्पादहीनं तच्छुभदृक्पादयुक् तथा
बलैक्यं ज्ञेज्यदृग्युक्तमेवं खेटबलं भवेत् १९

**19. Drik Bala.** Reduce one fourth of the Aspect Pinda, if a Planet receives malefic Aspects and add a fourth, if it receives a Aspect from a benefic. Super add the entire Aspect of Mercury and Jupiter to get the net strength of a Planet.

अथ तारग्रहाणां तु युद्धयतोश्च द्वयोर्मिथः
बलान्तरं विजेतुः स्वं निर्जितस्य बले त्वृणम् २०

**20. War Between Planets (graha yuddha).** Should there be a war between the starry Planets, the difference between the Shad Balaas of the two should be added to the victors Shad Bala and deducted from the Shad Bala of the vanquished.

चक्रानुवक्रा विकला मन्दा मन्दतरा समा
चरा चाऽतिचरा चेति ग्रहाणामष्टधा गतिः २१

षष्टिर्वक्रगते वीर्यमनुवक्रगतेर्दलम्
पादो विकलभुक्तेः स्यात् तथा मध्यगतेर्दलम् २२

पादो मन्दगतेस्तस्य दलं मन्दतरस्य हि
चरभुक्तेस्तु पादोनां दलं स्यादतिचारिणः २३

**21-23. Motions of Planets (Mars to Saturn).** Eight kinds of motions are attributed to Planets. These are Vakr (retrogression), Anuvakr (entering the previous Rāśi in retrograde motion), Vikala (devoid of motion), Mand (somewhat slower motion than usual), Mandatar (slower than the previous), Sama (somewhat increasing in motion), Char (faster than Sama) and Atichar (entering next Rāśi in accelerated motion). The strengths, allotted due to such 8 motions are 60, 30, 15, 30, 15, 7.5, 45 and 30.

मध्यमस्फुटयोगार्धहीनं स्वस्वचलोच्चकम्
षड्भाधिकं च्युतं चक्राच्चेष्टाकेन्द्रं स्मृतं कुजात् २४

भागीकृतं त्रिभिर्भक्तं लब्धं चेष्टाबलं त्विति
स्थानदिक्कालदृक्चेष्टानिसर्गोत्थं च षड्विधम् २५

**24-25. Motional Strength for Mars etc.** Add together the mean and true longitudes of a Planet and divide the one by two. Reduce this sum from the Seeghroch (or apogee) of the Planet. The resultant product will indicate the Cheshta Kendra (or Seeghra Kendra) of the Planet from 12 Rāśis. The Rāśi, degrees and minutes so arrived should be converted into degrees, minutes etc. and divided by 3, which will denote the motional strength of the Planet. Thus there are six sources of strength, called Sthan Bala, Dig Bala, Kaal Bala, Drik Bala, Chesht Bala and Naisargika Bala.

एवं ग्रहबलं प्रोक्तमथ भावबलं श्रृणु
कन्यायुग्मतुलाकुम्भचापाद्यार्धाश्च सप्तमम् २६

गोऽजसिंहमृगाद्यार्धचापान्त्यार्धात् सुखं त्यजेत्
कर्कवृश्चिकतो लग्नं मृगान्त्यार्धाझषाश्च खम् २७

शोध्यमङ्गाधिकं चक्राच्चयुतं भागीकृतं त्रिहृत्
सद्दृष्टिपादयुक्पापदृष्टिपादविवर्जितम् २८

ज्ञेज्यदृष्टियुतं तच्च स्वस्वस्वामिबलान्वितम्
इति भावबलं स्पष्टं सामान्यं च पुरोदितम् २९

**26-29. House Balaas.** Thus I explained about the strengths of the Planets. Deduct 7th House from the House, if the House happens to be in Virgo, Gemini, Libra, Aquarius, or the first half of Sagittarius. If Aries, Taurus, Leo, or first half of Capricorn, or the second half of Sagittarius happen to be the House, deduct 4th House from it. Should the House be in Cancer, or in Scorpio, deduct from it Lagna. Deduct 10th House from the House, happening to fall in Capricorn second half, or Pisces. Convert the product so obtained into degrees etc. and divide by 3 to get House Bala. If the Balaance in the process of deducting Nadir, Meridian, Lagna, or 7th exceeds 6 Rāśis, deduct it again from 12 Rāśis, before converting into degrees and dividing by 3. The product after division should be increased by one fourth, if the House in question receives a benefic Aspect. If the House receives a malefic Aspect, one fourth should be reduced. If Jupiter, or Mercury give a Aspect to a House, add that Planets Drik Bala also. And then superadd the strength, acquired by the Lord of that House. This will be the net House Bala.

बुधेज्ययुक्तभावस्य बलमेकेन संयुतम्
मन्दाररवियुक्तस्य बलमेकेन वर्जितम् ३०

दिने शीर्षोदयो भावः सन्ध्यायामुभयोदयः
निशि पृष्ठोदयाख्यश्च दद्यात् पादमितं बलम् ३१

**30-31. Special Rules.** The Houses, occupied by Jupiter and Mercury will each get an addition of 1 Rupa, while each of the Houses, occupied by Saturn, Mars and Sun, suffer 1 Rupa reduction. 15 Virupas will have to be added to the Houses, falling in Seershodaya Rāśis, if birth happens to be in day time, to the Houses, falling in Dual Rāśis, if birth happens to be in twilight and to the Houses, falling in Prishtodaya Rāśis, if birth be in night time.

अंकाग्नयोऽङ्गरामाश्च खाग्नया करसिन्धवः
नवाग्नयः सुरास्त्रिंशद् दशसंगुणिताः क्रमात् ३२

रव्यादीनां बलैक्यश्चेत् तदा सुबलिनो मताः
अधिकं पूर्णमेव स्याद् बलं चेद्बलिनो द्विज ३३

**32-33. Shad Bala Requirements.** 390, 360, 300, 420, 390, 330 and 300 Virupas are the Shad Bala Pindas, needed for Sun etc. to be considered strong. If the strength exceeds the above-mentioned values, the Planet is deemed to be very strong. If a Planet has the required Shad Bala, it will prove favourable to the native by virtue of its strength. However, Saturn's extreme strength will give long life as well as miseries.

गुरुसौम्यरवीणां तु भूतषट्केन्दवो द्विज
पंचाग्नयः खभूतानि करभूमिसुधाकराः ३४

खाग्नयश्च क्रमात्स्थानदिक्चेष्टासमयाऽयने
सितेन्द्वोस्त्र्यग्निचन्द्राश्च खेषवः खाग्नयः शतम् ३५

चत्वारिंशत् कला भौममन्दयोः षरणव क्रमात्
त्रिंशत् खवेदाः सप्ताङ्गा नखाश्चेत्युदिता द्विज ३६

**34-36.** Jupiter, Mercury and Sun are strong, if each of their Sthan Bala, Dig Bala, Kaal Bala, Chesht Bala and Ayan Bala are, respectively, 165, 35, 50, 112 and 30 Virupas. The same required for Moon and Venus are 133, 50, 30, 100 and 40. For Mars and Saturn these are 96, 30, 40, 67 and 20.

एवं कृत्वा बलैक्यंच ततश्चिन्त्यम् फलं द्विज
भावस्थानग्रहैः प्रोक्तयोगे ये योगहेतवः ३७

तेषां मध्ये बली कर्ता स एवाऽस्य फलप्रदः
योगेष्वाप्तेषु बहुषु नीतिरेवं प्रकीर्तिता ३८

**37-38. House Effects**. O Brahmin, thus the various sources of strengths be gathered together and effects declared. Whatever Yogas, or effects have been stated with respect to a House, will come to pass through the strongest Planet.

गणितेषु प्रवीणो यः शब्दशास्त्रे कृतश्रमः
न्यायविद् बुद्धिमान् देशदिक्कालज्ञो जितेन्द्रियः ३९

ऊहापोहपटुर्होरास्कन्धश्रवणसम्मतः
मैत्रेय सत्यतां याति तस्य वाक्यं न संशयः ४०

**39-40. <u>Eligibility of Issue Fruitful Predictions</u>.** O Maitreya, the words of one, who has achieved skill in mathematics, one, who has put in industrious efforts in the branch of grammar, one, who has knowledge of justice, one, who is intelligent, one, who has knowledge of geography, space and time, one, who has conquered his senses, one, who is skilfully logical (in estimation) and one, who is favourable to Jyotishya, will doubtless be truthful.

अथेष्टकष्टाध्यायः २८

अथ चेष्टमनिष्टं च ग्रहानां कथयाम्यहम्
यद्वशाच्च प्रयच्छन्ति शुभाऽशुभदशाफलम् १

## Ch. 28. Isht and Kasht Balaas

**1**. Now I narrate the benefic and malefic tendencies of the Planets, based on which the Dasha effects can be decided.

स्वनीचोनो ग्रह शोध्यः षड्भाधिक्ये भमराडलात्
सैको राशिर्भवेदुच्चरश्मिर्द्विघ्नांशसंयुतः २

2- **Exaltation Rays.** Deduct the Planets debilitation point from its actual position. If the sum exceeds 6 Rāśis, deduct from 12 Rāśis. The said sum should then be increased by 1 Rāśi. The degrees etc. be multiplied by 2, which, when considered along with Rāśis, will indicate the Uchch Rasmi of the Planet.

चेष्टाकेन्द्राच्च तद्रश्मिं साधयेदुच्चरश्मिवत्
चेष्टाकेन्द्रं कुजादीनां पूर्वमुक्तं मया द्विज ३

सायनार्कस्त्रिभोऽर्कस्य व्यर्केन्दुश्च विधोस्तथा
चेष्टाकेन्द्रं रसाल्पं तच्चक्राच्छोध्यं रसाधिके ४

**3-4. Chesht Rasmi.** Chesht Rasmis are to be calculated from Chesht Kendr similar to Uchch Rasmi computations. The Chesht Kendras of Planets from Marsto Saturn have already been explained. Add 3 Rāśis to Sayana Sun (i.e. with Ayanāńś), which will be the Chesht Kendr for Sun. The sidereal longitude of Sun should be deducted from Moon to get Moon's Chesht Kendr. If the Chesht Kendr (for any Planet) is in excess of 6 Rāśis, deduct it from 12 Rāśis. Add 1 Rāśi and multiply the degrees etc. by 2, which will indicate the Chesht Rasmi of the Planet.

चेष्टोच्चरश्मियोगार्धं शुभरश्मिः प्रकीर्त्यते
अष्टभ्यश्च विशुद्धोऽसावशुभाख्यश्च कथ्यते ५

**5. Benefic and Malefic Rays.** Add the Uchch Rasmis and Chesht Rasmis together and divide by two. The result will be auspicious rays (Subh Rasmis). Deduct from 8 the Subh Rasmis to obtain inauspicious rays (Asubh Rasmis).

उच्चचेष्टाकरान् व्येकान् दिग्भिर्हत्वा तु योजयेत्
तदर्धमिष्टसंज्ञं स्यात् कष्टं तत्षष्टितश्च्युतम् ६

**6. Isht and Kasht Tendencies.** Reduce 1 from each of Chesht Rasmi and Uchch Rasmi. Then multiply the products by 10 and add together. Half of the sum will represent the Isht Phala (benefic tendency) of the Planet. Reduce Isht Phala from 60 to obtain the Planets Kasht Phala (malefic tendency).

स्वोच्चे मूलत्रिकोणे च स्वभेऽधिसुहृदीष्टभे
समभे शत्रुभे चाधिशत्रुभे नीचभे क्रमात् ७

षष्टिरिष्वब्धयस्त्रिंशदाकृतिस्तिथयो गजाः
चत्वारो द्वौ च शून्यं च शुभमेतत्फलं गृहे ८

षष्टितः पतितं चैतच्छेषं स्यादशुभं गृहे
तदर्धमन्यवर्गेषु ज्ञेयं विप्र शुभाऽशुभम् ९

**7-9. <u>Isht and Kasht and Sapt Varga Phal</u>.** 60, 45, 30, 22, 15, 8, 4, 2 and 0 are the Subhankas (Subha Griha Pankthis, benefic points), due to a Planets placement, respectively, in exaltation, Moolatrikona, own, great friends, friends, neutral, enemy, great enemy and debilitation Rāśi. If Subhanka is deducted from 60, Asubhanka (Asubh Pankthi, inauspicious points) will emerge. O Brahmin, in other Vargas these are halved.

पञ्चस्विष्टफलं चाद्यात् समं षष्ठे ततः परम्
अशुभं त्रिषु विज्ञेयमिति शास्त्रेषु निश्चितम् १०

**10.** A Planet is considered auspicious in the first five of the said places. In the sixth place it is neutral, i.e. neither good nor bad. And in the other three places it is inauspicious**.**

दिग्बलं दिक्फलं तस्य तथा दिनफलं भवेत्
तयोः फलं शुभं प्रोक्तमशुभं षष्टितश्च्युतम् ११

शुभेऽधिके शुभं ज्ञेयमशुभं त्वशुभेऽधिके
दशाफलं नभोगस्य तथा भावफलं द्विज १२

**11-12. <u>Nature of Effects, due to Dig Bala etc</u>.** The directional strength of a Planet is itself representative of the effects, due to the direction; and Kaal Bala itself is indicative of effects, due to the day. Whatever quantum of Dig Bala etc. are obtained by a Planet, will be the extent of auspicious effects, acquirable on account of that strength. Deducting those figures from 60, the extent of inauspiciousness is known. If auspiciousness is more in the case of a Planets strength, the Dasha and Houses, related to that Planet will be auspicious. These are converse, if inauspiciousness is predominant.

बलैः षड्भिः समेधित्वा बलैक्येन भजेत् पृथक्
तत्तद्बलफलानि स्युरशुभानि शुभानि च १३

शुभपापफलाभ्यां च हन्याद् दृष्टिं बलं तथा
दृष्टी ते शुभपापाख्ये बले स्यातां तदाह्वये १४

**13-14. <u>Sapt Varga Phal and Isht and Kasht (Continued)</u>.** The various strengths (i.e. the other 6 Vargas) be multiplied by the respective Planets Shad Bala Pinda, which will indicate the auspiciousness of the Varga concerned. Auspicious, or inauspicious aspect will be by multiplying the Subh, or Asubh Pankthi. Similarly auspicious, or inauspicious effects will be known by multiplying the auspicious, or inauspicious strength by the respective Pankthi.

भावानां च फले प्रोक्ते पतीनां च फले उभे
राशौ शुभनभोगश्चेद् भावसाधनसंभवम् १५

फलं तस्य शुभे युञ्ज्याादशुभे वर्जयेत् तथा
पापश्चेदन्यथा चैवं बले दृष्ट्यां तथैव च १६

युञ्ज्याादुच्चादिगे खेटे फलं नीचादिगे त्यजेत्
एवं शुभाऽशुभं ज्ञात्वा जातकस्य फलं वदेत् १७

अष्टवर्गफलं चैवं स्थाने च करणेऽन्यथा
राशिद्वयगते भावे तद्राश्यधिपतेः क्रिया १८

स्थानाधिकेन भावेन भावलाभः प्रकीर्तितः
तत्समाने च तद्भावे तदानीं स्थानदान् ग्रहान् १९

संयोज्य स्थानसंख्याया दलमेतत्समं फलम्
एवं सखेटभावानां फलं ज्ञेयं शुभाऽशुभम् २०

**15-20. <u>Effects of a House.</u>** The strength of a House and its Lord have already been explained. The actual effects will be a combination of House strength and its Lords strength. If there is a benefic in the House add the same to the auspicious effects and deduct from inauspicious effects, which will denote the inauspicious effects. If a malefic is in the House, reverse the process, i.e. add inauspicious effects and deduct auspicious effects. Similarly Aspects and Balaas. If a Planet is exalted, or with such a dignity, add auspicious effects and reduce inauspicious effects. For debilitation etc. it is converse. In Ashtak Varga add Bindus (auspicious points) and deduct Karanas (inauspicious points). If a House extends to two Rāśis, the rectification will be done, as per both the Lords. In that case, whichever Rāśi has more Bindus, that Rāśi will yield more favourable results, concerning that House. If both the Rāśis have more auspicious Bindus, take the average. Thus the auspicious and inauspicious effects of a House be understood.

अथ पदाध्यायः २९

कथयाम्यथ भावानां खेटानां च पदं द्विज
तद्विशेषफलं ज्ञातुं यथोक्तं प्राङ्‌ महर्षिभिः १

लग्नाद् यावतिथे राशौ तिष्ठेल्लग्नेश्वरः क्रमात्
ततस्तावतिथे राशौ लग्नस्य पदमुच्यते २

सर्वेषामाप भावानां ज्ञेयमेवं पदं द्विज
तनुभावपदं तत्र बुधा मुख्यपदं विदुः ३

## Ch. 29. House Padas

**1-3. <u>Method of House Calculation</u>.** O Brahmin, I shall now tell you about the Padas (Arudhas) for Houses and Planets as well, as laid down by the earlier Mahārśis. The Pad of Lagna will correspond to the Rāśi, arrived at by counting so many Rāśis from Lagnas Lord, as he is away from 1st House. Similarly Padas for other Houses be known through their Lords. The word Pad exclusively denotes the Pad for Lagna. Names of the 12 Arudhas are Lagna Pad - Arudh of 1st House, 2nd of 2nd, Vikram (Bhratru) of 3rd, Matru (Sukh) of 4th, Mantra (5th) of 5th, Rog (Satru) of 6th, Dar (Kalatr) of 7th, Maran of 8th, Pitru of 9th House, 10th of 10th, 11th of 11th, 12th of 12th.

स्वस्थानं सप्तमं नैवं पदं भवितुमर्हति
तस्मिन् पदत्वे विज्ञेयं मध्यं तुर्यं क्रमात् पदम् ४

यथा तुर्यस्थिते नाथे तुर्यमेव पदं भवेत्
सप्तमे च स्थिते नाथे विज्ञेयं दशमं पदम् ५

**4-5. <u>Special Exceptions.</u>** The same House, or the 7th from it does not become its Pad. When the Pad falls in the same House, the 10th there from be treated, as its Pad. Similarly, when the 7th becomes the Pad of a House, the 4th from the original House in question be treated, as its Pad. If the ruler of a House be in the 4th from the House, then the very House occupied be noted, as the Pad.

यस्माद् यावतिथे राशौ खेटात् तद्भवनं द्विज

ततस्तावतिथं राशिं खेटारूढं प्रचक्षते ६

द्विनाथद्विभयोरेवं विज्ञेयं सबलावधि
विगणय्य पदं विप्र ततस्तस्य फलं वदेत् ७

**6-7. <u>Padas for Planets</u>.** Note the position of a Planet and see how many Rāśis away is its own Rāśi with reference to its position. Count so many Rāśis from the said own Rāśi and the resultant Rāśi will become the Arudh of the Planet. If a Planet owns two Rāśis, or, if a Rāśi is owned by two Planets; consider the stronger and declare effects accordingly.

अथाऽहं पदमाश्रित्य फलं किञ्चिद् ब्रुवे द्विज
पदादेकादशे स्थाने ग्रहैर्युक्तोऽथवेक्षिते ८

धनवान् जायते बालस्तथा सुखसमन्वितः
शुभयोगात् सुमार्गेण धनाप्तिः पापतोऽन्तथा ९

मिश्रैर्मिश्रं फलं ज्ञेयं स्वोच्चमित्रादिगेहगैः
बहुधा जायते लाभो बहुधा च सुखागमः १०

पदाल्लाभगृहं यस्य पश्यन्ति सकला ग्रहाः
राजा वा राजतुल्यो वा स जातो नात्र संशयः ११

**8-11. Pad and Finance (up to Sloka 15).** O Brahmin, I now tell you of some effects of Planets, based on Pad. If the 11th from Lagna Pad is occupied, or receives a Aspect from a Planet the native will be happy and rich; wealth will come through various means, if a benefic is related, as above. A malefic will confer wealth through questionable means. If there be both a benefic and a malefic, it will be through both means. If the Planet in question be in exaltation, or in own Rāśi etc., there will be plenty of gains and plenty of happiness.

पदाल्लाभगृहं पश्येद् व्ययं कश्चिन्न पश्यति
अविघ्नेन सदा लाभो जायते द्विजसत्तम १२

**12.** O excellent of the Brahmins, if the 12th from Lagna Pad does not receive a Aspect, as the 11th from Lagna Pad receives a Aspect from a Planet, then the gains will be uninterrupted.

ग्रहदृग्योगबाहुल्ये पदादेकादशे द्विज
सार्गले चापि तत्रापि बह्वर्गलसमागमे १३

शुभग्रहार्गले विप्र तत्राप्युच्चग्रहार्गले
शुभेन स्वामिना दृष्टे लग्नभाग्यादिगेन वा १४

जातस्य भाग्यप्राबल्यं निर्दिशेदुत्तरोत्तरम्
उक्तयोगेषु चेत् खेटे द्वादशं नैव पश्यति १५

**13-15.** O Brahmin, the quantum of gains will correspond to the number of Planets in, or giving a Aspect to the 11th from Lagna Pad. If there is Argala for the said 11th, there will be more gains, while a benefic Argala will bring still more gains. If the said benefic, causing Argala is in his exaltation Rāśi, the gains will be still higher. If the said 11th receives a Aspect from a benefic from Lagna, the 9th etc., gains will increase in the ascending order. In all these cases, the 12th from Pad should simultaneously be free from malefic association. A benefic, placed in Lagna, giving a Aspect to the 11th from Arudh Lagna will be still beneficial. If the Aspect is from the 9th from Lagna, it will confer much more gains.

पदस्थानाद् व्यये विप्र शुभपापयुतेक्षिते
व्ययबाहुल्यमित्येवं विशेषोपार्जनात् सदा १६

शुभग्रहे सुमार्गेण कुमार्गात् पापखेचरे
मिश्रे मिश्रफलं वाच्यमेवं लाभोऽपि लाभगे १७

**16-17. Pad and Financial Losses (up to Sloka 21).** If the 12th from Lagna Pad receives a Aspect from, or is conjunct with both benefics and malefics, there will be abundant earnings, but plenty of expenses. The benefic will cause through fair means, malefic through unfair means and mixed Planets through both fair and unfair means.

पदारूढाद् व्यये शुक्रभानुस्वर्भानुभिर्युते
राजमूलाद् व्ययो वाच्यश्चन्द्रदृष्ट्या विशेषतः १८

**18.** If the 12th from Lagna Pad is conjunct Sun, Venus and Rahu, there will be loss of wealth through the king. Moon, giving a Aspect to (the said trio in the said House), will specifically cause more such losses.

पदारूढाद् व्यये सौम्ये शुभखेटयुतेक्षिते
ज्ञातिमध्ये व्ययो नित्यं पापदृक् कलहाद् व्ययः १९

**19.** If Mercury is in the 12th from Lagna Pad and is conjunct with, or receives a Aspect from a benefic, similarly there will be expenses through paternal relatives. A malefic so related to the said Mercury will cause loss of wealth through disputes.

पदाद् व्यये सुराचार्ये वीक्षिते चान्यखेचरैः
करमूलाद् व्ययो वाच्यः स्वस्यैव द्विजसत्तम २०

**20**. O Brahmin, if Jupiter is in the 12th from Lagna Pad, receiving a Aspect from others, the expenses will be through taxes and on the person himself.

आरूढाद् द्वादशे सौरे धरापुत्रेण संयुते
अन्यग्रहेक्षिते विप्र भ्रातृवर्गाद् धनव्ययः २१

**21**. O Brahmin, if Saturn is in the 12th from Lagna Pad along with Mars and receives a Aspect from others, the expenses will be through ones co-born.

आरूढाद् द्वादशे स्थाने ये योगाः कथिता यथा
लाभभावे च ते योगा लाभयोगकरास्तथा २२

22**. Gainful Sources.** Whatever sources of expenses are indicated above with reference to the 12th from Lagna Pad, gains through similar sources will occur, if 11th House so features with reference to Lagna Pad.

आरूढात् सप्तमे राहुरथवा संस्थितः शिखी
कुक्षिव्यथायुतो बालः शिखिना पीडितोऽथ वा २३

**23.** The 7th House from Pad (up to Sloka 27). If Rahu, or Ketu is placed in the 7th from Lagna Pad, the native will be troubled by disorders of the stomach, or by fire.

आरूढात् सप्तमे केतुः पापखेटयुतेक्षितः
साहसी श्वेतकेशी च वृद्धलिङ्गी भवेन्नरः २४

**24.** Should there be Ketu in the 7th from Lagna Pad, receiving a Aspect from, or being conjunct with another malefic, the native will be adventurous, will have (prematurely) grey hair and a big male organ**.**

पदात्तु सप्तमे स्थाने गुरुशुक्रनिशाकराः
त्रयो द्वयमथैकोऽपि लक्ष्मीवान् जायते जनः २५

**25**. Should one, two, or all three of Jupiter, Venus and Moon be in the 7th from Lagna Pad, the native will be very wealthy.

स्वतुङ्गे सप्तमे खेटः शुभो वाऽप्यशुभः पदात्
श्रीमान् सोऽपि भवेन्नूनं सत्कीर्तिसहितो द्विज २६

**26.** Whether a benefic, or a malefic, if be exalted in the 7th from Lagna Pad, the native will be affluent and be famous.

ये योगाः सप्तमे स्थाने पदाश्च कथिता मया

चिन्त्यास्तथैव ते योगा द्वितीयेऽपि सदा द्विज २७

**27**. O Brahmin, these Yogas, as narrated by me with reference to the 7th from Lagna Pad, should also be considered from the 2nd of Lagna Pad.

उच्चस्थो रौहिणेयो वा जीवो वा शुक्र एव वा
एवो बली धनगतः श्रियं दिशति देहिनः २८

**28.** Anyone of Mercury, Jupiter and Venus being exalted in the 2nd from Lagna Pad and being with strength will make the subject rich**.**

ये योगाश्च पदे लग्ने यथावद् गदिता मया
ते योगाः कारकांशेऽपि विज्ञेया बांधवर्जिताः २९

**29.** The Yogas so far stated by me with reference to Lagna Pad be similarly evaluated from Karakāńś as well**.**

आरूढाद् वित्तभे सौम्ये सर्वदेशाधिपो भवेत्
सर्वज्ञो यदि वा स स्यात् कविर्वादी च भार्गवे ३०

आरूढात् केन्द्रकोणेषु स्थिते दारपदे द्विज
लग्नजायापदे वापि सबलग्रहसंयुते ३१

स्त्रीमांश्च जायते नूनं देशे विख्यातिमान् भवेत्
षष्ठेष्टमे व्ययस्थाने जातो दारपदेऽधनः ३२

पदे तत्सप्तमे वापि केन्द्रे वृद्धौ त्रिकोणके
सुवीर्यः संस्थितः खेतः भार्याभर्तृसुखप्रदः ३३

पदाद्दारपदे चैवं केन्द्रे कोणे च संस्थिते
द्वयोर्मैत्री भवेन्नूनं त्रिके वैरं न संशयः ३४

एवं लग्नपदाद् विप्र तनयादिपदे स्थिते
मित्रामित्रे विजानीयाल्लाभालाभौ विचक्षणः ३५

लग्नदारपदे विप्र मिथः केन्द्रगते यदि
त्रिलाभयोस्त्रिकोणे वा तथा राजा धराधिपः ३६

एवं लग्नपदादेव धनादिपदतो द्विज
स्थानद्वयं समालोक्य जातकस्य फलं वदेत् ३७

**30-37. <u>General</u>.** If Mercury is in the 2nd from Arudh Lagna, the native will Lord over the whole country. Venus in the 2nd from Lagna Pad will make one a poet, or a speaker. If the Dar Pad falls in an angle, or in a trine, counted from Lagna Pad, or, if Lagna Pad and Dar Pad both have strong Planets, the native will be rich and be famous in his country. If the Dar Pad falls in the 6th/ 8th/12th from Lagna Pad, then the native will be poor. If Lagna Pad and the 7th there from, or an angle, a trine, an Upachaya there from is occupied by a strong Planet, there will be happiness between the husband and wife. If Lagna Pad and Dar Pad are mutually in Kendras, or Konas, there will be amity between the couple. If these be in mutually 6th/8th/12th, doubtlessly mutual enmity will crop up. O Brahmin, similarly mutual relationship, or gain, or loss through son etc. be known, based on Lagna Pad and the relative House Pad. If Lagna Pad and Dar Pad are mutually angular, or 3rd and 11th, or in Konas, the native will be a king, ruling the earth. Similar deductions be made with reference to mutual positions of Lagna Pad and 2nd Pad.

अथोपपदाध्यायः ३०

अथोपपदमाश्रित्य कथयामि फलं द्विज
युच्छुभत्वे भवेन्नृणां पुत्रदारादिजं सुखम् १

तनुभावपदं विप्र प्रधानं पदमुच्यते
तनोरनुचराद्यत् स्यादुपारूढं तदुच्यते २

तदेवोपपदं नाम तथा गौणपदं स्मृतम्
शुभखेटगृहे तस्मिन् शुभग्रहयुतेक्षिते ३

पुत्रदारसुखं पूर्णं जायते द्विजसत्तम
पापग्रहयुते तत्र पापभे पापवीक्षिते ४

प्रव्राजको भवेज्जतो दारहीनोऽथ वा नरः
शुभदृग्योगतो नैव योगोऽयं दारनाशकः ५

रविर्नैवात्र पापः स्यात् स्वोच्चमित्रस्वभस्थितः
नीचशत्रुगृहस्थश्चेत्तदाऽसौ पाप एव हि ६

## Ch. 30. Upa Pad

**1-6.** O Brahmin, now I tell you about Upa Pad, the auspiciousness of which will confer on the native happiness from progeny, wife etc. The Pad of Lagna, as discussed earlier, is of prime importance. Upa Pad is calculated for the House, following the natal Lagna. This Upa Pad is also called Gaun Pad. O excellent of the Brahmins, if Upa Pad is conjunct with, or receives a Aspect from a benefic Planet, one will obtain full happiness from progeny and spouse. Should the Upa Pad be in a malefics Rāśi, or receives a Aspect from, or is conjunct with a malefic, one will become an ascetic and go without a wife. If (in the said circumstances) there be a benefic Aspect (on Upa Pad, or the related malefic), or a conjunct, deprival of spouse will not come to pass. In this case Sun, being exalted, or in a friendly Rāśi, is not a malefic. He is a malefic, if in debilitation, or in an enemy Rāśi.

**Notes by Santanam.** Regarding Upa Pad calculations, there are more than two views on the same Sloka of Mahārśi Parashara, or an identical Sutra from Jaimini. In this text, the word Anuchar is used, which denotes the House, following the Lagna at birth. Normally this is 12th House. However, when we study other comment6thes on Jaimini (Chaukhambh Hindi edition), we are taught, that it is 12th House in the case of an odd Rāśi ascending and it is 2nd House in the case of an even Rāśi ascending. Accordingly the Pad for the 12th, or the 2nd from Lagna is called Upa Pad. In calculating Upa Pad the rules mentioned in verses 4 and 5 of the previous chapter be kept in mind.

शुभग्रहाणां दृष्टिश्चेदुपारूढाद् द्वितीयके
शुभर्क्षे शुभयुक्ते च पूर्वोक्तं हि फलं स्मृतम् ७

उपारूढाद् द्वितीयं च नीचांशे नीचखेटयुक्
क्रूरग्रहसमायुक्तं जातको दारहा भवेत् ८

स्वोच्चांशे स्वोच्चसंस्थे वा तुङ्गदृष्टिवशात् तथा
भवन्ति बहवो दारा रूपलक्षणसंयुताः ९

उपारूढे द्वितीये वा मिथुने संस्थिते सति
तत्र जातनरो विप्र बहुदारयुतो भवेत् १०

उपारूढे द्वितीयेऽपि स्वस्वामिग्रहसंयुते
स्वर्क्षगे तत्पतौ वापि यत्र कुत्रापि भूसुर ११

यस्य जन्मनि योगोऽयं स नरो द्विजसत्तम
उत्तरायुषि निर्दारो भवत्येव न संशयः १२

**7-12. <u>Effect from the 2nd from Upa Pad</u>.** If the 2nd from Upa Pad is a benefic Rāśi, or receives a Aspect from, or is conjunct with a benefic, the same good results (as for wife and sons) will come to pass. If there is a Planet in the 2nd from Upa Pad in its debilitation Rāśi, or debilitation Aṅś, or is conjunct with a debilitated, or malefic Planet, there will be destruction of wife. If the said occupant be in its exaltation Rāśi, or Navāmśa, or receives a Aspect from another Planet, there will be many charming and virtuous wives. Oh Brahmin, if Gemini happens to be the 2nd from Upa Pad, then also there will be many wives. O excellent of the Brahmins, if the Upa Pad, or the 2nd there from be occupied by its own Lord, or, if the said Lord is in his other own House, the death of wife will be at advanced age.

स्वराशौ संस्थितेऽप्येवं नित्याख्ये दारकारकै
उत्तरायुषि निर्दारो भवत्येव न संशयः १३

उपारूढपतिः स्वोच्चे स्थिरस्त्रीकारकोऽथ वा
सुकुलाद् दारलाभः स्यान्नीचस्थे तु विपर्ययात् १४

उपारूढे द्वितीये वा शुभसम्बधतो द्विज
जातस्य सुन्दरी भार्या भव्या रूपगुणान्विता १५

**13-15<u>. Wife from the 2nd of Upa Pad (up to Sloka 22).</u>** If a Planet being constant indicator of wife (i.e. the 7th Lord, or Venus) is in its own House, there will be loss of wife only at a later stage. If the Lord of Upa Pad, or the constant significator of wife is in exaltation, the wife will be from a noble family. Reverse will be the case, if he is debilitated. O Brahmin, if the 2nd from Upa Pad is related to a benefic, the wife will be beautiful, fortunate and virtuous.

उपारूढाद् द्वितीये च शनिराहू स्थितौ यदि
उपवादात् स्त्रियस्त्यागो नाशो वा जायते द्विज १६

**16.** Should Saturn and Rahu be in the 2nd from Upa Pad, the native will lose his wife on account of calumny, or through death.

उपारूढे द्वितीये वा शिखिशुक्रौ यदा स्थितौ
रक्तप्रदररोगार्ता जायते तस्य भामिनी १७

**17.** The natives wife will be troubled by disorder of blood, leucorrhoea (Pradar) etc., if Venus and Ketu are in the 2nd from Upa Pad.

बुधकेतू स्थितौ तत्र तदाऽस्थिस्रावसंयुता
तत्रस्थाः शनिराह्वर्कास्तदाऽस्थिज्वरसंयुता १८

**18**. Mercury with Ketu in the 2nd from Upa Pad will cause breakage of bones, while Rahu, Saturn and Sun will cause distress of bones.

स्थूलाङ्गी बुधराहूभ्यां तत्रस्थाभ्यां द्विजोत्तम
बुधक्षेत्रे कुजार्की चेन्नासिकारोगसंयुता १९

कुजक्षेत्रेऽप्येवमेव फलं ज्ञेयं द्विजोत्तम
बृहस्पतिशनी तत्र कर्णनेत्ररुजान्विता २०

तत्रान्यगेहगौ विप्र बुद्धभौमौ स्थितौ यदा
यदा स्वर्भानुदेवेज्यौ भार्या दन्तरुजान्विता २१

शनिराहू शनिक्षेत्रे पङ्गुर्वातरुजान्विता
शुभदृग्योगतो नेति फलं ज्ञेयं विपश्चिता २२

लग्नात् पदादुपारूढाद् यो राशिः सप्तमो द्विज
तस्मात् तत्स्वामिनः खेटात् तदंशाच्च द्विजोत्तम २३

एवमेव फलं ज्ञेयमित्याहुर्नारदादयः
उक्तेभ्यो नवमे विप्र शनिचन्द्रबुधा यदि २४

**19-24**. Mercury and Rahu in the 2nd from Upa Pad will give a stout-bodied wife. If the 2nd from Upa Pad happens to be one of Mercury's Rāśis and is tenanted by Mars and Saturn, the wife of the native will suffer from nasal disorders. Similarly a Rāśi of Mars, becoming the 2nd from Upa Pad and occupied by Mars and Saturn, will cause nasal disorders to ones wife. Jupiter and Saturn will, if be in the 2nd from Upa Pad, cause disorders of ears and/or eyes to the wife. If Mercury and Marsare placed in the 2nd from Upa Pad other than their own Rāśis, or, if Rahu is with Jupiter in the 2nd from Upa Pad, the natives wife will suffer from dental disorders. Saturn and Rahu together in one of Saturn's Rāśis, which is the 2nd from Upa Pad, will cause lameness, or windy disorders to the natives wife. These evils will not come to pass, if there happens to be a Conjunct with, or a Aspect from a benefic (or from another benefic in the case of affliction being caused by a benefic himself). O Brahmin, all these effects be deduced from the natal Lagna, Lagna Pad, the 7th from Upa Pad and the Lords thereof. So say Narada and others.

अपुत्रता तथाऽर्केज्यराहुभिर्बहुपुत्रता
चन्द्रेणैकसुतस्तत्र मिश्रैः पुत्रो विलम्बतः २५

रवीज्यराहुयोगेन पुत्रो वीर्यप्रतापवान्
प्रचण्डविजयी विप्र रिपुनिग्रहकारकः २६

उक्तस्थाने कुजार्किभ्यां पुत्रहीनः प्रजायते
दत्त पुत्रयुतो वापि सहोत्थसुतवान् भवेत् २७

तत्रस्थे विषमे राशौ बहुपुत्रयुतो नरः
स्वल्पापत्यः समे राशौ जायते द्विजसत्तम १ २८

**25-28. About Sons.** If Saturn, Moon and Mercury are together in the 9th from one of the said places (Sloka 23), there will be no son at all, while Sun, Jupiter and Rahu so placed will give a number of sons. Moon so placed will give a son, while a mixture of Planets will delay the obtainment of a son. The son, caused by the Conjunct of Sun, Jupiter and Rahu, will be strong, valorous, greatly successful and will destroy enemies. If Mars and Saturn are in the said 9th, there will be no son, or a son will be obtained by adoption, or brothers son will come in adoption. In all these cases odd Rāśis will yield many sons, while even Rāśis will cause only a few.

सिंहे चोपपदे विप्र निशानाथयुतेक्षिते
अल्पप्रजोऽथ कन्यायां जातः कन्याप्रजो भवेत् २९

सुतभावनवांशाच्च स्थिरसन्ततिकारकात्
एवं त्रिशांशकुण्डल्यामपि योगं विचिन्तयेत् ३०

**29-30. <u>Many Sons and Many Daughters.</u>** O Brahmin, if Leo happens to be Upa Pad and receives a Aspect from Moon, there will be a limited number of children. Similarly Virgo will cause many daughters.

शनिराहू त्रिलाभस्थौ पदाद् भ्रातुर्विनाशकौ
ज्येष्ठस्यैकादशे तत्र कनिष्ठस्य तृतीयके ३१

**31. <u>Co-born form Lagna Pad (up to Sloka 36).</u>** Rahu and Saturn in the 3rd, or the 11th from Lagna Pad will destroy the co-born of the native. Rahu and Saturn in the 11th will indicate the destruction of elder brothers and/or sisters and in the 3rd younger ones.

दैतेज्ये तत्र गर्भस्य नाशो व्यवहितस्य च
लग्ने वापि पदे रन्ध्रे दैत्याचार्ययुतेक्षिते ३२

**32**. If Venus is in the 3rd, or the 11th from Lagna Pad, there would have been an abortion to the mother earlier. Same is the effect, if Venus is in the 8th from natal Lagna, or from Lagna Pad.

तथैव फलमित्याहुर्निर्विशंकं मुनीश्वराः
तृतीयलाभयोर्विप्र चन्द्रेज्यबुधमङ्गलाः ३३

बहवो भ्रातरस्तस्य बलवन्तः प्रतापिनः
शन्यारसंयुते दृष्टे तृतीयैकादशे द्विज ३४

कनिष्ठज्येष्ठयोर्नाशो दिवज्ञेयो द्विजसत्तम
शनिरेको यदा विप्र लाभगो वा तृतीयगः ३५

तदा स्वमात्रशेषः स्यादन्ये नश्यन्ति सोदराः
तृतीये लाभगे केतौ बहुलं भगिनीसुखम् ३६

**33-36. <u>These are the effects,</u>** o Brahmin, as stated by Mahārśis for the 3rd and the 11th from Lagna Pad. Should Moon, Jupiter, Mercury and Mars be in the 3rd, or the 11th from Lagna Pad, there will be many valorous co-born. Should Saturn and Mars be in the 3rd, or the 11th from Lagna Pad, or give Aspects thereto, younger and elder co-born will, respectively, be destroyed. If Saturn is alone in one of the said Houses, the native will be spared, while the co-born will die. Ketu in the 3rd, or the 11th will give abundant happiness from ones sisters.

आरूढात् षष्ठभावस्थे पापाख्ये शुभवर्जिते
शुभसम्बन्धरहिते चौरो भवति जातकः ३७

**37. <u>Other Matters from Lagna Pad (up to Sloka 43)</u>.** If the 6th from Lagna Pad is occupied by a malefic and is bereft of a Conjunct with, or a Aspect from a benefic, the native will be a thief.

सप्तमे द्वादशे स्थाने सैहिकेययुतेक्षिते
ज्ञानवांश्च भवेद् बालो बहुभाग्ययुतो द्विज ३८

**38.** If Rahu is in the 7th, or the 12th from Lagna Pad, or gives a Aspect to one of the said Houses, the native will be endowed with spiritual knowledge and be very fortunate.

आरूढे संस्थिते सौम्ये सर्वदेशाधिपो भवेत्
सर्वज्ञस्तत्र देवेज्ये कविर्वादी च भार्गवे ३९

**39**. If Mercury is in Lagna Pad, the native will Lord over a whole country, while Jupiter will make him a knower of all things. Venus in this context denotes a poet/speaker **(also see Ch. 29, verse 30).**

उपारूढात् पदाद् वापि धनस्थे शुभखेचरे
सर्वद्रव्याधिपो धीमाञ्जायते द्विजसत्तम ४०

**40**. O excellent of the Brahmins, if benefics occupy the 2nd from Upa Pad, or from Lagna Pad, the native will be endowed with all kinds of wealth and be intelligent.

उपारूढाद्धनाधीशे द्वितियभवनस्थिते
पापखेचरसंयुक्ते चौरो भवति निश्चितम् ४१

**41.** One will surely become a thief, if the Lord of the 2nd from Upa Pad is in 2nd House and is there conjunct with a malefic Planet.

तत्सप्तमगृहाधीशाद् राहौ धनगते द्विज
दंष्ट्रावान् जायते बालः स्तब्धवाक् केतुखेचरे ४२

शनैश्चरे कुरूपः स्यात्सप्तमेशाद् द्वितीयगे
मिश्रग्रहसमायुक्ते फलं मिश्रं समादिशेत् ४३

**42-43.** O Brahmin, if Rahu is in the 2nd from the Lord of the 7th, counted from Upa Pad, the native will have long and projected teeth. Ketu in the 2nd from the Lord of the 7th, counted from Upa Pad, will cause stammering and Saturn in the 2nd from the Lord of the 7th, counted from Upa Pad, will make one look ugly. Mixed will be the effects, if there are mixed Planets

अथाऽर्गलाध्यायः ३१
भगवान् याऽर्गला प्रोक्ता शुभदा भवताऽधुना
तामहं स्रोतुमिच्छामि सलच्चणफलं मुने १

## Ch. 31. Argala, or Intervention from Planets

**1**. O Mahārśi Parashara, you have told of auspicious effects, related to Argala. Kindly narrate its conditions and effects.

मैत्रेय सार्गला नाम यया भावफलं दृढम्
स्थिरं खेटफलं च स्यात् साऽधुना कथ्यते मया २

चतुर्थे च धने लाभे ग्रहे ज्ञेया तदर्गला
तद्बाधकाः क्रमात् खेटा व्योमरिष्फतृतीयगाः ३

निर्बला न्यूनसंख्या वा बाधका नैव सम्मताः
तृतीये व्याधिकाः पापा यत्र मैत्रेय बाधकाः ४

तत्रापि चार्गला ज्ञेया विपरीता द्विजोत्तम
तथापि खेटभावानां फलमर्गलितं विदुः ५

पञ्चमं चार्गलास्थानं नवमं तद्विरोधकृत्
तमोग्रहभवा सा च व्यत्ययाज् ज्ञायते द्विज ६

एकग्रहा कनिष्ठा सा द्विग्रहा मध्यमा स्मृता
अर्गला द्व्यधिकोत्पन्ना मुनिभिः कथितोत्तमा ७

राशितो ग्रहतश्चापि विज्ञेया द्विविधाऽर्गला
निर्बाधका सुफलदा विफला च सबाधका ८

यत्र राशौ स्थितः खेटस्तस्य पाकान्तरं यदा
तस्मिन् काले फलं ज्ञेयं निर्विशंकं द्विजोत्तम ९

**2-9. Formation of Argala**. Maitreya, I explain below Argala to know the definite effects of Houses and Planets. Planets in the 4th, 2nd and the 11th cause Argalas, while obstructors of the Argala will be those in the 10th, 12th and 3rd from a House, or a Planet. If the Argala causing Planet is stronger than the obstructing one, the former will prevail. Or, if the number of Argalas are more than the obstructing Planets, then also the Argala will prevail. If there are 3, or more malefics in the 3rd they will cause Vipreeta Argala (more effective intervention), which will also be harmless and be very favourable. The 5th is also an Argala place, while the Planet in the 9th will counteract such Argala. As Rahu and Ketu have retrograde motions, the Argalas and obstructions be also counted accordingly in a reverse manner. Mahārśis say, that the Argala, caused by one Planet, will yield limited effect, by two medium and by more than two, excellent effects. Argalas should be counted from a Rāśi, or a Planet, as the case may be. The Argala, which is unobstructed will be fruitful, while the one duly obstructed will go astray. The Argala effects will be derived in the Dasha periods of the Rāśi, or Planet concerned.

**Notes.** Argala in Sanskrit is figuratively used to denote an impediment, or obstruction. Some suggest, that the Argala obstruction places are countable from the Argala place instead of from the original place, or Planet. This is not logical and a glance into Gochara Vedha (obstructions during transits) will confirm our findings.

अर्गलां प्रतिबन्धश्च कथमांघ्रिचतुर्थयोः
द्वित्र्यङ्घ्रयोश्च मिथो विप्र चिन्तयेदिति मे मतम् १०

**10. Special.** The Argala, caused by placement of a Planet in the first one fourth part of the Rāśi, is countered by another, placed in the 4th quarter of the respective obstructive Rāśi. Similarly 2nd quarters Argala is eliminated by the 3rd quarter placement of another Planet.

**Notes.** If the Argala causing Planet and the obstructing Planet are in the respective quarters, the obstruction will come to pass. Otherwise not.

पदे लग्ने मदे वापि निराभासार्गला यदा
तदा जातोऽतिविख्यातो बहुभाग्ययुतो भवेत्  ११

यस्य पापः शुभो वापि ग्रहस्तिष्ठेत् शुभार्गले
तेन द्रष्टेच्चितं लग्नं प्राबल्यायोपकल्प्यते  १२

सार्गले च धने विप्र  धनधान्यसमन्वितः
तृतीये सोदरादीनां सुखमुक्तं मनीषिभिः  १३

चतुर्थे सार्गले गेहपशुबन्धुकुलैर्युतः
पञ्चमे पुत्रपौत्रादिसंयुतो बुद्धिमान्नरः  १४

षष्ठे रिपुभयं कामे धनदारसुखं बहु
अष्टमे जायते कष्टं धर्मे भाग्योदयो भवेत्  १५

दशमे राजसम्मानं लाभे लाभसमन्वितः
सार्गले च व्यये विप्र  व्ययाधिक्यं प्रजायते  १६

शुभग्रहार्गलायां तु सौख्यं बहुविधं भवेत्
मध्यं पापार्गलायां च मिश्रायामपि चोत्तमम्  १७

**11-17. Argala Effects.** Should there be Argala for the Arudh Pad, for the natal Lagna and for the 7th from both, the native will be famous and fortunate. A malefic, or a benefic, causing unobstructed Argala, giving a Aspect to Lagna will make one famous. Similarly a malefic, or a benefic, causing unobstructed Argala, giving a Aspect to 2nd House denotes acquisition of wealth and grains, to 3rd House happiness from co-born, to 4th House residences, quadrupeds and relatives, to 5th House sons, grand sons and intelligence, to 6th House fear from enemies, to 7th House abundant wealth and m6thtal happiness, to 8th House difficulties, to 9th House fortunes, to 10th House royal honour, to 11th House gains and to 12th House expenses. The Argala by benefics will give various kinds of happiness, while benefic effects will be meddling with malefic Argalas. Argala by both benefics and malefics will yield results.

**Notes.** 1. Argala can be caused by a benefic, which is known, as Subha Argala. This Argala can be from a malefic also, so that the benefic, causing Argala, stalls the malefic role. If the benefics Argala is obstructed by another, then the benefic will become ineffective in Argala and the first-mentioned malefic will operate freely.

2. Argala can be by a malefic with reference to a benefic, so that the native does not enjoy good effects, due to the benefic. This is Pap (malefic) Argala. If the Argala is eliminated by a benefic, or a malefic, then the first mentioned benefic will be at liberty to act, according to his own disposition.

लग्नपञ्चमभाग्येषु सार्गलेषु द्विजोत्तम
जातश्च जायते राजा भाग्यवान् नात्र संशयः  १८

**18**. Should there be (unobstructed) Argala for Lagna, 5th and 9th House, the native will doubtlessly become a king and fortunate.

अथ कारकाध्यायः ३२

अथाऽहं सम्प्रवक्ष्यामि ग्रहानात्मादिकारकान्

सप्तरव्यादिशन्यन्तान् राह्वन्तान् वाऽष्टसंख्यकान् १

अंशैः समौग्रहौ द्वौ चेद्राह्वन्तान् चिन्तयेत् तदा
सप्तैव कारकानेवं केचिदष्टौ प्रचक्षते २

## Ch. 32. Karakatwas of the Planets

**1-2.** I now detail below Atma Karak etc., obtainable from among the 7 Planets, viz. Sun to Saturn. Some say, that Rahu will become a Karak, when there is a state of simil6thty in terms of longitude between (two) Planets. Yet some say, that the 8 Planets, including Rahu, will have to be considered irrespective of such a state**.**

आत्मा सूर्यादिखेटानां मध्ये ह्यंशाधिको ग्रहः
अंशसाम्ये कलाधिक्यात् तत्साम्ये विकलाधिकः ३

बुधै राशिकलाधिक्याद् ग्राह्यो नैवात्मकारकः
अंशाधिकः कारकः स्यादल्पभागोऽन्त्यकारकः ४

मध्यांशो मध्यखेटः स्यादुपखेटः स एव हि
विलोमगमनाद्राहोरंशाः शोध्याः खवह्नितः ५

अंशक्रमादधोऽधःस्थाश्चराख्याः कारका इति
आत्माख्यकारकस्तेषु प्रधानं कथ्यते द्विज ६

स एव जातकाधीशो विज्ञेयो द्विजसत्तम
यथा भूमौ प्रसिद्धोऽस्ति नराणां क्षितिपालकः ७

सर्ववार्ताधिकारी च बन्धकृन्मोक्षकृत् तथा ८

**3-8. Atma Karak Defined.** Among the Planets from Sun etc. whichever has traversed maximum number of degrees in a particular Rāśi is called Atma Karak. If the degrees are identical, then the one with more minutes of arc and, if the minutes are also identical, then the one with higher seconds of arc, have to be considered. In that case these three are called Anthya Karak, Madhya Karak and Upakheta. In the case of Rahu deduct his longitude in that particular Rāśi from 30. The Karakas will have to be decided, as above and, as per further rules given below. Out of these Karakas, Atma Karak is the most important and has a prime say on the native, just as the king is the most famous among the men of his country and is the head of all affairs and is entitled to arrest and release men.

यथा राजाज्ञया विप्र पुत्रामात्यादयो जनाः
समर्था लोककार्येषु तथैवान्येपि कारकाः ९

आत्मानुकूलमेवात्र भवन्ति फलदायकः
प्रतिकूले यथा भूपे सर्वेऽमात्यादयो द्विज १०

कार्य कर्तुं मनुष्याणां न समर्था भवन्ति हि
तथात्मकारके क्रूरे नाऽन्ये स्वशुभदायकः ११

अनुकूले नृपे यद्वत् सर्वेऽमात्यादयो द्विज
नाशुभं कुर्वते तद्वनान्ये स्वाशुभदायकाः १२

**9-12. Importance of Atma Karak**. O Brahmin, as the minister cannot go against the king, the other Karakas, viz. 5th Karak, Amatya Karak etc. cannot predominate over Atma Karak in the affairs of the native. If the Atma Karak is adverse, other Karakas cannot give their benefic effects. Similarly, if Atma Karak is favourable, other Karakas cannot predominate with their malefic influences.

आत्माकारकभागेभ्यो न्यूनांशोऽमात्यकारकः
तस्मान्नयूनांशको भ्राता तन्नयूनोमातृसंज्ञकः १३

तन्नयूनांशः पितातस्मादल्पांशः पुत्रकारकः
पुत्रान्नयूनांशको ज्ञतिर्ज्ञतिर्न्यूनांशको हि यः १४

स दारकारको ज्ञेयो निर्विशंक द्विजोत्तम
चराख्यकारला एते ब्राह्मणा कथिताः पुरा १५

मातृकारकमेवाऽन्ये वदन्ति सुतकारकम्
द्वौ ग्रहौ भागतुल्यौ चेज्जायेतां यस्य जन्मनि १६

तदग्रकारकस्यैवं लोपो ज्ञेयो द्विजोत्तम
स्थिरकारकवशात्तस्य फलं ज्ञेयं शुभाऽशुभम् १७

**13-17. Other Karakas.** The Planet next to Atma Karak in terms of longitude is called Amatya Karak. Similarly following one another in terms of longitude are Bhratru Karak, Matru Karak, Pitru Karak, 5th Karak, Gnati Karak and Stri Karak. These are Char Karakas, or inconstant significators. Some consider Matru Karak and 5th Karak, as identical. If two Planets have the same longitude, both become the same Karak, in which case there will be a deficit of one Karak. In that circumstance consider constant significator in the context of benefic/malefic influence for the concerned relative.

अधुना सम्प्रवक्ष्यामि स्थिराख्यान् करकग्रहान्
स पितृकारको ज्ञेयो यो बली रविशुक्रयोः १८

चन्द्रारयोर्बली खेटो मातृकारक उच्यते
भौमतो भगिनी श्यालः कनीयान् जननीत्यपि १९

बुधान्मातृसजातीया मातुलाद्याश्च बान्धवाः
गुरोः पितामहः शुक्रात् पतिः पुत्रः शनैश्चरात् २०

विप्रान्तेवासिनः पत्नी पितरौ श्वशुरौ तथा
मातामहादयश्चिन्त्या एते च स्थिरकारका २१

**18-21. Constant Karakatwas.** I narrate below the constant Karakatwas, as related to the Planets. The stronger among Sun and Venus indicates the father, while the stronger among Moon and Mars indicates the mother. Mars denotes sister, brother-in-law, younger brother and mother. Mercury rules maternal relative, while Jupiter indicates paternal grand father. Husband and sons are, respectively, denoted by Venus and Saturn. From Ketu note wife, father, mother, parents-in law and maternal grand father. These are constant Karakatwas.

अथाऽहं कारकान् वक्ष्ये खेटभाववशाद्द्विज
रवितः पुण्यभे तातश्चन्द्रान्माता चतुर्थके २२

कुजात् तृतीयतो भ्राता बुधात् षष्ठे च मातुलः
देवेज्यात् पञ्चमात् पुत्रो दाराः शुक्राच्च सप्तमे २३

मन्दादष्टमतो मृत्युः पित्रादीनां विचिन्तयेत्
इति सर्व विचार्यैव बुधस्तत्तत् फलं वदेत् २४

**22-24. Houses Related.** These constant significances are derivable from the Houses, counted from the said constant Karakatwas. The 9th from Sun denotes father, the 4th from Moon mother, the 3rd from Mars brothers, the 6th from Mercury maternal uncle, the 5th from Jupiter sons, the 7th from Venus wife and the 8th from Saturn death. The learned should consider all these and declare related effects accordingly.

अथाऽहं सम्प्रवक्ष्यामि प्रसङ्गाद्योगकारकान्
खेटान् जन्मनि जातस्य मिश्रः स्थितिवशाद् द्विज २५

स्वर्क्षे स्वोच्चे च मित्रर्क्षे मिथः केन्द्रगता ग्रहाः
ते सर्वे कारकास्तेषु कर्मगस्तु विशेषतः २६

यथा लग्ने सुखे कामे स्वोर्च्चोच्चस्था ग्रहा द्विज
भवन्ति कारकाख्यास्ते विशेषेण च खे स्थिताः २७

स्वमित्रोच्चर्क्षगो हेतुरन्योऽन्यं यदि केन्द्रगः
सुहृत् तद्गुणसम्पन्नः सोऽपि कारक उच्यते २८

नीचान्वयेऽपि यो जातः विद्यमाने च कारके
सोऽपि राजसमो विप्र धनवान् सुखसंयुतः २९

राजवंशसमुत्पन्नो राजा भवति निश्चयात्
एवं कुलानुसारेण कारकेभ्यः फलं वदेत् ३०

**25-30. Yoga Karakas.** O Brahmin, I make below a passing reference to Yoga Karakas (mutual co-workers). Planets become Yoga Karakas, if they are in mutual angles identical with own Rāśis, exaltation Rāśis, or friendly Rāśis. In 10th House a Planet will be significantly so. Planets simply (not being in friendly, own, or exaltation Rāśis) in Lagna, 4th and 7th House do not become such Yoga Karakas. Even, if they be placed in other Houses, but with such dignities, as mentioned, shall become Yoga Karakas. With such Planets even a person of mean birth will become a king and be affluent. One born of royal scion, then will surely become a king. Thus the effects be declared, considering the number of such Planets and the order the native belongs to.

अथाऽहं सम्प्रवक्ष्यामि विशेषं भावकारकान्
जनस्य जन्मलग्नं यत् विन्द्यादात्मकारकम् ३१

धनभावं विजानीयाद् दारकारकमेव हि
एकादशेऽग्रजातस्य तृतीये तु कनीयसः ३२

सुते सुतं विजानीयात् पत्नीं सप्तमभावतः
सुतभवे ग्रहो यः स्यात् सोऽपि कारक उच्यते ३३

सूर्यो गुरुः कुजः सोमो गुरुर्भौमः सितः शनिः
गुरुश्चन्द्रसुतो जीवो मन्दश्च भवकारकाः ३४

**31-34. House Significance.** I now narrate the significance of the Houses. 1st House denotes the soul (self), 2nd family, finance, wife etc., 3rd younger brothers/sisters, 5th progeny and 7th wife. It is also said, that a Planet in 5th becomes a Karak for wife. The Karakatwas of the House in order are Sun, Jupiter, Mars, Moon, Jupiter, Mars, Venus, Saturn, Jupiter, Mercury, Jupiter and Saturn.

पुनस्तन्वादयो भावः स्थाप्यास्तेषां शुभाऽशुभम्
लाभस्तृतीयो रन्ध्रश्च शत्रुसंज्ञधनव्ययाः ३५

एते भावाः समाख्याताः क्रूराख्या द्विजसत्तम
एषां योगेन यो भावस्तस्य हानिः प्रजायते ३६

भावा भद्राश्च केन्द्राख्याः कोणाख्यौ द्विजसत्तम
एषां संयोगमात्रेण ह्यशुभोऽपि शुभो भवेत् ३७

**35-37**. O excellent of the Brahmins, after knowing the merits of 1st House etc. the good and bad effects can be declared. 6th, 8th and 12th are Trikas, Dusthana, or malefic Houses. 3rd, 6th, 10th and 11th are Upachayas. 2nd, 5th, 8th and 11th are Panapharas and 3rd, 6th, 9th and 12th are Apoklimas. Association with Trikas will inflict evils. Kendras and Konas (5th and 9th) are auspicious Houses, the association with which turns even evil into auspiciousness.

**(Also see Ch. 34 for more information)**

अथ कारकांशफलाध्यायः ३३
अथाऽहं सम्प्रवक्ष्यामि कारकांशफलं द्विज
मेषादिराशिगे स्वांशे यथावद् ब्रह्मभाषितम् १

## Ch. 33. Effects of Karakāńśa

**1.** O Brahmin, as laid down by Lord Brahma, I now tell you about the effects of Karakāńśa identical with Aries etc. (Karakāńśa is the Navāmśa, occupied by the Atma Karak Planet)

गृहे मूषकमार्जारा मेषांशे ह्यात्मकारके
सदा भयप्रदा विप्र पापयुक्ते विशेषतः २

वृषांशकगते स्वस्मिन् सुखदाश्च चतुष्पदाः
मिथुनांशगते तस्मिन् कण्ड्वादिव्याधिसम्भवः ३

कर्कांशे च जलाद्भीतिः सिंहांशे श्वपदाद्भयम्
कण्डूः स्थौल्यञ्च कन्यांशे तथा वह्निकणाद्भयम् ४

तुलांशे च वणिग् जातो वस्त्रादिनिर्मितौ पटुः
अल्यंशे सर्पतो भीतिः पीडा मातुः पयोधरे ५

धनुरंशे क्रमादुच्चात् पतनं वाहनादपि
मकरांशे जलोद्भूतैर्जन्तुभिः खेचरस्तथा ६

शंखमुक्ताप्रवालाद्यैर्लाभो भवति निश्चितः
कुम्भांशे च तडागादिकारको जायते जनः ७

मीनांशे कारके जातो मुक्तिभाग् द्विजसत्तम
नाऽशुभं शुभसंदृष्टे न शुभं पापवीक्षिते ८

**2-8. <u>Karakāńśa in Various Rāśis</u>.** If Atma Karak happens to be in Aries Navāmśa, there will be nuisance from rats and cats at all times. A malefic joining will further increase the nuisance. Should Atma Karak be in Taurus Navāmśa, happiness from quadrupeds will result. Should Atma Karak be in Gemini Navāmśa, the native will be afflicted by itch etc. Should Atma Karak be in Cancer Navāmśa, there will be fear from water etc. If Atma Karak happens to be in Leo Navāmśa, fear will be from tiger etc. If Atma Karak happens to be in Virgo Navāmśa, itch, corpulence, fire etc. will cause trouble, while, if Atma Karak is in Libra Navāmśa, he will make one a trader and skilful in making robes etc. Scorpio Navāmśa, holding Atma Karak, will bring troubles from snakes etc. and also affliction to mothers breasts. There will be falls from height and conveyances etc., if it is Sagittarius Navāmśa, that is occupied by Atma Karak. Capricorn Navāmśa in this respect denotes gains from water dwelling beings and conch, pearl, coral etc. If it is Aquarius Navāmśa, holding Atma Karak, the native will construct tanks etc. And in Pisces Navāmśa the Atma Karak will grant final emancipation. The Aspect of a benefic will remove evils, while that of a malefic will cause no good.

कारकांशे शुभे विप्र लग्नांशे च शुभग्रहे
शुभसंवीक्षिते जातो राजा भवति निश्चितः ९

स्वांशाच्छुभग्रहाः केन्द्रे कोणे वा पापवर्जिताः
धनविद्यायुतो जातो मिश्रैर्मिश्रफलं वदेद् १०

उपग्रहे च विप्रेन्द्र स्वोच्चस्वर्क्षसुभर्क्षगे
पापदृग्रहिते चाऽन्त्ये कैवल्यंतस्य निर्दिशेत् ११

**9-11.** O Brahmin, if there be only benefics in Karakāṅś and the Navāmśa of Lagna receives a Aspect from a benefic, the native will undoubtedly become a king. Should the Kendras/Konas from the Karakāṅś be occupied by benefics, devoid of malefic association, the native will be endowed with wealth and learning. The combination of benefic and malefic influence will in this context yield mixed results. If the Upakheta (UpaPlanet, vide Ch.32 Sloka 5) is in its exaltation, or own, or friendly Rāśi and is devoid of a Aspect from a malefic, the native will go to heaven after death.

चन्द्राऽरभृगुवर्गस्थ कारके पारदारिकः
विपर्यस्थेऽन्यथा ज्ञेयं फलं सर्वं विचक्षणैः १२

**12**. If the Atma Karak is in the divisions of Moon, Mars, or Venus, the native will go to others wives. Otherwise the contrary will prevail.

कारकांशे रवौ जातो राजकार्यपरो द्विज
पूर्णेन्द्रौ भोगवान् विद्वान् शुक्रदृष्टे विशेषतः १३

स्वांशे बलयुते भौमे जातः कन्तायुधी भवेत्
वह्निजीवी नरो वाऽपि रसवादी च जायते १४

बुधे बलयुते स्वांशे कलाशिल्पविचक्षणः
वाणिज्यकुशलश्चापि बुद्धिविद्यासमन्वितः १५

सुकर्मा ज्ञाननिष्ठश्च वेदवित् स्वांशगे गुरौ
शुक्रे शतेन्द्रियः कामी राजकीयो भवेन्नरः १६

शनौ स्वांशगते जातः स्वकुलोचितकर्मकृत्
राहौ चौरश्च धानुष्को जातो वा लोहयन्त्रकृत् १७

विषवैद्योऽथवा विप्र जायते नाऽत्र संशयः
व्यवहारी गजादीनां केतौ चौरश्च जायते १८

**13-18. <u>Effects of Planets in the Karakāṅś.</u>** O Brahmin, if Sun is in the Karakāṅś, the native will be engaged in royal assignments. If the full Moon is there, he will enjoy pleasures and be a scholar, more so, if Venus gives a Aspect to the Karakāṅś. If strong Mars is in Karakāṅś, he will use the weapon spear, will live through fire and be an alchemist. Should strong Mercury be Karakāṅś, he will be skilful in arts and trading, be intelligent and educated. Jupiter in Karakāṅś denotes one, doing good acts, endowed with spiritualism and Vedic learning. One will be endowed with a longevity of 100 years, be sensuous and will look after state affairs, if Venus is in Karakāṅś. Saturn in Karakāṅś will give such livelihood, as due to the natives family. Rahu in Karakāṅś denotes a thief, a bowman, a machinery maker and a doctor, treating poisonous afflictions. If Ketu be in Karakāṅś, one will deal in elephants and be a thief.

रविराहू यदा स्वांशे सर्पाद् भीतिः प्रजायते
शुभदृष्टौ भयं नैव पापदृष्टौ मृतिभवेत् १९

शुभषड्वर्गसंयुक्तौ विषवैद्यो भवेत् तदा
भौमेच्चिते कारकांशे भानुस्वर्भानुसंयुते २०

अन्यग्रहा न पश्यन्ति स्ववेश्मपरदाहकः
तस्मिन् बुधेच्चि ते चापि वह्निदो नैव जायते २१

पापर्चे गुरुणा दृष्टे समीपगृहदाहकः
शुक्रदृष्टे तु विप्रेन्द्र गृहदाहो न जायते २२

**19-22. <u>Rahu-Sun in Karakāńś.</u>** Should Rahu and Sun be in Karakāńś, there will be fear from snakes. If a benefic gives a Aspect to Rahu-Sun in Karakāńś, there will be no fear, but a malefic Aspect will bring death (through serpents). If Rahu and Sun occupy benefic Shad Vargas, being in Karakāńś, one will be a doctor, treating poisonous afflictions, while the Aspect from Marson Rahu-Sun in Karakāńś denotes, that the native will burn either his own house, or that of others. Mercury's Aspect on Rahu-Sun in Karakāńś will not cause the burning of ones own house, but that of others. If Rahu and Sun happen to be in Karakāńś and are in a malefics Rāśi, receiving a Aspect from Jupiter, one will burn a house in ones neighborhood, while the Aspect of Venus will not cause such an event.

गुलिकेन युते स्वांशे पूर्णचन्द्रेण वीच्चिते
चौरैर्हृतधनो जातः स्वयं चौरोऽथवा भवेत् २३

गृहादृष्टे सगुलिके विपदो वा विषैर्हतः
बुधदृष्टे बृहद्बीजो जायते नाऽत्र संशयः २४

**23-24. <u>Gulika in Karakāńś.</u>** Should the full Moon give a Aspect to Gulika, placed in the Karakāńś, the native will lose his wealth to thieves, or will himself be a thief. If Gulika is in Karakāńś, but does not receive a Aspect from others, one will administer poison to others, or will himself die of poisoning. Mercury's Aspect in this context will give large testicles.

सकेतौ कारकांशे च पापदृष्टे द्विजोत्तम
जातस्य कर्णरोगो वा कर्णच्छेदः प्रजायते २५

भृगुपुत्रेच्चिते तस्मिन् दीच्चितो जायते जनः
बुधार्किदृष्टे निर्वीर्यो जायते मानवो ध्रुवम् २६

बुधशुक्रेच्चिते तस्मिन् दासीपुत्रः प्रजायते
पुनर्भवासुतो वाऽपि जायते नाऽत्र संशयः २७

तपस्वी शनिना दृष्टे जातः प्रेष्योऽथवा भवेत्
शनिमात्रेच्चिते तस्मिन् जातः संन्यासिवेषवान् २८

रविशुक्रेच्चिते तस्मिन् राजप्रेष्यो जनो भवेत्
इतिसंच्चेपतः प्रोक्तं कारकांशफलं द्विज २९

**25-29<u>. Effects of Aspects on Ketu in Karakāńś</u>.** If Ketu is in Karakāńś, receiving a Aspect from a malefic, ones ears will be severed, or one will suffer from diseases of the ears. Venus, giving a Aspect to Ketu in Karakāńś, denotes one, initiated into religious order. One will be devoid of strength, if Mercury and Saturn give a Aspect to Ketu in Karakāńś. If Mercury and Venus give a Aspect to Ketu in Karakāńś, one will be the son of a female slave, or of a female remarried. With Saturn's Aspect on Ketu in Karakāńś one will perform penance, or be a servant, or will be a pseudo-ascetic. Venus and Sun together, giving a Aspect to Ketu in Karakāńś, will make one serve the king. Thus, o Brahmin, are told briefly the effects of Karakāńś.

स्वांशाद्धने च शुक्रारवर्गे स्यात् पारदारिकः
तयोर्दृग्योगतो ज्ञेयमिदमामरणं फलम्  ३०

केतौ तत्प्रतिबन्धः स्यात् गुरौ तु स्त्रैण एव सः
राहौ चाऽर्थनिवृत्तिः स्यात् कारकांशाद् द्वितीयगे  ३१

**30-31. <u>Effects of the 2nd from Karakāńś</u>.** If the 2nd from Karakāńś falls in the divisions of Venus, or Mars, one will be addicted to others wives and, if Venus, or Mars give a Aspect to the 2nd from Karakāńś, the tendency will last till death. If Ketu is the 2nd from Karakāńś in a division of Venus, or Mars, addiction to others wives will not prevail, while the position of Jupiter will cause such an evil. Rahu in the 2nd from Karakāńś will destroy wealth.

स्वांशात् तृतीयगे पापे जातः शूरः प्रतापवान्
तस्मिन् शुभग्रहे जातः कातरो नात्र संशयः  ३२

**32**. Effects of the 3rd from Karakāńś. A malefic in the 3rd from Karakāńś will make one valorous, while a benefic in the 3rd from Karakāńś will make one timid.

स्वांशाच्चतुर्थभावे तु चन्द्रशुक्रयुतेक्षिते
तत्र वा स्वोच्चगे खेटे जातः प्रासादवान् भवेत्  ३३

शनिराहुयुते तस्मिन् जातस्य च शिलागृहम्
ऐष्टिकं कुजकेतुभ्यां गुरुणा दारवं गृहम्  ३४

तार्णं तु रविणा प्रोक्तं जातस्य भवनं द्विज
चन्द्रे त्वनावृते देशे पत्नीयोगः प्रजायते  ३५

**33-35. <u>Effects of the 4th from Karakāńś.</u>** If the 4th from Karakāńś happens to be occupied by Venus and Moon, one will own large buildings, like palaces etc. Similar is the effect of an exalted Planet in the said 4th. A house, made of stones, is denoted by the occupation of the 4th from Karakāńś by Rahu and Saturn. Mars and Ketu in the 4th from Karakāńś indicate a house, made of bricks, while Jupiter in the 4th from Karakāńś denotes a house, made of wood. Sun in the 4th from Karakāńś will give a house of grass. If Moon is in the 4th from Karakāńś, one will have union with his wife in an uncompounded house.

पञ्चमे कुजराहुभ्यां क्षयरोगस्य संभवः
रात्रिनाथेन दृष्टाभ्यां निश्चयेन प्रजायते  ३६

कुजदृष्टौ तु जातस्य पिटकादिगदो भवेत्
केतुदृष्टौ तु ग्रहणी जलरोगोऽथवा द्विज  ३७

सराहुगुलिके तत्र भयं क्षुदविषोद्भवम्
बुधे परमहंसश्च लगुडी वा प्रजायते  ३८

रवौ खड्गधरो जातः कुजे कुन्तायुधी भवेत्
शनौ धनुर्धरो ज्ञेयो राहौ च लोहयन्त्रवान्  ३९

केतौ च घटिकायन्त्री मानवो जायते द्विज
भार्गवे तु कविर्वाग्मी काव्यज्ञो जायते जनः  ४०

**36-40. <u>Effects of the 5th from Karakāńś.</u>** If Rahu and Mars are in the 5th from Karakāńś, one will suffer from a pulmonary consumption, more so, if Moon gives them a Aspect. The Aspect of Mars on the 5th from Karakāńś will bring boils, or ulcers, Ketu's Aspect on the 5th from Karakāńś will cause dysentery and other diseases, caused by (impure) water. If Rahu and Gulika happen to be in the 5th from Karakāńś, there will be fear from mean people and poison. Should Mercury be in the 5th from Karakāńś, the native will be an ascetic of the highest order, or one, holding staff. Sun in the 5th from Karakāńś denotes one, using a knife. Mars in the 5th from Karakāńś denotes one, using a spear. Saturn denotes a bowman, if Saturn is placed in the 5th from Karakāńś. Rahu in the 5th from Karakāńś denotes a machinist. Ketu in the 5th from Karakāńś denotes a watch maker. Venus in the 5th from Karakāńś will make one a poet and an eloquent speaker.

स्वांशे तत्पञ्चमे वाऽपि चन्द्रेज्याभ्यां च ग्रन्थकृत्
शुक्रेण किञ्चिदूनोऽसौ ततोऽप्यल्पो बुधेन च ४१

गुरुणा केवलेनैव सर्वविद् ग्रन्थकृत् तथा
वेदवेदान्तविच्चापि न वाग्मी शाब्दकोऽपि सन् ४२

नैयायिकः कुजेनासौ ज्ञेन मीमांसकस्तथा
सभाजडस्तु शनिना गीतज्ञो रविणा स्मृतः ४३

चन्द्रेण सांख्ययोगज्ञः साहित्यज्ञश्च गायकः
केतुना गणितज्ञोऽसौ राहुणाऽपि तथैव च ४४

सम्प्रदायस्य सिद्धिः स्यात् गुरुसम्बन्धतो द्विज
स्वांशाद् द्वितीयतः केचित् फलमेवं वदन्ति हि ४५

**41-45. Effects of Karakāṅś and the 5th from there.** If Jupiter and Moon are in Karakāṅś, or the 5th thereof, the native will be an author. Venus will make one an ordinary writer, while Mercury will indicate, that the writing skills are less than those of an ordinary writer. Should Jupiter be alone, one will be a knower of everything, be a writer and be versed in Vedas and Vedanta philosophy, but not an oratorian, or a gramm6than. Mars denotes a logician, Mercury a Mimamsaka (follower of 10th Mimansa), Saturn indicates, that one is dull-witted in the assembly, Sun denotes, that one is a musician, Moon denotes a follower of Sankhya philosophy (of Mahārśi Kapila, who enumerated 25 true principles with emphasis on final bliss) and indicates, that one is versed in rhetoric and singing and Ketu, or Rahu denotes, that one is a astrologer. Should Jupiter be related to the positions of Karakāṅś, or the 5th from there, while the Karakāṅś is caused by others than him, the effects, as stated, will effectively come to pass. Some say, that the 2nd from Karakāṅś should also be similarly considered.

स्वांशात् षष्ठगते पापे कर्षको जायते जनः
शुभग्रहेऽलसश्चेति तृतीयेऽपि फलं स्मृतम् ४६

**46. Effects of the 6th from Karakāṅś.** If the 6th from Karakāṅś is occupied by a malefic, the native will be an agriculturist, while he will be indolent, if a benefic is in the 6th from Karakāṅś. The 3rd from Karakāṅś should also be similarly considered.

द्यूने चन्द्रगुरु यस्य भार्या तस्यातिसुन्दरी
तत्र कामवती शुक्रे बुधे चैव कलावती ४७

रवौ च स्वकुले गुप्ता शनौ चापि वयोऽधिका
तपस्विनी रुजाढ्य वा राहौ च विधवा स्मृता ४८

**47-48. Effects of the 7th from Karakāṅś**. If Moon and Jupiter are in the 7th from Karakāṅś, the native will beget a very beautiful wife. Venus in the 7th form Karakāṅś denotes a sensuous wife, while Mercury in the 7th from Karakāṅś indicates a wife, versed in arts. Sun in the 7th from Karakāṅś will give a wife, who will be confining domestic core, while Saturn in the 7th from Karakāṅś denotes a wife of a higher age bracket, or a pious and/or sick wife. Rahu in the 7th from Karakāṅś will bring a widow in marriage.

शुभस्वामियुते रन्ध्रे स्वांशाद् दीर्घायुरुच्यते
पापेक्षितयुतेऽल्पायुर्मध्यायुर्मिश्रदृग्युते ४९

**49. Effects of the 8th from Karakāṅś**. If a benefic, or the Planet, owning the 8th from Karakāṅś, happens to be in the 8th from Karakāṅś, the native will be long-lived, while a malefic, placed in the 8th from Karakāṅś, will reduce the life span. Aspect/Conjunct of both benefics and malefics will yield a medium span of life.

कारकांशाच्च नवमे शुभग्रहयुतेक्षित
सत्यवादी गुरौ भक्तः स्वधर्मनिरतो नरः ५०

स्वांशाच्च नवमे भावे पापग्रहयुतेक्षिते
स्वधर्मनिरतो बाल्ये मिथ्यावादी च वार्धके ५१

नवमे कारकांशाच्च शनिराहुयुतेक्षिते
गुरुद्रोही भवेद् बालः शास्त्रेषु विमुखो नरः ५२

कारकांशाच्च नवमे गुरुभानुयुतेक्षिते
तदाऽपि गुरुद्रोही स्यात् गुरुवाक्यं न मन्यते ५३

कारकांशाच्च नवमे शुक्रभौमयुतेक्षिते
षड्वर्गादिकयोगे तु मरणं पारदारिकम् ५४

कारकांशाच्च नवमे ज्ञेन्दुयुक्तेक्षिते द्विज
परस्त्री सङ्गमाद् बालो बन्धको भवति ध्रुवम् ५५

नवमे केवलेनैवे गुरुणा च युतेक्षिते
स्त्रीलोलुपो भवेज्जातो विषयी चैव जायते ५६

**50-56. Effects of the 9th from Karakāṅś.** If the 9th from Karakāṅś receives a Aspect from, or is occupied by a benefic, the native will be truthful, devoted to elders and attached to his own religion. If a malefic gives a Aspect to, or occupies the 9th from Karakāṅś, one will be attached to his religion in boyhood, but will take to falsehood in old age. If Saturn and Rahu, one will betray his elders and be adverse to ancient learning. If Jupiter and Sun, one will betray his elders and will be disobedient to them. Should Mars and Venus give a Aspect to, or occupy the 9th from Karakāṅś and are joining in six identical Vargas, a female, ill-related to the native, will die. Mercury and Moon giving a Aspect to, or occupying the 9th from Karakāṅś and joining in six identical Vargas will cause imprisonment of the native, due to association with a female not of his own. If Jupiter is alone, related to the 9th from Karakāṅś by Aspect, or by Conjunct, the native will be addicted to females and be devoted to sensual enjoyments.

कारकांशाच्च दशमे शुभखेटयुतेक्षिते
स्थिरवित्तो भवेद् बालो गम्भीरो बलबुद्धिमान् ५७

दशमे कारकांशाच्च पापखेटयुतेक्षिते
व्यापारे जायते हानिः पितृसौख्येन वर्जितः ५८

दशमे कारकांशाच्च बुधशुक्रयुतेक्षिते
व्यापारे बहुलाभश्च महत्कर्मकरो नरः ५९

कारकांशाच्च दशमे रविचन्द्रयुतेक्षिते
गुरुदृष्टयुते विप्र जातको राज्यभाग् भवेत् ६०

**57-60. Effects of the 10th from Karakāṅś**. If the 10th from Karakāṅś receives a Aspect from, or is conjoined by a benefic, the native will have firm riches, be sagacious, strong and intelligent. A malefic, giving a Aspect to the 10th from Karakāṅś, or occupying this House, will cause harm to his profession and deprive him of paternal bliss. Mercury and Venus, giving a Aspect to the 10th from Karakāṅś, or conjoining this House, will confer many gains in business and will make him do many great deeds. Sun and Moon, giving a Aspect to the 10th from Karakāṅś, or conjoining this place and receiving a Aspect from, or be in Conjunct with Jupiter, the native will acquire a kingdom.

स्वांशादेकादशे स्थाने शुभखेटयुतेक्षिते
भ्रातृसौख्ययुतो बालः सर्वकार्येषु लाभकृत् ६१

एकादशे सपापे तु कुमार्गाल्लाभकृन्नरः
विख्यातो विक्रमी चैव जायते नाऽत्र संशयः ६२

**61-62. Effects of the 11th from Karakāńś**. If the 11th from Karakāńś receives a Aspect from, or is conjunct with a benefic, the native will enjoy happiness from co-born apart from gaining in every undertaking of his. If a malefic is in the 11th from Karakāńś, the native will gain by questionable means, be famous and valorous.

कारकांशाद् व्ययस्थाने सद्ग्रहे सद्व्ययो भवेत्
असद्व्ययोऽशुभे ज्ञयो ग्रहाभावे च सत्फलम् ६३

कारकांशाद् व्ययस्थाने स्वभोच्चस्थे शुभग्रहे
सद्गतिर्जायते तस्य शुभलोकमवाप्नुयात् ६४

कारकांशाद् व्यये केतौ शुभखेटयुतेक्षिते
तदा तु जायते मुक्तिः सायुज्यपदमाप्नुयात् ६५

मेषे धनुषि वा केतौ कारकांशात् व्यये स्थिते
शुभखेटेन सन्दृष्टे सायुजपदमाप्नुयात् ६६

व्यये च केवले केतौ पापयुक्तेक्षितेपि वा
न तदा जायते मुक्तिः शुभलोकं न पश्यति ६७

रविणा संयुते केतौ कारकांशाद् व्ययस्थिते
शिवभक्तिर्भवेस्यत्त निर्विशंकं द्विजोत्तम ६८

चन्द्रेण संयुते केतौ कारकांशाद् व्ययस्थिते

गौर्यां भक्तिर्भवेत्तस्य शाक्तिको जायते नरः ६९

शुक्रेण संयुते केतौ कारकांशाद् व्ययस्थिते
लक्ष्म्यां सञ्जायते भक्तिर्जातको सौ समृद्धिमान् ७०

कुजेन संयुते केतौ स्कन्दभक्तौ भवेन्नरः
वैष्णवो बुधसौरिभ्यां गुरुणा शिवभक्तिमान् ७१

राहुणा तामसीं दुर्गां सेवते क्षुद्रदेवताम्
भक्तिः स्कन्देऽथ हेरम्भे शिखिना केवलेन वा ७२

कारकांशाद् व्यये सौरिः पापराशौ यदा भवेत्
तदाऽपि क्षुद्रदेवस्य भक्तिस्तस्य न संशयः ७३

पापर्क्षेऽपि शनौ शुक्रे तदाऽपि क्षुद्रसेवकः
अमात्यकारकात् षष्ठेप्येवमेव फलं वदेत् ७४

**63-74. Effects of the 12th from Karakāńś.** If the 12th from Karakāńś has a benefic, the expenses will be on good account, while a malefic in the 12th from Karakāńś will cause bad expenses. If the 12th from Karakāńś is vacant, then also good effects will follow. If there happens to be a benefic Planet in exaltation, or in own House in the 12th from Karakāńś, or, if Ketu is so placed and receives a Aspect from, or is conjunct with a benefic, one will attain heaven after death. One will attain full enlightenment, if Ketu is in the 12th identical with Aries, or Sagittarius and receives a Aspect from a benefic. If Ketu is in the 12th from Karakāńś, receiving a Aspect from a malefic, or is there conjunct with a malefic, one will not attain full enlightenment. If Sun and Ketu are in the 12th from Karakāńś, the native will worship Lord Shiva. Moon and Ketu denotes a worshiper of Gauri. Venus and Ketu of Lakshmi and a wealthy person. Mars and Ketu of Lord Subramanya. Rahu will make one worship Durga, or some mean deity. Ketu alone denotes Subramanya's, or Ganesh's worshipper. If Saturn is in the 12th from Karakāńś in a malefics Rāśi, one will worship mean deities. Venus and Saturn in the 12th from Karakāńś in a malefics Rāśi will also make one worship mean deities. Similar inferences can be drawn from the 6th Navāmśa, counted from Amatya Karaks Navāmśa.

कारकांशात् त्रिकोणस्थे पापखेतद्वये द्विज
मानवो मन्त्रतन्त्रज्ञो जायते नाऽत्र संशयः ७५

पापेन वीक्षिते तत्र जातो निग्राहको भवेत्
शुभैर्निरीक्षिते तस्मिन् नरोऽनुग्राहको भवेत् ७६

**75-76. Miscellaneous Matters (up to Sloka 84).** O Brahmin, if there are two malefics in a Kon from Karakāńś, the native will have knowledge of Mantras and Tantras (formulas for the attainment of super-human powers). If a malefic simultaneously gives a Aspect to two malefics in a Kon from Karakāńś, the native will use his learning of Mantras and Tantras for malevolent purposes, while a benefics Aspect will make him use the learning for public good.

शुक्रदृष्टे विधौ स्वांशे रसवादी भवेन्नरः
बुधदृष्टे च सद्वैद्यः सर्वरोगहरो भवेत् ७७

शुक्रदृष्टे सुखे चन्द्रे पाण्डुश्वित्री भवेन्नरः
भौमदृष्टे महारोगी रक्तपित्तार्दितो भवेत् ७८

केतुदृष्टे सुखे चंद्रे नीलकुष्ठी प्रजायते
चतुर्थे पञ्चमेवाऽहि स्थितौ राहुकुजौ यदि ७९

क्षयरोगो भवेत् तस्य चन्द्रदृष्टौ तु निश्चितः
स्वांशात् सुखे सुते वाऽपि केवलः संस्थितः कुजः ८०

पिटकादिर्भवेत् तस्य तदा रोगो न संशयः
ग्रहणी जलरोगो वा तत्र केतौ स्थिते सति ८१

स्वर्भानुगुलिकौ तत्र विषवैद्यो विषार्दितः
स्वांशकात् पञ्चमे भावे केवले संस्थिते शनौ ८२

धनुर्विद्याविदा जाता भवन्त्यत्र न संशयः
केतौ च केवले तत्र घटिकायन्त्रकारकः ८३

बुधे परमहंसो वा दण्डी भवति मानवः
लोहयन्त्री तथा राहौ रवौ खड्गधरो भवेत् ८४

**77-84.** If Moon is in the Karakāńś, receiving a Aspect from Venus, the native will be an alchemist and, if receiving a Aspect from Mercury the native will be a doctor capable of curing all diseases. If Moon is in the 4th from Karakāńś and receives a Aspect from Venus, the native will be afflicted by white leprosy. If receiving a Aspect from Mars, the native will have blood and bilious disorders and, if receiving a Aspect from Ketu, the native will suffer from black leprosy. Should Rahu and Mars be in the 4th, or 5th from Karakāńś, the native will suffer from pulmonary consumption and, if simultaneously there happens to be Moon's Aspect on the 4th, or the 5th, this affliction will be certain. Marsalone in the 4th, or the 5th will cause ulcers. If Ketu is in the 4th, or the 5th, one will suffer from dysentery and afflictions, due to (impure) water. Rahu and Gulika will make one a doctor, curing poisonous afflictions, or will cause troubles through poison. Should Saturn be alone in the 4th, or 5th, the native will be skillful in archery. Ketu lonely placed in the 4th, or the 5th will make one a maker of watches etc. Mercury lonely placed in the 4th, or the 5th will make one an ascetic of the highest order, or an ascetic, holding staff. Rahu, Sun and Mars, respectively, in these places denote a machinist, a knife user and a spear, or arrow user.

केवले च कुजे तत्र जातः कुन्तास्त्रधारकः
स्वांशे वा पञ्चमे स्वांशाच्चन्द्रेज्यौ संस्थितौ तदा ८५

ग्रन्थकर्ता भवेज्जातः सर्वविद्याविशारदः
तत्र दैत्यगुरौ किञ्चिदूनग्रन्थकरो भवेत् ८६

**85-86.** Moon and Jupiter in the Karakāńś, or in the 5th there from denotes a writer well versed in all branches of learning. The grade of writership will comparatively descend in the case of Venus and even further in the case of Mercury.

चन्द्रे च सांख्ययोगज्ञः साहित्यज्ञश्च गायकः ९०

रवौ वेदान्तविच्चैव गीतज्ञश्च प्रजायते
केतौ च गणितज्ञः स्याज्ज्योतिःशास्त्रविशारदः ९१

सम्प्रदायस्य संसिद्धिर्गुरुसम्बन्धतो भवेत्
द्वितीये च तृतीये च स्वांशादेवं विचारयेत् ९२

बुधे तत्र ततोऽप्यूनग्रन्थकर्त्ता प्रजायते
तत्र शुक्रे कविर्वाग्मी काव्यज्ञश्च प्रजायते ८७

सर्वविद्वान्थिको जीवे न वाग्मी च सभादिषु
शब्दज्ञश्च विशेषेण वेदवेदान्तवित् तथा ८८

सभाजडो भवेद् बाल उक्तस्थानगते शनौ
मीमांसको भवेन्नूनमुक्तस्थानगते बुधे ८९

स्वांशे वा पञ्चमे भौमे जातो नैयायिको भवेत्

87-92. Planets in the 5th from Karakāńś. Should Venus be in the 5th from Karakāńś, the native will be eloquent and a poet. Jupiter denotes, that he be an exponent and be all knowing, but be unable to speak in an assembly. He will be further a gramm6than and a scholar in Vedas and Upanishads. Saturn will make one ineffective in an assembly, while Mercury will make him skilful in 10th Mimansa. Mars in Karakāńś, or the 5th there from will make one justice, while Moon in Karakāńś, or the 5th from there denotes a Sankhya Yogi, a rhetoric, or a singer. Sun in the 5th from Karakāńś will make one learned in Vedanta and music. Ketu will make one a mathematician and skilful in Jyotishya. Should Jupiter be related to the said Ketu, these learning will be by inheritance. All these as well apply to 2nd and 3rd from Karakāńś and to the Karakāńś itself apart from applying to the 5th from Karakāńś.

भावे सूक्ष्मफलं ज्ञात्वा जातकस्य फलं वदेत्
केतौ स्वांशाद्द्वितीये वा तृतीये स्तब्धवाग् भवेत् ९३

93-93. Should Ketu be in the 2nd, or 3rd from Karakāńś, the native will be defective in speech, more so, if a malefic gives a Aspect to Ketu, as above.

पापदृष्टे विशेषेण मानवो वक्तुमक्षमः
स्वांशाल्लग्नात् पदाद्वाऽपि द्वितीयाष्टमभावयोः ९४

केमद्रुमः पापसाम्ये चन्द्रदृष्टौ विशेषतः
अत्राऽध्याये च ये योगाः सफलाः कथिता मया ९५

योगकर्तृदशायान्ते ज्ञेयाः सर्वे फलप्रदाः
एवं दशाप्रदाद्राशैर्द्वितीयाष्टमयोर्द्विज ९६

ग्रहसाम्ये च विज्ञेयो योगः केमद्रुमोऽशुभः
दशाप्रारम्भसमये सलग्नान् साधयेद् ग्रहान् ९७

ज्ञेयस्तत्रापि योगोऽयं पापसाम्येऽर्थरन्ध्रयोः
एवं तन्वादिभावानां सूर्यादीनां नभसदाम् ९८

तत्तत्स्थित्यनुसारेण फलं वाच्यं विपश्चिता
इति संक्षेपतः प्रोक्तं कारकांशफलं मया ९९

94-99. If malefics be in Karakāńś, Arudh Lagna and the 2nd and 8th from these places, there will be Kemadruma Yoga, the effects of which will be still severer, if Moon's Aspect happens to be there. The effects, due for these Yogas, will come to pass in the Dasha periods of the Rāśis, or Planets concerned. Kemadruma Yoga will operate additionally, if there are malefics in the 2nd and 8th from the Rāśi, whose Dasha will be in currency. The results of such Yoga will also be inauspicious. If the 2nd and 8th in the Kundali, cast for the beginning of a Dasha, have malefics, then also Kemadruma prevails throughout the Dasha.

अथ योगकारकाध्यायः ३४
कारकांशवशादेवं फलं प्रोक्तं मया द्विज

अथ भावाधिपत्येन ग्रहयोगफलं शृणु १

## Ch. 34. Yoga Karakas

**1**. O Brahmin, thus I have told you about the effects, derivable through Karakāṅś. Now listen to the effects, 6thsing out of lordships of Planets over Houses.

केन्द्राधिपतयः सौम्या न दिशन्ति शुभं फलम्
क्रूरा नैवाऽशुभं कुर्युः शुभदाश्च त्रिकोणपाः २

लग्नं केन्द्रत्रिकोणत्वाद् विशेषेण शुभप्रदम्
पञ्चमं नवमं चैव विशेषधनमुच्यते ३

सप्तमं दशमं चैव विशेषसुखमुच्यते
त्रिषडायाधिपाः सर्वे ग्रहाः पापफलाः स्मृताः ४

व्ययद्वितीयरन्ध्रेशाः साहचर्यात् फलप्रदाः
स्थानान्तरानुरोधात्ते प्रबलाश्चोत्तरोत्तरम् ५

तत्र भाग्यव्ययेशत्वाद्रन्ध्रेशो न शुभप्रदः
त्रिमदायाधिपत्वेऽथो कोणपत्वे तु सत्फलः ६

उक्तेष्वेषु बली योगो निर्बलस्य प्रबाधकः
न रन्ध्रेशत्वदोषोऽत्र सूर्याचन्द्रमसोर्भवेत् ७

**2-7**. **Nature due to Lordships of Planets.** Benefics, owning Kendras, will not give benefic effects, while malefics, owning Kendras, will not remain inauspicious. The Lord of a Kona will give auspicious results. The Lord of Lagna is specially auspicious, as Lagna is a Kendra, as well as a Kon. 5th and 9th House are specially for wealth, while 7th and 10th House are specially for happiness. Any Planet, owning 3rd, 6th, or 11th House, will give evil effects. The effects, due to the Lords of 12th and 8th House, will depend on their association. In each group the significance will be in the ascending order. 8ths Lord is not auspicious, as he owns the 12th from 9th House. If the Lord of 8th House simultaneously owns 3rd, 7th, or 11th House, he will prove specifically harmful, while his simultaneous ownership of a Kona will bestow auspicious effects. The Planet, owning a predominant House, will stall the effects, due to another, owning a less significant House and will give his own results. 8ths lordship of Sun and Moon is not evil.

गुरुशुक्रौ शुभौ प्रोक्तौ चन्द्रो मध्यम उच्यते
उदासीनो बुधः ख्यातः पापा रव्यार्किभूमिजाः ८

पूर्णेन्दुज्ञेज्यशुक्राश्च प्रबला उत्तरोत्तरम्
क्षीणेन्द्वर्कार्किभूपुत्राः प्रबलाश्च यथोत्तरम् ९

केन्द्राधिपत्यदोषोयः शुभानां कथितो हि सः
चन्द्रज्ञगुरुशुक्राणां प्रबलाश्चोत्तरोत्तरम् १०

**8-10.** Natural Benefics and Malefics. Jupiter and Venus are benefics, while Moon is mediocre in benefice and Mercury is neutral (a benefic, when associated with a benefic and a malefic, when related to a malefic). Malefics are Sun, Saturn and Mars. Full Moon, Mercury, Jupiter and Venus are stronger in the ascending order. Weak Moon, Sun, Saturn and Mars are stronger (in malefic disposition) in the ascending order. In revealing maleficence, due to rulership of Kendras, Moon, Mercury, Jupiter and Venus are significant in the ascending order.

केन्द्रकोणपती स्यातां परस्परगृहोपगौ
एकभे द्वौ स्थितौ वापि ह्येकभेऽन्यतरः स्थितः ११

पूर्णदृष्टयेचिन्तौ वापि मिथो योगकारौ तदा
योगेऽस्मिन् जायते भूपो विख्यातो वा जनो भवेत् १२

**11-12. Lordships of Kendras and Konas.** If there be an exchange between a Lord of a Kendr and a Lord of a Kon, or, if a Lord of a Kendr is conjunct with a Lord of a Kon in a Kendr, or in a Kon, or, if a Lord of a Kon is in a Kendr, or vice versa, or, if there happens to be a full Aspect between a Lord of a Kendr and a Lord of a Kon, they cause a Yoga. One born in such a Yoga will become a king and be famous.

कोणेशत्वे यदैकस्य केन्द्रेशत्वं च जायते
केन्द्रे कोणे स्थितो वाऽसौ विशेषाद्योगकारकः १३

**13.** If one and the same Planet gets the lordships of a Kon, as well as a Kendr, or, if a Planet is in a Kendr, or in a Kon, it will prove specially a Yoga Karak**.**

केन्द्रेशत्वेन पापानां या प्रोक्ता शुभकारिता
सा त्रिकोणाधिपत्येऽपि न केन्द्रेशत्वमात्रतः १४

**14. Lordship of Kendr.** It has been said, that a malefic, owning a Kendr, will become auspicious, which is true, only when it simultaneously Lords over a Kon and not by merely owning a Kendr.

केन्द्रकोणाधिपावेव पापस्थानाधिपौ यदा
तयोः सम्बन्धमात्रेण न योगं लभते नरः १५

**15.** If the Lords of a Kendr, or a Kon own simultaneously an evil House, he does not cause a Raja Yoga by mere relations stipulated (as per Ch. 34, Slokas 11 and 12).

यद्भावेशयुतौ वापि यद्यद्भावसमागतौ
तत्तत्फलानि प्रबलौ प्रदिशेतां तमोग्रहौ १६

**16. Rahu and Ketu.** Rahu and Ketu give predominantly the effects, as due to their conjunct with a House Lord, or, as due to the House they occupy.

यदि केन्द्रे त्रिकोणे वा निवसेतां तमोग्रहौ
नाथेनान्यतरेणाढ्यौ दृष्टौ वा योगकारकौ १७

**17.** If Rahu and/or Ketu are in Kendr, receiving a Aspect from, or in association with the Lord of a Kon, or of a Kendr, it will become Yoga Karak.

कस्मिल्लग्ने प्रजातस्य के ग्रहा योगकारकाः
के चाऽशुभप्रदाः खेटाः कृपया वद मे मुने १८

**18**. O Mahārśi Parashara, please narrate, according to the Rāśis rising, as to which Planet is a Yoga Karak and which is inauspicious**.**

यथा पृष्टं त्वया विप्र तथोदाहरणं ब्रुवे
रन्ध्रेशत्वेऽपि भूपुत्रो भवेच्छूभसहायवान् १९

मन्दसौम्यसिताः पापाः शुभौ गुरुदिवाकरौ
न शुभं योगमात्रेण प्रभवेच्छनिजीवयोः २०

पारतन्त्र्येण जीवस्य पापकर्मापि निश्चितम्
शुक्रः साक्षान्निहन्ता स्यान्मारकत्वेन लक्षितः २१

मन्दादयोऽपि हन्तारो भवेयुः पापिनो ग्रहाः

मेषलग्नोद्भवस्यैवं फलं ज्ञेयं द्विजोत्तम २२

**19-22. Planets and Aries Lagna**. O Brahmin, listen to these with examples. Even though Mars is the Lord of 8th House, he will be helpful to auspicious Planets. Saturn, Mercury and Venus are malefics. Auspicious are Jupiter and Sun. The mere Conjunct of Saturn with Jupiter will not produce auspicious effects (although they own a Kon and a Kendr). If Jupiter is at the disposal of a malefic, he will surely give inauspicious results. Venus is a direct (independent) killer. Saturn etc. will also inflict death, if associated with an adverse Planet (Venus).

जीवशुक्रेन्दवः पापाः शुभौ शनिदिवाकरौ
राजयोगकरः सौरिर्बुधस्त्वल्पशुभप्रदः २३

जीवादयो कुजश्चापि सन्ति मारकलक्षणाः
वृषलग्नोद्भवस्यैवं फलान्यूह्यानि सूरिभिः २४

**23-24. Planets and Taurus Lagna.** Jupiter, Venus and Moon are malefics. Saturn and Sun are auspicious. Saturn will cause Raja Yoga. Mercury is somewhat inauspicious. The Jupiter group (Jupiter, Moon and Venus) and Mars will inflict death**.**

भौमजीवारुणाः पापाः एक एव कविः सुभः
शनैश्चरणे जीवस्य योगो मेषभवो यथा २५

शशी मुखनिहन्ताऽसौ साहचर्याच्च पाकदः
द्वन्द्वलग्नोद्भवस्यैवं फलान्यूह्यानि पंडितैः २६

**25-26. Planets and Gemini Lagna.** Mars, Jupiter and Sun are malefics, while Venus is the only auspicious Planet. The Conjunct of Jupiter with Saturn is similar to that for Aries Lagna. Moon is the prime killer, but it is dependant on her association**.**

भार्गवेन्दुसुतौ पापौ भूसुतेज्येन्दवः शुभाः
पूर्णयोगकरः साक्षान्मंगलो मंगलप्रदः २७

निहन्ताऽर्कसुतोऽर्कस्तु साहचर्यात् फलप्रदः
कर्कलग्नोद्भवस्यैवं फलं प्रोक्तं मनीषिभिः २८

**27-28. Planets and Cancer Lagna.** Venus and Mercury are malefics, Mars, Jupiter and Moon are auspicious. Mars is capable of conferring a full-fledged Yoga and giving auspicious effects. Saturn and Sun are killers and give effects, according to their associations.

सौम्यशुक्रार्कजाः पापाः कुजेज्यार्काः शुभावहाः
प्रभवेद्योगमात्रेण न शुभं गुरुशुक्रयोः २९

मारकस्तु शनिश्चन्द्रः साहचर्यात् फलप्रदः
सिंहलग्ने प्रजातस्य फलं ज्ञेयं विपश्चिता ३०

**29-30.** Planets and Leo Lagna. Mercury, Venus and Saturn are malefics. Auspicious effects will be given by Mars, Jupiter and Sun. Jupiter's Conjunct with Venus (though, respectively, Kon and Kendr Lords) will not produce auspicious results. Saturn and Moon are killers, who will give effects, according to their associations.

कुजजीवेन्दवः पापाः बुधशुक्रौ शुभावहौ
भार्गवेन्दुसुतावेव भवेतां योगकारकौ ३१

मारकोऽपि कविः सूर्यः साहचर्यफलप्रदः
कन्यालग्नोद्भवस्यैवं फलान्यूह्यानि सूरिभिः ३२

**31-32**. Planets and Virgo Lagna. Mars, Jupiter and Moon are malefics, while Mercury and Venus are auspicious. Venus Conjunct with Mercury will produce Yoga. Venus is a killer as well. Sun's role will depend on his association.

जीवार्कभूसुताः पापाः शनैश्चरबुधौ शुभौ
भवेतां राजयोगस्य कारकौ चन्द्रतत्सुतौ ३३

कुजो निहन्ति जीवाद्याः पापा मारकलक्षणाः
शुक्रः समः फलान्येवं विज्ञेयानि तुलोद्भवे ३४

**33-34. Planets and Libra Lagna.** Jupiter, Sun and Mars are malefics. Auspicious are Saturn and Mercury. Moon and Mercury will cause Raja Yoga. Mars is a killer. Jupiter and other malefics will also acquire a disposition to inflict death. Venus is neutral**.**

सितज्ञशनयः पापाः शुभौ गुरुनिशाकरौ
सूर्याचन्द्रमसावेव भवेतां योगकारकौ ३५

कुजः समः सिताद्याश्च पापा मारकलक्षणाः
एवं फलं च विज्ञेयं वृश्चिकोदयजन्मनः ३६

**35-36. Planets and Scorpio Lagna.** Venus, Mercury and Saturn are malefics. Jupiter and Moon are auspicious. Sun, as well as Moon are Yoga Karakas. Mars is neutral. Venus and other malefics acquire the quality of causing death.

एक एव कविः पापः शुभौ भौमदिवाकरौ
योगो भास्करसौम्याभ्यां निहन्ता भास्करात्मजः ३७

गुरुः समफलः ख्यातः शुक्रो मारकलक्षणः
धनुर्लग्नोद्भवस्यैवं फलं ज्ञेयं विपश्चिता ३८

**37-38. Planets and Sagittarius Lagna.** Only Venus is inauspicious. Mars and Sun are auspicious. Sun and Mercury are capable of conferring a Yoga. Saturn is a killer, Jupiter is neutral. Venus acquires killing powers.

कुजजीवेन्दवः पापाः शुभौ भार्गवचन्द्रजौ
मन्दः स्वयं न हन्ता स्याद् हन्ति पापाः कुजादयः ३९

सूर्यः समफलः प्रोक्तः कविरेकः सुयोगकृत्
मृगलग्नोद्भवस्यैवं फलान्यूह्यानि सूरिभिः ४०

**39-40. Planets and Capricorn Lagna**. Mars, Jupiter and Moon are malefics, Venus and Mercury are auspicious. Saturn will not be a killer on his own. Mars and other malefics will inflict death. Sun is neutral. Only Venus is capable of causing a superior Yoga.

जीवचन्द्रकुजाः पापाः शुक्रसूर्यात्मजौ शुभौ
राजयोगकरो ज्ञेजः कविरेव बृहस्पतिः ४१

सूर्यो भौमश्च हन्तारो बुधो मध्यफलः स्मृतः
कुम्भलग्नोद् भवस्यैवं फलान्यूह्यानि सूरिभिः ४२

**41-42. Planets and Aquarius Lagna.** Jupiter, Moon and Mars are malefics, while Venus and Saturn are auspicious. Venus is the only Planet, that causes Raja Yoga. Jupiter, Sun and Mars are killers. Mercury gives meddling effects.

मन्दशुक्रांशुमत्सौम्याः पापा भौमविधू शुभौ
महीसुतगुरू योगकारकौ च महीसुतः ४३

मारकोऽपि न हन्ताऽसौ मन्दज्ञौ मारकौ स्मृतौ
मीनलग्नोद् भवस्यैवं फलानि परिचिन्तयेत् ४४

**43-44. <u>Planets and Pisces House</u>.** Saturn, Venus, Sun and Mercury are malefics. Mars and Moon are auspicious. Mars and Jupiter will cause a Yoga. Though Mars is a killer, he will not kill the native (independently). Saturn and Mercury are killers.

एवं भावाधिपत्येन जन्मलग्नवशादिह
शुभत्वमशुभत्व च ग्रहाणां प्रतिपादितम् ४५

अन्यानपि पुनर्योगान् नाभसादीन् विचिन्त्य वै
देहिना च फलं वाच्यं प्रवक्ष्यामि च तानहम् ४६

**45-46<u>. General.</u>** Thus the auspicious and inauspicious effects, derivable through the Planets, due to their lordship, according to the rising Rāśi, have to be estimated. Apart the effects, due to Nabhash Yogas etc., should also be known, which I narrate, as under.

अथ नाभसयोगाध्यायः ३५
अधुना नाभसा योगाः कथ्यन्ते द्विजसत्तम
द्वात्रिंशात् तत्प्रभेदास्तु शतघ्नाष्टादशोन्मिताः १

आश्रयाख्यास्त्रयो योगा दलसंज्ञं द्वयं ततः
आकृतिर्विंशतिः संख्याः सप्त योगाः प्रकीर्तिताः २

## Ch. 35. Nabhash Yogas

**1-2**. O excellent of the Brahmins, explained below are 32 Nabhash Yogas, which have a total of 1800 different v6theties. These consist of 3 Asraya Yogas, 2 Dala Yogas, 20 Akriti Yogas and 7 Sankhya Yogas.

रज्जुश्च मुसलश्चैव नलश्चेत्याश्रयास्त्रयः
मालाख्यः सर्पसंज्ञश्च दलयोगौ प्रकीर्तितौ ३

गदाख्यः शकटाख्यश्च शृङ्गाटकविहंगसौ
हलवज्रयवाश्चैव कमलं वापियूपकौ ४

शरशक्तिदण्डनौकाकूटच्छत्रधनूंषि च
अर्धचन्द्रस्तु चक्रं च समुद्रश्चेति विंशतिः ५

संख्याख्याबल्लकीदामपाशकेदारशूलकाः
युगो गोलश्च सप्तैते युक्ता दन्तमिता द्विज ६

**3-6. Names of Nabhash Yogas.** The 3 Asraya Yogas are Rajju, Musala and Nala Yogas. The 2 Dala Yogas are Maal and Sarpa. The 20 Akriti Yogas are Gada, Sakat, Shringatak, Vihag, Hal, Vajr, Kamal, Vapi, Yup, Shar, Shakti, Danda, Nisk, Koot, Chatr, 2ndushi (Chap), Ardh, Moon, Chakra and Samudr Yogas. The 7 Sankhya Yogas are Vallaki, Daam, Paash, Kedara, Sool, Yuga and Gola Yogas. Thus these are 32 in total.

सर्वैश्चरे स्थितै रज्जुः स्थिरस्थैर्मुसलः स्मृतः

नलाख्यो द्विस्वभावस्थैराश्रयाख्या इमे स्मृताः ७

**7**. Rajju, Musala and Nala Yogas. All the Planets in Movable Rāśis cause Rajju Yoga. All the Planets in Fixed Rāśis cause Musala Yoga. All the Planets in Dual Rāśis cause Nala Yoga.

केन्द्रत्रयगतैः सौम्यैः पापैर्वा दलसंज्ञकौ
क्रमान्मालाभुजंगाख्यौ शुभाशुभफलप्रदौ ८

**8. Maal and Sarpa Yogas**. If 3 Kendras are occupied by benefics, Maal Yoga is produced, while malefics so placed will cause Bhujang, or Sarpa Yoga. These Yogas, respectively, produce benefic and malefic results.

आसन्नकेन्द्रद्वयगैः सर्वैर्योगो गदाह्वयः
शकटं लग्नजायास्थैः खाम्बुगैर्विहगः स्मृतः ९

योगः स्रृङ्गाटकं नाम लग्नात्मजतपःस्थितैः
अन्यस्थानात् त्रिकोणस्थैः सर्वैर्योगो हलाभिघः १०

लग्नजायास्थितैः सौम्यैः पापाख्यैः खाऽम्बुसंस्थितैः
योगो वज्राभिधः प्रोक्तः वीपरीतस्थितैर्यवः ११

**9-11. Gada, Sakata, Vihaga, Shringataka, Hala, Vajra and Yava Yogas**. If all the Planets occupy two successive Kendras, Gada Yoga is formed. Sakata Yoga occurs, when all the Planets are disposed in Lagna and 7th House. If all confine to 4th and 10th House, then Vihaga Yoga occurs. All Planets in Lagna, 5th and 9th House cause Shringataka Yoga, while all Planets in 2nd, 6th and 10th House, or in 3rd, 7th and 11th House, or in 4th, 8th and 12th House cause Hala Yoga. Vajra Yoga is caused by all benefics in Lagna and 7th House, or all malefics in 4th and 10th House. In a contrary situation, i.e. all benefics in 4th and 10th House, or all malefics in Lagna and 7th House, Yava Yoga is generated.

सर्वकेन्द्रगतैः सर्वैर्मिश्रैः कमलसंज्ञकः
केन्द्रादन्यत्रगैः सर्वैर्योगो वापीसमाह्वयः १२

**12. <u>Kamala and Vapi Yogas</u>.** If all the Planets are in the 4 Kendras, Kamala Yoga is produced. If all of them happen to be in all the Apoklimas, or in all the Panapharas, Vapi Yoga occurs.

यूपो लग्नाच्चतुर्भस्थैः शरस्तुर्याच्चतुर्भगैः
शक्तिर्मदाच्चतुर्भस्थैर्दण्डो मध्याच्चतुर्भगैः १३

**13<u>. Yupa, Shara, Shakti and Danda Yogas</u>.** If all the 7 Planets are in the 4 Houses, commencing from Lagna, they cause Yup Yoga, if from 4th, Shara Yoga occurs, if from 7th, Shakti Yoga occurs and, if from 10th, Danda Yoga is formed.

लग्नात् सप्तमगैनौ का कूटस्तुर्याच्च सप्तमैः
छत्राख्यः सप्तमादेवं चापं मध्याद् भसप्तगैः १४

**14<u>. Nauka, Koot, Chatra and Chap Yogas</u>.** If all the Planets occupy the seven Houses from Lagna, Nauka Yoga occurs, if from 4th, Koota Yoga is formed, if from 7th, Chatra Yoga occurs and, if from 10th, Chap Yoga occurs. Here again the Planets should occupy seven continuous Houses.

**<u>Quoted from Saravali.</u>** If the seven Planets occupy continuously seven Houses, commencing from a House, which is not angular to the Lagnaa, the Yoga produced is known, as Ardh Chandra Yoga**.**

लग्नादेकान्तरस्थैश्च षड्भगैश्चक्रमुच्यते
धनादेकान्तरस्थैस्तु समुद्रः षडगृहाश्रितै १५

**15. <u>Chakra and Samudr Yogas</u>.** If all the Planets occupy six alternative Rāśis, commencing from Lagna, Chakra Yoga is formed. Samudr Yoga is produced, if all Planets occupy six alternative Rāśis, commencing from 2nd House.

एकराशिस्थितैर्गोलो युगाख्यो द्विभसंस्थितैः
शूलस्तु त्रिभगैः प्रोक्तः केदारस्तु चतुर्भगैः १६

पञ्चराशिस्थतैः पाशा दामाख्यः षड्गृहाश्रितैः
वीना सप्तभगैः सर्वैर्विहायान्यानुदीरितान् १७

**16-17<u>. Sankhya Yogas.</u>** If all Planets are in one Rāśi, Gola Yoga is formed, if in 2, Yuga Yoga is formed, if in 3, Soola Yoga occurs, if in 4, Kedara Yoga occurs, if in 5, Paasha Yoga is formed, if in 6, Daama Yoga occurs and, if in 7, Veena Yoga is produced. None of these seven Yogas will be operable, if another Nabhash Yoga is derivable.

अटनप्रियाः सुरूपाः परदेशस्वास्थ्यभागिनो मनुजाः
क्रूराः खलस्वभावा रज्जुप्रभवाः सदा कथिताः १८

**18. <u>Effects of Nabhash Yogas (up to Sloka 50). Rajju Yoga</u>**. One born in Rajju Yoga will be fond of wandering, be charming, will earn in foreign countries. He will be cruel and mischievous**.**

मानज्ञानधनाद्यैर्युक्ता भूपप्रियाः ख्याताः
बहुपुत्राः स्थिरचित्ता मुसलसमुत्था भवन्ति नराः १९

**19<u>. Musala Yoga</u>.** One born in Musala Yoga will be endowed with honour, wisdom, wealth etc., be dear to king, famous, will have many sons and be firm in disposition.

न्यूनातिरिक्तदेहा धनसञ्चयभागिनोऽतिनिपुणाश्च
बन्धुहिताश्च सुरूपा नलयोगे सम्प्रसूयन्ते २०

**20<u>. Nala Yoga.</u>** One born in Nala Yoga will have uneven physique, be interested in accumulating money, very skilful, helpful to relatives and charming**.**

नित्यं सुखप्रधाना वाहनवस्त्रान्नभोगसम्पन्ना
कान्ता सुबहुस्त्रीका मालायां सम्प्रसूताः स्युः २१

**21. Maala Yoga.** One born in Maala Yoga will be ever happy, endowed with conveyances, robes, food and pleasures, be splendorous and endowed with many females.

वुषमाः क्रूरा निःस्वा नित्यं दुःखार्दिताः सुदीनाश्च
परभक्ष्यपाननिरताः सर्पप्रभवा भवन्ति नराः २२

**22. Sarpa Yoga**. One born in Sarpa Yoga will be crooked, cruel, poor, miserable and will depend on others for food and drinks.

सततोद्युक्तार्थवशा यज्वानः शास्त्रगेयकुशलाश्च
धनकनकरत्नसम्पत्संयुक्ता मानवा गदायां तु २३

**23. Gada Yoga**. One born in Gada Yoga will always make efforts to earn wealth, will perform sacrificial rites, be skilful in Shastras and songs and endowed with wealth, gold and precious stones.

रोगार्ताः कुनखा मूर्खाः शकटानुजीविनो निःस्वा
मित्रस्वजनविहीनाः शकटे जाता भवन्ति नराः २४

**24. Sakata Yoga**. One born in Sakata Yoga will be afflicted by diseases, will have diseased, or ugly nails, be foolish, will live by pulling carts, be poor and devoid of friends and relatives.

भ्रमणरुचयोविकृष्टा दूताः सुरतानुजीवनो धृष्टाः
कलहप्रियाश्च नित्यं विहगे योगे सदा जाताः २५

**25. Vihaga Yoga.** One born in Vihaga Yoga will be fond of roaming, be a messenger, will live by sexual dealings, be shameless and interested in quarrels.

प्रियकलहाः समरसहाः सुखिनो नृपतेः प्रियाः शुभकलत्राः
आढ्या युवतिद्वेष्याः शृङ्गाटकसम्भवा मनुजाः २६

**26. Shringataka Yoga**. One born in Shringataka Yoga will be fond of quarrels and battles, be happy, dear to king, endowed with an auspicious wife, be rich and will hate women.

बह्वाशिनो दरिद्राः कृषीवला दुःखिताश्च सोद्वेगा
बन्धुसुहृदिभः त्यक्ताः प्रेष्याः हलसंज्ञके सदा पुरुषाः २७

**27. Hal Yoga**. One born in Hal Yoga will eat a lot, will be very poor, will be miserable, agitated, given up by friends and relatives. He will be a servant.

आद्यन्तवयःसुखिनः शूराः सुभगा निरीहाश्चः

भाग्यविहीना वज्रे जाताः खला विरुद्धाश्च २८

**28. Vajra Yoga**. One born in Vajra Yoga will be happy in the beginning and at the end of life, be valorous, charming, devoid of desires and fortunes and be inimical.

व्रतनियममङ्गलपरा वयसो मध्ये सुखार्थपुत्रयुता
दातारः स्थिरचित्ता यवयोगभवाः सदा पुरुषाः २९

**29. Yava Yoga.** One born in Yava Yoga will observe fasts and other religious rules, will do auspicious acts, will obtain happiness, wealth and sons in his mid-life. He will be ch6thtable and firm.

विभवगुणाढ्याः पुरुषाः स्थिरायुषो विपुलकीर्तय शुद्धाः
शुभशतकाः पृथ्वीशाः कमलभवाः मानवा नित्यम् ३०

**30. Kamala Yoga.** One born in Kamala Yoga will be rich and virtuous, be long lived, very famous and pure. He will perform hundreds of auspicious acts and he will be a king.

निधिकरणे निपुणधियः स्थिरार्थसुखसंयुता सुतयुताश्च
नयनसुखसम्प्रहृष्टा वापीयोगेन राजानः ३१

**31. Vapi Yoga.** One born in Vapi Yoga will be capable of accumulating wealth, be endowed with lasting wealth and happiness and sons, be free from eye afflictions and will be a king.

आत्मविदिज्यानिरतः स्त्रिया युतः सत्त्वसम्पन्नः
व्रतनियमरतममुश्यो यूपे जातो विशिष्टश्च ३२

**32. Yup Yoga.** One born in Yup Yoga will have spiritual knowledge and will be interested in sacrificial rites. He will be endowed with a wife, be strong, interested in fasts and other religious observations and be distinguished.

इषुकारा बन्धनपाः मृगयाधनसेविताश्च मंसादा
हिंस्राः कुशिल्पकाराः शरयोगे मानवाः प्रसूयन्ते ३३

**33. Shara Yoga.** One born in Shara Yoga will make arrows, be head of a prison, will earn through animals, will eat meat, will indulge in torture and mean handiworks.

धनरहितविफलदुःखितनीचालसाश्चिरायुषः पुरुषाः
संग्रामबुद्धिनिपुणाः शक्त्यां जाताः स्थिराः शुभगाः ३४

**34. Shakti Yoga.** One born in Shakti Yoga will be bereft of wealth, be unsuccessful, miserable, mean, lazy, long lived, interested and skilful in war, firm and auspicious.

हतपुत्रदारनिःस्वाः सर्वत्र च निर्धृणाः स्वजनबाह्याः
दुःखितनीचप्रेष्या दण्डप्रभवा भवन्ति नराः ३५

**35. Danda Yoga**. One born in Danda Yoga will lose sons and wife, will be indigent, unkind, away from his men and will serve mean people.

सलिलोपजीविविभवाः बह्वाशाः ख्यातकीर्तयो दुष्टाः
कृपणा मलिना लुब्धा नौसञ्जाताः खलाः पुरुषाः ३६

**36. Nauka Yoga.** One born in Nauka Yoga will derive his livelihood through water, be wealthy, famous, wicked, wretched, dirty and miserly.

अनृतकथनबन्धनपा निष्किञ्चनाः शठाः क्रूराः
कूटसमुत्था नित्यं भवन्ति गिरिदुर्गवासिनो मनुजाः ३७

**37. Koota Yoga**. One born in Koota Yoga will be a liar, will head a jail, be poor, crafty, cruel and will live in hills and fortresses.

स्वजनाश्रयो दयावान्नानानृपवल्लभः प्रकृष्टमतिः
प्रथमेऽन्त्ये वयसि नराः सुखवान् दीर्घायुरातपत्री स्यात् ३८

**38. Chatra Yoga.** One born in Chatra Yoga will help his own men, be kind, dear to many kings, very intelligent, happy at the beginning and end of his life and be long-lived.

आनृतिकगुप्तपालाश्चोराः कितवाश्च कानने निरताः
कार्मुकयोगे जाता भाग्यविहीनाः शुभा वयोमध्ये ३९

**39. Chapa Yoga.** One born in Chapa Yoga will be liar, will protect secrets, be a thief, be fond of wandering, forests, be devoid of luck and be happy in the middle of the life.

सेनापतयः सर्वे कान्तशरीरा नृपप्रिया बलिनः
मणिकनकभूषणयुता भवन्ति योगेऽर्धचन्द्राख्ये ४०

**40. Ardh Chandra Yoga.** One born in Ardha Chandra Yoga will lead an Army, will possess a splendorous body, be dear to king, be strong and endowed with gems, gold and ornaments.

प्रणताऽऽशेषनराधिपकिरीटरत्नप्रभास्फुरितपादः
भवति नरेन्द्रो मनुजश्चक्रे यो जायते योगे ४१

**41. Chakra Yoga**. One born in Chakra Yoga will be an emperor, at whose feet will be the prostrating kings, heads, adoring gem studded diadems.

बहुरत्नधनसमृद्धा भोगयुता धनजनप्रियाः ससुता
उदधिसमुत्थाः पुरुषाः स्थिरविभवाः साधुशीलाश्च ४२

**42. <u>Samudra Yoga.</u> One born in Samudra Yoga will have many precious stones and abundant wealth, be endowed with pleasures, dear to people, will have firm wealth and be well disposed.**

प्रियगीतनृत्यवाद्या निपुणाः सुखिनश्च धनवन्तः
नेतारो बहुभृत्या वीणायां कीर्तिताः पुरुषाः ४३

**43. <u>Veena Yoga</u>. One born in Veena Yoga will be fond of songs, dance and musical instruments, be skilful, happy, wealthy and be a leader of men.**

दाम्नि सुजनोपकारी नयधनयुक्तो महेश्वरः ख्यातः
बहुसुतरत्नसमृद्धो धीरो जायेत विद्वांश्च ४४

**44. <u>Daamini Yoga</u>. One born in Daamini Yoga will be helpful to others, will have righteously earned wealth, be very affluent, famous, will have many sons and gems, be courageous and red-lettered.**

पाशे बन्धनभाजः कार्ये दक्षाः प्रपञ्चकाराश्च
बहुभाषिणो विशीला बहुभृत्याः सम्प्रतानाश्च ४५

**45. <u>Paasha Yoga</u>. One born in Paasha Yoga will be liable to be imprisoned, be skilful in work, be deceiving in disposition, will talk much, be bereft of good qualities and will have many servants.**

सुबहूनामुपयोज्याः कृषीवलाः सत्यवादिनः सुखिनः
केदारे सम्भूताश्चलस्वभावा धनैर्युक्ताः ४६

**46. <u>Kedara Yoga</u>. One born in Kedara Yoga will be useful to many, be an agriculturist, be truthful, happy, fickle-minded and wealthy.**

तीक्ष्णालसधनहीना हिंस्राः सुबहिष्कृता महाशूराः
संग्रामे लब्धयशा शूले योगे भवन्ति नराः ४७

**47. <u>Soola Yoga</u>. One born in Soola Yoga will be sharp, indolent, bereft of wealth, be tortuous, prohibited, valiant and famous through war.**

पाखण्डवादिनो वा धनरहिता वा बहिष्कृता लोके
सुतमातृधर्मरहिता युगयोगे ये नरा जाताः ४८

**48. <u>Yuga Yoga.</u> One born in Yuga Yoga will be heretic, be devoid of wealth, be discarded by others and be devoid of sons, mother and virtues.**

बलसंयुक्ता विधना वद्याविज्ञानवर्जिता मलिना नित्यं दुःखितदीना गोले योगे भवन्ति नराः ४९

**49. <u>Gola Yoga.</u> One born in Gola Yoga will be strong, be devoid of wealth, learning and intelligence, be dirty, sorrowful and miserable.**

सर्वास्वपि दशस्वेते भवेयुः फलदायिनः
प्राणिनामिति विज्ञेयाः प्रवदन्ति तवाग्रजाः ५०

**50. Ancestors say, that the results, due to said (Nabhash) Yogas, will be felt throughout in all the Dasha periods.**

विविधयोगाध्यायः ३६
लग्ने शुभयुते योगः शुभः पापयुतेऽशुभः
व्ययस्वगैः शुभैः पापैः क्रमाद्योगौ शुभाऽशुभौ १

शुभयोगोद्भवो वाग्मी रूपशीलगुणान्वितः
पापयोगोद्भवः कामी पापकर्मा परार्थयुक् २

## Ch. 36. Many Other Yogas

**1-2. Benefic and Malefic Yogas. If there be a benefic in Lagna, Subha Yoga is produced, while a malefic in Lagna causes Asubha Yoga. Benefics in both 12th and 2nd House cause Subha Yoga. Malefics in both 12th and 2nd House cause Asubha Yoga. One born in Subha Yoga will be eloquent, charming and virtuous, while his counterpart will be sensuous, will do sinful acts and will enjoy (swallow) others wealth.**

केन्द्रे देवगुरौ लग्नाच्चन्द्राद्वा शुभदृग्युते
नीचास्तारिगृहैर्हीने योगोऽयं गजकेसरी ३

गजकेसरिसञ्जातस्तेजस्वी धनवान् भवेत्
मेधावी गुणसम्पन्नो राजप्रियकरो नरः ४

**3-4. Gaja Kesari Yoga. Should Jupiter be in a Kendr from Lagna, or from Moon and be conjunct with, or receiving a Aspect from benefic, avoiding at the same time debilitation, combustion and inimical Rāśi, Gaja Kesari Yoga is caused. One born in Gaj Kes6th Yoga will be splendorous, wealthy, and intelligent, endowed with many laudable virtues and will please the king.**

दशमेऽङ्गात्तथा चन्द्रात् केवलैश्च शुभैर्युते
स योगोऽमलकीर्त्याख्यः कीर्तिराचन्द्रतारकी ५

राजपूज्यो महाभोगी दाता बन्धुजनप्रियः
परोपकारी धर्मात्मा गुणढ्योऽमलकीर्तिजः ६

**5-6. Amala Yoga. If there be exclusively a benefic in the 10th from Lagna, or Moon, Amala Yoga exists. Amala Yoga will confer fame, lasting till Moon and stars exist and will make the native honoured by the king, enjoy abundant pleasures, ch6thtable, fond of relatives, helpful to others, pious and virtuous.**

सप्तमे चाऽष्टमे शुद्धे शुभग्रहयुतेऽथवा
केन्द्रेषु शुभयुक्तेषु योगः पर्वतसंज्ञकः ७

भाग्यवान् पर्वतोत्पन्नः वाग्मी दाता च शास्त्रवित्
हास्यप्रियो यशस्वी च तेजस्वी पुरनायकः ८

**7-8. Parvata Yoga. Benefics in Kendras will produce Parvata Yoga, as 7th and 8th House are vacant, or are occupied by only benefics. One born in Parvata Yoga will be wealthy, eloquent, ch6thtable, learned in Shastras, fond of mirth, famous, splendorous and be the leader of a city.**

सुखेशेज्यौ मिथः केन्द्रगतौ बलिनि लग्नपे

काहलो वा स्वभोच्चस्थे सुखेशे कर्मपान्विते ९

ओजस्वी साहसी धूर्तश्चतुरङ्गबलान्वितः
यत्किञ्चिद् ग्रामनाथश्च काहले जायते नरः १०

**9-10. Kahala Yoga. Should 4ths Lord and Jupiter be in mutual Kendras, while Lagnas Lord is strong, Kahala Yoga occurs. Alternatively 4ths Lord, being in his own, or exaltation Rāśi, should be conjunct with 10ths Lord. In effect the native will be energetic, adventurous, charming, endowed with a complete Army, consisting of ch6thots, elephants, horses and infantry and he will Lord over a few villages.**

लग्नेशे तुङ्गगे केन्द्रे गुरुदृष्टे तु चामरः
शुभद्वये विलग्ने वा नवमे दशमे मदे ११

राजा वा राजपुज्यो वा चिरजीवी च पण्डितः
वाग्मी सर्वकलाविद् वा चामरे जायते जनः १२

11-12. **Chamara Yoga**. If Lagnas Lord is exalted in a Kendr and receives a Aspect from Jupiter, Chamar Yoga is formed. This Yoga also occurs, if two benefics are in Lagna, or 9th, or 10th, or 7th House. The effects of Chamara Yoga are: the native will be a king, or honoured by the king, long lived, scholarly, eloquent and versed in all arts.

सबले लग्नपे पुत्रषष्ठपौ केन्द्रगौ मिथः
शंखो वा लग्नकर्मेशौ चरे बलिनि भाग्यपे १३

धनस्त्रीपुत्रसंयुक्तो दयालुः पुण्यवान् सुधीः
पुण्यकर्मा चिरञ्जीवी शंखयोगोद्भवो नरः १४

13-14. **Shankha Yoga**. If Lagnas Lord is strong, while the Lords of 5th and 6th House are in mutual Kendras, then what is known, as Shankha Yoga, is produced. Alternatively, if Lagnas Lord along with 10ths Lord is in a Movable Rāśi, while 9ths Lord is strong, Shankha Yoga is obtained. One born with Shankha Yoga will be endowed with wealth, spouse and sons. He will be kindly disposed, propitious, intelligent, meritorious and long-lived.

सबले भाग्यपे भेरी खगैः स्वान्त्योदयास्तगैः
सबले भाग्यपे वाऽसौ केन्द्रे शुक्रेज्यलग्नपैः १५

धनस्त्रीपुत्रसंयुक्तो भूपः कीर्तिगुणान्वितः
आचारवान् सुखी भोगी भेरीयोगे जनो भवेत् १६

15-16. **Bhairi Yoga.** If 12th, 1st, 2nd and 7th House are occupied, as 9ths Lord is strong, the native obtains Bhairi Yoga. Again another kind of Bhairi Yoga is formed, if Venus, Jupiter and Lagnas Lord are in a Kendr, while 9ths Lord is strong. The results of Bhairi Yoga are: the native will be endowed with wealth, wife and sons. He will be a king, be famous, virtuous and endowed with good behavior, happiness and pleasures.

सबले लग्नपे खेटाः केन्द्रे कोणे स्वभोच्चगाः
मृदङ्गयोगो जातोऽत्र भूपो वा तत्समः सुखी १७

17. **Mridanga Yoga**. If Lagnas Lord is strong and others occupy Kendras, Konas, own Houses, or exaltation Rāśis, Mridanga Yoga is formed. The native concerned will be a king, or equal to a king and be happy.

कामेशे कर्मगे तुङ्गे कर्मेशे भाग्यपान्विते
योगः श्रीनाथसंज्ञोऽत्र जातः शुक्रसमो नृपः १८

18. **Shrinath Yoga**. If 7ths Lord is in 10th House, while 10ths Lord is exalted and conjunct with 9ths Lord, Shrinath Yoga takes place. The native with Shrinath Yoga will be equal to Lord Devendra (god of gods).

कर्मेशे सुतगे केन्द्रे बुधेऽर्के सबले स्वभे
चन्द्रात् कोणे गुरौ ज्ञे वा कुजे लाभे च शारदः १९

धनस्त्रीपुत्रसंयुक्तः सुखी विद्वान् नृपप्रियः
तपस्वी धर्मसंयुक्तः शारदे जायते जनः २०

19-20. **Sharada Yoga.** Should 10ths Lord be in 5th House, while Mercury is in a Kendr, as Sun with strength

is in Leo, Sharada Yoga is formed. This will again be obtained, if Jupiter, or Mercury is in a Kon to Moon, while Mars is in 11th House. One born in either kind of Yoga will obtain wealth, spouse and sons, be happy, scholarly, dear to the king, pious and virtuous.

धर्मलग्नगते सौम्ये पञ्चमे सदसद्युते
पापे च चतुरस्रस्थे योगोऽयं मत्स्यसंज्ञकः २१

कालज्ञः करुणामूर्तिर्गुणधीबलरूपवान्
यशोविद्यातपस्वी च मत्स्ययोगे हि जायते २२

**21-22. <u>Matsya Yoga.</u> Benefics in 9th and 1st House, mixed Planets in 5th House and malefics in 4th and 8th House: this array of Planets at birth will produce Matsya Yoga. In effect the native will be a astrologer, be a synonym of kindness, be virtuous, strong, beautiful, famous, learned and pious.**

पुत्रारिमदगाः सौम्याः स्वभोच्चसुहृदंशगाः
त्रिलाभोदयगाः पापाः कूर्मयोगः स्वभोच्चगाः २३

कूर्मयोगे जनो भूपो धीरो धर्मगुणान्वितः
कीर्तिमानुपकारी च सुखी मानवनायकः २४

**23-24. <u>Kurma Yoga</u>. If 5th, 6th and 7th House are occupied by benefic Planets identical with own House, or exaltation, or friendly Rāśi, while malefics are in 3rd, 11th and 1st House, in own House, or in exaltation, Kurma Yoga is formed. The results of Kurma Yoga are: the native will be a king. be courageous, virtuous, famous, helpful, happy. He will be a leader of men.**

भाग्येशे धनभावास्थे धनेशे भाग्यभावगे
लग्नेशे केन्द्रकोणस्थे खड्गयोगः स कथ्यते २५

खड्गयोगे समुत्पन्नो धनभाग्यसुखान्वितः
शास्त्रज्ञो बुद्धिवीर्याढ्यः कृतज्ञः कुशलो नरः २६

**25-26. <u>Khadga Yoga</u>. Should there be an exchange of Rāśis between the Lords of 2nd and 9th House, as Lagnas Lord is in a Kendr, or in a Kon, Khadga Yoga is obtained. One with Khadga Yoga will be endowed with wealth, fortunes and happiness, be learned in Shastras, be intelligent, mighty, grateful and skilful.**

केन्द्रे मूलत्रिकोणस्ते भाग्येशे वा स्वभोच्चगे
लग्नाधिपे बलाढ्ये च लक्ष्मीयोगः प्रकीर्त्यते २७

सुरूपो गुणवान् भूपो बहुपुत्रधनान्वितः
यशस्वी धर्मसम्पन्नो लक्ष्मीयोगे जनो भवेत् २८

**27-28. <u>Lakshmi Yoga</u>. If 9ths Lord is in a Kendr identical with his Moolatrikona Rāśi, or own Rāśi, or in exaltation, while Lagnas Lord is endowed with strength, Lakshmi Yoga occurs. The native with Lakshmi Yoga will be charming, virtuous, kingly in status, endowed with many sons and abundant wealth. He will be famous and of high moral merits.**

लग्ने स्थिरे भृगौ केन्द्रे चन्द्रकोणे शभान्विते
मानस्थानगते सौरे योगोऽयं कुसुमाभिधः २९

भूपो वा भूपतुल्यो वा दाता भोगी सुखी जनः

कुलमुख्यो गुणी विद्वान् जायते कुसुमाह्वये ३०

**29-30. <u>Kusuma Yoga</u>. Venus in a Kendr, Moon in a Kon along with a benefic and Saturn in 10th House: these Planets thus cause Kusuma Yoga for one born in a Fixed Rāśi ascending. Such a native will be a king, or equal to him, be ch6thtable, will enjoy pleasures, be happy, prime among his race men, virtuous and red-lettered.**

द्वितीये पञ्चमे जीवे बुधशुक्रयुतेक्षिते
क्षेत्रे तयोर्वा सम्प्राप्ते योगः स च कलानिधिः ३१

कलानिधिसमुत्पन्नो गुणवान् भूपवन्दितः
रोगहीनः सुखी जातो धनविद्यासमन्वितः ३२

**31-32. Kalanidhi Yoga. If Jupiter is placed in 2nd, or 5th House and receives a Aspect from Mercury and Venus, Kalanidhi Yoga is caused. In effect the native will be virtuous, honoured by the kings, bereft of diseases, be happy, wealthy and learned.**

लग्नेशतद्गतर्क्षेशतद्गतर्क्षेशतदंशपाः
केन्द्रे कोणे स्वतुङ्गे वा योगः कल्पद्रुमो मतः ३३

सर्वैश्वर्ययुतो भूपो धर्मात्मा बलसंयुतः
युद्धप्रियो दयालुश्च पारिजाते नरो भवेत् ३४

**33-34. Kalpa Drum Yoga. Note the following four Planets: Lagnas Lord , the depositor of Lagnas Lord (a), the depositor of the Planet a (b), the Navāmśa depositor of the Planet b. If all these are disposed in Kendras and in Konas from Lagna, or are exalted, Kalpa Drum Yoga exists. One with Kalpa Drum Yoga will be endowed with all kinds of wealth, be a king, pious, strong, fond of war and merciful.**

स्वान्त्याष्टस्थैर्द्वितीयेशाद् हरियोगः शुभग्रहैः
कामेशाद् बन्धुधर्माष्टस्थितैः सौम्यैर्हराभिधः ३५

लग्नेशाद् बन्धुकर्मायस्थितैर्ब्रह्माह्वयः स्मृतः
एषु जातः सुखी विद्वान् धनपुत्रादिसंयुतः ३६

**35-36. Trimurthi Yogas. Counted from 2nds Lord, if benefics occupy the 2nd, 12th and 8th, H6th Yoga is formed. If the 4th, 9th and 8th with reference to the Rāśi, occupied by 7ths Lord, are occupied by benefics, Hara Yoga is obtainable. Brahma Yoga is generated, if, counted from Lagnas Lord, benefics are in the 4th, 10th and 11th Rāśis. One born in anyone of the said three Yogas will be happy, learned and endowed with wealth and sons.**

लग्नान्मदाष्टगैः सौम्यैः पापदृग्योगवर्जितैः
योगो लग्नाधियोगोऽस्मिन् महात्मा शास्त्रवित् सुखी ३७

**37. Lagna Adhi Yoga. Should benefics be in 7th and 8th House, counted from Lagna and be devoid of Conjunct with and/or Aspect from malefics, Lagna Adhi Yoga is produced, making one a great person, learned in Shastras and happy.**

लग्नपे पारिजातस्थे सुखी वर्गोत्तमे ह्यरुक्
गोपुरे धनधान्याढ्या भूपः सिंहासने स्थिते ३८

विद्वान् पारावते श्रीमान् देवलोके सवाहनः
ऐरावतस्थिते जातो विख्यातो भूपवन्दितः ३९

**38-39. Effects of Lagnas Lords Division Dignities. Lagnas Lord in P6thjatāńś will make one happy, in Vargaottama will give immunity to diseases, in Gopurāńś will make one rich with wealth and grains, in Leoasanāńś will make one a king, in Paravatāńś will make one a scholar, in Devalokāńś will make one opulent and endowed with conveyances and in Iravatāńś will make one famous and honoured by kings. (Vargaottama indicates a Planet, occupying the same Rāśi and the same Navāmśa)**

अथ चन्द्रयोगाध्यायः ३७

सहस्ररश्मितश्चन्द्रे कण्टकादिगते क्रमात्
धनधीनैपुणादीनि न्यूनमध्योत्तमानि हि १

## Ch. 37. Moon's Yogas

**1. If Moon with reference to Sun is in a Kendr, ones wealth, intelligence and skill will be little, if in a Panaphara, will be meddling, if in a Apoklima, will be excellent.**

स्वांशे वा स्वाधिमित्रांशे स्थितश्च दिवसे शशी
गुरुणा दृश्यते तत्र जातो धनसुखान्वितः २

स्वांशे वा स्वाधिमित्रांशे स्थितश्च शशभृन्निशि
शुक्रेण दृश्यते तत्र जातो धनसुखान्वितः ३

एतद्विपर्ययस्थे च शुक्रेज्यानवलोकिते
जायतेऽल्पधनो बालो योगेऽस्मिन्निर्धनोऽथवा ४

**2-4. In the case of a day birth, if Moon, placed in its own Navāmśa, or in a friendly Navāmśa, receives a Aspect from Jupiter, one will be endowed with wealth and happiness. One born at night time will enjoy similar effects, if Moon is in its own Navāmśa, or in a friendly Navāmśa, receiving a Aspect from Venus. In a contrary situation, the Aspect from Jupiter, or from Venus on Moon will make one go with little wealth, or even without that.**

चन्द्राद्रन्ध्रारिकामस्थैः सौम्यैः स्याधियोगकः
तत्र राजा च मन्त्री च सेनाधीशश्च बलक्रमात् ५

**5. Adhi Yoga from Moon. If benefics occupy the 8th, 6th and 7th, counted from Moon, Adhi Yoga obtains. According to the strength of the participating Planets, the native concerned will be either a king, or a minister, or an Army chief.**

चन्द्राद् वृद्धिगतैः सर्वैः शुभैर्जातो महाधनी
द्वाभ्यां मध्यधनो जात एकेनाऽल्पधनो भवेत् ६

**6. 2nd Yoga. Should all the (three) benefics be Upachaya, counted from Moon, one will be very affluent. With two benefics, placed in the 3rd, the 6th, the 10th and the 11th, one will have medium effects in regard to wealth. If a single benefic is there, the wealth will be negligible.**

चन्द्रात् स्वान्त्योभयस्थे हि ग्रहे सूर्यं बिना क्रमात्
सुनफाख्तोऽनफाख्यश्च योगो दुरधराह्वयः ७

राजा वा राजतुल्यो वा धीधनख्यातिमाञ्जनः
स्वभुजार्जितवित्तश्च सुनफायोगसम्भवः ८

भूपोऽगदशरीरश्च शीलवान् ख्यातकीर्तिमान्
सुरूपश्चाऽनफाजातो सुखैः सर्वैः समन्वितः ९

उत्पन्नसुखभुग् दाता धनवाहनसंयुतः
सद्भृत्यो जायते नूनं जनो दुरधराभवः १०

**7-10. <u>Sunaph, Anaph and Duradhar</u>. If there is a Planet other than Sun, in the 2nd from Moon, Sunaph Yoga is formed, if in the 12th from Moon, Anaph Yoga is formed and, if in the 2nd and 12th from Moon, Duradhar Yoga is caused. One with Sunaph Yoga will be a king, or equal to a king, endowed with intelligence, wealth, fame and self-earned wealth. One born in Anaph Yoga will be a king, be free from diseases, virtuous, famous, charming and happy. One born in Duradhar Yoga will enjoy pleasures, will be ch6thtable and endowed with wealth, conveyances and excellent serving force.**

चन्द्रादाद्यधनाऽन्त्यस्थो विना भानुं न चेद्ग्रहः
कश्चित् स्याद्वा विना चन्द्रं लग्नात् केन्द्रगतोऽथ वा ११

योगः केमद्रुमो नाम तत्र जातोऽतिगर्हितः
बुद्धिविद्याविहीनश्च दरिद्रापत्तिसंयुतः १२

अन्ययोगफलं हन्ति चन्द्रयोगो विशेषतः
स्वफलं प्रददातीति बुधो यत्नाद् विचिन्तयेत् १३

**11-13. Kema Druma Yoga. Excluding Sun, should there be no Planet with Moon, or in the 2nd and/or 12th from Moon, or in a Kendr from Lagna, Kema Druma Yoga is formed. One born in Kema Druma Yoga will be very much reproached, will be bereft of intelligence, learning, reduced to penury and perils.**

अथ रवियोगाध्यायः ३८
सूर्यात् स्वन्त्योभयस्थैश्च विना चन्द्रं कुजादिभिः
वेशिवोशिसमाख्यौ च तथोभयचरः क्रमात् १

## Ch. 38. Sun's Yogas

**1. Vesi, Vosi and Abhayach6th Yogas. Barring Moon, if a Planet among Mars etc. be in the 2nd from Sun, Vesi Yoga is formed, if in the 12th from Sun, Vosi Yoga is formed and if in both the 2nd and the 12th from Sun, Ubhayach6th Yoga is caused.**

समदृक् सत्यवाङ् मर्त्यो दीर्घकायोऽलसस्तथा
सुखभागल्पवित्तोऽपि वेशियोगसमुद्भवः २

वोशौ च निपुणो दाता यशोविद्याबलावन्तिः
तथोभयचरे जातो भूपो वा तत्समः सुखी ३

**2-3. Effects of Vesi, Vosi and Ubhayach6th Yogas. One born in Vesi Yoga will be even sighted, truthful, long-bodied, indolent, happy and endowed with negligible wealth. One born with Vosi Yoga will be skilful, ch6thtable and endowed with fame, learning and strength. The Ubhayach6th native will be a king, or equal to a king and be happy.**

शुभग्रहभवे योगे फलमेवं विचिन्तयेत्
पापग्रहसमुत्पन्ने योगे तु फलमन्यथा ४

**4. Benefics, causing Vesi, Vosi, or Ubhayach6th Yogas, will give the above-mentioned effects, while malefics will produce contrary effects.**

अथ राजयोगाध्यायः ३९
अथाऽतः सम्प्रवक्ष्यामि राययोगान् द्विजोत्तम
येषां विज्ञानमात्रेण राजपूज्यो जनो भवेत् १

ये योगाः शम्भुना प्रोक्ताः पुरा शैलसुताग्रतः
तेषां सारमहं वक्ष्ये तवाग्रे द्विजनन्दन २

## Ch. 39. Raja Yoga

**1-2. O excellent of the Brahmins, I now narrate below the Raja Yogas, making one entitled to royal honour. These were told to Parvati by Lord Shiva once upon a time, the gist of which is, as follows.**

चिन्तयेत् कारकांशे वा जनुर्लग्नेऽथ वा द्विज
राजयोगकरौ द्वौ द्वौ स्फुटौ खेटौ प्रयत्नतः ३

आत्मकारकपुत्राभ्यां योगमेकं प्रकल्पयेत्
तन्पञ्चमनाथाभ्यां तथैव द्विजसत्तम ४

लग्नपुत्रेशयोरात्मपुत्रकारकयोर्द्वयोः
सम्बन्धात् पूर्णमर्धं वा पादं वीर्यानुसारतः ५

**3-5. Raja Yogas are to be known from the Karakāńś Lagna and the natal Lagna. On the one hand the pair of Atma Karak and 5th Karak should be considered and on the other hand the natal Lagnas Lord and 5ths Lord should be taken into consideration. The effects, due to such association, will be full, or a half, or a quarter, according to their strengths.**

लग्नेशे पञ्चमे भावे पञ्चमेशे च लग्ने
पुत्रात्मकारकौ विप्र लग्ने च पञ्चमे स्थित ६

स्वोच्चे स्वांशे स्वभे वाऽपि शुभग्रहनिरीक्षितो
महाराजाख्ययोगोऽत्र जातः ख्यातः सुखान्वितः ७

**6-7. <u>Maha Raja Yoga</u>. Should Lagnas Lord and 5ths Lord exchange their Rāśis, or, if Atma Karak and 5th Karak (Char) are in Lagna, or in 5th House, or in the exaltation Rāśi, or in own Rāśi, or in own Navāmśa, receiving a Aspect from a benefic, Maha Raja Yoga is produced. The native so born will be famous and happy.**

भाग्येशः कारको लग्ने पञ्चमे सप्तमेऽपि वा
राजयोगप्रदातारौ शुभखेटयुतेक्षितौ ८

**8. If Lagnas Lord and Atma Karak are in 1st, 5th, or 7th House, conjunct with, or receiving a Aspect from a benefic, a Raja Yoga is formed.**

लग्नेशात् कारकाच्चापि धने तुर्ये च पञ्चमे
शुभखेटयुते भावे जातो राजा भवेद् ध्रुवम् ९

तृतीये षष्ठभे ताभ्यां पापग्रहयुतेक्षिते
जातो राजा भवेदेवं मिश्रे मिश्रफलं वदेत् १०

**9-10. Should there be benefics in the 2nd, the 4th and the 5th, counted either from Lagnas Lord, or from Atma Karak Rāśi, one will become a king. Similarly malefics in the 3rd and 6th from Lagnas Lord, or from Atma Karak Rāśi will make one a king.**

स्वांशे वा पञ्चमे शुक्रे जीवेन्दुयुतवीक्षिते
लग्ने लग्नपदे वाऽपि राजवर्गो भवेन्नरः ११

**11. One will be related to royal circles, if Venus is the Karakāńś, or in the 5th there from, or in Lagna, or in Arudh Lagna, receiving a Aspect from, or conjunct with Jupiter, or Moon.**

जन्माङ्गे कालहोराङ्गे कालङ्गे येन केनचित्
एकग्रहेण सन्दृष्टे त्रितये राजभाग् जनः १२

**12. Even, if a single Planet gives a Aspect to the natal Lagna, or Hora Lagna, or Ghatik Lagna, the native will become a king.**

लग्नषड्वर्गके चैवमेकखेटयुतेक्षिते
राजयोगो भवत्येव निर्विशंक द्विजोत्तम  १३

पूर्णदृष्टे पूर्नयोगमर्धदृष्टेऽर्धमेव च
पाददृष्टे पादयोगमिति ज्ञेयं क्रमात् फलम्  १४

**13-14. If the Shad Vargas of Lagna are occupied, or receive a Aspect from one and the same Planet, a Raja Yoga is doubtlessly formed. Accordingly, if the Aspect is full, half, or one fourth, results will be in order full, medium and negligible.**

लग्नत्रये स्वभोच्चस्थे खेटे राजा भवेद् ध्रुवम्

यद्वा लग्ने दृकाणेंऽशे स्वोच्चखेटयुते द्विज  १५

**15. If the 3 Lagnas (natal, Hora and Ghatik) are occupied by Planets in exaltation, or in own Rāśi, or, if the natal Lagna, the Dreshkan Lagna and the Navāmśa Lagna have exalted Planets, Raja Yoga is formed.**

पदे शुभ सचंद्रे च धने देवगुरौ तथा
स्वोच्चस्थखेटसन्दृष्टे राजयोगो न संशयः  १६

**16. If Moon and a benefic are in the Arudh Lang, as Jupiter is in the 2nd from the natal Lagna and both these places are receiving Aspects from Planets in exaltation, or Planets in own Rāśi, there will be a Raja Yoga.**

शुभे लग्ने शुभे त्वर्थे तृतीये पापखेचरे
चतुर्थे च शुभे प्राप्ते राजा वा तत्समोऽपि वा  १७

**17. If Lagna, 2nd and 4th House are occupied by benefics, while a malefic is in 3rd House, one will become a king, or equal to a king.**

स्वोच्चस्थो हरिणांको वा जीवो वा शुक्र एव वा
बुधो वा धनभावस्थः श्रियं दिशति देहिनः  १८

**18. The native will be wealthy, if one among Moon, Jupiter, Venus and Mercury is exalted in 2nd House.**

षष्ठेऽष्टमे तृतीये वा स्वस्वनीचगता ग्रहाः
लग्नं पश्येत् स्वभोच्चस्थो लग्नपो राज्ययोगदः  १९

**19. If 6th, 8th and 3rd House are occupied by debilitated Planets, as Lagnas Lord is exalted, or is in own House and gives a Aspect to Lagna, there is a Raja Yoga.**

षष्ठाऽष्टमव्ययाधीशा नीचस्था रिपुभेऽस्तगाः
स्वोच्चस्वभगलग्नेशो लग्नं पश्यंश्च राज्यदः  २०

**20. Again a Raja Yoga is formed, if 6ths, 8ths and 12ths Lords are in fall, or in inimical Rāśis, or in combustion, as Lagnas Lord, placed in his own Rāśi, or in its exaltation Rāśi, gives a Aspect to Lagna.**

स्वोच्चस्वभस्थराज्येशो लग्नं पश्यंश्च राज्यदः
शुभाः केन्द्रस्थिता वाऽपि राज्यदः नाऽत्र संशयः  २१

**21. If 10ths Lord, placed in his own House, or in its exaltation Rāśi, gives a Aspect to Lagna, a Raja Yoga is formed. Similar is the case, if benefics are in Kendras.**

शुभराशौ शुभांशे च कारको धनवान् भवेत्
तदंशकेन्द्रेषु शुभे नूनं राजा प्रजायते  २२

**22. If the Atma Karak Planet is in a benefics Rāśi/Navāmśa, the native will be wealthy. If there are benefics in Kendras from Karakāńś Lagna, he will become a king**

लग्नारूढं दारपदं मिथः केन्द्र स्थितं यदि
त्रिलाभे वा त्रिकोणे वा तदा राजा न संशयः २३

**23. If the Arudh Lagna and Dar Pad are in mutual Kendras, or in mutual 3rd/11th Houses, or in mutual Konas, the native will doubtlessly become a king.**

भावहोराघटीसंज्ञलग्नानि च प्रपश्यति
स्वोच्चग्रहो राजयोगो लग्नद्वयमथापि वा २४

**24. If two, or all of House, Hora, Ghatik Lagnas are receiving a Aspect from exalted Planets, a Raja Yoga is formed.**

राशेर्द्रेष्काणतोंऽशाच्च राशेरंशादथापि वा
यद्वा राशिदृकाणाभ्यां लग्नद्रष्टा तु योगदः २५

**25. If House, Hora and Ghatik Lagnas, their Dreshkanas and Navāmśaas, or the said Lagnas and their Navāmśaas, or the said Lagnas and their Dreshkanas receive a Aspect from a Planet, a Raja Yoga is formed.**

पदे स्वोच्चखगाक्रान्ते चन्द्राक्रान्ते विशेषतः
क्रान्ते च गुरुशुक्राभ्यां केनाप्युच्चग्रहेण वा २६

दुष्टार्गलग्रहाभावे राजयोगो न संशयः
शुभारूढे तत्र चन्द्रे धने देवगुरौ तथा २७

**26-27. If Arudh Pad is occupied by an exalted Planet, particularly Moon in exaltation, or by Jupiter and/or Venus (with, or without exaltation), while there is no Argala by a malefic, the native will become a king. If the Arudh Pad is a benefic Rāśi, containing Moon, while Jupiter is in 2nd House, the same effect will prevail.**

दुःस्थानेशोऽपि नीचस्थो यदि लग्नं प्रपश्यति
तदाऽपि राजयोगः स्यादिति ज्ञेयं द्विजोत्तम २८

**28. Even, if one among 6ths, 8ths and 12ths Lords, being in debilitation, gives a Aspect to Lagna, there will be a Raja Yoga.**

चतुर्थदशमार्थायपतिदृष्टे विलग्नभे
पदाल्लाभे तु शुक्रेण दृष्टेऽप्यारूढभे शुभे २९

राजा वा तत्समो वापि जातको जायते ध्रुवम्
षष्ठाष्टमगते नीचे लग्नं पश्यति वा तथा ३०

तृतीयलाभगे नीचे लग्नं पश्यति वा तथा
लग्नांशकेन्द्रेषु शुभे निग्रहानुग्रहक्षमः ३१

**29-31. The native will become a king, if a Planet, ruling 4th, 10th, 2nd, or 11th, gives a Aspect to Lagna, while Venus gives a Aspect to the 11th from Arudh Lagna, as Arudh Lagna is occupied by a benefic. The same effect will be obtained, if a debilitated Planet gives a Aspect to Lagna and is placed in 6th, or 8th House. Again similar result will prevail, if a debilitated Planet, placed in 3rd, or 11th House, gives a Aspect to Lagna.**

अथाऽहं सम्प्रवक्ष्यामि राजयोगादिकं परम्
ग्रहाणां स्थानभेदेन दृष्टियोगवशात् फलम् ३२

**32. I now tell you of the Raja Yogas, based on the Planets with different dignities and on the Aspects and Conjuncts of the Planets.**

तपःस्थानाधिपो मन्त्री मन्त्राधीशो विशेषतः
उभावन्योन्यसंदृष्टौ जातश्चेदिह राज्यभाक् ३३

यत्र कुत्रापि संयुक्तौ तौ वापि समसप्तमौ
राजवंशभवो बालो राजा भवति निश्चितम् ३४

**33-34. 9ths Lord is akin to a minister and more especially 5ths Lord. If these two Planets mutually give a Aspect, the native will obtain a kingdom. Even, if these two are conjunct in any House, or, if they happen to be placed in mutually 7th places, one born of royal scion will become a king.**

वाहनेशस्तथा माने मानेशो वाहने स्थितः
बुद्धिधर्माधिपाभ्यां तु दृष्टश्चेदिह राज्यभाक् ३५

**35. The native will attain a kingdom, if 4ths Lord is in 10th House and 10ths Lord is in 4th House and, if these Planets give a Aspect to 5ths and 9ths Lords.**

सुतकर्मसुहृल्लग्ननाथा धर्मपसंयुताः

यस्य जन्मनि भूपोऽसौ कीर्त्या ख्यातो दिगन्तरे ३६

**36. If the Lords of 5th, 10th, 4th and Lagna are conjunct in 9th House, one will become a ruler with fame, spreading over the four directions.**

सुखकर्मादिपौ वापि मन्त्रिनाथेन संयुतौ
धर्मनाथेन वा युक्तौ जातश्चेदिह राज्यभाक् ३७

**37. Should the Lord of 4th, or of 10th House join either the 5ths Lord, or 9ths Lord, the native will obtain a kingdom.**

सुतेशे धर्मनाथेन युते लग्नेश्वरेण वा
लग्ने सुखेऽथवा माने स्थिते जातो नृपो भवेत् ३८

**38. If 5ths Lord is in Lagna, 4th, or 10th House, conjunct with 9ths Lord, or Lagna Lord, the native will become a king.**

धर्मस्थाने स्थिते जीवे स्वगृहे भृगुसंयुते
पंचमाधिपयुक्ते वा जातश्चेदिह राजभाक् ३९

**39. Should Jupiter be in his own Rāśi identical with 9th House and conjunct with either Venus, or 5ths Lord, the native will obtain royal status.**

दिनार्धाच्च निशार्धाच्च परं सार्धद्विनाडिका
शुभा वेला तदुत्पन्नो राजा स्यात्तत्समोऽपि वा ४०

**40. Two and a half Ghatis from mid-day, or from mid-night is auspicious time. A birth during such an auspicious time will cause one to be a king, or equal to him.**

चन्द्रः कविं कविश्चन्द्रमन्योऽन्यं त्रिभवस्थितः
मिथः पश्यति वा क्वापि राजयोग उदाहृतः ४१

**41. Should Moon and Venus be mutually in 3rd and 11th House and receiving Aspects from each other, while they are placed elsewhere, a Raja Yoga is obtained.**

चन्द्रे वर्गोत्तमांशस्थे सबले चतुरादिभिः
ग्रहैर्दृष्टे च यो जातः स राजा भवति ध्रुवम् ४२

**42. Should Moon, endowed with strength, be Vargaottāńśa and receives a Aspect from four, or more Planets, the native will become a king.**

उत्तमांशगते लग्ने चन्द्रान्यैश्चतुरादिभिः
ग्रहैर्दृष्टेऽपि यो जातः सोऽपि भूमिपतिर्भवेत् ४३

**43. One will become a king, if Lagna in Uttamāńśa receives a Aspect from four, or more Planets, out of which Moon should not be one.**

त्र्यल्पैरुच्चस्थितैः खेटे राजा राजकुलोद्भवः
अन्यवंशभवस्तत्र राजतुल्यो धनैर्युतः ४४

**44. If one, or two, or three Planets are in exaltation, one of a royal scion will become a king, while another will be equal to a king, or be wealthy.**

चतुर्भिः पञ्चभिर्वाऽपि खेटैः स्वोच्चत्रिकोणगैः
हीनवंशभवश्चापि राजा भवति निश्चितः ४५

**45. If four, or five Planets occupy their exaltation Rāśis, or Moolatrikona Rāśis, even a person of base birth will become king.**

षड्भिरुच्चगतैः खेटैश्चक्रवर्तित्वमाप्नुयात्
एवं बहुविधा राजयोगा ज्ञेया द्विजोत्तम ४६

**46. If six Planets are exalted, the native will become emperor and will enjoy various kinds of royal paraphernalia.**

एको गुरुर्भृगुर्वापि बुधो वा स्वोच्चसंस्थितः
शुभग्रहयुते केन्द्रे राजा वा तत्समो भवेत् ४७

**47. Even, if one among Jupiter, Venus and Mercury is in exaltation, while a benefic is in a Kendr, the native will become a king, or be equal to him.**

केन्द्रेस्थितैः शुभैः सर्वैः पापैश्च त्रिषडायगैः
हीनवंशोऽपि यो जातः स राजा भवति ध्रुवम् ४८

**48. If all benefics are relegated to Kendras, while malefics are in 3rd, 6th and 11th House, the native, though may be of mean descent, will ascend the throne.**

अथ राजसम्बन्धयोगाध्यायः ४०

राज्यनाथे जनुर्लग्नादमात्येशयुतेक्षिते
अमात्यकारकेणापि प्रधानत्वं नृपालये १

## Ch. 40. Yogas For Royal Association

**1. If 10ths Lord is conjunct with, or receives a Aspect from the depositor of Amatya Karak, or even, if 10ths Lord is conjunct with, or receives a Aspect from Amatya Karak himself, the native will be a chief in the kings court.**

लाभेशवीक्षिते लाभे पापदृग्योगवर्जिते
राज्यभावे तदा विप्र प्रधानत्वं नृपालये २

**2. If 10th and 11th House are devoid of malefic occupation and devoid of Aspect from a malefic, while 11th House receives a Aspect from its own Lord, the native will be a chief in the kings court.**

अमात्यकारकेणापि कारकेन्द्रेण संयुते
तीव्रबुद्धियुतो बालो राजमन्त्री भवेद् ध्रुवम् ३

**3. Should Amatya Karak and the depositor of Atma Karak be together, the native will be endowed with great intelligence and will be a kings minister. (Karakendr is interpreted here, as the depositor of Atma Karak. Similarly Amatyesa means the depositor of Amatya Karak)**

अमात्यकारके विप्र सबले शुभसंयुते
स्वक्षेत्रेस्वोच्चगे वापि राजमन्त्री भवेद् ध्रुवम् ४

**4. If Atma Karak is strong and is with a benefic, or Amatya Karak is in its own House, or in exaltation, one will surely become a kings minister.**

अमात्यकारके लग्ने पञ्चमे नवमेऽपि वा
राजमन्त्री भवेद् बालो विख्यातो नाऽत्रसंशयः ५

**5. There is no doubt in ones becoming a kings minister and famous, if Atma Karak is in 1st, or 5th, or 9th House.**

आत्मकारकतः केन्द्रे कोणे वाऽमात्यकारके
तदा राजकृपायुक्तो जातो राजाश्रितः सुखी ६

**6. If Atma Karak, or Amatya Karak is placed in a Kendr, or in a Kon, the native will beget royal mercy, royal patronage and happiness thereof.**

कारकाच्च तथारूढात् लग्नाच्च द्विजसत्तम
तृतीये षष्ठभे पापैः सेनाधीशः प्रजायते ७

**7. Should malefics be in the 3rd and the 6th from Atma Karak, or from Arudh Lagna, or in 3rd and 6th House, one will become Army chief.**

कारके केन्द्रे कोणेषु स्वतुङ्गे वा स्वभे स्थिते
भाग्यपेन युते दृष्टे राजमन्त्री भवेद् ध्रुवम् ८

**8. If Atma Karak is in a Kendr, or in a Kon, or in exaltation, or in its own House and gives a Aspect to 9ths Lord, the native will be a kings minister.**

कारके जन्मराशीशे लग्नगे शुभसंयुते
मन्त्रित्वे मुख्ययोगोऽयं वार्धकेनाऽत्र संशयः ९

**9. If the Lord of the Rāśi, where Moon is placed becomes Atma Karak and, if this Lord is placed in 1st House along with a benefic, the native will become a kings minister at his advanced age.**

कारके शुभसंयुक्ते पञ्चमे सप्तमेऽपि वा
दशमे नवमे वाऽपि धनं राजाश्रयाद् भवेत् १०

**10. Should the Atma Karak be in 5th, 7th, 10th, or 9th House and happen to be with a benefic, one will earn wealth through royal patronage.**

भाग्यभावपदे लग्ने कारके नवमेऽपि वा
राजसम्बन्धयोगोऽयं निर्विशंकं द्विजोत्तम ११

**11. If the Arudh of 9th House happens to be itself the Janm Lagna, or, if Atma Karak is placed in 9th House, the native will be associated with royal circles.**

लाभेशे लाभभावस्थे पापदृष्टिविवर्जिते
कारके शुभसंयुक्ते लाभस्तस्य नृपालयात् १२

**12. One will gain through royal association, if 11th House is occupied by its own Lord and is devoid of a Aspect from a malefic. The Atma Karak should at the same time be conjunct with a benefic.**

लग्नेशे राज्यभावस्थे राज्येशे लग्नसंस्थिते
प्रबलो राजसम्बन्धयोगोऽयं परिकीर्तितः १३

**13. An exchange of Rāśis between 10ths Lord and Lagnas Lord will make the native associated with the king in a great manner.**

कारकात् तुर्यभावस्थौ सितेन्दू द्विजसत्तम
यस्य जन्मनि जातोऽयं राजचिह्नेन संयुतः १४

**14. If Venus and Moon are in the 4th from Karakāńś Lagna, the native will be endowed with royal insignia.**

लग्नेशे कारके वाऽपि पञ्चमेशेन संयुते
केन्द्रे कोणे स्थिते तस्मिन् राजमित्रं भवेन्नरः १५

**15. Should Lagnas Lord, or the Atma Karak be conjunct with 5ths Lord and be in a Kendr, or in a Kon, the native will be a king, or minister.**

अथ विशेषधनयोगाऽध्यायः ४१

अथाऽतः संप्रवक्ष्यामि धनयोगं विशेषतः
यस्मिन् योगे समुत्पन्नो निश्चितो धनवान् भवेत् १

## Ch. 41. Combinations for Wealth

**1. I now tell you of special combinations, giving wealth. One born to these Yogas will surely become wealthy.**

पञ्चमे भृगुजक्षेत्रे तस्मिन् शुक्रेण संयुते
लाभे भौमेन संयुक्ते बहुद्रव्यस्य नायकः २

**2. Yogas for Great Affluence (up to Sloka 8). Should a Rāśi of Venus be 5th House and be occupied by Venus himself, while Mars is in 11th House, the native will obtain great riches.**

पंचमे तु बुधक्षेत्रे तस्मिन् बुधयुतो सति
चन्द्रे भौमे गुरौ लाभे बहुद्रव्यस्य नायकः ३

**3. Should a Rāśi of Mercury be 5th House and be occupied by Mercury himself, as 11th House is occupied by Moon, Mars and Jupiter, the native will be very affluent.**

पञ्चमे च रविक्षेत्रे तस्मिन् रवियुते सति
लाभे शनीन्दुजीवाढ्ये बहुद्रव्यस्य नायकः ४

**4. Should Leo be 5th House and be occupied by Sun himself, as Saturn, Moon and Jupiter are in 11th House, the native will be very affluent.**

पंचमे तु शनिक्षेत्रे तस्मिन् शनियुते सति
लाभे रवीन्दुसंयुक्ते बहुद्रव्यस्य नायकः ५

**5. Should Sun and Moon be in 11th House, as Saturn is in 5th House identical with his own House, the native will be very affluent.**

पंचमे तु गुरुक्षेत्रे तस्मिन् गुरुयुते सति
लाभे चन्द्रसुते जातो बहुद्रव्यस्य नायकः ६

**6. Should Jupiter be in 5th House identical with his own Rāśi, as Mercury is in 11th House, the native will be very affluent.**

पंचमे तु कुजक्षेत्रे तस्मिन् कुजयुते सति
लाभस्थे भृगुपुत्रे तु बहुद्रव्यस्य नायकः ७

**7. If a Rāśi of Mars happens to be 5th House with Mars therein, while Venus is in 11th House, the native will become very affluent**

पंचमे तु शशिक्षेत्रे तस्मिन् शशियुते सति
शनौ लाभस्थिते जातो बहुद्रव्यस्य नायकः ८

**.8. If Cancer happens to be 5th House, containing Moon therein, while Saturn is in 11th House, the native will become very affluent.**

भानुक्षेत्रगते लग्ने तस्मिन् भानुयुते पुनः
भौमेन गुरुणा युक्ते दृष्टे जातो युतो धनैः ९

**9. Yogas for Wealth (up to Sloka 15). Should Sun be in Leo identical with Lagna and be conjunct with, or receiving a Aspect from Mars and Jupiter, one will be wealthy.**

चन्द्रक्षेत्रगते लग्ने तस्मिन् चन्द्रयुते सति
बुधेन गुरुणा युक्ते दृष्टे जातो धनी भवेत्  १०

**10. Should Moon be in Cancer identical with Lagna and be conjunct with, or receiving a Aspect from Mercury and Jupiter, one will be wealthy.**

भौमक्षेत्रे गते लग्ने तस्मिन् भौमेन संयुते
सौम्यशुक्रार्कजैर्युक्ते दृष्टे श्रीमान्नरो भवेत्  ११

**11. Should Mars be in Lagna identical with his own Rāśi and be conjunct with, or receiving a Aspect from Mercury, Venus and Saturn, the native will be rich.**

बुधक्षेत्रगते लग्ने तस्मिन् बुधयुते सति
शनिजीवयुते दृष्टे जातो धनयुतो भवेत्  १२

**12. Should Mercury's Rāśi be Lagna with Mercury therein and should Mercury be conjunct with, or receiving a Aspect from Saturn and Jupiter, the native will be rich.**

गुरुक्षेत्रगते लग्ने तस्मिन् गुरुयुते सति
बुधभौमयुते दृष्टे जायते धनवान्नरः  १३

**13. Should Jupiter be in Lagna identical with his own Rāśi and be conjunct with, or receiving a Aspect from Mercury and Mars , the native will be rich.**

भृगुक्षेत्रगते लग्ने तस्मिन् भृगुयुते सति

शनिसौम्ययुते दृष्टे यो जातः स धनी भवेत्  १४

**14. If Venus happens to be in Lagna identical with his own Rāśi and be conjunct with, or receiving a Aspect from Saturn and Mercury, one will be wealthy.**

शनिक्षेत्रगते लग्ने तस्मिन् शनियुते सति
भौमेन गुरुणा युक्ते दृष्टे जातो धनैर्युतः  १५

**15. If Saturn is in his own Rāśi identical with Lagna and receiving a Aspect from, or being conjunct with Mars and Jupiter, the native will be wealthy.**

धनदौ धर्मधीनाथौ ये वा ताभ्यां युता ग्रहाः
तेऽपि स्वस्वदशाकाले धनदा नाऽत्र संशयः  १६

**16. Other Qualified Planets. 9ths Lord and 5ths Lord are capable of bestowing wealth. Similarly Planets, conjunct with 9ths Lord and/or 5ths Lord are capable of bestowing wealth. There is no doubt, that these Planets will give wealth during their Dasha periods.**

ग्रहाणामुक्तयोगेषु क्रूरसौम्यविभागतः
बलाबलविवेकेन फलमूह्यं विचक्षणैः  १७

**17. The Yogas, mentioned above (up to Sloka 16) should be delineated after knowing favourable, or unfavorable dispositions of the participant Planets and their strength and weakness.**

केन्द्रेशः पारिजातस्थस्तदा दाता भवेन्नरः
उत्तमे ह्युत्तमो दाता गोपुरे पुरुषत्वयुक्  १८

सिंहासने भवेन्मान्यः शूरः पारावतांशके
सभाध्यक्षो देवलोके ब्रह्मलोके मुनिर्मत
ऐरावतांशके तृष्टो दिग्योगो नैव जायते  १९

**18-19. Effects of the Divisional Dignities of the Lords of Kendras. If the Lord of a Kendra is in Parijatāńśa, the native will be liberal, if in Uttamāńśa, will be highly liberal, if in Gopurāńśa, will be endowed with prowess, if in Simhasanāńś, will be honourable, if in Paravatāńśa, will be valorous, if in Devalokāńśa, will be head of an assembly, if in Brahmalokāńśa, will be a sage and, if in Iravatāńśa, will be delighted and be celebrated in all quarters.**

पारिजाते सुताधीशे विद्या चैव कुलोचिता
उत्तमे चोत्तमा ज्ञेया गोपुरे भुवनांकिता २०

सिंहासने तथा वाच्या साचिव्येन समन्विता
पारावते च विज्ञेया ब्रह्मविद्या द्विजोत्तम २१

सुतेशे देवलोकस्थे कर्मयोगश्च जायते
उपासना ब्रह्मलोके भक्तिस्त्वरावतांशके २२

**20-22. Effects of the Divisional Dignities of 5ths Lord. If 5ths Lord is in Parijatāńś, the native will take to the branch of learning, befitting his race, if in Uttamāńśa, will have excellent learning, if in Gopurāńśa, will receive world-wide honors, if in Simhasanāńś, will become a minister, if in also Paravatāńśa, will be endowed with Vedic Knowledge, if in Devalokāńśa, will be a 10th Yogi (performer of actions, worldly and religious rites), if in Brahmalokāńśa, will be devoted to the Lord and, if in Iravatāńśa, will be pious.**

धर्मेशे पारिजातस्थे तीर्थकृत्त्वत्र जन्मनि
पूर्वजन्मन्यपि ज्ञेयस्तीर्थकृच्चोत्तमांशके २३

गौपुरे मखकर्ता च परे चैवाऽत्र जन्मनि

सिंहासने भवेद्वीरः सत्यवादी जितेन्द्रियः २४

सर्वधर्मान् परित्यज्य ब्रह्मैकपदमाश्रितः
पारावते च परमो हंश्चैवात्र जन्मनि २५

लगुडी वा त्रिदराडी स्याद्देवलोके न संशयः
ब्रह्मलोके शक्रतदं याति कृत्वाऽश्वमेधकम् २६

ऐरावते तु धर्मात्मा स्वयं धर्मो भविष्यति
श्रीरामः कुन्तिपुत्राद्यो यथा जातो द्विजोत्तम २७

**23-27. Effects of the Divisional Dignities of 9ths Lord. If 9ths Lord is in P6thjatāńś, the native will visit holy places, if in Uttamāńśa, has been visiting holy places in the past births and he will do the same within this life-time, if in Gopurāńśa, will perform sacrificial rites, if in Simhasanāńś, will be mighty and truthful, conquerer of his senses and will concentrate only on the Brahman, giving up all religions, if in Paravatāńśa, will be the greatest of ascetics, if in Devalokāńśa, will be an ascetic, holding a cudgel (Lagudi), or he will be a religious mendicant, that has renounced all mundane attachments and carrying three long staves, tied together, in his right hand (Tridandin) and, if in Brahmalokāńśa, will perform Aswamedh Yagya (Horse Sacrifice) and will attain the state of Lord Indra, if in Iravatāńś, will be a synonym of dharma, or virtues just, as Lord Ram and Yudhishtira.**

विष्णुस्थानं च केन्द्रं स्याल्लक्ष्मीस्थानं त्रिकोणकम्
तदीशयोश्च सम्बन्धाद्राजयोगः पुरोदितः २८

**28. Lords of Kendras and Konaas Related. The Kendras are known, as Vishnu Sthanas (Houses of Lord Vishnu), while the Konaas are called Lakshmi Sthanas. If the Lord of a Kendra establishes a relationship with the Lord of a Konaa, a Raja Yoga is obtained.**

**(A sixth kind of relationship can also be extended in this context to Navāmśa positions, though there is no specific classic sanction for this. For example in the case of a Capricorn native Mars in the Navāmśa of Venus and Venus in the Navāmśa of Mars will confer a superior Raja Yoga. This form of relationship will be equally superior, like the first 3 relationships, mentioned in the earlier paragraph).**

पारिजाते स्थितौ तौ चेन्नृपो लोकानुरञ्जकः
उत्तमे चोत्तमो भूपो गजवाजिरथादिमान् २९

गोपुरे नृपशार्दूलः पूजितांध्रिर्नृपैर्भवेत्
सिंहासने चक्रवर्ती सर्वभूमिप्रपालकः ३०

अस्मिन् योगे हरिश्चन्द्रो मनुश्चैवोत्तमस्तथा
बलिर्वैश्वानरो जातस्तथान्ये चक्रवर्तिनः ३१

वर्तमानयुगे जातस्तथा राजा युधिष्ठिरः
भविता शालिवाहाद्यस्तथैव द्विजसत्तम ३२

पारावतांशकेऽप्येवं जाता मन्वादयस्तथा
विष्णोः सर्वेऽवताराश्च जायन्ते देवलोकके ३३

ब्रह्मलोके तु ब्रह्माद्या जायन्ते विश्वपालकाः
ऐरावतांशके जातः पूर्व स्वायंभुवो मनुः ३४

**29-34 Effects of the Divisional Dignities of Related Lords of Kendras and Lords of Konaas. If the Lord of a Kendra and the Lord of a Kona, having a relationship, as indicated in Sloka 28, happen to be in P6thjatāńś, the native will be king and will protect men, if in Uttamāńś, will be an excellent king, endowed with elephants, horses, ch6thots etc., if in Gopurāńś, will be a tiger of kings, honoured by other kings and, if in Leoasanāńś, will be an emperor, ruling over the entire earth. With the said Raja Yoga relationship of the said Planets in Leoasanāńś were born H6thsh Moon, Manu, Balai, Agni Deva and many emperors. In the present Yuga so born is Yudhishtira (9th Raja of Mahabharat). Salivahanas birth and that of others will also come with this Yoga. With such Lords, placed in Paravatāńś, Manu etc. were born. The Incarnations of Lord Vishnu took place, when such Lords were placed in Devalokāńś. With such Lords, placed in Brahmalokāńś, Lord Brahma was born and, placed in Iravatāńś, the Swayambhu Manu was born. (Manu is the first of the 14 Manus, identified, as the second creator, who produced the Prajapatis. To Manu the code of laws, Manu Smriti is ascribed).**

अथ दारिद्र्ययोगाध्यायः ४२
बहवो धनदा योगा श्रुतास्त्वत्तो मया मुने
दरिद्रजन्मदान् योगान् कृपया कथय प्रभो १

## Ch. 42. Combinations for Penury

**1. O Lord, you have stated many Yogas, related to acquisition of wealth. Please tell me such Yogas, causing utter poverty.**

लग्नेशे च व्ययस्थाने व्ययेशे लग्नमागते
मारकेशयुते दृष्टे निर्धनो जायते नरः २

**2. The native will be penniless, if Lagnas Lord is in 12th House, while 12ths Lord is in Lagna along with the Lord of a Maraka, or receives a Aspect from such a Planet.**

लग्नेशे षष्ठभावस्थे षष्ठेशे लग्नमागते
मारकेशेन युग्दृष्टे धनहीनः प्रजायते ३

**3. The native will be penniless, if Lagnas Lord is in 6th House, while 6ths Lord is in Lagna, conjunct with, or receiving a Aspect from a Maraka Lord.**

लग्नेन्दू केतुसंयुक्तौ लग्नपे निधनं गते
मारकेशयुते दृष्टे जातो वै निर्धनो भवेत् ४

**4. Should Lagna, or Moon be with Ketu, while Lagnas Lord is in 8th House, the person concerned will be penniless.**

षष्ठाष्टमव्ययगते लग्नपे पापसंयुते
धनेशे रिपुभे नीचे राजवंश्योऽपि निर्धनः ५

**5. If Lagnas Lord along with a malefic is in 6th, 8th, or 12th House, while 2nds Lord is in an enemy Rāśi, or in debilitation, even a native of royal scion will become penniless.**

त्रिकेशेन समायुक्ते पापदृष्टे विलग्नपे
शनियुक्तेऽधवा सौम्यैरदृष्टे निर्धनो नरः ६

**6. If Lagnas Lord is conjunct with the Lord of 6th, 8th, or 12th House, or with Saturn and, if Lagnas Lord is devoid of a Aspect from a benefic, the native will be penniless.**

मन्त्रेशो धर्मनाथश्च क्रमात् षष्ठव्ययस्थितौ
दृष्टौ चेन्मारकेशेन निर्धनो जायते नरः ७

**7. Should 5ths and 9ths Lords be, respectively, found in 6th and 12th House and receive a Aspect from Maraka Planets, the native will be penniless.**

पापग्रहे लग्नगते राज्यधर्माधिपौ विना
मारकेशयुते दृष्टे जातः स्यन्निर्धनो भवेत् ८

**8. If malefics, excepting the Lords of 10th and 9th House, happen to be in Lagna, associated with, or receiving a Aspect from Maraka Planets, one will become penniless.**

त्रिकेशा यत्र भावस्था तद्भावेशास्त्रिकस्थिताः
पापदृष्टयुता बालो दुःखाक्रान्तश्च निर्धनः ९

**9. Note the Planets, that are ruling the Rāśis, occupied by the Lords of 6th, 8th and 12th House. If the said dispositors are in such evil Houses in turn and are associated with, or receive a Aspect from malefics, the native will be miserable and indigent.**

चन्द्राक्रान्तनवांशेशो मारकेशयुतो यदि
मारकस्थानगो वाऽपि जातोऽत्र निर्धनो नरः १०

**10. The Lord of the Navāmśa, occupied by Moon, joining a Maraka Planet, or occupying a Maraka House, will make one penniless.**

लग्नेशलग्नभागेशौ रिष्फरन्ध्रारिगौ यदि
मारकेशयुतौ दृष्टौ जातोऽसौ निर्धनो नरः ११

**11. Should the Lord of the natal Lagna and that of the Navāmśa Lagna be conjunct with, or receive a Aspect from Maraka Planets, one will be penniless.**

शुभस्थानगताः पापाः पापस्थानगताः शुभाः
निर्धनो जायते बालो भोजनेन प्रपीडितः १२

**12. If inauspicious Houses are occupied by benefics, while auspicious Houses are occupied by malefics, the native will be indigent and will be distressed even in the matter of food.**

कोणेशदृष्टिहीना ये त्रिकेशैः संयुता ग्रहाः
ते सर्वे स्वदशाकाले धनहानिकराः स्मृताः १३

**13. A Planet, associated with one of the Lords of 6th, 8th and 12th House, being bereft of a Aspect from the Lord of a Kona, will in its Dasha periods cause harm to the natives financial aspects.**

कारकाद् वा विलग्नाद् वा रन्ध्रेरिष्फे द्विजोत्तम
कारकाङ्गपयोदृष्ट्या धनहीनः प्रजायते १४

**14. If the 8th/12th from Atma Karak, or 8th/12th House receive a Aspect from the Atma Karaks Navāmśa Lord and the Lord of Janma Lagna, the native will be bereft of wealth.**

कारकेशो व्ययं स्वस्मात् लग्नेशो लग्नतो व्ययम्
वीक्षते चेत् तदा बालो व्ययशीलो भवेद्ध्रुवम् १५

**15. The native will be a spendthrift, if the 12th from Atma Karak receives a Aspect from the dispositor of Atma Karak, or, if 12th House receives a Aspect from the Lord of Lagna.**

अथ दारिद्र्ययोगांस्त् कथयामि सभङ्गकान्
धनसंस्थौ तु भौमार्की कथितौ धननाशकौ १६

बुधेक्षितौ महावित्तं कुरुतो नात्र संशयः
निःस्वतां कुरुते तत्र रविर्नित्यं यमेक्षितः १७

महाधनयुतं ख्यातं शन्यदृष्टः करोत्यसौ
शनिश्चापि रवेर्दृष्ट्या फलमेवं प्रयच्छति १८

**16-18. Now I tell you some Yogas for poverty along with conditions of their nullifications. Should Mars and Saturn be together in 2nd House, the natives wealth will be destroyed. Should Mercury give a Aspect to Mars and Saturn in 2nd House, there will be great wealth. There is no doubt in it. Sun in 2nd House, receiving a Aspect from Saturn, will cause penury, while, if Sun is in 2nd House and does not receive a Aspect from Saturn, riches and fame will be obtained. The same effects (poverty) will be declared, if Saturn is in 2nd House, receiving a Aspect from Sun.**

अथायुर्दायाध्यायः ४३

धनाधनाख्ययोगौ च कथितौ भवता मुने
नराणामायुषो ज्ञानं कथयस्व महामते १

## Ch. 43. Longevity

**1. O Mahārśi Parashara, you have dealt with combinations for wealth and poverty. Kindly detail methods of ascertaining the life-span of human beings.**

साधु पृष्टं त्वया विप्र जनानां च हितेच्छया
कथयाम्यायुषो ज्ञानं दुर्ज्ञेयं यत् सुरैरपि २

आयुर्ज्ञानविभेदास्तु बहुभिर्बहुधोदिताः
तेषां सारांशमादाय प्रवदामि तवाऽग्रतः ३

**2-3. O Brahmin, for the benefit of mankind I narrate methods of ascertaining longevity. Knowing that longevity is difficult even for gods. Many exponents have laid down various methods of longevity calculations. Following is the summary of such schools of thought.**

स्वोच्चनीचादिसंस्थित्या ग्रहा आयुःप्रदायकाः
स्वस्ववीर्यवशैर्नैवं नक्षत्राणि च राशयः ४

पिण्डायुः प्रथमं तत्र ग्रहस्थितिवशादहम्
कथयामि द्विजश्रेष्ठ शृणुष्वेकाग्रमानसः ५

क्रमात् सूर्यादिखेटेषु स्वस्वोच्चस्थानगेष्विह
नन्देन्दवस्तत्त्वमितास्तिथयोऽर्काः शरेन्दवः ६

प्रकृत्यो विंशतिश्चाब्दा आयुःपिण्डाः प्रकीर्तिताः
नीचगेष्वेतदर्धञ्च ज्ञेयं मध्येऽनुपाततः ७

स्वच्चशुद्धौ ग्रहः शोध्यः षड्भादूनो भमण्डलात्
स्वपिण्डगुणितो भक्तो भादिमानेन वत्सराः ८

**4-8. Pindayu. The Planets contribute to longevity, according to their being in exaltation, or debilitation and also based on their strengths and weaknesses and positions in Ashvini etc. and in the various Rāśis. First of all Pindayu is based on the positions of the Planets. O Brahmin, listen carefully to what I say: 19, 25, 15, 12, 15, 21 and 20 are the number of years, contributed by the Planets, from Sun etc., when in exaltation. These are half of the above in debilitation. And, if the Planets are in between exaltation and debilitation, the rule of three process should be used. Deduct the actual position of the Planet from its deep exaltation point. If the product is less than 6 Rāśis, deduct it again from 12 Rāśis. The product concerned should be multiplied by the number of years allotted to the Planet and divided by 12 to get the Planets actual contribution.**

अस्तगस्तु हरेत्स्वार्ध विना शुक्रशनैश्चरौ
वक्रचारं विना त्र्यंशं शत्रुराशौ हरेद् ग्रहः ९

**9. Rectifications. Excepting Venus and Saturn, the contributions, made by others, should be halved, if they are eclipsed by Sun. One third should be reduced, if the Planet is in its inimical Rāśi. This does not apply to the one in retrogression (see Vakra Charam).**

सर्वार्धत्रिचतुःपञ्चषष्ठभागं क्रमाद् ग्रहः
व्ययाद्वामं स्थितः पापो हरेत् सौम्यश्च तद्दलम् १०

एकभे तु बहुष्वेको हरेत्स्वांशं बली ग्रहः
नाऽत्र क्षीणस्य चन्द्रस्य पापत्वं मुनिभिः स्मृतम् ११

**10-11. Deductions for Planets in the Visible Half of the Zodiac. Full, half, one third, one fourth, one fifth and one sixth are the deductions of contributions, made by malefics, placed in the visible half of the zodiac. Benefics in such cases lose only half of what malefics lose. Should there be more than one Planet in a House, the deduction, due to the strongest, will only prevail and not deductions, due to other Planets in that particular House. Waning Moon is a benefic for this purpose.**

लग्नांशलिप्तिका हत्वा प्रत्येकं विहगायुषा
भाज्या मण्डललिप्ताभिर्लब्धं वर्षादि शोधयेत् १२

स्वायुषो लग्नगे सूर्ये मङ्गले च शनैश्चरे

तदर्धं शुभसंदृष्टे पातयेद् द्विजसत्तम १३

**12-13. Malefics in Lagna. In case 1st House is occupied by malefics, adopt the following procedure. Convert Lagnas Sphuta into minutes of arc and multiply it by the years etc., contributed by the occupant, and divide by 21600. The years etc. so arrived be deducted from the respective contribution, which will be the net span, donated by the Planet. If there is benefics Aspect on Lagna, containing malefics, then the loss is only half.**

लग्नराशिसमाश्चाब्दा भागाद्यैरनुपाततः
मासादिका इतीच्छन्ति लग्नायुः केऽपि कोविदाः १४

लग्नादायोंऽशतुल्यः स्यादन्तरे चाऽनुपाततः
तत्पतौ बलसंयुक्ते राशितुल्यं च भाधिपे १५

**14-15. Lagnas Contribution. The number of years, contributed by Lagna, will correspond to the number of Rāśis it gained (from Aries), while the degrees Lagna has gained in the particular Rāśi will also correspondingly donate (30– = I year). If the Lagnas Lord in the Navāmśa is stronger than Lagnas Lord, then the contribution should be computed only based on the number of Navāmśaas gained (from Aries), otherwise the computation will be for the Rāśi Lagna.**

अथ विप्र निसर्गायुः खेटानां कथयाम्यहम्
चन्द्रारज्ञसितेज्यार्कशनीनां क्रमशोब्दका १६

एकद्वयंकनखा धृत्यः कृतिः पंचाशदेव हि
जन्मकालात् क्रमाज् ज्ञेया दशाश्चैता निसर्गजाः १७

**16-17. Nisargayu. O Brahmin, now I tell you about Nisargayu. 1, 2, 9, 20, 18, 20 and 50 are the years, allotted to Moon, Mars , Mercury, Venus, Jupiter, Sun and Saturn from the period of birth.**

अथांशायु सलग्नानां खेटानां कथयाम्यहम्
नवांशराशितुल्यानि खेटो वर्षाणि यच्छति १८

भादिं खगं खगैः सूर्यैर्हत्वा तद्भगणादिकम्
कृत्वाऽर्क्रशेषितं ज्ञेयमब्दाद्यंशायुषः स्फुटम् १९

**18-19. Aṅśayu. Now I will tell you about Aṅśayu contributions by Lagna and Planets. The years correspond to the number of Navāmśaas, counted from Aries. Multiply the longitude in question by 108. If the product exceeds 12, expunge multiples of 12 and consider the final product in Rāśis, degrees etc., as years, months etc.**

पिण्डायुरिव तत्रापि हानिं कुर्याद् विचक्षणः
अत्राऽपरो विशेषोऽपि कैम्चिद् विज्ञैरुदाहृतः २०

साधितायुः खगे स्वोच्चे स्वर्क्षे वा त्रिगुणं स्मृतम्
द्विगुणं स्वनवांशस्थे स्वद्रेष्काणे तथोत्तमे २१

उभयत्र गते खेटे कार्यं त्रिगुणमेव हि
हानिद्वयेऽर्धहानिः स्यादित्यायुः प्रस्फुटं नृणाम् २२

**20-22. The same reductions, as per Pindayu, apply to Aṅśayu as well; i.e. half for a combust Planet, one third for inimical placement and the ones, due for placements in the half of the zodiac, counted from the 12th backwards. Some scholars suggest further corrections for Aṅśayu, viz. to increase threefold the contribution of a Planet in exaltation, or in own House and double the contribution, if the contributor is in his own Navāmśa, or in his own Dreshkana. If doubling and trebling is warranted, only trebling be done. In case of reductions also only halving is to be done, if both halving and reducing a third are required. That is how the final life-span of men be understood.**

एवं संसाध्य चान्येषां हन्यात् स्वस्वपरायुषा
नृणां परायुषा भक्त्वा तेषामायुः स्फुटं भवेत् २३

**23. Longevity for Other Living Beings. For other living beings as well such computations can be made. The said figure should be multiplied by the figure, corresponding to its full span of life and divided by the figure, corresponding to the full span of life for human beings.**

अथायुः परमं वक्ष्ये नानाजातिसमुद्भवम्
अनन्तसंख्यं देवानामृषीणां च द्विजोत्तम २४

गृध्रोलूकशुकध्वांक्षसर्पाणां च सहस्रकम्
श्येनवानरभल्लुकमण्डूकानां शतत्रयम् २५

पंचशदुत्तरशतं राक्षसानां प्रकीर्तितम्
नराणां कुञ्जराणां च विंशोत्तरशतं तथा २६

द्वात्रिंशद् घोटकानाञ्च पंचविंशत् खरोष्ट्रयोः
वृषाणां महिषाणां च चतुर्विंशतिवत्सरम् २७

विंशत्यायुर्मयूराणां छागादीनां च षोडश
हंसानां पंचनव च पिकानां द्वादशाब्दकाः २८

शुनां पारावतानां च कुक्कुटानां समाष्टकम्
बुद्बुदाद्यण्डजानां च परायुः सप्तवत्सराः २९

**24-29. Full Life Span of Various Living Beings. Now Ill tell you about the full life-span figures for various living beings. Gods and sages enjoy endless life-span (in astronomical proportions, as against ordinary mortals). The full life-span of eagles, owls, parrots, crows and snakes is one thousand years. For falcon, monkey, bear and frog the full span of life is 300 years. Demons full life-span is 150 years, while it is 120 for human beings, 32 for horses, 25 for donkeys and camels, 24 for oxen and buffaloes, 20 for peacocks, 16 for goats and rams. 14 for swans, 12 for cuckoo, dog and dove, 8 for hens etc. and 7 for birds etc.**

यदेतदधुना प्रोक्तं त्रिधायुर्द्विजसत्तम
तेषु किञ्च कदा ग्राह्यमिति ते कथयाम्यहम् ३०

विलग्नपे बलोपेते शुभदृष्टेंश्शसम्भवभ्
रवौ पिंडोद्भवं ग्राह्यं चन्द्रे नैसर्गिकं तथा ३१

**30-31. Choice of Longevity. I have narrated 3 different methods of longevity. Listen to me about the choice among the three systems. According to which of the three, Lagna, Sun, or Moon is stronger than the other two, Aṅśayu, Pindayu, or Nisargayu should be, respectively, chosen.**

बलसाम्ये द्वयोर्योगदलमायुः प्रकीर्तितम्
त्रयाणां त्रियुतेस्त्र्यंशसमं ज्ञेयं द्विजोत्तम ३२

**32. Doubtful Cases. If two among Lagna, Sun and Moon gain equal strength, then longevity should be worked out, as per both systems and the average of both should be considered. If all the three are equally strong, the average of the three should be considered.**

अथाऽन्यदपि वक्ष्यामि शृणु त्वं द्विजसत्तम
कैश्चिल्लग्नाष्टमेशाभ्यां मन्देन्दुभ्यां तथैव च ३३

लग्नहोराविलग्नाभ्यां स्फुटमायुः प्रकीर्तितम्

आदौ लग्नाष्टमेशाभ्यां योगमेकं विचिन्तयेत् ३४

द्वितीयं मन्दचन्द्राभ्यां योगं पश्येद् द्विजोत्तम
लग्नहोराविलग्नाभ्यां तृतीयं परिचिन्तयेत् ३५

चरराशौ स्थितौ द्वौ चेत् तदा दीर्घमुदाहृतम्
एकः स्थिरेऽपरो द्वन्द्वे दीर्घमायुस्तथापि हि ३६

एकश्चरे स्थिरेऽन्यश्चेत् तदामध्यमुदाहृतम्
द्वौ वा द्वन्द्वे स्थितौ विप्र मध्यमायुस्तथापि च ३७

एकश्चरेऽपरो द्वन्द्वे द्वौ वा स्थिरगतौ तदा
जातकस्य तदाऽल्पायुर्ज्ञेयमेवं द्विजोत्तम ३८

योगत्रयेण योगाभ्यां सिद्धं यद् ग्राह्यमेव तत्
योगत्रयविसंवादे लग्नहोराविलग्नतः ३९

लग्ने वा सप्तमे चन्द्रे ग्राह्यं मन्देन्दुतस्तदा
ह्रासो वृद्धिश्च कक्ष्याया विचिन्त्या सर्वदा बुधैः ४०

**33-40. Other Clues to Longevity. O excellent of the Brahmins, I will now give you details of other methods in the matter of longevity, as under. This is based on the positions of Lagnas Lord, 8ths Lord, Saturn, Moon, natal Lagna and Hora Lagna. These six are grouped into three groups thus: the Lords of Lagna and of 8th House on the one hand, Saturn and Moon on the other hand and the natal Lagna and Hora Lagna on yet the other hand. Out of a group of two, if the two are in Movable Rāśis, long life is denoted. One in a Fixed Rāśi and the other in a Dual Rāśi will also bestow long life. One in a Movable Rāśi and the other in a Fixed Rāśi will give medium life. If both are in Dual Rāśis, then again medium life will be obtained. Short life is denoted, if one is in a Movable Rāśi, as the other is in a Dual Rāśi, or, if both are in Fixed Rāśis. The type of life, denoted by three, or two groups be only considered. If the three groups denote different scales, then the one, indicated by the pair of natal Lagna and Hora Lagna should be only considered. In case of three different indications, if Moon is in Lagna, or 7th House, then the one, indicated by the Saturn-Moon pair will only come to pass.**

दीर्घे योगत्रयेणैवं नखचन्द्रसमाब्दकाः
योगद्वयेन वस्वाशा योगैकेन रसांककाः ४१

मध्ये योगत्रयेणैवं खाष्टतुल्याब्दकाः स्मृताः
द्व्यगा योगद्वयेनाऽत्रयोगैकेनाब्धिषरिमताः ४२

अल्पे योगत्रयेणाऽत्रद्वात्रिंशन्मितवत्सराः
योगद्वयेन षट्त्रिंशत् योगैकेन च खाब्धयः ४३

एवं दीर्घसमाल्पेषु खाब्धयो रसवह्नयः
खण्डा दन्तमितास्तेभ्यः स्फुटमायुः प्रसाधयेत् ४४

**41-44. Further Cl6thfications. If long life is denoted by all the said three groups, the span is 120 years, if by two groups, it is 108 years and, if only by one group it is 91 years. If medium life is arrived at by three groups, it is 80 years, if indicated by 2 groups, it is 72 years and, if by one group, it is 64 years. If short life is denoted by the said three groups, it is only 32 years, if indicated by two groups, the life-span is 36 years and, if by one group, the life-span is 40 years. These are rectified, as under.**

पूर्ण राश्यादिगे चान्ते हानिर्मध्येऽनुपाततः
योगकारकखेटांशयोगस्तत्संख्यया हृतः ४५

लब्धांशास्तु यथाप्राप्तखण्डघ्नास्त्रिंशतोद्धृताः
लब्धवर्षादिभिर्हीनं प्राप्तायुः प्रस्फुटं भवेत् ४६

**45-46. Rectifications. If the contributor is in the beginning of a Rāśi, his donation will be full and it will be nil, if he is at the end of a Rāśi. For intermediary placements rule of three process will apply. Add the longitudes of the contributors and the sum so arrived at must be divided by the number of contributors. The latest product should be multiplied by the number of basic years and divided by 30. This will yield the net longevity.**

योगहेतौ शनौ कक्ष्याह्रासोऽन्यैर्वृद्धिरुच्यते
न स्वर्क्षतुङ्गगे नो वा पापमात्रयुतेक्षिते ४७

**47. Special Rule for Saturn. Should Saturn be a contributor, the class of longevity declines. Some advocate contr6thly an increase of class in this context. If Saturn is in its own Rāśi, or in exaltation, change in class will not occur. Even, if he receives a Aspect from, or is conjunct with only a malefic, no change occurs.**

लग्नसप्तमगे जीवे शुभमात्रयुतेक्षिते
कथितस्यायुषो विप्र कक्ष्यावृद्धिः प्रजायते ४८

**48. Special Rule for Jupiter. If Jupiter is in Lagna, or in 7th House and receives a Aspect from, or is conjunct with only benefics, the class of longevity will increase.**

अनायुश्चेद् भवेदल्पमल्पान्मध्यं प्रजायते
मध्यमाज्जायते दीर्घं दीर्घायुश्चेत्ततोऽधिकम् ४९

योगहेतौ गुरवेवं कक्ष्यावृद्धेश्च लक्षणम्
एतस्माद् वैपरीत्येन कक्ष्याह्रासः शनौ भवेत् ५०

**49-50. Increase and Fall in Class of Longevity. From very short life to short life, from short life to medium life, from medium life to long life and from long life to extremely long life are the increases in the classification of longevity, when Jupiter warrants an increase. The reverse is true, if Saturn warrants a fall in the span of life.**

ग्रायुषो बहुधा भेदाः कथिता भवताऽधुना
कतिधा सा कदाऽनायुरमितायुः कदा भवेत्  ५१

**51. (Maitreya says) You have narrated various kinds of longevity computations. Please favour me by denoting subtle classes thereof and poor and long life-spans.**

बालारिष्टं योगारिष्टमल्पं मध्यञ्च दीर्घकम्
दिव्यं चैवाऽमितं चैवं सप्तधायुः प्रकीर्तितम्  ५२

**52. (Mahārśi Parashara replies) These are seven-fold, viz. Bala Risht, Yoga Risht, short, medium, long, super-natural (Divya) and immortality (Amritayu).**

बालारिष्टे समा ग्रष्टौ योगारिष्टे च विंशतिः
द्वात्रिंशद् वत्सरा ग्रल्पे चतुष्षष्टिस्तु मध्यमे  ५३

विंशाधिकशतं दीर्घे दिव्ये वर्षसहस्रकम्
तदूर्ध्वममितं पुण्यैरमितैराप्यते जनैः  ५४

**53-54. The life-span in Bala Risht is 8 years, in Yoga Risht 20 years, in short, medium and long lives, respectively, 32, 64 and 120 years. Super-natural life-span is 1000 years. Above this super-natural life-span of 1000 years it is Amritayu, which can be acquired only by those, who deserve it.**

चन्द्रेज्यौ च कुलीरांगे ज्ञसितौ केन्द्रसंस्थितौ

ग्रन्ये त्र्यायारिगाः खेटा ग्रमितायुस्तदा भवेत्  ५५

**55. Limitless Longevity. Should Cancer be Lagna with Jupiter and Moon therein, while Venus and Mercury are in Kendras and others are in 3rd, 6th and 11th House, the native will obtain limitless longevity.**

सौम्याः केन्द्रत्रिकोणस्थाः पापास्त्र्यायारिगास्तथा
शुभराशौ स्थिते रन्ध्रे दिव्यमायुस्तदा भवेत्  ५६

**56. Super-Natural Longevity. One having benefics in Kendras and/or Konaas, while malefics are in 3rd, 6th and 11th House will obtain super-natural life-span. 8th House in this case should be one of the Rāśis, owned by a benefic.**

गोपुरांशे गुरौ केन्द्रे शुक्रे पारावतांशके
त्रिकोणे कर्कटे लग्ने युगान्तायुस्तदा द्विज   ५७

**57. Living until the End of the Yuga. One born in Cancer Lagna will live till the end of the Yuga, if Jupiter is in a Kendra and happens to be in Gopurāńś, while Venus is in a Kona and happens to be in Paravatāńś.**

देवलोकांशके मन्दे कुजे पारावतांशके
गुरौ सिंहासनांशेऽङ्गे जातो मुनिसमो भवेत्  ५८

**58. Living the Life-Span of a Sage. Jupiter in Leoasanāńś, being in Lagna, Saturn in Devalokāńś and Mars in Paravatāńś. If these are so, one will enjoy the life-span, as due to a sage.**

सुयोगैर्वर्ध्यते ह्यायुः कुयोगैर्हीयते तथा
ग्रतो योगानहं वक्ष्ये पूर्णमध्याल्पकारकान्  ५९

**59. Good Yogas increase the life-span and bad Yogas decrease the same. Hence I tell you such Yogas, as to know of full, medium and short span combinations.**

केन्द्रे शुभग्रहैर्युक्ते लग्नेशे च शुभान्विते
सन्दृष्टे गुरुणा वाऽपि पूर्णमायुयुस्तदा भवेत्  ६०

**60. If a Kendra contains a benefic, while Lagnas Lord is conjunct with, or receives a Aspect from a benefic, or Jupiter in particular, the native will live a full span of life.**

केन्द्रस्थिते विलग्नेशे गुरुशुक्रसमन्विते
ताभ्यां निरीक्षिते वाऽपि पूर्णमायुर्विनिर्दिशेत् ६१

**61. Should Lagnas Lord be in a Kendra conjunct with, or receiving a Aspect from Jupiter and Venus, full life-span will result.**

उच्चस्थितैस्त्रिभिः खेटैर्लग्नरन्ध्रशसंयुतैः
अष्टमे पापहीने च पूर्णमायुर्विनिर्दिशेत् ६२

**62. If at birth three Planets are exalted, out of which the Lords of Lagna and 8th House are inclusive, as 8th House is devoid of a malefic in it, full life-span will result.**

अष्टमस्थैस्त्रिभि खेटैः स्वोच्चमित्रस्ववर्गगैः
लग्नेशे बलसंयुक्ते दीर्घमायुस्तदा भवेत् ६३

**63. Long life is denoted, if three Planets are in 8th House, in exaltation, own, or friendly divisions, while Lagnas Lord is strong.**

स्वभोच्चस्थेन केनापि नभोगेन समन्वितः
अष्टमेशः शनिर्वापि दीर्घमायुर्विनिर्दिशेत् ६४

**64. If Saturn, or Lagnas Lord is conjunct with any exalted Planet, long life will result.**

त्रिषडायगतैः पापैः शुभैः केन्द्रत्रिकोणगैः
लग्नेशे बलसंयुक्ते दीर्घमायुर्विनिर्दिशेत् ६५

**65. Long life will be enjoyed, if malefics are in 3rd, 6th and 11th House, while benefics are in Kendras.**

षट्सप्तरन्ध्रभवेषु शुभखेटयुतेषु च
त्रिभवेषु च पापेषु पूर्णमायुर्विनिर्दिशेत् ६६

**66. If 6th, 7th and 8th House are occupied by benefics, while malefics are in 3rd and 11th House, full life-span will follow the birth.**

शत्रुव्ययगताः पापा लग्नेशो यदि केन्द्रगः
रविमित्रं च रन्ध्रेशः पूर्णमायुस्तथापि हि ६७

**67. If 8ths Lord is friendly to Sun, while malefics are in 6th and 12th House, as Lagnas Lord is in a Kendra, the native will live the full span of life.**

आयुः स्थानस्थिताः पापाः कर्मेशः स्वोच्चगो यदा
तथापि दीर्घमायु स्याद् विज्ञेयं द्विजसत्तम ६८

**68. O excellent of the Brahmins, if a malefic is in 8th House, while 10ths Lord is exalted, one will be long-lived.**

द्विस्वभावगृहे लग्ने लग्नेशे केन्द्रसंस्थिते
स्वोच्चराशित्रिकोणे वा दीर्घमायुर्विनिर्दिशेत् ६९

**69. Long life will follow, if Lagna is a Dual Rāśi, while Lagnas Lord is in a Kendra, or in exaltation, or in a Kona.**

द्विस्वभावगृहे लग्ने लग्नेशाद् बलसंयुतात्
द्वौ पापौ यदि केन्द्रस्थौ दीर्घमायुस्तदा भवेत् ७०

**70. Should Lagna be a Dual Rāśi, while two malefics are in a Kendra with reference to a strong Lagnas Lord, long life is indicated.**

लग्नाष्टमेशयोर्मध्ये यः खेटः प्रबलो भवेत्
तस्मिन् केन्द्रगते दीर्घ मध्यं पणफरस्थिते ७१

आपोक्लिमे स्थिते स्वल्पमायुर्भवति निश्चितम्
लग्नेशे च रवेर्मित्रे दीर्घमायुः समे समम् ७२

शत्रौ स्वल्पं वदेदित्थमष्टमेशादपि स्मृतम्
मित्रमध्याऽरिभावस्थे तस्मिन्नेवं फलं वदेत् ७३

71-73. If the stronger among Lagnas Lord and 8ths Lord is placed in a Kendra, long life is indicated and, if in a Panaphara, medium life is indicated, if in Apoklima, short life will come to pass. According to Lagnas Lord being friendly, neutral, or inimical to Sun, long, medium, or short life will result.

सहजाधीशभूपुत्रौ द्वौ रन्ध्रेशशनैश्चरौ
अस्तौ वा पापदृग्युक्तौ स्वल्पमायुः प्रयच्छतः ७४

74. Should Mars and 3rds Lord, or 8ths Lord and Saturn be combust, or be conjunct with malefics, or receive a Aspect from malefics, there will be short life.

षष्ठेऽष्टमे व्यये वाऽपि लग्नेशे पापसंयुते
स्व पायुरनपत्यो वा शुभदृग्योगवर्जिते ७५

75. If Lagnas Lord is in 6th, 8th, or 12th House, conjunct with malefics and devoid of Conjunct with and/or Aspect from a benefic, short life will come to pass.

चतुष्टयगते पापे शुभदृष्टिविवर्जिते

बलहीने विग्लनेशे स्वल्पमायुर्विनिर्दिशेत् ७६

76. If malefics are in Kendras, devoid of Conjunct with, or a Aspect from benefics, while Lagnas Lord is not strong, only short life will result.

व्ययार्थौ पापसंयुक्तौ शुभदृग्योगवर्जितौ
स्वल्पमायुस्तदा ज्ञेयं निर्विशंकं द्विजोत्तम ७७

77. O excellent of Brahmins, if 12th and 2nd House are occupied by malefics and devoid of a Aspect from a benefic, or of Conjunct with a benefic, the native will be short-lived.

लग्नरन्ध्रेशयोरेवं दुःस्थयोर्बलहीनयोः
स्वल्पमायुर्बुधैर्ज्ञेयं मिश्रयोगाच्च मध्यमम् ७८

78. If the Lords of Lagna and 8th House are bereft of dignities and strength, short life will come to pass. If the Lords of Lagna and 8th House are helped by others, while being so, medium life-span will come to pass.

अथ मारकभेदाध्यायः ४४

बहुधाऽऽयुर्भवा योगाः कथिता भवताऽधुना
नृणां मारकभेदाश्च कथ्यन्तां कृपया मुने १

## Ch. 44. Maraka Planets

**1. O Mahārśi Parashara, you have mentioned a lot about longevity. Be kind enough to throw light on Marakas, or killers.**

तृतीयमष्टमस्थानमायुःस्थानं द्वयं द्विज
मारकं तद्व्ययस्थानं द्वितीयं सप्तमं तथा २

तत्रापि सप्तमस्थानाद् द्वितीयं बलवत्तरम्
तयोरीशौ तत्र गताः पापिनस्तेन संयुताः ३

ये खेटाः पापिनस्ते च सर्वे मारकसंज्ञकाः
तेषां दशाविपाकेषु सम्भवे निधनं नृणाम् ४

अल्पमध्यमपूर्णायुः प्रमाणमिह योगजम्
विज्ञाय प्रथमं पुंसां मारकं परिचिन्तयेत् ५

**2-5. O Brahmin, 3rd and 8th House are the two Houses of longevity. The Houses, related to death, are the 12th from each of these, i.e. 2nd and 7th House are Maraka Houses. Out of the two, 2nd House is a powerful Maraka House. The Lords of 2nd and 7th House, malefics in 2nd and 7th House and malefics, conjunct with 2nds Lord and conjunct with 7ths Lord are all known, as Marakas. The major and sub-periods of these Planets will bring death on the native, depending on whether he is a long life, medium life, or short life person.**

अलाभे पुनरेतेषां सम्बन्धेन व्ययेशितुः
क्वचिच्छुभानां च दशास्वष्टमेशदशासु च ६

केवलानां च पापानां दशासु निधनं क्वचित्
अल्पनीयं बुधैर्नृणां मारकाणामदर्शने ७

सत्यपि स्वेन सम्बन्धे न हन्ति शुभभुक्तिषु
हन्ति सत्यप्यसम्बन्धे मारकः पापभुक्तिषु ८

**6-8. The Dasha of a benefic Planet, related to 12ths Lord may also inflict death. End may descend on the native in 8ths Lords Dasha. The Dasha of a Planet, which is an exclusive malefic, may also cause death.**

मारकग्रहसम्बन्धान्निहन्ता पापकृच्छनिः
अतिक्रम्येतरान् सर्वान् भवत्यत्र न संशयः ९

**9. Should Saturn be ill-disposed and be related to a Maraka Planet, he will be the first to kill in preference to other Planets.**

अथाऽन्यदपि वक्ष्यामि द्विज मारकलक्षणम्
त्रिविधाश्चायुषो योगाः स्वल्पायुर्मध्यमोत्तमाः १०

द्वाविंशात् पूर्वमल्पायुर्मध्यमायुस्ततः परम्
चतुष्षष्ट्याः पुरस्तात् तु ततो दीर्घमुदाहृतम् ११

उत्तमायुः शतादूर्ध्वं ज्ञातव्यं द्विजसत्तम
जनैर्विंशतिवर्षान्त्यमायुर्ज्ञातुं न शक्यते १२

जपहोमचिकित्साद्यैर्बालरक्षां हि कारयेत्
म्रियन्ते पितृदोषैश्च केचिन्मातृग्रहैरपि १३

केचित् स्वारिष्टयोगाच्च त्रिविधा बालमृत्यवः
ततः परं नृणामायुर्गणयेद् द्विजसत्तम १४

**10-14. O Brahmin, I tell you further about Marakas. Narrated earlier are three kinds of life-spans, viz. short, medium and long. Short life is before 32 years, later on up to 64 it is medium life and from 64 to 100 it is long life. Beyond 100 the longevity is called supreme. O excellent of the Brahmins, it is impossible to decide upon longevity till the native is 20 years old. Till such year the child should be protected by sacred recitations, religious offerings (of Ghī etc.) to consecrated fire, as prescribed in the Vedas etc. and through medical treatments, for premature death may descend on the child due to sins of father and mother, or of its own (in the previous birth).**

अथाऽन्यदपि वक्ष्यामि नृणां मारकलक्षणम्
अल्पायुर्योगजातस्य विपभे च मृतिर्भवेत् १५

मध्यायुर्योगजस्यैवं प्रत्यरौ च मृतिर्भवेत्
दीर्घायुर्योगजातस्य वधभे तु मृतिर्भवेत् १६

द्वाविंशत्र्यंशपश्चैव तथा वैनाशिकाधिपः
विपत्ताराप्रत्यरीशा वधभेशंस्तथैव च १७

आद्यान्तपौ च विज्ञेयौ चन्द्राक्रान्तगृहाद् द्विज
मारकौ पापखेटौ तौ शुभौ चेद्रोगदौ स्मृतौ १८

षष्ठाधिपदशायां च नृणां निधनसम्भवः
षष्ठाष्टरिष्फनाथानामपहारे मृतिर्भवेत् १९

मारका बहवः खेटा यदि वीर्यसमन्विताः
तत्तद्दशान्तरे विप्र रोगकष्टादिसंभवः २०

उक्ता ये मारकास्तेषु प्रबलो मुख्यमारकः
तदवस्थानुसारेण मृतिं वा कष्टमादिशेत् २१

**15-21. I further mention about the Maraka Planets. One born with short life combinations may face death in the Dasha, denoted by Vipat star (3rd from the birth star), one of medium life may die in the Dasha, denoted by Pratyak star (5th from the birth star). In the Dasha, denoted by Vadh star (7th from the birth star), one with long life may obtain his end. The Dasha of the Lord of the 22nd Dreshkana, or 23rd, or 3rd, or 5th, or 7th asterisms may also cause death. The Lords of the 2nd and the 12th, counted from Cancer, may bring death. This is true, when Moon is a malefic. If he happens to be a benefic, there will be diseases (not death). Death may come to pass in the Dasha of 6ths Lord and in the subperiods of 6ths, 8ths and/or 12ths Lords. Should there be many Marakas and, if these Marakas are strong, there will be diseases, miseries etc. in major and sub-periods. Thus these are Marakas and are prim6thly related to bring death upon the native. According to their dispositions there may be death, or difficulties.**

रहुश्चेदथवा केतुर्लग्ने कामेऽष्टमे व्यये
मारकेशान्मदे वाऽपि मारकेशेन संयुतः २२

मारकः स च विज्ञेयः स्वदशान्तर्दशास्वपि
मकरे वृश्चिके जन्म राहुस्तस्य मृतिप्रदः २३

षष्ठाऽष्टरिष्फगो राहुस्तद्द्ये कष्टदो भवेत्
शुभग्रहयुतो दृष्टो न तदा कष्टकृन्मतः २४

**22-24. <u>Rahu and Ketu, as Marakas</u>. If Rahu, or Ketu are placed in 1st, 7th, 8th, or 12th House, or happen to be in the 7th from a Maraka Lord, or are placed with such a Planet, they acquire powers of killing in their major, or sub-periods. For one born in Capricorn, or in Scorpio, Rahu will be a Maraka. Should Rahu be in 6th, 8th, or 12th House, he will give difficulties in his Dasha periods. He will not, however, do so, if Rahu receives a Aspect from, or is conjunct with a benefic.**

लग्नात् तृतीयभावे तु बलिना रविणा युते
राजहेतुश्च मरणं तस्य ज्ञेयं द्विजोत्तम २५

त्रितीये चेन्दुना युक्ते दृष्टे वा यक्ष्मणा मृतिः
कुजेन व्रणशस्त्राग्निदाहाद्यैर्मरणं भवेत् २६

तृतीये शनिराहुभ्यां युक्ते दृष्टेऽपि वा द्विज
विषार्तितो मृतिर्वाच्या जलाद्वा वह्निपीडनात् २७

गर्तादुच्चात् प्रपतनाद् बन्धनाद् वा मृतिर्भवेत्
तृतीये चन्द्रमान्दिभ्यां युक्ते वा वीक्षिते द्विज २८

कृमिकुष्ठादिना तस्य मरणं भवति ध्रुवम्

तृतीये बुधसंयुक्ते वीक्षिते वापि तेन च २९

ज्वरेण मरणं तस्य विज्ञेयं द्विजसत्तम
तृतीये गुरुणा युक्ते दृष्टे शोफादिना मृतिः ३०

तृतीये भृगुयुग्दृष्टे मेहरोगेण तन्मृतिः
बहुखेटयुते तस्मिन् बहुरोगभवा मृतिः ३१

**25-31. <u>3rd House and Death.</u> O excellent of Brahmins, if Sun, being with strength, is in 3rd House, one will obtain his death, due to a king (legal punishments). Moon in 3rd House will cause death, due to tuberculosis, while wounds, weapons, fire and thirst will cause death through Mars in 3rd House. If 3rd House receives a Aspect from, or is occupied by Saturn and Rahu, death will be through poison, water, or fire, or fall from heights, or confinement. Death will surely come to descend through insects, or leprosy, if Moon and Gulika occupy, or give a Aspect to 3rd House. Mercury, giving a Aspect to, or occupying 3rd House, will bring death, followed by fever. Jupiter in 3rd House, or giving a Aspect to 3rd House, will cause death by swelling, or tumors. Urinary diseases will cause death, if Venus is in, or gives a Aspect to 3rd House. Many Planets, giving a Aspect to, or occupying 3rd House, will bring death through many diseases.**

तृतीये च शुभैर्युक्ते शुभदेशे मृतिर्भवेत्
पापैश्च कीकटे देशे मिश्रैर्मिश्रस्थले मृतिः ३२

**32. If 3rd House is occupied by a benefic, death will be in an auspicious place (like a shrine) and, if 3rd House is occupied by a malefic, death will be in sinful places. Mixed occupation of 3rd House will yield mixed results with regard to the place of death.**

तृतीये गुरुशुक्राभ्यां युक्ते ज्ञानन वै मृतिः
अज्ञानेनाऽन्यखेटैश्च मृतिर्ज्ञेया द्विजोत्तम ३३

**33. Consciousness will prevail at the time of death, if Jupiter, or Venus are placed in 3rd House. With other Planets in 3rd House there will be unconsciousness before death.**

चरराशौ तृतीयस्थे परदेशे मृतिर्भवेत्
स्थिरराशौ स्वगेहे च द्विस्वभावे पथि द्विज ३४

**34. According to 3rd House being a Movable, a Fixed, or a Dual Rāśi, death will be, respectively, in a foreign place (other than native birth place), in ones own house, or on the way.**

लग्नादष्टमभावाच्च निमित्तं कथितं बुधैः
सूर्येऽष्टमेऽग्नितो मृत्युश्चन्द्रे मृत्युर्जलेन च ३५

शास्त्राद् भौमे ज्वराज् ज्ञे च गुरौ रोगात् क्षुधा भृगौ
पिपासया शनौ मृत्युर्विज्ञेयो द्विजसत्तम ३६

**35-36. <u>Occupants of 8th House</u>. Note the occupant of 8th House. If it is Sun, death will be through fire, if Moon is in 8th House, through water, if Mars , through weapons, if Mercury, through fever, if Jupiter, through diseases, if Venus, through hunger and, if Saturn, through thirst.**

अष्टमे शुभदृग्युक्ते धर्मपे च शुभैर्युते
तीर्थे मृतिस्तदा ज्ञेया पापाख्यैरन्यथा मृतिः ३७

**37. If 8th House is occupied by, or receives a Aspect from a benefic, while 9ths Lord is conjunct with a benefic, the native will die in a shrine. If 8th House is occupied by, or receives a Aspect from a malefic, while 9ths Lord is conjunct with a malefic, death will be in a place, other than a shrine.**

अग्न्यम्बुमिश्रभत्र्यंशैर्ज्ञेयो मृत्युर्गृहाश्रितैः
परिणामः शवस्याऽत्र भस्मसंक्लेदशोषकैः ३८

व्यालवर्गदृकाणैस्तु विडम्बो भवति ध्रुवम्
शवस्य श्वशृगालाद्यैर्गृध्रकाकादिपक्षिभिः ३९

**38-39. <u>Fate of the Human Physical System</u>. Should there be a benefics Dreshkana in 8th House (22nd Dreshkana), the body will be burnt in fire (as prescribed in Shastras). If a malefics Dreshkana happens to be in 8th House, the body will be thrown away in water. If the Dreshkana in 8th House is owned by a mixed Planet, the dead body will only dry up. If the Dreshkana in 8th House is a serpent Dreshkana, the body will be eaten away by animals, crows etc.**

कर्कटे मध्यमोऽन्त्यश्च वृश्चिकाद्यद्वितीयकौ
मीनेऽन्तिमस्त्रिभागश्च व्यालवर्गाः प्रकीर्तिताः ४०

**40. <u>Serpent Dreshkanaas</u>. The 2nd and 3rd Dreshkana in Cancer, the initial one in Scorpio and the last one in Pisces are designated, as serpent Dreshkanaas.**

रविश्चन्द्रबलाक्रान्तत्र्यंशनाथे गुरौ जनः
देवलोकात् समायातो विज्ञेयो द्विजसत्तम ४१

शुक्रेन्द्वोः पितृलोकात्तु मर्त्याच्च रविभौमयोः
बुधाऽऽर्क्योर्नरकादेवं जन्मकालाद् वदेत् सुधिः ४२

**41-42<u>. Pre-natal Abode</u>. O excellent of Brahmins, the stronger of the two lumin6thes, Sun and Moon, occupying a Dreshkana of Jupiter, denotes the descent from the world of gods. If the stronger of the lumin6thes occupies the Dreshkana of Venus, or Moon, the descent is from the world of the Manes, if the stronger of the two lumin6thes is in the Dreshkana of Sun, or Mars , the descent is from the world of Yama (world of the death) and, if in Dreshkana of Mercury, or Saturn, the descent is from the hell.**

गुरुश्चन्द्रसितौ सूर्यभौमौ ज्ञार्की यथाक्रमम्
देवेन्दुभूम्यधोलोकान् नयन्त्यस्तारिरन्ध्रगाः ४३

अथ तत्र ग्रहाभावे रन्ध्रारित्र्यंशनाथयोः
यो बली स निजं लोकं नयत्यन्ते द्विजोत्तम ४४

तस्य स्वोच्चादि संस्थित्या वरमध्याऽधमाः क्रमात्
तत्तल्लोकेऽपि सञ्जाता विज्ञेया द्विजसत्तम ४५

**43-45. Ascent after Death. According to the following Planets in 12th, 7th, 6th, or 8th House, the native will attain one of the different worlds after death: Jupiter heaven, Moon, or Venus the world of Manes, Mars and/or Sun earth (rebirth), Mercury and/or Saturn hell. In case the said Houses are not occupied, the native will go to the world, indicated by the stronger of the Dreshkana Lords, related to 6th and 8th House. The relative Planets exaltation etc. will denote the high, medium and low status the native will obtain in the said world.**

अन्यान् मारकभेदांश्च राशिग्रहकृतान् द्विज
दशाध्यायप्रसंगेषु कथयिष्यामि सुव्रत ४६

**46. Other Planets and Rāśis, becoming Marakas, are being discussed in the chapter, related to Dashas.**

अथ ग्रहावस्थाध्यायः ४५
अवस्थावशतः प्रोक्तं ग्रहाणां यत् फलं मुने
का साऽवस्था मुनिश्रेष्ठ कतिधा चेति कथ्यताम् १

## Ch. 45. Avasthas of Planets

**1. O Mahārśi Parashara, you have earlier stated, that the Avasthas, or states of the Planets are to be considered in the context of the effects of the Planets. Be so kind to tell me about this.**

अवस्था विविधाः सन्ति ग्रहाणां दिवजसत्तम
सारभूताश्च यास्तासु बालाद्यास्ता वदाम्यहम् २

**2. O excellent of Brahmins, various kinds of Avasthas of the Planets have been expounded. Out of these, I will give you the summary of Baal (infant) and other states of the Planets.**

क्रमाद् बालः कुमारोऽथ युवा वृद्धस्तथा मृतः
षडंशैरसमे खेटः समे ज्ञेयो विपर्ययात् ३

**3. Baal, Kumar, Yuv, Vriddh and Mrit Avastha (Baal Adi Avasthas). Infant, youthful, adolescent, old and dead are the states of the Planets, placed in the ascending order at the rate of six degrees in odd Rāśis. In the case of even Rāśis this arrangement is in reverse order. (Vriddh - Advanced, Mrit - In extremis)**

फलं पादमितं बाले फलार्धं च कुमारके
यूनि पूर्णं फलं ज्ञेयं वृद्धे किञ्चित् मृते च खम् ४

**4. Results. One fourth, half, full, negligible and nil are the grades of the results, due to a Planet in infant, youthful, adolescent, old and dead Avasthas.**

स्वभोच्चयोः समसुहृद्धयोः शत्रुभनीचयोः
जाग्रत्स्वप्नसुषुप्त्याख्या अवस्था नामदृक्फलाः ५

**5. Awakening, Dreaming and Sleeping States. If a Planet is in its own Rāśi, or in exaltation, it is said to be in a state of awakening (alertness). In the Rāśi of a friend, or of a neutral it is in dreaming state, while in an enemy Rāśi, or in debilitation it is in a state of sleeping.**

जागरे च फलं पूर्णं स्वप्ने मध्यफलं तथा
सुषुप्तौ तु फलं शून्यं विज्ञेयं द्विजसत्तम ६

**6. According to a Planet, being in Awakening, Dreaming, or Sleeping states, the results, due to it will be full, medium, or nil.**

दीप्तः स्वस्थः प्रमुदितः शान्तो दीनोऽथ दुःखितः
विकलश्च खलः कोऽपीत्यवस्था नवधाऽपराः ७

**7. Other Kinds of States. There are nine kinds of other Avasthas, viz. Deepta, Swastha, Pramudit, Shanta, Din, Vikala, Dukhita, Khal and Kop.**

स्वोच्चस्थः खेचरो दीप्तः स्वर्क्षे स्वस्थोऽधिमित्रभे
मुदितो मित्रभे शान्तः समभे दीन उच्यते ८

शत्रुभे दुःखितः प्रोक्तो विकलः पापसंयुतः
खलः खलगृहे ज्ञेयः कोपी स्यादर्कसंयुतः ९

यादृशो जन्मकाले यः खेटो यद्भावगो भवेत्
तादृशं तस्य भावस्य फलमूह्यं द्विजोत्तम १०

**8-10. If a Planet is in its exaltation Rāśi, it is in Deepta Avastha, if in its own Rāśi, it is in Swastha, if in a great friends Rāśi, it is in Pramudit, if in a friendly Rāśi, it is in Shanta, if in a neutral Rāśi, it is in Din, if a Planet is conjunct with a malefic, it is in Vikala, if is in an enemy Rāśi, it is in Dukhita, if in a great enemy Rāśi, it is in Khal and, if a Planet is being eclipsed by Sun, it is in Kop. Depending on such a state of the Planet, the House, occupied by it will obtain corresponding effects.**

लज्जितो गर्वितश्चैव क्षुधितस्तृषितस्तथा
मुदितः क्षोभितश्चैव ग्रहभावाः प्रकीर्तिताः ११

पुत्रगेहगतः खेटो राहुकेतुयुतोऽथवा
रविमन्दकुजैर्युक्तो लज्जितो ग्रह उच्यते १२

तुङ्गस्थानगतो वाऽपि त्रिकोणेऽपि भवेत्पुनः
गर्वितः सोऽपि गदितो निर्विशंकं द्विजोत्तम १३

शत्रुगेही शत्रुयुक्तो रिपुदृष्टो भवेद्यदि

क्षुधितः स च विज्ञेयः शनियुक्तो यथा तथा १४

जलराशौ स्थितः खेटः शत्रुणा चाऽवलोकितः
शुभग्रहा न पश्यन्ति तृषितः स उदाहृतः १५

मित्रगेही मित्रयुक्तो मित्रेण च विलोकितः
गुरुणा सहितो यश्च मुदितः स प्रकीर्तितः १६

रविणा सहितो यश्च पापा पश्यन्ति सर्वथा
क्षोभितं तं विजानीयाच्छत्रुणा यदि वीक्षितः १७

येषु येषु च भावेषु ग्रहास्तिष्ठन्ति सर्वथा
क्षुधितः क्षोभितो वापि तद्भावफलनाशनः १८

**11-18. Yet other Avasthas. Lajjita, Garvita, Kshudhita, Trushita, Mudita and Kshobhita are the other kinds of Avasthas, due to the Planets. Placed in 5th House, if a Planet is associated with Rahu, or Ketu, or with Sun, Saturn, or Mars , it is in Lajjita Avastha. If a Planet is in exaltation, or in MoolatriKonaa, it is Garvita. If a Planet is in an enemy Rāśi, or conjunct with an enemy, or receives a Aspect from an enemy, or even, if a Planet is conjunct with Saturn, the Avastha is Kshudhita. If a Planet is in a watery Rāśi and receives a Aspect from a malefic, but does not receive a Aspect from a benefic, the Avastha is called Trushita. If a Planet is in a friendly Rāśi, or is conjunct with, or receives a Aspect from a benefic, or is conjunct with Jupiter, it is said to be in Mudita Avastha. If a Planet is conjunct with Sun and receives a Aspect from, or is conjunct with a malefic, or receives a Aspect from an enemy, it is said to be in Kshobhita. The Houses, occupied by a Planet in Kshudhita, or in Kshobhita, are destroyed.**

एवं क्रमेण बोद्धव्यं सर्वभावेषु पण्डितैः
बलाऽबलविचारेण वक्तव्यः फलनिर्णयः १९

अन्योन्यं च मुदा युक्तं फलं मिश्रं वदेत्पुनः
बलहीने तदा हानिः सबले च महाफलम् २०

कर्मस्थाने स्थितो यस्य लज्जितस्तृषितस्तथा
क्षुधितः क्षोभितो वापि स नरो दुःखभाजनम् २१

सुतस्थाने भवेद्यस्य लज्जितो ग्रह एव च
सुतनाशो भवेत्तस्य एकस्तिष्ठति सर्वदा २२

क्षोभितस्तृषितश्चैव सप्तमे यस्य वा भवेत्
म्रियते तस्य नारी च सत्यमाहुर्द्विजोत्तम २३

**19-23. The learned should estimate the effects, due to a House, in the manner, cited above, after ascertaining the strength and weakness. Weak Planets cause reduction in good effects, while stronger ones give greater effects. If a Planet, posited in 10th House, is in Lajjita, Kshudhita Avastha, or Kshobhita Avastha, the person will always be subjected to miseries. If a Planet in 5th is in Lajjita, there will be destruction of progeny, or there will be only one surviving child. Surely the wife of the native will die, if there is a Planet in 7th in Kshobhita, or in Trushita Avastha.**

नवालयारामसुखं नृपत्वं कलापटुत्वं विदधाति पुंसाम्
सदार्थलाभं व्यवहारवृद्धिं फलं विशेषादिह गर्वितस्य २४
भवति मुदितयोगे वासशालाविशाला
विमलवसनभूषाभूमियोषासु सौख्यम्
स्वजनजनविलासो भूमिपागारवासो
रिपुनिवहविनाशो बुद्धिविद्याविकाशः २५

दिशति लज्जितभाववशाद्रतिं विगतराममतिं विमतिक्षयम्
सुतगदागमनं गमनं वृथा कलिकथाभिरुचिं न रुचिं शुभे २६

संक्षोभितस्यापि फलं विशेषाद्दरिद्रजातं कुमतिं च कष्टम्
करोति वित्तक्षयमंघ्रिबाधां धनाप्तिबाधामवनीशकोपात् २७

क्षुधितखगवशाद्वै शोकमोहादिपातः
परिजनपरितापादाधिभीत्या कृशत्वम्
कलिरपि रिपुलोकैरर्थबाधा नराणा
मखिलबलनिरोधो बुद्धिरोधो विषादात् २८

तृषितखगभवे स्वादंगनासंगमध्ये
भवति गदविकारो दुष्टकार्याधिकारः
निजजनपरिवादादर्थहानिः कृशत्वं
खलकृतपरितापो मानहानिः सदैव २९

**24-29. Effects of Garvita, Mudita, Lajjita, Kshobhita, Kshudhita and Trushita Avastha. A Planet in Garvita Avastha will cause happiness through new houses and gardens, regalhood, skill in arts, financial gains at all times and improvement in business. A Planet in Mudita Avastha will give residences, clothes, ornaments, happiness from lands and wife, happiness from relatives, living in royal places, destruction of enemies and acquisition of wisdom and learning. A Planet in Lajjita will give aversion to God, loss of intelligence, loss of child, interest in evil speeches and listlessness in good things. A Planet in Kshobhita will give acute penury, evil disposition, miseries, financial debacles, distress to feet and obstruction to income, due to royal wrath. A Planet in Kshudhita will cause downfall, due to grief and passion, grief on account of relatives, physical decline, troubles from enemies, financial distress, loss of physical strength and an eclipsed mind, due to miseries. A Planet in Trushita Avastha will cause diseases through association with females, leading over wicked deeds, loss of wealth, due to ones own men, physical weakness, miseries, caused by evil people and decline of honour.**

शयनं चोपवेशं च नेत्रपाणिप्रकाशनम्
गमनागमनं चाऽथ सभायां वसतिं तथा ३०

आगमं भोजनं चैव नृत्यं लिप्सां च कौतुकम्
निद्रां ग्रहाणां चेष्टां च कथयामि तवाग्रितः ३१

यस्मिन्नृक्षे भवेत्खेटस्तेन तं परिपूरयेत्
पुनरंशेन सम्पूर्य स्वनक्षत्रं नियोजयेत् ३२

यातदण्डं तथा लग्नमेकीकृत्य सदा बुधः
रविभिस्तु हरेद् भागं शेषं कार्ये नियोजयेत् ३३

नाक्षत्रिकदशारीत्या पुनः पूरणमाचरेत्
नामाद्यस्वरसंख्याढ्यं हर्तव्यं रविभिस्ततः ३४

रवौ पञ्च तथा देयाश्चन्द्रे दद्याद्द्वयं तथा
कुजे द्वयं च संयुक्तं बुधे त्रीत्रि नियोजयेत् ३५

गुरौ बाणाः प्रदेयाश्च त्रयं दद्याच्च भार्गवे
शनौ त्रयमथो देयं राहौ दद्याच्चतुष्टयम् ३६

त्रिभिर्भक्तं च शेषांकैः सा पुनस्त्रिबिधा स्मृता
दष्टिश्चेष्टा विचेष्टा च तत्फलं तथयाम्यहम् ३७

**<u>30-37. Calculation of Shayan Adi Avasthas.</u> Now I will tell you of the Avasthas, viz. Shayan, Upavesana, Netrapani, Prakasha, Gamana, Agaman, Shubh, Agama, Bhojana, Nritya Lips, Kautuka and Nidra and the Chesthas of such Avasthas. Note the number of the star, occupied by the Planet, for which an Avastha is to be calculated. Multiply that number by the number, denoted by the Planet (Sun 1 to Saturn 7). The figure so arrived at should again be multiplied by the number of the Navāmśa, where the Planet is in. Add to this the number of the birth asterism (ruling star, the one, occupied by Moon), the number of Ghatis of birth and the number of Rāśis, Lagna gained from Aries (Aries 1, Taurus 2 and so forth). This figure should be divided by 12 and the remainder will indicate the corresponding Avastha of the Planet. The sub-state in the said Avastha can be found out in the following way. Multiply the figure (Sayana 1 to Nidra 12), denoted by the Avastha concerned, by the same figure and increase it by the figure, denoted by the Anka value for the first syllable of the natives personal name. Divide the product so obtained by 12. The remainder thereof should be further increased by constant additives of the Planets in the following way: Sun 5, Moon 2, Mars 2, Mercury 3, Jupiter 5, Venus 3, Saturn 3, Rahu (Ketu) 4. The product so arrived at should be divided by 3. In the process of calculation, if it happens, that the remainder is 1, it is Aspect, if 2, it is Cheshta and, if 0, it is Vicheshta.**

**<u>Notes.</u> Shayan Adi are of supreme importance, as compared to the other kinds of Avasthas.**

**In place of Navāmśa, given above, some translators interpret the word Ańśa, as degree, occupied by the Planet, which is obviously not correct. In this connection the readers attention is drawn to Balaabhadrs Hora Ratna, Ch. 3, wherein the author, Balaabhadra himself, gives an example for Sun, being in the 7th Navāmśa of Leo and thus he considered only 7, as multiplier. He quotes Adhibhut Sagara, as his authority for calculation of Sayana Adi.**

**Agaman Avastha is known, as Gamanechch by some exponents.**

**Anka value is 1 for a, ka, cha, da, dha, bha and va, 2 for i, kha, ja, dha, na, ma and da, 3 for u, ga, jha, ta, pa, ya and śa, 4 for e, gha, ga, tha, pha, ra and sa, 5 for o, ca, dha, da, ba, la and ha.**

दृष्टौ मध्यफलं ज्ञेयं चेष्टायां विपुलं फलम्
विचेष्टायां फलं स्वल्पमेवं दृष्टिफलं विदुः ३८

शुभाऽशुभं ग्रहाणां च समीक्ष्याऽथ बलाऽबलम्
तुङ्गस्थाने विशेषेण बलं ज्ञेयं तथा बुधैः ३९

**38-39. <u>Effects of Chesht etc</u>. If the sub-state is Aspect in an Avastha, the results, being stated for the Avastha, will be medium, the effects will be full in Chesht and negligible in Vichesht. The good and bad effects of Planets should be deciphered, based on the strength and weakness of the Planets. In exaltation the Planets reveal effects in a pronounced manner, due to Avasthas.**

मन्दाग्निरोगो बहुधा नराणां स्थूलत्वमनङ्ग घ्रेरपिपित्तकोपः
व्रणं गुदे शूलमुरःप्रदेशे यदोष्णभानुः शयनं प्रयातः ४०

दरिद्रताभारविहाराशाली विवादविद्याभिरतो नरः स्यात्
कठोरचित्तः खलु नष्टवित्तः सूर्यो यदा चेदुपवेशनस्थः ४१

नरः सदानन्दधरो विवेकी परोपकारी बलवित्तयुक्तः
महासुखी राजकृपाभिमानी दिवाधिनाथो यदि नेत्रपानौ ४२

उदारचित्तः परिपूर्णवित्तः सभासु वक्ता बहुपुष्यकर्ता
महाबली सुन्दररूपशाली प्रकाशने जन्मनि पदिमनीशे ४३

प्रवासशाली किल दुःखमाली सदालसी धीधनवर्जितश्च
भयातुरः कोपपरो विशेषाद्दिवाधिनाथे गमने मनुष्यः ४४

परदाररतो जनतारहितो बहुधागमने गमनाभिरुचिः
खलताकुशलो मलिनो दिवसाधिपतौ मनुजः कुमतिः कृपणः ४५

सभागते हिते नरः परोपकारतत्परः
सदार्थरत्नपूरितो दिवाकरे गुणाकरः
वसुन्धरानवांबरालयान्वितो महाबली
विचित्रमित्रवत्सलः कृपाकलाधरः परः ४६

च्चोभितो रिपुगणैः सदा नरश्चञ्चलः खलमतिः कृशस्तथा
धर्मकर्मरहितो मदोद्धतश्चागमे दिनपतौ तदा तदा ४७

सदाङ्गसन्धिवेदनापराङ्गनाधनच्चयो
बलच्चयः पदे पदे यदा यदा हि भोजने
असत्यता शिरोव्यथा तथा वृथान्नभोजनं
रवावसत्कथारतिः कुमार्गगामिनी मति ४८

विज्ञलोकैः सदा मण्डितः पण्डितः काव्यविद्यानवद्यप्रलापान्वितः
राजपूज्यो धरामण्डले सर्वदा नृत्यलिप्सागते पद्मिनीनायके ४९

सर्वदानन्दधर्ता जनो ज्ञानवान् यज्ञकर्ता धराधीशसद्मस्थितः
पद्मबन्धावरातेर्भयं स्वाननः काव्यविद्याप्रलापी मुदा कौतुके ५०

निद्राभरारक्तनिभे भवेतां निद्रागते लोचनपद्मयुग्मे
रवौ विदेशे वसतिर्जनस्य कलत्रहानिः कातिधार्थनाशः ५१

**40-51. <u>Effects of Sun's Avasthas</u>. If Sun is in Sayana Avastha, the native will incur digestive deficiency, many diseases, stoutness of legs, bilious vitiation, ulcer in the anus and heart strokes; if in Upavesana, will suffer poverty, will carry loads, will indulge in litigations, be hard-hearted, wicked and will lose in his undertakings; if is in Netrapani, will always be happy, wise, helpful to others, endowed with prowess and wealth, very happy and will gain royal favours; if in Prakasha, will be liberal in disposition, have plenty of wealth, be a significant speaker in the assembly, will perform many meritorious acts, be greatly strong and endowed with charming beauty; if in Gamana, will be disposed to live in foreign places, be miserable, indolent, bereft of intelligence and wealth, be distressed, due to fear and will be short-tempered; if in Agaman, will be interested in others wives, be devoid of his own men, be interested in movements and skilful in doing evil deeds, be dirty, ill-disposed and will be a talebearer; if in Shubh, will be disposed to help others, be always endowed with wealth and gems, be virtuous, endowed with lands, new houses and robes, be very strong, very affectionate to his friends and very kindly disposed; if in Agama, will be distressed, due to enemies, fickle-minded, evil-minded, emaciated, devoid of virtuous acts and intoxicated with pride; if in Bhojana, will experience pains in joints, will lose money on account of others females, will have strength, declining off and on, be untruthful, will incur head-aches, eat remnant food and will take to bad ways; if in Nritya Lips, will be honoured by the learned, be a scholar, will have knowledge of poetry etc. and will be adored by kings on the earth; if is Kautuka, will always be happy, will be endowed with Vedic Knowledge and will perform Yagyas, will move amidst kings, have fear from enemies, will be charming-faced and be endowed with knowledge of poetry; if in Nidra, will have a strong tendency towards being drowsy, will live in foreign (distant) places, will incur harm to his wife and will face financial destruction. Sun in Upavesana will make one an artisan, black in complexion, devoid of learning and miserable. One will serve others. In Netrapani there will be all kinds of happiness, if Sun is in 5th, 9th, 10th, or 7th. In other Houses Netrapani of Sun will give eye diseases and enmity with all. If Sun is in Prakasha, the native will be meritorious, religious and liberal, will enjoy pleasures, be equal to a prince and will enjoy the status of Kubera, the God of wealth. However, the Prakasha of Sun, placed in 7th, or 5th will cause loss of the first child and will produce many litigations. If Sun is in Gamana, the native will incur disease of the feet and will be very mean. If in Agaman, Sun in 12th, or in 7th will destroy progeny and will give very limited wealth. If in Agama, Sun will give many miseries, an ugly appearance and foolishness. However, he will give wealth. Sun in Bhojana in 9th will cause many hindrances to spiritual and religious undertakings. In other Houses Sun in Bhojana will cause head and ear diseases, apart from joint pains. Though**

**Mahārśi Parashara states, that the native with Sun in Kautuka Avastha will have fear from enemies, Bala Bhadr exempts such evil effect for the 6th House position. Sun in Kautuka in other Houses will give a number of daughters, two wives, itch, excellence, liberality etc. If Sun is in Nidra, the native will be predisposed to incur piles and elephantiasis, will experience a lack of peace and he will be liable to lose his first child.**

जानुःकाले क्षपानाथे शयनं चेदुपागते
मानी शीतप्रधानश्च कामी वित्तविनाशकः ५२

रोगार्दितो मन्दमतिर्विशेषाद्वित्तेन हीनो मनुजः कठोरः
अकार्यकारी परवित्तहारी क्षपाकरे चेदुपवेशनस्थे ५३

नेत्रपाणौ क्षपानाथे महारोगी नरो भवेत्
अनल्पजल्पको धूर्तः कुकर्मनिरतः सदा ५४

यदा राकानाथे गतवति विकाशं च जनने
विकाशः संसारे विमलगुणराशेरवनिपात्
नवाशामाला स्यात्करितुरगलक्ष्म्या परिवृता
विभूषा योषाभिः सुखमनुदिनं तीर्थगमनम् ५५

सितेतरे पापरतो निशाकरे विशेषतः क्रूरकरो नरो भवेत्
सदाक्षिरोगैः परिपीड्यमानो वलक्षपक्षे गमने भयातुरः ५६

विधावागमगे मानी पादरोगी नरो भवेत्
गुप्तपापरतो दीनो मतितोषविवर्जितः ५७

सकलजनवदान्यो राजराजेन्द्रमान्यो
रतिपतिसमाकान्तिः शान्तिकृत्कामिनीनाम्
सपदि सदसि याते चारुबिम्बे शशंके
भवति परमरीतिप्रीतिविज्ञो गुणज्ञः ५८

विधावागमके मर्त्यो वाचालो धर्मपूरितः
कृष्णपक्षे द्विभार्यः स्याद्रोगी दुष्टतरो हठी ५९

भोजने जनुषि पूर्णचन्द्रमा मानयानजनतासुखं नृणाम्
आतनोति वनितासुतासुखं सर्वमेव न सितेतरे शुभम् ६०

नृत्यलिप्सागते चन्द्रे सबले बलवान्नरः
गीतज्ञो हि रसज्ञश्च कृष्णे पापकरो भवेत् ६१
कौतुकभवनं गतवति चन्द्रे भवति नृपत्वं वा धनपत्वम्
कामकलासु सदा कुशलत्वं वारवधूरतिरमणपटुत्वम् ६२

निद्रागते जन्मनि मानवानां कलाधरे जीवयुते महत्त्वम्
हीनेऽङ्गनासञ्चितवित्तनाशः शिवालये रौति विचित्रमुच्चैः ६३

**52-63. <u>Effects of Moon's Avasthas</u>. If Moon is in Sayana, the native will be honourable, sluggish, given to sexual lust and he will face financial destruction; if in Upavesana, will be troubled by diseases, be dull-witted, not endowed with mentionable wealth, will be hard-hearted, will do unworthy acts and will steal others wealth; if in Netrapani, will be troubled by great diseases (long lasting in nature), be very garrulous, wicked and will indulge in bad deeds. Should Moon be in Prakasha, the native will be famous in the world, will have his virtues exposed through royal patronage, will be surrounded by horses, elephants, females and ornaments, will visit shrines. If Moon is in Gamana with decreasing rays, the native will be sinful, cruel and always troubled by afflictions of sight. If Moon is in Gamana with increasing rays, the native will be distressed, due to fear. If Moon is in Agaman, the native will be honourable, will suffer diseases of the feet,**

**will secretly indulge in sinful acts, will be poor and devoid of intelligence and happiness; if in Shubh, will be eminent among men, honoured by kings and kings of kings, will be very beautiful, will subdue the passion of women and will be skilful in sexual acts, will be virtuous; if in Agama, will be garrulous and virtuous and, if the said Moon is of dark fortnight, the native will have two wives, he will be sick, highly wicked and violent; if in Bhojana, will be endowed with honour, conveyances, attendants, social status, wife and daughters, provided Moon is Full Purna; if in Bhojana and is of dark fortnight, auspicious effects will fail to come; if in Nritya Lips and is endowed with (fortnightly) strength, will be strong, will have knowledge of songs and will be a critic of beauty of things; if in Nritya Lips and of dark fortnight, i.e. not endowed with strength, the person will be sinful; if in Kautuka, the native will attain kingship, lordship over wealth and skill in sexual acts and in sporting with harlots. Should waxing Moon, being conjunct with Jupiter, be in Nidra, the native will be quite eminent. If waxing Moon is in Nidra, but devoid of Jupiter's Conjunct, the native will lose his wealth on account of females and female jackals will be crying around his abode (as though it were a cemetery).**

शयने वसुधापुत्रे व्रणयुक्तो जनो भवेत्
बहुना कण्डुना युक्तो दद्रुणा च विशेषतः ६४

बली सदा पापरतो नरः स्यादसत्यवादी नितरां प्रगल्भः
धनेन पूर्णो निजधर्महीनो धरासुतश्चेदुपवेशनस्थः ६५

यदा भूमिसुतो लग्ने नेत्रपाणिमुपागतः
दरिद्रता तदा पुंसामन्यभे नगरेशता ६६

प्रकाशो गुणस्यापि वासः प्रकाशे धराधीशभर्तुः सदा मानवृद्धिः
सुते भूसुते पुत्रकान्तावियोगो भवेद्राहुणा दारुणो वा निपातः ६७

गमने गमनं कुरुतेऽनुदिनं व्रणजालभयं वनिताकलहः
बहुदद्रुककण्डुभयं बहुधा वसुधातनयो वसुहानिकरः ६८

आगमने गुणशाली मणिमालीवा करालकरवाली
गजहन्ता रिपुहन्ता परिजनसन्तापहारको भौमे ६९

तुङ्गे युद्धकलाकलापकुशलो धर्मध्वजो वित्तपः
कोणे भूमिसुते सभामुपगते विद्याविहीनः पुमान्
अन्तेऽपत्यकलत्रमित्ररहितः प्रोक्तेतरस्थानगे
ऽवश्यं राजसभाबुधो बहुधनी मानी च दानी जनः ७०

आगमे भवति भूमिजे जनो धर्मकर्मरहितो गदातुरः
कर्णमूलगुरुशूलरोगवानेव कातरमतिः कुसङ्गमी ७१
भोजने मिष्टभोजी च जनने सबले कुजे
नीचकर्मकरो नित्यं मनुजो मानवर्जितः ७२

नृत्यलिप्सागते भूसुते जन्मिनामिन्दिराराशिरायाति भूमीपतेः
स्वर्नरत्नप्रवालैः सदा मण्डिता वासशाला नराणां भवेत्सर्वदा ७३

कौतुकी भवति कौतुके कुजे मित्रपुत्रपरिपूरितो जनः
उच्चगे नृपतिगेहमण्डितः पूजितो गुणवरैर्गुणाकरैः ७४

निद्रावस्थां गते भौमे क्रोधी धीधनवर्जितः
धूर्तो धर्मपरिभ्रष्टो मनुष्यो गदपीडितः ७५

64 75. <u>Effects of the Avasthas of Mars</u> . If Mars is in Sayana, the native will be troubled by wounds, itch and ulcer. If Mars is placed in Upavesana, the native will be strong, sinful, untruthful, eminent, wealthy and bereft of virtues. If Mars is placed in Lagna and happens to be in Netrapani, there will be penury; if placed in other Houses, Netrapani will confer rulership of a city. Should Mars be in Prakasha, the native will shine with virtues and will be honoured by the king. Mars in Prakasha in 5th will cause loss of children and of wife. If Mars is in Prakasha in 5th and happens to be there with Rahu, a severe (positional) fall will descend on the native. Should Mars be in Gamana, the native will be always roaming, will have fear of multiple ulcers, will incur misunderstandings with females, will be afflicted by boils, itches etc. and will incur financial decline. If Mars happens to be in Agaman Avastha, the native will be virtuous, endowed with precious gems, will adore a sharp sword, will walk with the gait of an elephant, will destroy his enemies and will remove the miseries of his people. If Mars is placed in Shubh and happens to be in exaltation, the native will be skilful in conducting wars, will hold the flag of righteousness aloft and will be wealthy; if Mars happens to be in Shubh in 5th, or 9th, the native will be bereft of learning; if Mars is in Shubh in 12th, childlessness and no wife and no friends will result; if Mars is in other Houses in Shubh, the native will be a scholar in a kings court (poet laureate), be very wealthy, honourable and ch6thtable. If Mars is in Agama, the native will be devoid of virtues and good deeds, will be distressed by diseases, will acquire diseases of the root of the ears (Karan Mularogam & Padamulam Urumulam etc.) and severe gout pains, will be timid and will befriend evil lot. If Mars is with strength, while in Bhojana Avastha, the native will eat sweet-food; if devoid of strength, will indulge in base acts and be dishonourable. If Mars is in Nritya Lips, the native will earn wealth through the king and will be endowed with fullness of gold, diamonds and corals in his house; if in Kautuka, will be curious in disposition and will be endowed with friends and sons; if in Kautuka and simultaneously exalted, will be honoured by the king and the virtuous and will be virtuous himself; if in Nidra, will be short-tempered, devoid of intelligence and wealth, will be wicked, fallen from virtuous path and troubled by diseases. Should Mars be in Upavesana in Lagna, the native will be extremely sinful and he will incur several diseases, will be indigent and not peaceful. If Upavesana occurs for Mars in 9th, the native will lose his whole wealth apart from his wife and progeny. Mars in Netrapani in Lagna will give poverty and will destroy the natives wife and progeny; if Mars is in Netrapani in other Houses, this confers on the native all kinds of wealth and happiness from wife and children. The 2nd, or 7th position of Mars in Netrapani will cause fear from lions and snakes apart from giving earnings from lands. Furthermore the natives wife will predecease him. Should Mars be in Prakasha in 5th, or in 7th, the native will lose his wife and all children. If Mars is placed in 5th in Prakasha and is conjunct with Saturn, the native will kill cows. Should Mars be in Gamana in Lagna, the native will be active in his assignments, will incur diseases of the joints, burning pains in the eyes and will obtain dental afflictions and the like, he will have fear from dogs and will adore the guise of a female. In other Houses Mars in Gamana will bring royal favours, leadership and luxuries of life. Mars in Agaman will cause piles and diseases of the rectum. If Mars is in Bhojana, or in Sayana in 5th, or in 8th, there will be untimely death for the native. In other Houses Bhojana of Mars will confer wealth. Should Mars be in Nritya Lips and happens to be in Lagna, 2nd, 7th, or 10th, the native will receive all kinds of happiness; there will be miseries in abundance, if Mars is in Nritya Lips and placed in 8th, or 9th, apart from incurring untimely death. In other Houses Nritya Lips of Mars will make the native akin to Kubera. Mars in 7th, or in 9th in Kautuka will give several diseases and death of the first child and wife. In other Houses Kautuka will confer scholarship, various kinds of wealth, two wives and more female children. In Nidra Mars in Lagna, 2nd, 3rd, 9th, 10th, or 11th will give scholarship, foolishness and poverty. 5th, or 7th placement of Mars in Nidra will give many miseries and many male children. Should Rahu join Mars in Nidra in any House, the native will have many wives, be miserable and will suffer from some diseases on the surface of the feet.

क्षुधातुरो भवेदंगे खञ्जो गुञ्जानिभेक्षणः
अन्यभे लम्पटो धूर्तो मनुजः शयने बुधे ७६

शशांकपुत्रे जनुरङ्गगेहे यदोपवेशे गुणराशिपूर्णः
पापेक्षिते पापयुते दरिद्रो हिते शुभे वित्तसुखी मनुष्यः ७७

विद्याविवेकरहितो हिततोषहीनो मनी
जनोभवति चन्द्रसुतेऽक्षि पाणौ
पुत्रालये सुतकलत्रसुखेन हीनः कन्या
प्रजा नृपतिगेहबुधो वरार्थः ७८

दाता दयालुः खलु पुण्यकर्ता विकाशने चन्द्रसुते मनुष्यः
अनेकविद्यार्णवपारङ्गता विवेकपूर्णः खलवर्गहन्ता ७९

गमनागमने भवतो गमने बहुधा वसुधाधिपतेर्भवने
भवनं च विचित्रमलं रमया विदि नुश्च जनुःसमये नितराम् ८०

सपदि विदि जनानामुच्चगे जन्मकाले
सदसि धनसमृद्धिः सर्वदा पुण्यवृद्धिः

धनपतिसमता वा भूपता मंत्रिता वा
हरिहरपदभक्तिः सात्त्विकी मुक्तिलब्धिः ८१

आगमे जनुषि जन्मिनां यदा चन्द्रजे भवति हीनसेवया
अर्थसिद्धिरपि पुत्रयुग्मता बालिका भवति मानदायिका ८२

भोजने चन्द्रजे जन्मकाले यदा जन्मिनानर्थहानिः सदा वादतः
राजभीत्या कृशत्वंचलत्वं मतेरङ्गसङ्गो न जाया न जायासुखम् ८३

नृत्यलिप्सागते चन्द्रजे मानवो मानयानप्रवालव्रजैः संयुतः
मित्रपुत्रप्रतापैः सभापण्डितः पापभे वारवामारतो लम्पटः ८४

कौतुके चन्द्रजे जन्मकाले नृणामंगभे गीतविद्याऽनवद्या भवेत्
सप्तमे नैधने वारवध्वा रतिः पुण्यभे पुण्ययुक्ता मतिः सद्गतिः ८५

निद्राश्रिते चन्द्रसुते न निद्रासुखं सदा व्याधिसमाधियोगः
सहोत्थवैकल्यमनल्पतापो निजेन वादो धनमाननाशः ८६

**76-86. Effects of Mercury's Avasthas. Should Mercury in Sayana be in Lagna, the native will be lame and will have reddish eyes (like the black bee); if Mercury is in Sayana in other Houses, the native will be addicted to licentious (disregarding certain rules) pleasures and be wicked. If Mercury is in Upavesana in Lagna, the native will possess (the seven principle) virtues; if Mercury in Upavesana is in Lagna, receiving a Aspect from a malefic, or Aspects from malefics, or is conjunct with malefics, penury will result; if Mercury in Upavesana is in Lagna, receiving a Aspect from a benefic, or Aspects from benefics, or is conjunct with benefics, financial happiness will follow. If Mercury is in Netrapani, the native will be devoid of learning, wisdom, well wishers and satisfaction, but he will be honourable; if Mercury is in 5th in Netrapani, the subject will be bereft of happiness from wife and sons, will be endowed with (more) female children and will gain abundant finance through royal patronage. If Mercury is in Prakasha, the native will be charitable, merciful and meritorious, he will cross the boundaries of ocean in respect of many branches of learning, he will be endowed with the great faculty of discrimination and will destroy evil people; if in Gamana, will visit the courts of kings on many occasions and Goddess Lakshmi will dwell in his abode; if in Agaman, the same effects, due to his being in Gamana, will fructify; if in Shubh and happens to be in exaltation, will be affluent and meritorious at all times, will be equal to Kubera, or will be a king, or a minister, will be devoted to Lord Vishnu and Lord Shiva, will be virtuous and will attain full enlightenment. Should Mercury be in Agama, the native will serve base men and will gain wealth thereby, will have two sons and one fame bringing daughter. If Mercury is in Bhojana, the native will face financial losses through litigations, will physically lose on account of fear from the king, will be fickle-minded and will be bereft of physical and conjugal felicity; if in Nritya Lips, will be endowed with honour, conveyances, corals (gems etc.), sons, friends, prowess and recognition in assembly, due to his scholarship; if Mercury in Nritya Lips Avastha is in a malefics Rāśi, the native will be addicted to prostitutes and will long for licentious pleasures. If Mercury is in Kautuka in Lagna, the native will be skilful in music; if Mercury is in 7th, or 8th with Kautuka, the native will be addicted to courtezans; if Mercury in Kautuka is placed in 9th, the native will be meritorious and attain heavens after death. If Mercury is in Nidra, the native will not enjoy comfortable sleep, will be afflicted by neck, or neck joint Samadhi diseases, will be devoid of co-born, afflicted by miseries galore, will enter into litigations with his own men and will lose wealth and honour.**

वचसामधिपे तु जनुःसमये शयने बलवानपि हीनरवः
अतिगौरतनुः खलुदीर्घहनुः सुतरामरिभीतियुतो मनुजः ८७

उपवेशं गतवति यदि जीवे वाचालो बहुगर्वपरीतः
क्षोणीपतिरिपुजनपरितप्तः पदजंघास्यकरव्रणयुक्तः ८८

नेत्रपाणिं गते देवराजार्चिते रोगयुक्तो वियुक्तो वरार्थश्रिया
गीतनृत्यप्रियः कामुकः सर्वदा गौरवर्णो विवर्णोद्भवप्रीतियुक् ८९

गुणानामानन्दं विमलसुखकन्दं वितनुते
सदा तेजःपुञ्जं व्रजपतिनिकुञ्जं प्रतिगमम्

प्रकाशं चेदुच्चे द्रुतमुपगतो वासवगुरु

गुरुत्वं लोकानां धनपतिसमत्वं तनुभृताम् ९०

साहसी भवति मानवः सदा मित्रवर्गसुखपूरितो मुदा
पण्डितो विविधवित्तमण्डितो देवविद्यदि गुरौ गमं गते ९१

आगमने जनता वरजाया यस्य जनुःसमये हरिमाया
मुञ्चति नालमिहालयमद्धा देवगुरौ परितः परिबद्धा ९२

सुरगुरुसमवक्ता शुभ्रमुक्ताफलाढ्यः
सदसि सपदि पूर्णो वित्तमाणिक्यमानैः
गजतुरगरथाढ्यो देवताधीशपूज्यो
जनुषि विविधविद्यागर्वितो मानवः स्यात् ९३

नानावाहनमानयानपटलीसौख्यं गुरावागमे
भृत्यापत्यकलत्रमित्रजसुखं विद्याऽनवद्या भवेत्
क्षोणीपालसमानतानवरतं चाऽतीव हृद्या मतिः
काव्यानन्दरतिः सदा हितगतिः सर्वत्र मानोन्नतिः ९४

भोजने भवति देवतागुरौ यस्य तस्य सततं सुभोजनम्
नैव मुञ्चति रमालयं तदा वाजिवारणरथैश्च मण्डितम् ९५

नृत्यलिप्सागते राजमानी धनी देवताधीशवन्द्यः सदा धर्मवित्
तन्त्रविज्ञो बुधैर्मण्डितः पंडितः शब्दविद्यानविद्यो हि सद्यो जनः ९६

कुतूहली सकौतुके माहाधनी जनः सदा
निजान्वये च भास्करः कृपाकलाधरः सुखी
निलिम्पराजपूजिते सुतेन भूनयेन वा
युतो महाबली धराधिपेन्द्रसद्मपण्डितः ९७

गुरौ निद्रागते यस्य मूर्खता सर्वकर्मणि
दरिद्रतापरिक्रन्तं भवनं पुण्यवर्जितम् ९८

**87-98. <u>Effects of Jupiter's Avasthas. I</u>f Jupiter is in Sayana, the native will be strong, but will speak in whispers, he will be very tawny in complexion, will have prominent cheeks and will have fear from enemies; if in Upavesana, will be garrulous and very proud, will be troubled by the king and enemies and will have ulcers on the feet shanks, face and hands; if in Netrapani, will be afflicted by diseases, be devoid of wealth, fond of music and dances, libidinous, tawny in complexion and will be attached to people of other castes; if in Prakasha, will enjoy virtues, will be happy, splendorous and will visit holy places, devoted to Lord Krishna; if Jupiter in Prakasha is exalted, will attain greatness among men and will be equal to Kubera; if in Gamana, will be adventurous, happy on account of friends, scholarly and endowed with Vedic learning and with various kinds of wealth; if in Agaman, serving force, excellent women and the goddess of wealth will never leave the natives abode; if in Shubh, will attain comparability with Jupiter (God of speech) in the matter of speech, will be endowed with superior corals, rubies and wealth, will be rich with elephants, horses and chariots and will be supremely learned; if in Agama, will be endowed with various conveyances, honors, retinue (many persons will take good care of him), children, wife, friends and learning, will be equal to a king, extremely noble, fond of literature and will take to the path of the virtuous; if in Bhojana, will always beget excellent food and horses, elephants and ch6thots, while Lakshmi, the Goddess of Wealth, will never leave his house; if in Nritya Lips, will receive royal honors, be wealthy, endowed with knowledge of moral law 9tha and Tantra, will be supreme among the learned and be a great grammarian; if in Kautuka, will be curious in disposition, very rich, will shine, like Sun in his circles, be exceedingly kind, happy, honoured by the kings, endowed with sons, wealth and just disposition, will be very strong and he will be a scholar in the kings court; if in Nidra, will be foolish in all his undertakings, will suffer irredeemable penury and will be devoid of righteous acts.**

जनो बलीयानपिदन्तरोगी भृगौ महारोषसमन्वितः स्यात्
धनेन हीनः शयनं प्रयाते वारांगनासंगमलम्पटश्च ९९

यदि भवेदुशना उपवेशने नवमणिव्रजकाञ्चनभूषणैः
सुखमजस्रमरिक्षय आदरादवनिपादपि मानसमुन्नतिः १००

नेत्रपाणिंगते लग्नगेहे कवौ सप्तमे मानभे यस्य तस्य ध्रुवम्
नेत्रपाते निपातो धनानामलं चान्यभे वासशाला विशाला भवेत् १०१

स्वालये तुंगभे मित्रभे भार्गवे तुंगमातंगलीलाकलापी जनः
भूपतेस्तुल्य एव प्रकाशं गते काव्यविद्याकलाकैतुकी गीतवित् १०२

गमने जनने शुक्रे तस्य माता न जीवति
आधियोगो वियोगश्च जनानामरिभीतितः १०३

आगमनं भृगुपुत्रे गतवति वित्तेश्वरो मनुजः
सत्तेर्थभ्रमशाली नित्योत्साही करांघ्रिरोगी च १०४

अनायासेनालं सपदि महसा याति सहसा
प्रगल्भत्वंराज्ञः सदसि गुणविज्ञः किल कवौ
सभायामायाते रिपुनिवहहन्ता धनपतेः
समत्वं वा दाता बलतुरगगन्ता नरवरः १०५

आगमे भार्गवे मागमो जन्मिनामर्थराशेररातेरतीव क्षतिः
पुत्रपातो निपातो जनानामपिव्याधिभीतिः प्रियाभोगहानिर्भवेत् १०६

क्षुधातुरो व्याधिनिपीडितः स्यादनेकधारातिभयर्दितश्च
कवौ यदा भोजनगे युवत्या महाधनी पण्डितमण्डितश्च १०७

काव्यविद्यानवद्या च हृद्या मतिः सर्वदा नृत्यलिप्सागते भार्गवे
शंखवीणामृदंगादिगानध्वनिव्रातनैपुण्यमेतस्य वित्तोन्नतिः १०८

कौतुकभवनं गतवति शुक्रे शक्रेशत्वं सदसि महत्त्वम्
हृद्या विद्या भविति च पुंसः पदमा निवसति सदमारतः १०९

परसेवारतो नित्यं निद्रामुपगते कवौ
परनिन्दापरो वीरो वाचालो भ्रमते महीम् ११०

**99-110. Effects of Venus Avasthas. If Venus is in Sayana, the native, although strong, will incur dental disease, he will be very short-tempered, bereft of wealth, will seek union with courtesans and be licentious; if in Upavesana, will be endowed with a multitude of nine gems (Navamin Vraja) and golden ornaments, be ever happy, will destroy enemies and will be honoured by the king, will have highly increased honors; if in Netrapani in Lagna, 7th, or 10th, there will be loss of wealth on account of afflictions of the sense of sight (heavy medical expenses, due to severe eye diseases); if Netrapani occurs, when Venus is in other Houses, the native will own large houses. Should Venus be in Prakasha in its own Rāśi, in its exaltation Rāśi, or in a**

**friendly Rāśi, the native will sport, like a lofty elephant, will be equal to a king and be skilful in poetry and music. If Venus is in Gamana, the native will not have a long-living mother, will lament over separation from his own people and will have fear from enemies; if in Agaman, will command abundant wealth, will undertake to visit superior shrines, will be ever enthusiastic and will contract diseases of the hand and foot; if in Shubh, will earn eminence in the kings court, will be very virtuous, will destroy enemies, be equal to Kubera in wealth, will be charitable, will ride on horses and will be excellent among men; if in Agama, there will be no advent of wealth, but there will be troubles from enemies, separation from children and relatives, diseases and lack of pleasures from the wife. Should Venus be in Bhojana, the native will be distressed, due to hunger, diseases and many kinds of fear from enemies; if Venus is in Virgo in Bhojana, the native will be very rich and will be honoured by scholars. If Venus is in Nritya Lips, the native will be skilful in literature and intelligent, will play musical instruments, like lute, tabla etc., be meritorious and very affluent; if in Kautuka, will be equal to Lord Indra, will attain greatness in the assembly, be learned and will have Lakshmi always dwelling in his abode; if in Nidra, will be interested in serving others, will blame others, be heroic, garrulous and will be wandering all over the earth.**

क्षुत्पिपासापरिक्रान्तो विश्रान्तः शयने शनौ
वयसि प्रथमे रोगी ततो भाग्यवतां वरः १११

भानोः सुते चेदुपवेशनस्थे करालकारातिजनानुतप्तः
अपायशाली खलु दद्रुमाली नरोभिमानी नृपदण्डयुक्तः ११२

नयनपाणिगते रविनन्दने परमया रमया रमयायुतः
नृपतितो हिततो महितोषकृद्बहुकलाकलितो विमलोक्तिकृत् ११३

नानागुणग्रामधनाधिशाली सदा नरो बुद्धिविनोदमाली
प्रकाशने भानुसुते सुभानुः कृपानुरक्तो हरपादभक्तः ११४

महाधनी नन्दननन्दितः स्यादपायकारी रिपुभूमिहारी
गमे शनौ पण्डितराजाभावं धरापतेरायातने प्रयाति ११५

आगमने गर्दभपदयुक्तः पुत्रकलत्रसुखेन विमुक्तः
भानुसुते भ्रमते भुवि नित्यं दीनमना विजनाश्रयभावम् ११६

रत्नावलीकाञ्चनमौक्तिकानां व्रातेन नित्यं व्रजति प्रमोदम्
सभागते भानुसुते नितान्तं नयेन पूर्णो मनुजो महौजाः ११७

आगमे गदसमागमो नृणामब्जबन्धुतनये यदा तदा
मन्दमेव गमनं धरापतेर्याचनाविरहिता मतिः सदा ११८

संगते जनुषि भानुनन्दने भोजनं भवति भोजनं रसैः
संयुतं नयनमन्दता तता मोहतापपरितापिता मतिः ११९

नृत्यलिप्सागते मन्दे धर्मात्मा वित्तपूरितः
राजपूज्यो नरो धीरो महावीरो रणाङ्गणे १२०

भवति कौतुकभावमुपागते रविसुते वसुधावसुपूरितः
अतिसुखी सुमुखीसुखपूरितः कवितयामलया कलयानरः १२१

निद्रागते वासरनाथपुत्रे धनी सदा चारुगुणैरुपेतः
पराक्रमी चण्डविपक्षहन्ता सुवारकान्तारतिरीतिविज्ञः १२२

**111-122. <u>Effects of Saturn's Avasthas</u>. If Saturn is in Sayana, the native will be troubled by hunger and thirst, will incur diseases in boyhood and later on he will become wealthy; if in Upavesana, will be troubled greatly by enemies, will contract dangers, will have ulcers all over the body, will be self-respected and will be punished by the king; if in Netrapani, will be endowed with a charming female, wealth, royal favour and friends, will have knowledge of many arts**

**and will be an eloquent speaker; if in Prakasha, will be very virtuous, very wealthy, intelligent, sportive, splendorous, merciful and devoted to Lord Shiva; if in Gamana, will be very rich and endowed with sons, will grab enemy lands and will be a scholar at royal court; if in Agaman, will be akin to a donkey (foolish) and bereft of happiness from wife and children, will always roam pitiably without anybody's patronage; if in Shubh, the native will have surprising possessions of abundant precious stones and gold, will be endowed with great judicial (political) knowledge and will be extremely brilliant; if in Agama, will incur diseases and will not be skilful in earning royal patronage; if in Bhojana, will enjoy tastes of food, will be weak-sighted and will be fickle-minded, due to mental delusion; if in Nritya Lips, will be righteous, extremely opulent, honoured by the king and brave, heroic in the field of war; if in Kautuka, will be endowed with lands and wealth, will be happy, endowed with pleasures through charming females and learned in poetry, arts etc.; if in Nidra, will be rich, endowed with charming virtues and valorous, will destroy even fierce enemies and will be skilful in seeking pleasures through harlots.**

यदागमो जन्मनि यस्य राहौ क्लेशाधिकत्वं शयनं प्रयाते
वृषेऽथ युग्मेऽपि च कन्यकायामजे समाजो धनधान्यराशेः १२३

उपवेशनमिह गतवति राहौ दद्रुगदेन जनः परितप्तः
राजसमाजयुतो बहुमानी वित्तसुखेन सदा रहितः स्यात् १२४

नेत्रपाणावगौ नेत्रे भवतो रोगपीडिते
दुष्टव्यालारिचौराणां भयं तस्य धनक्षयः १२५

प्रकाशने शुभासने स्थितिः कृतिः शुभा नृणां
धनोन्नतिर्गुणोन्नतिः सदा विदामगाविह
धराधिपाधिकारिता यशोलता तता भवे
न्नवीननीरदाकृतिर्विदेशतो महोन्नतिः १२६

गमने च यदा राहौ बहुसन्तानवान्नरः
पण्डितो धनवान् दाता राजपूज्यो नरो भवेत् १२७

राहावागमने क्रोधी सदा धीधनवर्जितः
कुटिलः कृपणः कामी नरो भवति सर्वथा १२८

सभागतो यदा राहुः पण्डितः कृपणो नरः
नानागुणपरिक्रान्तो वित्त सौख्यसमन्वितः १२९

चेदगावागमं यस्य याते तदा व्याकुलत्वं सदारातिभीत्या भयम्
महद्बन्धुवादो जनानां निपातो भवेद्वित्तहानिः शठत्वं कृशत्वम् १३०

भोजने भोजनेनालं विकलो मनुजो भवेत्
मन्दबुद्धिः क्रियाभीरुः स्त्रीपुत्रसुखवर्जितः १३१

नृत्यलिप्सागते राहौ महाव्याधिविवर्द्धनम्
नेत्ररोगी रिपोर्भीतिर्धनधर्मक्षयो नृणाम् १३२

कौतुके च यदा राहौ स्थानहीनो नरो भवेत्
परदाररतो नित्यं परवित्तापहारकः १३३

निद्रावस्थां गते राहौ गुणग्रामयुतो नरः
कान्तासन्तानवान् धीरो गर्वितो बहुवित्तवान् १३४

**123-134. <u>Effects of Rahu's Avasthas</u>. If Rahu is in Sayana, the native will experience miseries in abundance, but, if Rahu in Sayana is placed in Taurus, Gemini, Virgo, or Aries, the native will be endowed with wealth and grains. If Rahu is in Upavesana, the native will be distressed, due to ulcers, will be endowed with royal association, be highly honourable and ever devoid of financial happiness; if in Netrapani, will be troubled by eye diseases, will have fear from wicked people, snakes and thieves and will incur financial decline; if in Prakasha, will acquire a high position, will perform auspicious acts and will obtain elevation of his financial state, will be highly virtuous, a chief in the kings court, charming, like freshly formed clouds (that will cause soon rain) and will be very prosperous in foreign places; if in Gamana, will be endowed with numerous children, be scholarly, wealthy, ch6thtable and honoured by the king; if in Agaman, will be very irritable, bereft of intelligence and wealth, crooked, miserly and libidinous; if in Shubh, will be scholarly, miserly and endowed with many virtues, wealth and happiness; if in Agama, will be always mentally distressed, will have fear from enemies and litigations with enemies, be bereft of his own men, will face financial destruction and will be crafty and emaciated; if in Bhojana, will be distressed without food and dull-witted, will not be bold in his acts and will be bereft of conjugal and progenic happiness; if in Nritya Lips, will contract a serious disease, which seems difficult to subdue, will have afflicted eyes and will have fear from enemies, will decline financially and righteously; if in Kautuka, will be devoid of a position (place), be interested in others females and will steal others wealth; if in Nidra, will be a repository of virtues, will be endowed with wife and children, be bold, proud and very affluent.**

मेषे वृषेऽथ वा युग्मे कन्यायां शयनं गते
केतौ धनसमृद्धिः स्यादन्यभे रोगवर्धनम् १३५

उपवेशं गतौ केतौ दद्रुरोगविवर्द्धनम्
अरिवातनृपव्यालचैरशंका समन्ततः १३६

नेत्रपाणिं गते केतौ नेत्ररोगः प्रजायते
दुष्टसर्पादिभीतिश्च रिपुराजकुलादपि १३७

केतौ प्रकाशने संज्ञे धनवान् धार्मिकः सदा
नित्यं प्रवासी चोत्साही सात्त्विको राजसेवकः १३८

गमेच्छायां भवेत्केतुर्बहुपुत्रो महाधनः
पण्डितो गुणवान् दाता जायते च नरोत्तमः १३९

आगमने च यदा केतुर्नानारोगो धनक्षयः
दन्तघाती महारोगी पिशुनः परनिन्दकः १४०

सभावस्थां गते केतौ वाचालो बहुगर्वितः
कृपणो लम्पटश्चैव धूर्तविद्याविशारदः १४१

यदागमे भवेत्केतुः केतुः स्यात्पापकर्मणाम्
बन्धुवादरतो दुष्टो रिपुरोगनिपीडितः १४२

भोजने तु जनो नित्यं क्षुधया परिपीडितः
दरिद्रो रोगसंतप्तः केतौ भ्रमति मेदिनीम् १४३

नृत्यलिप्साङ्गते केतौ व्याधिना विकलो भवेत्
बुद्बुदाक्षो दुराधर्षो धूर्तोऽनर्थकरो नरः १४४

कौतुकी कौतुके केतौ नटवामारतिप्रियः
स्थानभ्रष्टो दुराचारी दरिद्रो भ्रमते महीम् १४५

निद्रावस्थां गते केतौ धनधान्यसुखं महत्
नानागुणविनोदेन कालो गच्छति जन्मिनाम् १४६

**135-146. Effects of Ketu's Avasthas. If Ketu is in Sayana in Aries, Taurus, Gemini, or Virgo, there will be plenty of wealth; if Ketu is in Sayana in other Rāśis, increased diseases will follow. If Ketu is in Upavesana, the native will suffer from ulcers and will have fear from enemies, windy diseases, snakes and thieves. Should Ketu be in Netrapani, the native will contract eye diseases and will have fear from wicked people, snakes, enemies and people of royal family. If Ketu is in Prakasha, the native will be wealthy and righteous, will live in foreign places, be enthusiastic and genuine and will serve the king; if in Gamana, will be endowed with many sons and abundant wealth, be scholarly, virtuous, ch6thtable and excellent among men; if in Agaman, will incur many diseases, will face loss of wealth, will hurt (others) with his teeth (Danta Ghatin), be a tale bearer and will blame others; if in Shubh, will be garrulous, very proud, miserly, licentious and skilful in evil branches of learning; if in Agama, will be a notorious sinner, will enter into litigations with his relatives, will be wicked and troubled by diseases and enemies; if in Bhojana, will always be distressed with hunger, penury and diseases and will roam all over the earth; if in Nritya Lips, will be distressed, due to diseases, will have a floral mark on the eye (white of the pupil), will be impertinent and wicked and will plan evils; if in Kautuka, will seek union with dancing females (prostitutes), will suffer positional displacement, will take to evil paths and will roam all over; if in Nidra, will be endowed with wealth and corns, will be virtuous and will spend his time sportively.**

शयने द्विज भावेषु यत्र तिष्ठन्ति सद्ग्रहाः
नित्यं तस्य शुभज्ञानं निर्विशंकं वदेत् बुधः १४७

**147. General Effects (up to Sloka 155). O Brahmin, if a benefic Planet is in Sayana, there will be benefic effects at all times, according to the learned.**

भोजने येषु भावेषु पापास्तिष्ठन्ति सर्वथा
तदा सर्वविनाशेऽपि नाऽत्र कार्या विचारणा १४८

**148. If a malefic is in Bhojana, everything will be destroyed and there is no need of a second thought.**

निद्रायां च यदा पापो जायास्थाने शुभं वदेत्
यदि पापग्रहैर्दृष्टो न शुभं च कदाचन १४९

**149. Should a malefic in 7th be in Nidra, auspicious effects will follow, provided, that there is no Aspect from another malefic.**

सुतस्थाने स्थितः पापो निद्रायां शयनेऽपि वा
तदा शुभं भवेत्तस्य नाऽत्र कार्या विचारणा १५०

**150. Declare without a second thought auspicious effects, following the location of a malefic in 5th House, but only with Nidra, or in Sayana.**

मृत्युस्थानस्थितः पापो निद्रायां शयनेऽपि वा
तदा तस्याऽपमृत्युः स्याद्राजतः परतस्तथा १५१

**151. Untimely death, due to royal wrath, will come to pass, if there is a malefic in 8th House in Nidra, or in Sayana.**

शुभग्रहैर्यदा युक्तः शुभैर्वा यदि वीक्षितः
तदा तु मरणं तस्य गङ्गादौ च विशेषतः १५२

**152. If in the case of a malefic in 8th House in Nidra, or Sayana there happens to be a benefic Aspect, or the Conjunct of a benefic, (untimely) death will be in the river Ganges, i.e. Gangetic belt, shrines etc.**

कर्मस्थाने यदा पापः शयने भोजनेऽपि वा
तदा कर्मविपाकः स्यान्नानादुःखप्रदायकः १५३

**153. If there is a malefic in 10th in Sayana, or Bhojana, the native will face many miseries on account of his own deeds.**

दशमस्थो निशानाथः कौतुके च प्रकाशने
तदैव राजयोगः स्यान्निर्विशकं द्विजोत्तम १५४

**154. O excellent of the Brahmins, doubtlessly a Raja Yoga will come to pass, if Moon is in 10th in Kautuka, or Prakasha.**

बलाऽबलविचारेण ज्ञातव्यञ्च शुभाऽशुभम्
एवं क्रमेण बोद्धव्यं सर्वाभावेषु बुद्धिमन् १५५

**155. Thus the good and bad effects should be guessed, assessing the strength and weakness of the Planets, concerning all the Houses.**

अथ दशाध्याय ४६
सर्वज्ञोऽसि महर्षे त्वं कृपया दीनवत्सल
दशाः कतिविधाः सन्ति तन्मे कथय तत्त्वतः १

## Ch. 46. Dashas of Planets

**1. Maitreya said. O Venerable Mahārśi Parashara! You are omniscient. There is no subject, with which you are not conversant. Therefore now please favour me with guidance about the different kinds of Dashas (periods) of the various Planets.**

साधु पृष्टं त्वया विप्र लोकानुग्रहकारिणा
कथयामि तवाग्रेऽहं दशाभेदाननेकशः २

दशाबहुविधास्तासु मुख्या विंशोत्तरी मता
कैश्चिदष्टोत्तरी कैश्चित् कथिता षोडशोत्तरी ३

द्वादशाब्दोत्तरी विप्र दशा पञ्चोत्तरी तथा
दशा शतसमा तद्वत् चतुराशीतिवत्सरा ४

द्विसप्ततिसमा षष्टिसमा षट्त्रिंशवत्सरा
नक्षत्राधारिकाश्चेताः कथिताः पूर्वसूरिभिः ५

**2-5. Mahārśi Parashara replied. O Brahmin! Dashas are of many kinds. Amongst them Vimshottari is the most appropriate for the general populace. But the other Dashas, followed in special cases, are Astottara, Shodshottari, Dwadashottari, Panchottari, Shatabdik, Chaturashiti-sama, Dwisaptati-sama, Shastihayani, Shat-trimshat-sama. Our ancients have described these different kinds of Dashas, based on Nakshatras.**

अथ कालदशा चक्रदशा प्रोक्ता मुनीश्वरैः
कालचक्रदशा चाऽन्या मान्यासर्वदशासु या ६

दशाऽथ चरपर्याया स्थिराख्या च दशा द्विज
केन्द्राद्य च दशा ज्ञेया कारकादिग्रहोद्भवा ७

ब्रह्मग्रहाश्रितर्क्षाद्या दशा प्रोक्ता तु केनचित्
माण्डूकी च दशा नाम तथा स्थूलदशा स्मृता ८

योगार्धजदशा विप्र दृग्दशा च ततः परम्
त्रिकोणाख्या दशा नाम तथा राशिदशा स्मृता ९

पञ्चस्वरदशा विप्र विज्ञेया योगिनीदशा
दशा पैण्डी तथांशी च नैसर्गिकदशा तथा १०

अष्टवर्गदशा सन्ध्यादशा पाचकसंज्ञिका
अन्यास्तारादशाद्याश्च न सर्वाः सर्वसम्मताः ११

**6-11. O Brahmin! Some Mahārśis have made a mention of Kala and Chakra Dasha, but they have recognized the Kala Chakra Dasha, as supreme. The other kinds of Dashas, propagated by the sages, are Char, Sthira, Kendra, Karak, Brahma Planet, Manduk, Shul, Yogardh, Drig, Trikona, Rāśi, Panchswara, Yogini, Pind, Nausargik, Asht Varga, Sandhya, Pachak, Tara etc. But in our view all these Dashas are not appropriate.**

**Vimshottari**

कृत्तिकातः समारभ्य त्रिरावृत्य दशाधिपाः
आचंकुरागुशबुकेशुपूर्वा विहगाः क्रमात् १२

वह्निभाज्जन्मभं यावद् या संख्या नवतष्टिता
शेषाद्दशाधिपो ज्ञेयस्तमारभ्य दशां नयेत् १३

विंशोत्तरशतं पूर्णमायुः पूर्वमुदाहृतम्
कलौ विंशोत्तरी तस्माद् दशा मुख्या द्विजोत्तम १४

**12-14. Beginning from Kritika, the Lords of Dashas are Sun, Moon, Mars, Rahu, Jupiter, Saturn, Mercury, Ketu and Venus in that order. Thus, if the Nakshatras from Kritika to the Janma Nakshatra are divided by nine, the remainder will signify the Lord of the commencing Dasha. The remaining Dashas will be of the Planets in the order, given above. In Kali Yuga the natural life-span of a human being is generally taken, as 120 years. Therefore Vimshottari Dasha is considered to be the most appropriate and the best of all Dashas.**

दशासमाः क्रमादेषां षड् दशाऽश्वा गजेन्दवः

नृपाला नवचन्द्राश्च नगचन्द्रा नगा नखाः १५

**15. The periods of Dashas of Sun, Moon, Mars, Rahu, Jupiter, Saturn, Mercury, Ketu and Venus are 6, 10, 7, 18, 16, 19, 17, 7 and 20 in that order.**

दशामानं भयातघ्नं भभोगेन हृतं फलम्
दशाया भुक्तवर्षाद्य भोग्यं मानाद् विशोधितम् १६

**16. To find out the remainder of the Dasha, operating at the time of birth, first find out the expired portion of the Dasha of the concerned Planet. This is done, as follows. Multiply the Dasha period of the Planet concerned by the period of the stay of Moon in Janma Nakshatra, that has expired and divide that amount by the total period of the stay of Moon in that Nakshatra. The figure in years, months etc. so arrived at will be the expired period of the Dasha. If this figure is deducted from the total period of the Dasha, we will get the Balance of Dasha at the time of birth.**

## Ashtottari

लग्नेशात् केन्द्रकोणस्थे राहौ लग्नं विना स्थिते
अष्टोत्तरी दशा विप्र विज्ञेया रौद्रभादितः १७

चतुष्कं त्रितयं तस्मात् चतुष्कं त्रितयं पुनः
एवं स्वजन्मभं यावद् विगणय्य यथाक्रमम् १८

सूर्यश्चन्द्रः कुजः सौम्यः शनिर्जीवस्तमो भृगुः
एते दशाधिपा विप्र ज्ञेयाः केतुं विना ग्रहाः १९

रसाः पञ्चेन्दवो नागाः सप्तचन्द्राश्च खेन्दवः
गोऽब्जाः सूर्याः कुनेत्राश्च रव्यादीनां दशासमाः २०

**17-20. Mahārśi Parashara said. O Brahmin, the sages have recommended the adoption of Ashtott6th, when Rahu not being in Lagna, in any other Kendra, or Trikona to the Lord of the Lagna. From 4 Nakshatras from Ardra commences the Dasha of Sun, from 3 after that begins the Dasha of Moon, 4 after that will bring the Dasha of Mars, 3 after that the Lord of Dasha will be Mercury, 4 there from will have Saturn, as the Dasha Lord, 3 thereafter the Lord will be Jupiter, Rahu will be the Lord of the Dasha 4 Nakshatras after that and then Venus will take over the lordship of the Dasha 3 Nakshatras from the last one mentioned above. The Lord of the Dasha at birth will be determined by counting in this order up to the Janma Nakshatra. The duration of Ashtott6th Dasha for Sun, Moon, Mars, Mercury, Saturn, Jupiter, Rahu and Venus are 6, 15, 8, 17, 10, 19, 12 and 21 in that order. Thus in this Dasha system only 8 Planets play the role of Dasha Lords, Ketu having been denied this privilege.**

दशाब्दांघ्रिश्च पापानां शुभानां त्र्यंश एव हि
एकैकभे दशामानं विज्ञेयं द्विजसत्तम   २१

ततस्तद्यातभोगाभ्यां भुक्तं भोग्यं च साधयेत्
विंशोत्तरीवदेवात्र ततस्तत्फलमादिशेत्  २२

**21-22. The Dashas of the various Planets have been specified above. In the case of malefic Planets the Dasha span of one Nakshatra is ¼ of the Dasha of the Planet. It is 1/3rd in the case of benefics. Thus the expired portion of the Dasha is calculated, according to the method, followed for Vimshottari Dasha, by multiplying the Bhayat, i.e. the expired period of the stay of Moon in the Janma Nakshatra, by the Dasha portion of the Janma Nakshatra and dividing it by Bhabhog, i.e. the total period of the stay of Moon in the Janma Nakshatra. Then the Balaance of Dasha at birth can also be ascertained. If Uttarashadha happens to be the Janma Nakshatra, the duration of its first three Padas is taken, as Bhabhog and the Dasha calculations should be done accordingly. The Dasha and calculations for Abhijit Nakshatra are done by taking the 4th Pad of Uttarashadha plus the 15th part of the beginning of Shravan. For Shravan the Bhabhog would be the total of its duration in Ghatikas minus the 1/15th part of the beginning of Shravan.**

## Shodshottari

कृष्णपक्षे दिवा जन्म शुक्लपक्षे तथा निशि
तदा ह्यष्टोत्तरी चिन्त्या फलार्थञ्च विशेषतः  २३

**23. It will be advisable to adopt the Shodshottari, if the birth is in the day in Krishna Paksh (dark half of the month), or at night in Shukla Paksh (bright half).**

चन्द्रहोरागते कृष्णे सूर्यहोरागते सिते
लग्ने नृणां फलज्ञप्तयै विचिन्त्या षोडशोत्तरी  २४

पुष्यभाज्जन्मभं यावद् या संख्या गजतष्टिता
रविर्भौमो गुरुर्मन्दः केतुश्चन्द्रो बुधो भृगुः  २५

इति क्रमाद् दशाधीशाः ज्ञेया राहुं विना ग्रहाः
रुद्राद्येकोत्तराः संख्या धृत्यन्तं वत्सराः क्रमात्  २६

**24-26. The Dasha may be adopted, when the Lagna is in the Hora of Moon with birth in the Krishna Paksh, or, when Lagna is in the Hora of Sun with birth in the Shukla Paksh. Count the number of Nakshatras from Pushya to the Janma Nakshatra. Divide this number by 8. The remainder will indicate the Dashas of Sun, Mars, Jupiter, Saturn, Ketu, Moon, Mercury and Venus. The Dashas of the above Planets are of 11, 12, 13, 14, 15, 16, 17 and 18 years.**

## Dwadashottari

शुक्रांशके प्रजातस्य विचिन्त्या द्वादशोत्तरी
जन्मभात् पौष्णभं यावत् संख्या हि वसुतष्टिता  २७

सूर्यो गुरुः शिखी ज्ञोऽगुः कुजो मन्दो निशाकरः
विना शुक्रं दशाधीशा द्विचयात् सप्ततः समाः  २८

**27-28. This Dasha system will be appropriate for one, whose Lagna is in the Navāmśa of Venus. Count from Janma Nakshatra to Revati. Divide this number by 8. The remainder will indicate the Dasha of the Planet concerned. The Dasha order is Sun, Jupiter, Ketu, Mercury, Rahu, Mars, Saturn, Moon. The Dashas will be of 7, 9, 11, 13, 15, 17, 19 and 21 years of the Planets.Panchottari**

अर्कांश कर्कलग्ने पञ्चोत्तरी मता
मित्रर्क्षाज्जन्मभं यावत् संख्या सप्तविभाजिता २९

एकादिशेषे विज्ञेयाः क्रमात्सप्तदशाधिपाः
रविर्ज्ञोऽर्कसुतो भौमः शुक्रश्चन्द्रो वृहस्पतिः ३०

**(29-30) This Dasha is considered suitable for those, whose Lagna is Cancer and also in the Cancer Dvadashāńś. Count from Anuradha up to the Janma Nakshatra and divide the number by 7. The remainder will indicate the Dasha. The order of the Dasha Lords is Sun, Mercury, Saturn, Mars, Venus, Moon and Jupiter. The Dashas of the Planets are 12, 13, 14, 15, 16, 17 and 18 years.**

## Shatabdik

एकोत्तराश्च विज्ञेया द्वादशाद्याः क्रमात्समाः
धृत्यन्ताः सप्तखेटानां राहुकेतू विना द्विज ३१

वर्गोत्तमगते लग्ने दशा चिन्त्या शताब्दिका
पौष्णभाज्जन्मपर्यन्तं गणयेत् सप्तभिर्भजेत् ३२

**(31-32) This Dasha system has been considered appropriate, if Lagna is Vargaottama. This happens, when Lagna in the Rāśi Kundali and the Navāmśa Lagna are in the same Rāśi.**

शेषाङ्के रवितो ज्ञेया दशा शतसमाह्वया
रविश्चन्द्रो भृगुर्ज्ञश्च जीवो भौमः शनिस्तथा ३३

क्रमादेते दशाधीशा बाणा बाणा दिशो दश
नखा नखाः खरामाश्च समाज्ञेया द्विजोत्तम ३४

**(33-34) Count from Revati to the Janma Nakshatra and divide this number by seven. The remainder will indicate the Lords of Dashas in this order: Sun, Moon, Venus, Mercury, Jupiter, Mars and Saturn. Their Dashas will be of 5, 5, 10, 10, 20, 20 and 30 years.**

## Chaturashiti-sama

कर्मेशे कर्मगे ज्ञेया चतुराशीतिका दशा
पवनाज्जन्मभं यावद् या संख्या सप्तभाजिता ३५

शेषे रवीन्दुभौमज्ञा गुरुशुक्रशनैश्चराः
दशाधीशाः क्रमादेषां ज्ञेया द्वादशवत्सराः ३६

**35-36. Chaturashiti-sama Dasha is considered appropriate in cases, where the 10ths Lord is placed in 10th. Count from Swati to the Janma Nakshatra and divide this number by 7. The remainder will indicate the Dasha Lords in the following order: Sun, Moon, Mars, Mercury, Jupiter, Venus and Saturn. The Dasha period of each Planet is 12 years.**

## Dwisaptati-sama

मूलाज्जन्मर्क्षपर्यन्तं गणयेदष्टभिर्भजेत्
शेषाद्दशाधीपा ज्ञेया अष्टौ रव्यादयः क्रमात् ३७

नव वर्षाणि सर्वेषां विकेतूनां नभःसदाम्
लग्नेशे सप्तमे यस्य लग्ने वा सप्तमाधिपे ३८

चिन्तनीया दशा तस्य द्विसप्ततिसमाह्वया
विंशोत्तरीवदत्राऽपि भुक्तं भोग्यं च साधयेत् ३९

**37-39. This Dasha system is considered suitable in cases, where the Lord of Lagna is in Lagna, or in 7th. Count from Mul to the Janma Nakshatra and divide the number by 8. The remainder will determine the Dasha Lords in the following order: Sun, Moon, Mars, Mercury, Jupiter, Venus, Saturn and Rahu. In this Dasha system all the eight Planets have Dashas of 9 years each.**

## Shastihayani

यदार्को लग्नराशिस्थश्चिन्त्या षष्टिसमा तदा
दास्रात् त्रयं चतुष्कं च त्रयं चेति पुनः पुनः ४०

गुर्वर्कभूसुतानां च दशा दश दशाब्दकाः
ततः शशिज्ञशुक्रार्कपुत्रागूनां रसाब्दकाः ४१

**40-41. This Dasha may be adopted in cases, where Sun is posited in Lagna. The order of Dasha Lords in this system is, as follows: Jupiter, Sun, Mars, Moon, Mercury, Venus, Saturn and Rahu. The following shows the Nakshatras, falling under the various Dasha Lords. The Dashas of Jupiter, Sun and Marsare of 10 years. The remaining Planets have Dashas of 6 years each. Jupiter (Ashvini, Bharani, Kritika, Punarvasu), Sun (Rohini, Mrigashira, Ardra, U.Ashadha), Mars(Pushya, Aslesha, Magha, Revati), Moon (P.Phalguni, U.Phalguni, Hast), Mercury (Swati, Vishakah, Anuradha), Venus (Jyeshtha, Mul, P.Ashadha), Saturn (Abhijit, Shravan, 2ndishtha), Rahu (Shatabhisha, P.Bhadra, U.Bhadra).**

## Shat-trimshat-sama

श्रवणाज्जन्मभं यावत् संख्या वसुविभाजिता
शेषे चन्द्ररवीज्यारबुधार्किभृगुराहवः ४२

क्रमाद्दशाधिपास्तेषामेकाद्येकोत्तराः समा
लग्ने दिनेऽर्कहोरायां चन्द्रहोरागते निशि ४३

**42-43. Count from Shravan to the Janma Nakshatra and divide the number by 8. The remainder 1 etc. will indicate the Dasha Lords, whose order will be, as follows: Moon, Sun, Jupiter, Mars, Mercury, Saturn, Venus and Rahu. Their Dashas will be 1, 2, 3, 4, 5, 6, 7 and 8 years. If the birth is during the day and Lagna is in the Hora of Sun and, if the birth is at night and Lagna is in the Hora of Moon, adoption of this system would be preferable.**

## Kaala

सूर्यस्याऽर्धास्तयः पूर्वं परस्तादूदयादपि
पञ्च पञ्च घटी सन्ध्या दशनाडी प्रकीर्तिता ४४

सन्ध्याद्वयञ्च विंशत्या नाडिकाभिः प्रकीर्तितम्
दिनस्य विंशतिर्घटयः पूर्णसंज्ञा उदाहृताः ४५

निशायाः मुग्धसंज्ञाश्च घटिका विंशतिश्च याः
सूर्योदये च या सन्ध्या खण्डाख्या दशनाडिका ४६
अस्तकाले च या सन्ध्या सुधाख्या दशनाडिका
पूर्णमुग्धघटीमाने द्विगुणे तिथिभिर्भजेत् ४७

तथा खण्डसुधाघट्यौ चतुर्घ्ने तिथिभिर्भजेत्
लब्धं वर्षादिकं मानं सूर्यादीनां खचारिणाम् ४८

एकादिसंख्यया निघ्नं दशामानं पृथक् क्रमात्
राहुकेतुयुतानां च नवानां कालसंज्ञकम् ४९

**44-49. 5 Ghatikas before the sight of the semi-disk of the setting Sun and 5 Ghatikas after that and 5 Ghatikas before and after the rising of Sun, that is 10 Ghatikas in the evening and 10 Ghatikas in the morning, respectively. The total period of both these Sandhyas (twilight) is said to be 20 Ghatikas. The 20 Ghatikas of the night have been given the name Purna and the 20 Ghatikas of the day have been given the name Mugdha. The Sandhya at the time of sunrise is called Khanda and the Sandhya at the time of Sun'set is said to be Sudh. Both of these Sandhyas are of 10 Ghatikas each. If the birth is in Purna, or Mugdha, its past Ghatikas should be multiplied by 2 and the product should be divided by 15. The figure so arrived at should be converted into years, months etc. By multiplying it by the serial number of Sun and other Planets in their normal order, we will get the Kaal Dasha of these Planets. If the birth is during Sandhya, then its past Ghatikas should be multiplied by 4 and the product divided by 15. The figure so arrived at in terms of years, months etc. should be multiplied by the serial number of Sun and the other Planets to get the Kaal Dasha of all the nine Planets.**

## Chakra

रात्रौ लग्नाश्रिताद्राशेर्दिने लग्नेश्वराश्रितात्
सन्ध्यायां वित्तभावस्थान्नेया चक्रदशा बुधैः ५०

दशा वर्षाणि राशीनामेकैकस्य दशामितिः
क्रमाच्चक्रस्थितानाञ्च विज्ञातव्या द्विजोत्तम ५१

**50-51. If the birth is at night, the Dasha will commence from Lagna Rāśi. If the birth is during the day, the Dasha will start from the Rāśi, in which the Lord of Lagna is placed. If the birth is during Sandhya, the Dasha will begin from the Rāśi of the second House. The Dasha of each Rāśi is 10 years. As it is the Dasha system of the 12 Rāśis in the Zodiac, it has been named, as Chakra Dasha.Kala Chakra**

अथाऽहं शङ्करं नत्वा कालचक्रदशां ब्रुवे
पार्वत्यै कथिता पूर्वं सादरं या पिनाकिना ५२

तस्याः सारं समुद्धृत्य तवाग्रे द्विजनन्दन
शुभाऽशुभं मनुष्याणां यथा जानन्ति पण्डिताः ५३

**52-53. Mahārśi Parashara said. O Brahmin! Now, after making obedience to Lord Shiva, I shall describe the Kala Chakra Dasha. Whatever was related by Lord Shiva to Goddess Parvati, is being explained by me for the use of sages to be utilized for the welfare of the people.**

द्वादशारं लिखेच्चक्रं तिर्यगूर्ध्वसमानकम्
गृहा द्वादश जायन्ते सव्येऽसव्ये द्विधा द्विज ५४

द्वितीयादिषु कोष्ठेषु राशीन् मेषादिकान् लिखेत्
एवं द्वादशराश्याख्यं कालचक्रमुदीरितम् ५५

**54-55. By drawing vertical and horizontal lines, prepare 2 Charts, Savya and Apsavya, of 12 apartments (Kosthas) each. From the second Kostha in each Kundali fix the Rāśis Aries, Taurus, Gemini, Cancer, Leo, Virgo, Libra, Scorpio, Sagittarius, Capricorn, Aquarius, Pisces. Then Nakshatras may be incorporated in the manner, indicated hereafter. These Charts, indicative of the 12 Rāśis, are called Kala Chakra.**

अश्विन्यादित्रयं सव्यमार्गे चक्रे व्यवस्थितम्
रोहिण्यादित्रयं चैवमपसव्ये व्यवस्थितम् ५६

एवमृक्षविभागं हि कृत्वा चक्रं समुद्धरेत्

अश्विन्यदितिहस्तर्क्षमूलप्रोष्ठपदाभिधाः ५७

वह्निवातादिविश्वर्क्षरेवत्यः सव्यतारकाः
एतद्दशोडुपादानामश्विन्यादौ च वीक्षयेत् ५८

**56-58. Write Ashvini, Bharani and Kritika in the Savya Chakra and Rohini, Mrigashira, Ardra in the Apsavya. Then incorporate the three following Nakshatras, Punarvasu, Pushya and Aslesha in the Savya and Magha, Purvaphalguni and Uttaraphalguni in the Apsavya. Then incorporate the three following, Hast, Chitra and Swati in the Savya and Vishakah, Anuradha and Jyeshtha in the Apsavya. Then incorporate Mul, Purvashadha and Uttarashadha in the Savya and Shravan, 2ndishtha and Shatabhisha in the Apsavya. Finally incorporate the last three Nakshatras, Purvabhadrapad, Uttarabhadrapad and Revati in the Savya Chakra. Now there will be 15 Nakshatras in the Savya and 12 Nakshatras in the Apsavya, (because for the 12 Rāśis there are 12 Padas of 3 Nakshatras, the Navāmśaas). The Padas of Ashvini, Punarvasu, Hast, Mul, Purvabhadrapad, Kritika, Aslesha, Swati, Uttarashadha and Revati of the Savya should be reckoned in the same manner, as the Padas of Ashvini.**

देहजीवौ कथं वीक्ष्यौ नक्षत्राणां पदेषु च
विशदं तत्प्रकारं च मैत्रेय कथयामयहम् ५९

**59. Now I shall describe in detail, how the Deha and Jiva should be reckoned in the Padas (quarters) of the <u>Nakshatras.</u>**

देहजीवौ मेषचापौ दास्राद्यचरणस्य च
मेषाद्याश्चापपर्यन्तं राशिपाश्च दशाधिपाः ६०

**60. In the first Pad of Ashvini Aries is indicative of Deha (body) and Sagittarius is indicative of Jiva (life). And the Lords of Aries, Taurus, Gemini, Cancer, Leo, Virgo, Libra, Scorpio and Sagittarius are Lords of the Dashas in the order, as described before.**

मृगयुग्मे देहजीवौ द्वितीयचरणे स्मृतौ
क्रमात् मिथुनपर्यन्तं राशिपाश्च दशाधिपाः ६१

**61. In the second Pad of Ashvini Capricorn is Deha and Gemini is Jiva and the Lords of the nine Rāśis from Capricorn to Gemini are Lords of the Dashas.**

दास्रादिदशताराणां तृतीयचरणे द्विज
गौर्देहो मिथुनं जीवो द्व्येकार्केशदशाङ्कपाः ६२

**62. In the third Pad of the ten Nakshatras, beginning from Ashvini, Taurus is Deha and Gemini is Jiva. The Lords of the Rāśis Taurus, Aries, Pisces, Aquarius, Capricorn, Sagittarius, Aries, Taurus and Gemini are Lords of the Dashas in that order.**

क्वचित्रिरामर्त्तनाथाश्च दशाधिपतयः क्रमात्
अश्विन्यादिदशौडूनां चतुर्थचरणे तथा ६३

कर्कमीनौ देहजीवौ कर्कादिनवराशिपाः
दशाधीशाश्च विज्ञेया नवैते द्विजसत्तम ६४

**63-64. For the 4th Pad of the 10 Nakshatras, beginning from Ashvini, Cancer is Deha and Pisces is Jiva and the Lords of the nine Rāśis from Cancer to Pisces are the Lords of Dashas.**

यमेज्यचित्रातोयर्क्षाऽहीर्बुध्न्याः सव्यतारकाः
एतत्पञ्चोडुपादानां भरण्यादौ विचिन्तयेत् ६५

**65. In the four Padas of the 5 Nakshatras, Bharani, Pushya, Chitra, Purvashadha and Uttarabhadrapad, Deha and Jiva are the same, as for Bharani.**

याम्यप्रथमपादस्य देहजीवावलिर्झषः
नागागर्तुपयोधीषुरामाक्षीन्द्वर्कभेश्वराः ६६

**66. In the first Pad of Bharani Scorpio is Deha and Pisces is Jiva and the Lords of the Rāśis Scorpio, Libra, Virgo, Cancer, Leo, Gemini, Taurus, Aries and Pisces are the Lords of Dashas in this order.**

याम्यद्वितीयपादस्य देहजीवौ घटाङ्गने
रुद्रदिङ्नन्दचन्द्राक्षिरामाब्धीष्वङ्गभेश्वराः ६७

**67. In the 2nd Pad of Bharani Aquarius is Deha and Virgo is Jiva and the Lords of Aquarius, Capricorn, Sagittarius, Aries, Taurus, Gemini, Cancer, Leo and Virgo are the Lords of Dashas in that order.**

याम्यतृतीयपादस्य देहजीवौ तुलाङ्गने
सप्ताष्टाङ्कदिगीशार्कगजाद्रिरसभेश्वराः ६८

**68. In the 3rd Pad of Bharani Libra is Deha and Virgo is Jiva and Lords of the Rāśis Libra, Scorpio, Sagittarius, Capricorn, Aquarius, Pisces, Scorpio, Libra and Virgo are the Dasha Lords in this order.**

कर्को देहो धनुर्जीवो याम्यतुर्यपदे द्विज
वेदबाणाग्निनेत्रेन्दुसूर्येशाशाङ्कभेश्वराः ६९

**69. In the 4th Pad of Bharani Cancer is Deha and Aquarius is Jiva and the Lords of the Rāśis Cancer, Leo, Gemini, Taurus, Aries, Pisces, Aquarius, Capricorn and Sagittarius are the Dasha Lords in this order.**

सव्यमेवं विजानीयादसव्यं कथयाम्यहम्
द्वादशारां लिखेच्चक्रं पूर्ववद् द्विजसत्तम ७०

द्वितीयादिषु कोष्ठेषु वृश्चिकाद् व्यस्तमालिखेत्
रोहिणी च मघा द्वीशः कर्णश्चेति चतुष्टयम् ७१

उक्तं चाऽसव्यनाक्षत्रं पूर्वाचार्यैर्द्विजोत्तम
एतद्वेदोडुपादानां रोहिनीवन्निरीक्षयेत् ७२

**71-72. O Brahmin! I have thus given you the description of Savya Chakra. Now I shall give the description of Apsavya Chakra. Prepare a similar chart of 12 apartments and from the 2nd apartment onwards place the Rāśis from Scorpio onwards in the reverse order. In this chart Deha and Jiva would be the same for Rohini, Magha, Vishakah and Shravan, as for Rohini.**

रोहिण्यादिपदे देहजीवौ कर्किधनुर्धरौ
नवदिग्रुद्रसूर्येन्दुनेत्राग्नोष्वब्धिभेश्वराः ७३

धातृद्वितीचरणे देहजीवौ तुलस्त्रियौ
अङ्कागवसुसूर्येशदिगङ्कवसुजूकपाः ७४

तृतीयचरणे ब्राह्म देहजीवौ घटाङ्गने
षड्बाणब्धिगुणाक्षीन्दुनन्ददिग्रुद्रभेश्वराः ७५

रोहिण्यन्तपदे देहजीवावलिजषौ स्मृतौ
सूर्येन्दुद्विगुणेष्वब्धितर्कशैलाष्टभेश्वराः ७६

**73-76. In the first Pad of Rohini Cancer is Deha and Sagittarius is Jiva. The Lords of the Rāśis Sagittarius, Capricorn, Aquarius, Pisces, Aries, Taurus, Gemini, Leo and Libra will be the Dasha Lords in this order. In the 2nd Libra will be Deha and Virgo the Jiva and the Lords of the Rāśis Virgo, Libra, Scorpio, Pisces, Aquarius, Capricorn, Sagittarius, Scorpio and Scorpio will be the Dasha Lords. In the 3rd Aquarius will be Deha and Virgo Jiva. The Lords of the Rāśis Virgo, Leo, Cancer, Gemini, Taurus, Aries, Sagittarius, Capricorn and Aquarius will be the Dasha Lords. In the 4th Scorpio will be Deha and Pisces Jiva and the Lords of the Rāśis Pisces, Aries, Taurus, Gemini, Leo, Cancer, Virgo, Libra and Scorpio will be the Lords.**

चान्द्ररौद्रभगार्यम्णमित्रेन्द्रवसुवारुणम्
एतत्ताराष्टकं विज्ञैर्विज्ञेयं चान्द्रवत् क्रमात् ७७

**77. In the 4 Padas of the Apsavya Nakshatras Mrigashira, Ardra, Purvaphalguni, Uttaraphalguni, Anuradha, Jyeshtha, 2ndishtha and Shatabhisha the Deha and Jiva and the Dasha Lords will be the same, as for Mrigashira.**

कर्को देहो झषो जीवो मृगाद्यचरणे द्विज
व्यस्तान्मीनादिकर्कान्तराशिपाश्च दशाधिपाः ७८

गौर्देहो मिथुनं जीवो द्वितीयचरणे मृगे
त्रिद्व्येकाङ्कदिशीशार्कचन्द्राक्षिभवनाधिपाः ७९

देहजीवौ नक्रयुग्मे तृतीयचरणे मृगे
त्रिबाणाब्धिरसागाष्टसूर्येशदशभेश्वराः ८०

मेषो देहो धनुर्जीवो चतुर्थचरणे मृगे
व्यस्ताच्चापादिमेषान्तराशिपाश्च दशाधिपाः ८१

**78-81. In the first Pad of Mrigashira Cancer is Deha and Pisces is Jiva and the Lords of the Rāśis Pisces, Aquarius, Capricorn, Sagittarius, Scorpio, Libra, Virgo, Leo and Cancer will be the Dasha Lords in this order. In the 2nd Taurus is Deha and Gemini is Jiva and the Lords of the Rāśis Gemini, Taurus, Aries, Sagittarius, Capricorn, Aquarius, Pisces, Aries and Taurus will be the Dasha Lords. In the 3rd Capricorn is Deha and Gemini is Jiva and the Lords of the Rāśis Gemini, Leo, Cancer, Virgo, Libra, Scorpio, Pisces, Aquarius and Capricorn will be the Dasha Lords. In the 4th Aries will be Deha and Sagittarius Jiva and the Lords of the Rāśis Sagittarius, Scorpio, Libra, Virgo, Leo, Cancer, Gemini, Taurus and Aries will be the Dasha Lords.**

अपसव्यगणे त्वेवं देहजीवदशादिकम्
पार्वत्यै शम्भुना प्रोक्तमिदानींकथितं मया ८२

**82. Mahārśi Parashara said. O Brahmin! The description of the Deha and Jiva of the Padas of the Apsavya Nakshatras and the Dasha Lords is the same, as narrated by Lord Mahadeva to Goddess Parvati.**

केषां च कति वर्षाणि दशेशानां महामुने
दशाया भुक्तभोग्याद्यं तदारम्भ प्रचक्ष्व मे ८३

**83. Maitreya said. O Venerable Mahārśi Parashara! Now please guide me about the Dasha spans of the Dasha Lords, described by you. Please also demonstrate, how the commencement of the Dasha, its expired and the remaining periods at the birth are to be calculated.**

भूतैकविंशगिरयो नवदिक्षोडशाब्धयः
सूर्यादीनां दशाब्दाः स्यू राशीनां स्वामिनो वशात् ८४

**84. Mahārśi Parashara said. 5, 21, 7, 9, 10, 16 and 4 years are the Dasha spans of Sun, Moon, Mars, Mercury, Jupiter, Venus and Saturn.**

नरस्य जन्मकाले वा प्रश्नकाले यदंशकः
तदादिनवराशीनामब्दास्तस्यायुरुच्यते ८५

सम्पूर्णायुर्भवेदादावर्धमंशस्य मध्यके
अंशान्ते परमं कष्टमित्याहुरपरे बुधाः ८६

**85-86. The span of life of a person is determined from the Padas (Ańśaas) of the Nakshatra at the time of birth, or the time of query and the years allotted to the 9 Rāśis, commencing from it (the Pad of the Nakshatra). Some sages are of the view, that the person will enjoy full span of life (Purna Ayu), if his birth is at the commencement of the Padas, will have middle span of life (Madhaya Ayu), if the birth is in the middle of the Padas and short span of life (Alap Ayu), or will face death-like sufferings, if the birth is at the end of the Padas of the Nakshatra.**

ज्ञात्वैवं स्फुटसिद्धान्तं राश्यंशं गणयेद् बुधः
अनुपातेन वक्ष्यामि तदुपायमतः परम् ८७

गततारास्त्रिभिर्भक्ताः शेषं चैव चतुर्गुणम्
वर्तमानपदेनाढ्यं राशीनामंशको भवेत् ८८

**87-88. According to this principle, we should be acquainted with the Padas of the Nakshatras. Now I shall tell you, how the calculations are made, according to the proportion of the Padas of a Nakshatra. The number of Ashvini etc., whichever may be the past Nakshatras, should be divided by 3. Thereafter the remainder should be multiplied by 4. To the figure so made available the Pad of the present Nakshatra should be added. The product will be the Navāmśa from Aries onwards.**

मेषे शतं वृषेऽङ्काष्टौ मिथुने त्रिगजाः समाः
कर्कटेऽङ्गगजाः प्रोक्तास्तावन्तस्तत्त्रिकोणयोः ८९

**89. The number of years (Purna Ayu) are, as under. For the Aṅśa in Aries 100 years, in Taurus 85 years, in Gemini 83 years, in Cancer 86 years. The number of years will be the same for Rāśis, situated the 5th and 9th to them.**

जनो यत्रांशके जातो गतनाडीपलादिभिः
तदांशस्य हताः स्वाब्दाः पञ्चभूमिविभाजिताः ९०

एवं महादशारम्भो भवेदंशाद्यथा क्रमात्
गणयेन्नवपर्यन्तं तत्तदायुः प्रकीर्तितम् ९१

**90-91. Multiply the past Ghatikas, Palas etc. of the Pad of the Nakshatra, in which a person is born, by the existing Dasha years and divide it by 15. The result will indicate the expired period of the Dasha in years, months etc. By deducting it from the total number of years allotted, we get the Balaance of Dasha at birth. The Dasha should be taken, as commencing from that Rāśi.**

पदस्य भुक्तघट्याद्यैः स्वाब्दमानं हतं ततः
भभोगांघ्रिहृतं भुक्तं भोग्यं मानाद् विशोधितम् ९२

**92. Multiply the past Ghatikas, Palas etc. of the present Pad of the Nakshatra by the number of years and divide the product by the fourth part of Bhabhog. The years etc. so obtained may then be deducted from the total Dasha period. The result will be the Balaance of Dasha at birth in years, months etc.**

चन्द्राङ्कांशकला भुक्ताः स्वाब्दमानहता हृताः
द्विशत्या भुक्तवर्षाद्यं ज्ञेयं भोग्यं ततो बुधैः ९३

**93. The past Kalas (minutes) of the Navāmśa, in which Moon may be placed, should be multiplied by the years, allotted to the Dasha and the product should be divided by 200. The resulting years etc. will be the expired portion of the Dasha. By deducting them from the total number of years the Balaance of the Dasha at birth is obtained.**

सव्याख्ये प्रथमांशो यः स देह इति कथ्यते
अन्त्यांशो जीवसंज्ञः स्याद् विलोममपसव्यके ९४

देहादिं गणयेत् सव्ये जीवादिमपसव्यके
एवं विज्ञाय दैवज्ञस्ततस्तत्फलमादिशेत् ९५

**94-95. In the Savya Chakra the first Aṅśa is called Deha and the last Jiva. The opposite is the case in the Apsavya Chakra. Therefore the calculations should be based on the Deha etc. in the Savya Chakra and on the Jiva etc. in Apsavya.**

**We give below the Savya and Apsavya Kala Chakra Charts. <u>For example.</u> The birth is in Mrigashira 4th Pad. It is in the Apsavya Kala Chakra. The Lord of Deha is Mars and that of Jiva is Jupiter. The Bhabhog of Mrigashira is 59/31 (59 Ghatikas 31 Palas) and Bhayat is 58/15 (58 Ghatikas 15 Palas). ¼ of the Bhabhog comes to 14/52/44. That would be the value of one Pad. Multiplying this by 3 will get Ghatikas of 3 Padas, namely 44/38/15. Deducting this from Bhayat, the past Ghatikas, Palas etc. of the 4th Pad will be 13/36/45. The full Dasha years are 100. Multiplying this by 13/36/45 we get 1300/3600/4500 = 1361/15. This divided by 15 will give the expired period at birth, namely 90 years and 9 months. See the Kala Chakra. There we count from Jiva etc. to Deha. In the 4th Pad of Mrigashira Jiva is in Sagittarius and Deha in Aries. Therefore, by**

deducting the total of years from Sagittarius to Gemini, namely 77, from 90 years 9 months, we get the expired period of Taurus, namely 13 years and 9 months. By deducting this from the present 16 years of Venus, we will get 2 years and 3 months, as the Balaance of Dasha at birth. Accordingly, like Vimshottari Dasha, the order of Dasha will be Taurus, Aries, Sagittarius, Scorpio etc. For Example. Suppose, that at the time of birth of a person in Kritika Nakshatra the longitude of Moon is 1r4–50. This converted into Kalas will be 2090 at birth. The Dasha should be taken, as commencing from that. Divide the Kalas by 800 (1 Nakshatra). The result will be the 2nd Nakshatra, namely Bharani and the remainder will be 490. These will be the past Kalas of Kritika. There are 200 Kalas in one Pad (Navāmśa). Divide 490, the past Kalas of Kritika, by 200. We will then get 2, as past Padas and the remainder 90 will represent the past Kalas of the present Nakshatra. By multiplying this by 83, the Dasha years, we will get 7470, which, divided by 200, will indicate the expired portion of the Dasha, as 37 years, 4 months and 6 days. By deducting the years of Dehāńś, commencing from Taurus, in the order Taurus, Aries, Pisces, Aquarius (16+7+10+4 = 37), we will get 0 years, 4 months and 6 days. This will be the expired portion of Capricorn. Deducting this from 4, the Dasha period of Capricorn, we get the Balaance of the Dasha of Capricorn, namely 3 years, 7 months and 24 days. See in this connection the Savya Kala Chakra.Gati of Rāśis in the Kala Chakra

कालचक्रगतिः प्रोक्ता त्रिधा पूर्वमहर्षिभिः
मण्डूकाख्या गतिश्चैका मर्कटीसंज्ञकाऽपरा ९६

सिंहावलोकनाख्या च तृतीया परिकीर्तिता
उत्प्लुत्य गमनं विज्ञा मण्डूकाख्यं प्रचक्षते ९७

पृष्ठतो गमनं नाम मर्कटीसंज्ञकं तथा
वाणाद्य नवपर्यन्तं गतिः सिंहावलोकनम् ९८

96-98. There are three kinds of movements (Gati) of the Rāśis in the Kala Chakra, namely Manduki, Markati and Leoavlokan. The movement of one Rāśi by jumping over one Rāśi is known, as Manduki Gati. Backward movement to the previous Rāśi is called Markati Gati. The movement of a Rāśi to the 5th and 9th Rāśi is said to be Leoavlokan.

कन्याकर्कटयोः सिंहयुग्मयोर्मण्डूकी गतिः
कर्किकेसरिणोरेवं कथ्यते मर्कटी गतिः ९९

मीनवृश्चिकयोश्चापमेषयोः सैंहिकी गतिः
इति सञ्चिन्त्य विज्ञेयं कालचक्रदशाफलम् १००

99-100. Movement from Virgo to Cancer and from Leo to Gemini is Manduki Gati. Movement from Leo to Cancer is Markati Gati. Movement from Pisces to Scorpio and from Sagittarius to Aries is called Leoavlokan Gati.

## Effects of Dashas of Rāśis, as a Result of these Gati

मराडूकगतिकाले हि सव्ये बन्धुजने भयम्
पित्रोर्वा विषशस्त्राग्निज्वरचोरादिजं भयम् १०१

केसरीयुग्ममराडूके मातुर्मरणमादिशेत्
स्वमृतिं राजभितिं वा सन्निपातभयं वदेत् १०२

**101-102. The effects of the Dasha of the Rāśis with Manduki Gati in the Savya Chakra are distress to friends, relations, parents and elders and there is likely to be cause for trouble from poison, weapons, thieves and enemies. In the Manduki Dasha of the Gati of a Rāśi from Leo to Gemini there is the likelihood of the death of the mother, or self, trouble from Government and possibility of brain fever**

मर्कटीगमने सव्ये धनधान्यपशुत्त्वयः
पितुर्मरणमालस्यं तत्समानां च व मृतिः १०३

**.103. The effects of the Dasha of Rāśi with Markati Gati in the Savya Chakra are loss of wealth, agricultural products and animals, death of father, or an elderly close relation and feeling of lethargy.**

सव्ये सिंहावलोके तु पशुभीतिर्भवेन्नृणाम्
सुहृत्स्नेहादिनाशश्च समानजनपीडनम् १०४

पतनं वापि कूपादौ विषशस्त्राग्निजं भयम्
वाहनात् पतनं वापि ज्वरार्तिः स्थाननाशनम् १०५

**104-105. The effects of the Dasha of the Rāśis with Leoavlokan Gati in the Savya Chakra are possibility of injury from animals, loss of amity with friends, distress to near relations, drowning in a well, fall from animals, possibility of harm from poison, weapons and diseases and destruction of residential dwelling.**

मराडूकगमने वामे स्त्रीसुतादिप्रपीडनम्
ज्वरं च श्वापदाद् भीतिं वदेद् विज्ञः पदच्युतिम् १०६

मर्कटीगमने वाऽपि जलभीतिं पदच्युतिम्
पितुर्नाशं नृपक्रोधं दुर्गाररायाटनं वदेत् १०७

सिंहावलोकने वामे पदभ्रंशः पितुर्मृतिः
तत्समानमृतिर्वाऽपि फलमेवं विचिन्तयेत् १०८

**106-108. In the Dasha of the Rāśis with the Manduki Gati in the Apsavya Chakra the effects will be distress to wife and conditions, loss of children, possibility of feverish conditions and loss of position. In the Dasha of the Rāśis with the Markati Gati there may be danger from watery places, loss of position, distress from father, punishment from Government and wandering in the forests; with the Simhaavlokan there may be destruction of the dwelling and death of father etc.**

मीनात् तु वृश्चिके याते ज्वरो भवति निश्चितः
कन्यातः कर्कटे याते भ्रातृबन्धुविनाशनम् १०९

सिंहात्तु मिथुने याते स्त्रिया व्याधिर्भवेद् ध्रुवम्
कर्कटाच्च हरौ याते वधो भवति देहिनाम् ११०

पितृबन्धुमृतिं विद्याच्चापान्मेषे गते पुनः
भयं पापखगैर्युक्ते शुभखेटयुते शुभम् १११

**109-111. If the movement is from Pisces to Scorpio, the native may suffer from fever; if from Virgo to Cancer, there may be loss of brothers and kinsmen; if from Leo to Gemini, there may be ill health of the wife; if from Leo to Cancer, the native may die; if from Sagittarius to Aries, there may be death of uncles and similar relations. If the Rāśi is conjunct with a malefic, adverse conditions may be expected in the Dasha of the Rāśi. Favourable effects will be felt in its Dasha, if the Rāśi is conjunct with a benefic.**

शुभं वाऽप्यशुभं वापि कालचक्रदशाफलम्
राशिदिग्भागतो वापि पूर्वादिदिग्ग्रभश्चरात् ११२

तद्दिगावभागे वक्तव्यं तद्दशासमये नृणाम्
यथोपदेशमार्गेण सर्वेषां द्विजसत्तम ११३

**112-113. O Brahmin! In the Kala Chakra Dasha favourable and unfavorable effects may be predicted, after taking into account the directions of the Rāśis and Planets.**

कन्यातः कर्कटे याते पूर्वभागे महत्फलम्
उत्तरं देशमाश्रित्य शुभा यात्रा भविष्यति ११४

सिंहात्तु मिथुने याते पूर्वभागं विवर्जयेत्
कार्यान्तेऽपि च नैऋत्यां सुखं यात्रा भविष्यति ११५

कर्कटात् सिंहभे याते कार्यहानिश्च दक्षिणे
दक्षिणां दिशमाश्रित्य प्रत्यगागमनं भवेत् ११६

मीनात्तु वृश्चिके याते उदग् गच्छति सङ्कटम्
चापाच्च मकरे याते सङ्कटं जायते ध्रुवम् ११७

चापान्मेषे तु यात्रायां व्याधिर्बन्धो मृतिर्भवेत्
वृश्चिके तु सुखं सम्पत् स्त्रीप्राप्तिश्च द्विजोत्तम ११८

सिंहाच्च कर्कटे याते पश्चिमां वर्जयेद्दिशम्
शुभयोगे शुभं ब्रूयादशुभे त्वशुभं फलम् ११९

**114-119. If the movement is from Virgo to Cancer, good results are realized in places, located in the East and at that time journeys to the places in the North prove fruitful. Unfavorable effects will be felt in places, located in the West and the South. It will be advisable not to undertake journeys in those directions in the Dasha of these Rāśis. If the movement is from Leo to Gemini, no journey should be undertaken to places, located in the East. However, the journeys to the South-West will prove fruitful in the Dasha of those Rāśis. If the movement is from Cancer to Leo, journeys during that period to the South will prove unfavorable and result in loss and the native has to return from the South to the West. If the movement is from Pisces to Scorpio, there will distress, if the native goes to the North. The same would happen, if the movement is from Sagittarius to Capricorn. There may be ill health, imprisonment, or death, if the movement is from Sagittarius to Aries. There may be gains, comforts and property and marriage, if the movement is from Sagittarius to Scorpio. It will not be advisable to undertake journeys to the West during the related period, if the movement is from Leo to Cancer. Favourable results should be predicted, if the Rāśis are conjunct with benefics and adverse, if the Rāśis are conjunct with malefics.**

शूरश्चौरश्च मेषांशे लक्ष्मीवांश्च वृषांशके

मिथुनांशे भवेज्ज्ञानी कर्कांशे नृपतिर्भवेत् १२०

सिंहांशे राजमान्यश्च कन्यांशे पण्डितो भवेत्
तुलांशे राजमन्त्री स्याद् वृश्चिकांशे च निर्धनः १२१

चापांशे ज्ञानसम्पन्नो मरकांशे च पापकृत्
कुम्भांशे च वणिक्कर्मा मीनांशे धनधान्यवान् १२२

**120-122. According to the above-mentioned Kala Chakra, the person, born in the Aṅśaas of the various Rāśis, will be, as under. Aries Aṅśa brave and a thief, Taurus wealthy, Gemini learned, Cancer king, Leo respected by king, Virgo learned, Libra minister, or adviser, Sagittarius sinful, Aquarius businessman, Pisces wealthy.**

देहो जीवोऽथवा युक्तो रविभौमार्किराहुभिः
एकैकयोगे मृत्युः स्याद् बहुयोगे तु का कथा १२३

क्रूरैर्युक्ते तनौ रोगं जीवे युक्ते महद् भयम्
आधी रोगो भवेद् द्वाभ्यामपमृत्युस्त्रिभिर्भवेत् १२४

चतुर्भिर्मृतिमापन्नो देहे जीवेऽशुभैर्युते
युगपद्देहजीवौ च क्रूरग्रहयुतौ तदा १२५

राजचोरादिभीतिश्च मृतिश्चापि न संशयः
वह्निवाधा रवौ ज्ञेया क्षीणेन्दौ च जलाद् भयम् १२६

कुजे शस्त्रकृता पीडा वायुवाधा बुधे भवेत्
गुल्मवाधा शनौ ज्ञेया राहौ केतौ विषाद् भयम् १२७

देहजीवगृहे यातो बुधो जीवोऽथवा भृगुः
सुखसम्पत्कराः सर्वे रोगशोकविनाशनाः १२८

**123-128. If the Deha, or Jiva Rāśis are conjunct with Sun, Mars, Saturn, or Rahu, the native will die. Worse results may be expected, if the Deha and Jiva Rāśis are conjunct with two, or all of them. If there is a malefic in Deha Rāśi, the native suffers ill health; a malefic in a Jiva Rāśi will make the native very timid. If the Deha and/or Jiva Rāśi are conjunct with two malefics, there will be distress and diseases. Three malefics in the Deha and/or Jiva Rāśi will cause premature death. Four malefics in the Deha and Jiva Rāśi will cause definite death. If both the Deha and Jiva Rāśis are occupied by malefics, there will be fear from king and thieves and death of the native. If Sun is in the Deha, or Jiva Rāśi, there will be danger from fire. Moon in the Deha, or Jiva Rāśi will cause danger from water, Marsfear from weapons, Mercury fear from windy troubles, Saturn fear from Gulma (a disease), Rahu and Ketu fear from poison. If the Deha, or Jiva Rāśis are occupied by Mercury, Jupiter and Venus, the native will be wealthy, will enjoy all kinds of comforts and will have good health. Mixed results may be expected, if the Deha and Jiva Rāśis are occupied by both benefics and malefics.**

मिश्रग्रहैश्च संयुक्ते मिश्रं फलमवाप्नुयात्
पापक्षेत्रदशाकाले देहजीवौ तु दुःखितौ
शुभक्षेत्रदशाकाले शुभं भवति निश्चितम् १२९

शुभयुक्ताशुभक्षेत्रदशा मिश्रफला स्मृता

क्रूरयुक्तशुभक्षेत्रदशा मिश्रफला तथा १३०

**129-130. In the Dasha of the Rāśis, owned by malefics, the body and soul will be in distress. The effects will be favourable in the Dasha of the Rāśis, owned by benefics. If a malefic Rāśi is occupied by a benefic Planet, or, if a benefic Rāśi is occupied by a malefic Planet, the effects will be of a mixed nature.**

## Effects of Kala Chakra Dasha of the Rāśis in Lagna and other Houses.

जनानां जन्मकाले तु यो राशिस्तनुभावगः
तस्य चक्रदशाकाले देहारोग्यं सुखं महत् १३१

शुभे पूर्णसुखं पापे देहे रोगादिसम्भवः
स्वोच्चादिगतखेटाढ्ये राज्यमानधनाप्तयः १३२

**131-132. In the Kala Chakra Dasha of the Rāśi in Lagna the body remains healthy and the native spends a life with many kinds of comforts. If the Lagna Rāśi is a benefic one, the good effects are realized fully. If the Lagna Rāśi is a malefic Rāśi, there is likelihood of ill health. If a Planet is in exaltation or in its own Rāśi occupies Lagna, the native is respected by the king, or government and acquires wealth.**

धनभावे च यो राशिस्तस्य चक्रदशा यदा
तदा सुभोजनं पुत्रस्त्रीसुखं च धनाप्तयः १३३

विद्याप्तिर्वाक्पटुत्वं च सुगोष्ठ्या कालयापनम्
शुभर्क्षे फलमेवं स्यात् पापभे फलमन्यथा १३४

**133-134. In the Chakra Dasha of the Rāśi in 2nd the native receives good food, enjoys happiness of wife and children, gains wealth, achieves progress in the educational sphere, becomes a clever conversationalist and moves in good society. If the Rāśi be a benefic, good effects are realized in full, otherwise the effects would be of a mixed nature.**

तृतीयभावराशेस्तु कालचक्रदशा यदा
तदा भ्रातृसुखं शौर्यं धैर्यं चापि महत्सुखम् १३५

स्वर्णाभरणवस्त्राप्तिः सम्मानं राजसंसदि
शुभर्क्षे फलमेवं स्यात् पापर्क्षे फलमन्यथा १३६

**135-136. Happiness from co-borns, valor, patience, comforts, acquisition of gold, ornaments and clothes and recognition by the king, or government, are the effects in the Kala Chakra Dasha of the Rāśi in 3rd. If the Rāśi is a benefic, the good results are realized in full, otherwise adverse effects may also be experienced.**

सुखभावगतर्क्षस्य कालचक्रदशा यदा
तदा बन्धुसुखं भूमिगृहराज्यसुखाप्तयः १३७

आरोग्यमर्थलाभश्च वस्त्रवाहनजं सुखम्
शुभर्क्षे शोभनं ज्ञेयं पापभे फलमन्यथा १३८

**137-138. Good relations with kinsmen, acquisition of land, houses, or a kingdom, conveyances and clothes and enjoyment of sound health, are the effects of the Chakra Dasha of the Rāśi in 4th. If the Rāśi is a benefic one, the good effects are realized in full. If it is a malefic Rāśi, adverse results are also experienced.**

सुतभावगतर्क्षस्य कालचक्रदशा यदा
सुतस्त्रीराज्यसौख्याप्तिरारोग्यं मित्रसंगमः १३९

विद्याबुद्धियशोलाभो धैर्यं च विक्रमोदयः
शुभराशौ शुभं पूर्णं पापर्क्षे फलमन्यथा १४०

**139-140. Being blessed with wife and children, favours from Government, enjoyment of sound health, good relations with friends, achievement of fame, good progress in the educational sphere, patience and valor are the effects of the Chakra Dasha of the Rāśi in 5th. If the Rāśi is a benefic one, the good results are enjoyed in full. If the Rāśi is a malefic one, adverse effects are also experienced.**

रिपुभावगतर्क्षस्य कालचक्रदशा यदा
तदा चोरादिभूपाग्निविषशस्त्रभयं महत् १४१

प्रमेहगुल्मपाण्ड्वादिरोगाणामपि संभवः
पापर्क्षे फलमेवंस्यात् शुभर्क्षे मिश्रमादिशेत् १४२

**141-142. Danger from the king, fire and weapons and the possibility of suffering from diabetes, Gulma and jaundice are the effects in the Chakra Dasha of the Rāśi in 6th. If the Rāśi is a malefic one, the above adverse effects will be experienced in full. There will be some mitigation of the evil effects in the case of a benefic Rāśi.**

जायाभावगतर्क्षस्य कालचक्रदशा यदा
तदा पाणिग्रहः पत्नीपुत्रलाभादिकं सुखम् १४३

कृषिगोधनवस्त्राप्तिर्नृपपूजा महद्यशः
शुभराशौ फलं पूर्णं पापराशौ च तद्दलम् १४४

**143-144. Marriage, conjugal happiness, being blessed with children, gain of agricultural products, cows and clothes, favours and recognition from the king and achievement of fame, are the effects in the Chakra Dasha of the Rāśi in 7th. The beneficial results will be experienced in full, if the Rāśi is a benefic one. Meager good effects will be realized in the case of a malefic Rāśi.**

मृत्युभावस्थितर्क्षस्य कालचक्रदशा तदा
स्थाननाशं महद् दुःखं बन्धुनाशं धनक्षयम् १४५

दारिद्र्यमन्नविद्वोपमरिभीतिं च निर्दिशेत्
पापराशौ फलं पूर्णं शुभराशौ च तद्दलम् १४६

**145-146. Destruction of a residential house, distress, loss of wealth, poverty and danger from enemies are the effects of the Chakra Dasha of the Rāśi in 8th. The adverse effects will be realized in full, if the Rāśi is a malefic one. Some mitigation in evil effects may be expected in the case of a benefic Rāśi.**

धर्मभावगतर्क्षस्य कालचक्रदशा यदा
तदा पुत्रकलत्रार्थकृषिगेहसुखं वदेत् १४७

सत्कर्मधर्मसंसिद्धिं महज्जनपरिग्रहम्
शुभराशौ शुभं पूर्णं पापराशौ च तद्दलम् १४८

**147-148. Felicity in respect of wife, children, house, agricultural activities, performance of good and pious deeds, progress in religious inclinations and privilege of moving in the society of great religious leaders, are the effects in Chakra Dasa of the sign in the ninth house (Dharma Bhava). These of a benefic sign. Very meager good effects will be experienced in the event of the sign being a malefic one.**

कर्मभावगतर्क्षस्य कालचक्रदशा यदा
राज्याप्तिर्भूपसम्मानं पुत्रदारादिजं सुखम् १४९

सत्कर्मफलमैश्वर्यं सद्गोष्ठ्या कालयापनम्
शुभराशौ फलं पूर्णं पापराशौ च मिश्रितम् १५०

**149 - 150. Acquisition of kingdom, recognition from the king, happiness from wife and children, success in ventures and performance of pious deeds are the effects in the chakra dasa of the sign in the 10th house. The good results will be realized in full in case of a benefic sign. If it is a malefic sign, the good effects will be few.**

लाभभावस्थितर्क्षस्य कालचक्रदशा यदा
पुत्रस्त्रीबन्धुसौख्याप्तिर्भूपप्रीतिर्महत्सुखम् १५१

धनवस्त्राप्तिरारोग्यं सतां सङ्गश्च जायते
शुभराशौ फलं पूर्णं पापराशौ च खण्डितम् १५२

**151 - 152. Felicity from wife, children and kinsmen, receipt of favors from government, acquisition of wealth and clothes and association with good people, are the effects in the Chakra Dasa of the sign in the eleventh house (Labha Bhava). The good effects will be enjoyed in full in the case of a benefic sign. Very little good will happen in the sign be a malefic one.**

व्ययभावगतर्क्षस्य कालचक्रदशा तदा
उद्योगभङ्गमालस्यं देहपीडां पदच्युतिम् १५३

दारिद्यं कर्मवैफल्यं तथा व्यर्थव्ययं वदेत्
पापराशौ फलं त्वेवं शुभराशौ च तद्दलम् १५४

**153 - 154. Failure in efforts and ventures, pain in the body, loss of position, poverty and unnecessary expenditures are the effects in the Kalachakra Dasa of the sign in the twelfth house (Vyaya Bhava). The adverse effects will be experienced in full in the case of a malefic sign. Some good may happen if the sign be a benefic.**

## Chara Dasa

लग्नादिव्ययपर्यन्तं भानां चरदशां ब्रुवे
तस्मात् तदीशपर्यन्तं संख्यामत्र दशां विदुः १५५

मेषादित्रित्रिभैर्ज्ञेयं पदमोजपदे क्रमात्
दशाब्दानयने कार्या गणना व्युत्क्रमात् समे १५६

**155 -156. Now I shall describe to you the Chara Dasa of the signs (Rasis) of the twelve houses. In this Dasa system the number of years of Dasa is reckoned from the Rasi up to the house in which its lord is posited. The peculiar feature of this system is that every three signs from Aries etc. have four padas. For the odd (1,3) padas, the counting is done from Rasi onwards up to the Rasi in which its lord is housed. For the even padas (2,4) this counting is done in the reverse order.**

वृश्चिकाधिपती द्वौ च केतुभौमौ स्मृतौ द्विज
शनिराहु च कुम्भस्य स्वामिनौ परिकीर्तितो १५७

**157 . In this system Mars and Ketu are both lords of Scorpio. Similarly Saturn and Rahu are lords of Aquarius.**

द्विनाथक्षेत्रयोरत्र क्रियते निर्णयोऽधुना
द्वावेवाधिपती विप्र युक्तौ स्वर्क्षे स्थितौ यदि १५८

वर्ष द्वादशकं तत्र न चेदेकादि चिन्तयेत्
एकः स्वक्षेत्रगोऽन्यस्तु परत्र यदि संस्थितः १५९

तदाऽन्यत्र स्थितं नाथं परिगृह्य दशां नयेत्
द्वावप्यन्यर्क्षगौ तौ चेत् तमोर्मध्ये च यो बली १६०

तत एव दशा ग्राह्या क्रमाद् वोत्क्रमतो द्विजः
बलस्याऽत्र विचारे स्यादग्रहात् सग्रहो बली १६१
द्वावेव सग्रहौ तौ चेत् बली तत्राधिकग्रहः
ग्रहयोगसमानत्वे ज्ञेयं राशिबलाद् बलम् १६२

ज्ञेयाश्चरस्थिरद्वन्द्वाः क्रमतो बलशालिनः
राशिसत्त्वसमानत्वे बहुवर्षो बली भवेद् १६३

एकः स्वोच्चगतश्चाऽन्यः परत्र यदि संस्थितः
गृह्णीयादुच्चखेटस्थं राशिमन्यं विहाय वै १६४

उच्चखेटस्य सद्भावे वर्षमेकं च निक्षिपेत्
तथैव नीचखेटस्य वर्षमेकं विशोधयेत् १६५

एवं सर्वं समालोच्य जातकस्य फलं वदेत् १६६

**158-166. Now I will tell you about the working out of the Dasha years of Scorpio and Aquarius. If both the Lords of the two Rāśis, Scorpio and Aquarius, are placed in their own Rāśis, their Dasha will be of 12 years. Otherwise the Dasha will be of the number of years, indicated by the number, counted from that Rāśi to the Rāśi, occupied by its Lord. If one Planet be in his own Rāśi and the other in any other Rāśi, the Dasha will be of the number of years counted, from the above first Rāśi to the other. If the Lords are in different Rāśis, the counting is to be done up to the Rāśi, which is stronger. The Rāśi, which has a Planet, placed in it, is considered more powerful than the Rāśi without a Planet in it. If both are with Planets in them, the one with more Planets would be considered more powerful. If both Rāśis are occupied by an equal number of Planets, the strength of the Rāśi itself should be taken into account. The principle for considering the Bala of the Rāśi is, that the Fixed Rāśi is considered stronger than the Movable one and the Dual Rāśi is considered more powerful than the Fixed Rāśi. If there is equality in the strength of the Rāśis, then to determine the number of years of Dasha counting should be done up to the Rāśi with bigger number. If one Rāśi is occupied by a Planet in exaltation, the counting should be done up to that Rāśi only. In addition 1 should be added in the number of years in the case of a Rāśi with an exalted Planet and 1 should be deducted from the number of years in the case of a Rāśi with a Planet in debilitation. The prediction should be made after calculating the Dashas in this manner.**

क्रमादुत्क्रमतो वाऽपि धर्मभावपदक्रमात्
लग्नराशिं समारभ्य विज्ञश्चरदशां नयेत् १६७

**167. If the Rāśi in 9th House is in an odd Pad, the counting should be from the Rāśi in the Lagna onwards. The counting would be in the reverse order, if the Pad is even. The Dashas of Rāśis have to be fixed, keeping this in view.**

**For example. In the above Libra is the Rāśi in 9th House in an odd Pad. Amongst the Lords of Lagna, Saturn and Rahu, Rahu is associated with a Planet. Therefore Rahu is more powerful than, Saturn. Therefore counting should be done up to Rahu. Aquarius is in even Pad, therefore counting has to be done from Aquarius up to Rahu in the reverse order, by which the Char Dasha for Aquarius would come to 8 years. Aries is in odd Pad. Therefore the Char Dasha for Aries will be one year. The Dasha of other Rāśis should be calculated in the same manner.**

## Sthira Dasa

अथाऽहं संप्रवक्ष्यामि स्थिरसंज्ञां दशां द्विज
चरे सप्त स्थिरे चाऽष्टौ द्वन्द्वे नव समाः स्मृताः १६८

स्थिरत्वाच्च दशाब्दानां स्थिराख्येति निगद्यते
ब्रह्मखेटाश्रितर्क्षादिर्दशेयं परिवर्तते १६९

**168-169. Mahārśi Parashara said. Now I am going to describe the Sthira Dasha. In this Dasha system 7, 8 and 9 years are the Dasha spans of the Movable (Char), Fixed (Sthira) and Dual (Dvisva House) Rāśis. In this system the Dasha of the 12 Rāśis begins from the Brahm Planet Ashrit Rāśi. The Dashas are counted onwards from the odd Rāśis and in the reverse order from the even Rāśis.**

योऽसौ ब्रह्मग्रहः प्रोक्तः कथं स ज्ञायते मुने
इति स्पष्टतरं ब्रूहि कृपाऽस्ति यदि ते मयि १७०

षष्ठाष्टव्ययनाथेषु यो बली विषमर्क्षगः
पृष्ठस्थितो भवेद् ब्रह्मां बलिनो लग्नजाययोः १७१

कारकादष्टमेशो वा ब्रह्माऽप्यष्टभावगः
शनौ पाते च ब्रह्मत्वे ब्रह्मा तत्षष्ठखेचरः १७२
बहवो लक्षणाक्रान्ता ज्ञेयस्तेष्वधिकांशकः
अंशसाम्ये बलाधिक्याद् विज्ञेयो ब्रह्मखेचरः १७३

**170-173. Maitreya said. O great Sage! Now please enlighten me how the Brahm Planet is picked out in a chart. Mahārśi Parashara said. From amongst the Lords of 6th, 8th and 12th the Planet, who may possess the greatest strength and is placed in Lagna, or in 7th with strength, the one, placed in an odd Rāśi within sixth House from the House concerned, is called the Brahm Planet. The Lord of 8th in 8th is also accepted, as Brahm Planet. If Saturn, or Rahu/Ketu obtain Brahmatva (qualifications of Brahm Planet), they become Brahm Planet. If a number of Planets obtain Brahmatva, the one with the largest number of degrees would become Brahm Planet. If there is p6thty in the degrees of such Planets, the most powerful amongst them would become Brahm Planet.**

## Yogardha Dasa

योगार्धे च दशामानं द्वयोर्योगार्धसम्मितम्
लग्नसप्तमप्राण्यादिर्दशेयं च प्रवर्तते १७४

**174. The spans of Dashas of the Rāśis in the Yogardha Dasha system are half of the total of the spans of Char and Sthira Dashas. The Dasha will commence from the Rāśi of Lagna, or 7th, whichever is stronger. The order of the Dashas of the 12 Rāśis will be counted onwards, if the opening Dasha Rāśi is an odd one. If it be an even Rāśi, the Dashas will be in reverse order.**

## Kendraadi Dasa

लग्नसप्तमयोर्मध्ये यो राशिर्बलवान् भवेत्
ततः केन्द्रादिसंस्थानां राशीनाञ्च बलक्रमात् १७५

कारकादपि राशीनां खेटानां चैवमेव हि
दशाब्दाश्चरवज्ज्ञेयाः खेटानां च स्वभावधि १७६

**175-176. In this system there are Dashas of Fixed Rāśis in the Kendra etc. from Lagna, or from 7th, whichever is stronger. If Lagna, or 7th with strength is placed in an odd Rāśi, the Kendra etc. are counted in the onward order. If it be in an even Rāśi, the counting will be in the backward, or reverse order. In them also the Dashas would be in the order of comparative strength of the Rāśis. The order of Dashas would be the same, as reckoned from the Atma Karak. The spans of Dashas would be the same, as they are in the Char Dasha. In calculating the years of Dashas of Planets, counting is done from the Planet to his own Rāśi. The years of Dashas would be the number, arrived at by counting up to the Rāśi of the Planet, which is stronger, or more in number.**

द्विराश्यधिपश्चेटस्य गणयेदुभयावधि
उभयोरधिका संख्या कारकस्य दशा समाः १७७

**177. If a Planet owns two Rāśis, the Dasha years will be equal to the number, which is greater, when counted from the Rāśi, occupied by him.**

**Notes. Under this system Dashas are of two kinds, namely Lagna Kendraadi and Atma Karak Kendraadi. There are also Kendraadi Rāśi Dasha, or Kendraadi Planet Dasha in both the Dasha systems, mentioned above.**

**Karak Dasa**

आत्मकारकमारभ्य कारकाख्यदशा क्रमात्
लग्नात् कारकपर्यन्तं संख्यामत्र दशां विदुः १७८

**178. The system, under which the first Dasha is of the Atma Karak and the subsequent Dashas are of the remaining 7 Karakas in their order is known, as Karak Dasha. In this system the Dasha years are equal to the number of Rāśis, counted from Lagna up to the Karak concerned.**

**Manduka Dasa**

मण्डूकापरपर्याया त्रिकूटाख्यदशा द्विज
लग्नसप्तमयोर्मध्ये यो राशिर्बलवान् भवेत् १७९

ततः क्रमेणौजराशौ समे नेया तथोत्क्रमात्
त्रिकूटानां च विज्ञेयाः स्थिरवच्च दशा समाः १८०

**179-180. Under the Manduka Dasha system the Dasha commences from Lagna, or 7th House, whichever is stronger. If the Rāśi of commencement is an odd Rāśi, the Dashas of 3 Movable, 3 Fixed and 3 Dual Rāśis will be counted in the onwards order. They will be in the reverse order in the case of an even Rāśi. In this system the Dasha years will be the same, as in Sthira Dasha. In this system every Dasha is of the next 3rd Rāśi.**

**Shula Dasa**

निर्याणस्य विचारार्थं कैश्चिच्छूलदशा स्मृता
लग्नसप्तमतो मृत्युभयोर्यो बलवान् भवेत् १८१

तदादिर्विषमे विप्र क्रमादुत्क्रमतः समे
दशाब्दाः स्थिरवत्तत्र बलिमारकभे मृतिः १८२

**181-182. Some sages have designed the Shula Dasha for determining the time of death. In this system the Dasha commences from 2nd, or 8th, whichever is stronger. If the Rāśi is an odd one, the order of the Dasha Rāśis will be onwards. It will be backwards in the case of an even Rāśi. The Dasha years in this system are, as adopted for the Sthira Dasha. There is a possibility, that death appears in the Dasha of the Marak Rāśi, which has greater strength.**

**Trikona**

जन्मलग्नत्रिकोणेषु यो राशिर्बलवान् भवेत्
तमारभ्य नयेद् धीमान् चरपर्यायवद् दशाम् १८३

क्रमादुत्क्रमतो ग्राह्यं त्रिकोणं विषमे समे
त्रिकोणाख्यदशा प्रोक्ता समा नाथावसानकाः १८४

**183-184. In this system the first Dasha commences from the strongest amongst the Rāśis in Kona (Trikona) to Lagna (1st, 5th and 9th). This system is similar to the Char Dasha. Here also the Dashas of the Rāśis will be in the onwards order in the case of odd Rāśis and in the reverse order in the case of even Rāśis. The Dasha years will be similar to that of Char Dasha. It has been named Trikona because of the commencement of the Dasha from the Rāśis in Konas.**

**Dirga Dasa**

लग्नाद् धर्मस्य तद्दृष्टराशीनां च दशास्ततः
दशमस्य च तद्दृष्टराशीनां च नयेत् पुनः १८५

एकादशस्य तद्दृष्टराशीनां स्थिरवत् समाः
प्रवृत्ता दृग् वशाद्यस्माद् दृग्दशेयं ततः स्मृता १८६

चरे व्युत्क्रमतो ग्राह्या दृग्योग्याः स्थिरभे क्रमात्
विषमे क्रमतो द्वन्द्वे राशयो व्युत्क्रमात् समे १८७

**185-187. In this system the order of the Dashas is, as follows: the Rāśi, occupying 9th, the Rāśis, receiving a Aspect from the Rāśi in 9th, the Rāśi in 10th, the Rāśis, receiving a Aspect from the Rāśi in 10th, the Rāśi in 11th and the Rāśis, receiving a Aspect from the Rāśi in 11th. As this system is mostly based on Aspects, it has been named, as Dirga Dasha. Three different processes are adopted for the Movable, Fixed and Dual Rāśis from 9th, 10th and 11th. According to them, Rāśi, which receives a Aspect from the Movable Rāśi, is counted backwards and the Rāśi, receiving a Aspect from the Fixed Rāśi, is counted onwards. In the case of the Dual Rāśi, if it is odd, the counting is onwards and the order is backwards in case of an even Rāśi for the Rāśis, receiving a Aspect.**

**Notes. The intention is, that from the point of view of Aspect the process of Rāśi, receiving a Aspect, should be started from the Rāśi, which is nearest. In this connection readers may refer to Rāśi Aspectkathan Adhyaya, Ch. 8, Verse 9 and the table after that.**

**Lagnaadi Rāśi Dasha**

ऋृक्षे लग्नादिराशीनां दशा राशिदशा स्मृता
भयातं रविभिर्निघ्नं भभोगविहृतं फलम् १८८

राश्याद्यं लग्नराश्यादौ योज्यं द्वादशशेषितम्
तदारभ्य क्रमादोजे दशा ज्ञेयोत्क्रमात् समे १८९

**188-189. In this system there are Dashas of all the 12 Rāśis, including Lagna, in every Nakshatra. Consequently the Bhayat at birth may be multiplied by 12 and then the product should be divided by Bhabhog. The Rāśi, degree etc. so available may be added to the longitude of Lagna. From the Rāśi, becoming available by doing so, will start the Dashas of the 12 Rāśis. (If that Rāśi is odd, the counting will be onwards. It will be in the reverse order, if the Rāśi is even)**

दशाब्दा भुक्तभागघ्ना त्रिंशता विहृताः फलम्
भुक्तं वर्षादिकं ज्ञेयं भोग्यं मानाद् विशोधितम् १९०

**190. For finding the Balaance of Dasha at birth, multiply the expired degree etc. by the Dasha years of the first Dasha Rāśi and divide it by 30. The years etc. so arrived at may be deducted from the Dasha years. The result will indicate the Balaance of Dasha at birth in years, months etc.**

## Panch Swar Dasha

अकारादीन् स्वरान् पञ्च प्रथमं विन्यसेत् क्रमात्
कादिहान्तांल्लिखेद् वर्णान् स्वराधो ङञणोज्झितान् १९१

तिर्यक् पंक्तिक्रमेणैव पञ्चपञ्चविभागतः
न प्रोक्ता ङञणा वर्णा नामादौ सन्ति ते नहि १९२

चेद् भवन्ति तदा ज्ञेया गजडास्ते यथाक्रमात्
यत्र स्वरे स्वनामाद्यवर्णः स्यात् तत्स्वरादयः १९३
क्रमात् पंच दशाधीशाः द्वादशद्वादशाब्दकाः
स्वराणां च क्रमाज्ज्ञेयाः दशास्वन्तर्दशादयः १९४

**191-194. Beginning from Akaradhi 5 Swaras (a, i, u, e, o), write underneath them the Varnas in 6 lines. Leave out the letters ňa, a and ŋa, because they are not used in names. If they are found in any name, ga may be substituted for ňa, ja for a and da for ŋa for working out the Dashas and making predictions. In this manner the Swar, under which the first Varna of the name of the native is found, will determine the order of the Dashas of the five Swaras. Dashas are of 12 years for all the five Swaras. In the Dasha of every Swar there will be Antar Dashas of all the five Swaras in the same order.**

## Yogini Dasa

पूर्वमेव मया प्रोक्ता वर्णदाख्या दशा द्विज
इदानीं शम्भुना प्रोक्ता कथ्यते योगिनी दशा १९५

मङ्गला पिङ्गला धन्या भ्रामरी भद्रिका तथा
उल्का सिद्धा संकटा च योगिन्योऽष्टौ प्रकीर्तिताः १९६

मङ्गलातोऽभवच्चन्द्रः पिङ्गलातो दिवाकरः
धन्यातो देवपूज्योऽभूद् भ्रामरीतोऽभवत् कुजः १९७

भद्रिकातो बुधो जातस्तथोल्कातः शनैश्चरः
सिद्धातो भार्गवि जातः संकटातस्तमोऽभवद् १९८

जन्मर्क्ष च त्रिभिर्युक्तं वसुभिर्भागमाहरेत्
एकादिशेषे विज्ञेया योगिन्योः मङ्गलादिकाः १९९

एकाद्येकोत्तरा ज्ञेयाः क्रमादासां दशासमाः
नक्षत्रयातभोगाभ्यां भुक्तं भोग्यं च साधयेत् २००

**195-199. Mahārśi Parashara said. O Brahmin! I have already given you the description of Panch Swar Dasha. Now I will acquaint you with the Yogini Dasha, as described by Lord Mahadeva. There are 8 Yoginis, namely Mars, Pingal, 2ndya, Bhram6th, Bhadrika, Ulka, Siddha and Sankat.**
**Moon, Sun, Jupiter, Mars, Mercury, Saturn, Venus and Rahu are born from them. Add 3 to the Janma Nakshatra and divide it by 8. The remainder will indicate the Yogini Dasha of Mars, etc. The Dashas are of 1, 2, 3, 4, 5, 6, 7 and 8 years. The Balaance of Dasha at birth should be worked out from the Bhayat and Bhabhog etc., as already explained earlier.**

## Pind, Ańśa and Nisarg

येषां यदायुः संप्रोक्तं पैराडमांशं निसर्गजम्
तत्तत् तेषां दशा ज्ञेया पैराडी चांशी निसर्गजा २०१

बली लग्नार्कचन्द्राणां यस्तस्य प्रथमा दशा
तत्केन्द्रादिगतानां च ज्ञेया बलवशात्ततः २०२

**201-202. The Pind, Ańśa and Nisarg Dasha will be the same, as Pindayu, Ańśaayu and Nisargayu, the method of determination of which has already been explained previously. The order of Dashas will be, as follows. The first will be of Lagna, Sun, or Moon, whoever is stronger. The subsequent Dashas will be of Planets in Kendra to them, then of Planets in Panaphara Houses and lastly in Apoklima Houses. The Dashas and Antar Dashas of Lagna and the seven Planets will also be in the same order.**

अष्टवर्गबलेनैषां फलानि परिचिन्तयेत्
अष्टवर्गदशाश्चैताः कथिताः पूर्वसूरिभिः २०३

**203. The effects of these Dashas will be in accordance with Ashtak Varga Bala, which subject will be dealt with later. These Dashas are also called Ashtak Varga Dashas.**

## Sandhya

परायुर्द्वादशो भागस्तस्य सन्ध्या प्रकीर्तिता

तन्मिता लग्नभादीनां क्रमात् सन्ध्यादशा स्मृता २०४

**204. Sandhya is the Dvadashāńś Ayurdaya of the Param Ayurdaya (maximum possible life-span). In Sandhya Dasha the Dasha of all the Rāśis from Lagna onwards is of 1/12 the years of Param Ayurdaya.Pachak Dasha in Sandhya Dasha**

सन्ध्या रसगुणा कार्या चन्द्रवह्निहृता फलम्
संस्थाप्यं प्रथमे कोष्ठे तदर्धं त्रिषु विन्यसेत् २०५

त्रिभागं वसुकोष्ठेषु विन्यस्य तत्फलं वदेत्
एवं द्वादशभावेषु पाचकानि प्रकल्पयेत् २०६

**205-206. By multiplying the Dasha years of Sandhya Dasha by 6 and dividing the product by 31, the years, months etc. so arrived at may be put in one apartment of a Table. Thereafter half of these years, months etc. may be written in the next three apartments. The remaining 8 apartments may be filled in by one third of the aforesaid years, months etc. In this manner Pachak Dasha in Sandhya Dasha of every House can be worked out and predictions may be made from it.**

## Tar

विंशोत्तरीदशेवाऽत्र कैश्चित् तारादशा स्मृता
आचंकुरागुशबुकेश्वादिस्थानेषु तारकाः २०७

जन्मसम्पत्विपत्क्षेमप्रत्यरिः साधको वधः
मैत्रं परममैत्रं च केन्द्रस्थबलिनो ग्रहात् २०८

ज्ञेया तारादशा विप्र नामतुल्यफलप्रदा
यस्य केन्द्रे स्थितः खेटो दशेयं तस्य कीर्तिता २०९

**207-209. O Brahmin! Some sages have given consideration to Tar Dasha, which is like Vimshottari. In this Dasha Janma, Sampat etc. in their order replace Sun, Moon etc., placed in Kendraas. This Dasha is applied in those cases only, where there are Planets in Kendraas. If there are a number of Planets, the first Dasha will belong to the strongest amongst them.**

इति ते कथिता विप्र दश भेदा अनेकधा
एतदन्तर्दशाभेदान् कथयिष्यामि चाग्रतः २१०

**210. O Brahmin! I have now completed the description of the different kinds of Dashas. I will give the description of their Antar Dashas (sub-periods) later.**

अथ दशाफलाद्यायः ४७
श्रुताश्च बहुधा भेदा दशानां च मया मुने
फलं च कीदृशं तासां कृपया मे तदुच्यताम् १

## Ch. 47. Effects of Dashas

**1. Maitreya said. O Mahārśi Parashara! You have told me about the different kinds of Dashas. Now be kind enough to enlighten me with the effects of Dashas.**

साधारणं विशिष्टञ्च दशानां द्विविधं फलम्
ग्रहाणां च स्वभावेन स्थानस्थितिवशेन च २

**2. Mahārśi Parashara replied. O Brahmin! There are two kinds of effects of Dashas: general and distinctive. The natural characteristics of the Planets cause the general effects and the distinctive effects are realized by their placements etc.**

ग्रहवीर्यानुसारेण फलं ज्ञेयं दशासु च
आद्यद्रेष्काणगे खेटे दशारम्भे फलं वदेत् ३

दशामध्ये फलं वाच्यं मध्यद्रेष्काणगे खगे

3. अन्ते फलं तृतीयस्थे व्यस्तं खेटे च वक्रगे ४

**3-4. The effects of the Dashas of the Planets are in accordance with their strength. The effects of a Planet in the first Dreshkan are realized at the commencement of the Dasha. The Planet in the second Dreshkan makes its effects felt in the middle of the Dasha. The effects of the Planet in the third Dreshkan are experienced at the end of the Dasha. If the Planet is retrograde, these effects would be in the reverse order. The Dasha effects of Rahu and Ketu, who are always retrograde, will always be realized in the reverse order.**

दशारम्भे दशादीशे लग्नगे शुभदृग्युते
स्वोच्चे स्वभे स्वमैत्रे वा शुभं तस्य दशाफलम् ५

षष्ठाऽष्टमव्ययस्थे च नीचास्तरिपुभस्थिते
अशुभं तत्फलं चाऽथ ब्रुवे सर्वदशाफलम् ६

**5-6. The effects are favourable, if at the commencement of the Dasha the Dasha Lord is in Lagna, in his exaltation, own, or a Shant Rāśi. The results are unfavorable, if the Dasha Lord is in 6th, 8th, or 12th House, in his debilitation, or in an inimical Rāśi.**

मूलत्रिकोणे स्वक्षेत्रे स्वोच्चे वा परमोच्चगे
केन्द्रत्रिकोणलाभस्थे भाग्यकर्माधिपैर्युते ७

सूर्ये बलसमायुक्ते निजवर्गबलैर्युते
तस्मिन्दाये महत् सौख्यं धनलाभादिकं शुभम् ८

अत्यन्तं राजसन्मानमश्वांदोल्यादिकं शुभम्
सुताधिपसमायुक्ते पुत्रलाभं च विन्दति ९

धनेशस्य च सम्बन्धे गजान्तैश्वर्यमादिशेत्
वाहनाधिपसम्बन्धे वाहनत्रयलाभकृत् १०

नृपालतुष्टिर्वित्ताढ्यः सेनाधीशः सुखी नरः
वस्त्रवाहनलाभश्च दशायां बलिनो रवेः ११

**7-11. During the Dasha of Sun there is acquisition of wealth, great felicity and honors from the Government, if at the time of birth Sun is in his own Rāśi, in his exaltation Rāśi, in a Kendra, in 11th, be associated with the Lord of 9th, or the Lord of 10th and strong in his Varga. The native will be blessed with a son (children), if Sun is with the Lord of 5th. The native will acquire elephants and other kinds of wealth, if Sun is associated with the Lord of 2nd. The native will enjoy comforts of conveyances, if Sun is associated with the Lord of 4th. He attains a high position, like that of Army Chief, by the beneficence of the king and enjoys all kinds of happiness. Thus during the Dasha of a strong (and favourable) Sun there are acquisitions of clothes, agricultural products, wealth, honors, conveyances etc.**

नीचे षडष्टके रिःफे दुर्बले पापसंयुते
राहुकेतुसमायुक्ते दुःस्थानाधिपसंयुते १२

तस्मिन्दाये महापीडा धनधान्यविनाशकृत
राजकोपः प्रवासश्च राजदण्डो धनक्षयः १३

ज्वरपीडा यशोहानिर्बन्धुमित्रविरोधकृत
पितृक्षयभयं चैव गृहे त्वशुभमेव च १४

पितृवर्गे मनस्तापं जनद्वेषं च विन्दति
शुभदृष्टियुते सूर्ये मध्ये तस्मिन् क्वचित्सुखम्
पापग्रहेण सन्दृष्टे वदेत्पापफलं बुधः १५

**12-15. During the Dasha of Sun there will be anxieties, loss of wealth, punishment from Government, defamation, opposition by kinsmen, distress to father, (in)auspicious happenings at home, distress to paternal and maternal uncles etc., anxiety and inimical relations with other people for no reason whatsoever, should Sun be in his Rāśi of debilitation, be weak in 6th, 8th, or 12th, or be associated with malefic Planets, or with the Lord of 6th, 8th, or 12th. There will be some favourable effects at times, if in the above situations Sun receives a Aspect from benefic Planets. The effects will always be unfavorable, when malefic Planets give a Aspect to Sun.**

एवं सूर्यफलं विप्र संक्षेपादुदितं मया
विंशोत्तरीमतेनाथ ब्रुवे चन्द्रदशाफलम् १६

स्वोच्चे स्वक्षेत्रगे चैव केन्द्रे लाभत्रिकोणगे
शुभग्रहेण संयुक्ते पूर्णे चन्द्रेबलैर्युते १७

कर्मभाग्याधिपैर्युक्ते वाहनेशबलैर्युते
आद्यन्तैश्वर्यसौभाग्यधनधान्यादिलाभकृत १८

गृहे तु शुभकार्याणि वाहनं राजदर्शनम्
यत्नकार्यार्थसिद्धिः स्याद् गृहे लक्ष्मीकटाक्षकृत् १९

मित्रप्रभुवशाद्भाग्यं राज्यलाभं महत्सुखम्
अश्वान्दोल्यादिलाभं च श्वेतवस्त्रादिकं लभेत् २०

पुत्रलाभादिसन्तोषं गृहगोधनसंकुलम्
धनस्थानगते चन्द्रे तुङ्गे स्वक्षेत्रगेऽपि वा २१

अनेकधनलाभं च भाग्यवृद्धिर्महत्सुखम्
निक्षेपराजसन्मानं विद्यालाभं च विन्दति २२

**16-22.** **O Brahmin! After describing the effects of the Dasha of Sun in brief, I will now come to the effects of Vimshottari Dasha of Moon. During the Dasha of Moon from its commencement to the end there will be opulence and glory, good fortune, gain of wealth, auspicious functions at home, dawn of fortune, attainment of a high position in Government, acquisition of conveyances, clothes, birth of children and acquisition of cattle, should Moon be in her exaltation, in her own Rāśi, in Kendra, in 11th, 9th, or 5th, be associated with, or receives a Aspect from benefics, be fully powerful and is associated with the Lord of 10th, 9th, or 4th. There will be extraordinary gains of wealth and luxuries, if such a Moon is in 2nd House.**

नीचे वा क्षीणचन्द्रे वा धनहानिर्भविष्यति
दुश्चिक्ये बलसंयुक्ते क्वचित्सौख्यं क्वचिद्धनम्  २३

दुर्बले पापसंयुक्ते देहजाड्यं मनोरुजम्
भृत्यपीडा वित्तहानिर्मातृवर्गजनाद्व्यधः  २४

षष्ठाष्टमव्यये चन्द्रे दुर्बले पापसंयुते
राजद्वेषो मनोदुःखं धनधान्यादिनाशनम्  २५

मातृक्लेषं मनस्तापं देहजाड्यं मनोरुजम्
दुःस्थे चन्द्रे बलैर्युक्ते क्वचिल्लाभं क्वचित्सुखम्
देहजाड्यं क्वचिच्चैव शान्त्या तत्र शुभं दिशेत्  २६

**23-26.** **Should Moon be waning, or in her debilitation Rāśi, there will be loss of wealth in her Daha. If Moon is in 3rd, there will be happiness off and on. If Moon is associated with malefics, there will be idiocy, mental tension, trouble from employees and mother and loss of wealth. If waning Moon is in 6th, 8th, or 12th, or is associated with malefics, there will be inimical relations with Government, loss of wealth, distress to mother and similar evil effects. If a strong Moon is placed in 6th, 8th, or 12th there will be troubles and good times off and on.**

स्वभोच्चादिगतस्यैवं नीचशत्रुभगस्य च
ब्रवीमि भूमिपुर्तस्य शुभाऽशुभदशाफलम्  २७

परमोच्चगते भौमे स्वोच्चे मूलत्रिकोणगे
स्वर्क्षे केन्द्रत्रिकोणे वा लाभे वा धनगेऽपि वा  २८

सम्पूर्णबलसंयुक्ते शुभदृष्टे शुभांशके
राज्यलाभं भूमिलाभं धनधान्यादिलाभकृत्  २९

आधिक्यं राजसम्मानं वाहनाम्बरभूषणम्
विदेशे स्थानलाभं च सोदराणां सुखं लभेत्  ३०

केन्द्रे गते सदा भौमे दुश्चिक्ये बलसंयुते
पराक्रमाद्वित्तलाभो युद्धे शत्रुजयो भवेत्  ३१

कलत्रपुत्रविभवं राजसम्मानमेव च
दशादौ सुखमाप्नोति दशान्ते कष्टमादिशेत्  ३२

**27-32.** **If Mars is in his exaltation, in his MulaTrikonaa, in his own Rāśi, in Kendra, in 11th, or 2nd House with strength, in a benefic Aṅśa (Navāmśa) and is associated with a benefic, there will be during his Dasha acquisition of kingdom (attainment of a high administrative, or political position in Government, gain of wealth and land, recognition by Government), gain of wealth from foreign countries and acquisition of conveyances and ornaments. There will also be happiness and good relations with co-borns. If Mars with strength is placed in a Kendra, or in 3rd, there will be gain of wealth through valor, victory over enemies, happiness from wife and children. There will, however, be a possibility of some unfavorable effects at the end of the Dasha.**

नीचादिदुष्टभावस्थे भौमे बलविवर्जिते
पापयुक्ते पापदृष्टे सा दशा नेष्टदायिका ३३

**33. If Mars is in his debilitation Rāśi, weak, in an inauspicious House, or is associated with, or receives a Aspect from malefics, there will be in his Dasha loss of wealth, distress and similar unfavorable effects.**

एवं राहोश्च केतोश्च कथयामि गृहादिकम्
तयोर्दशाफलज्ञप्त्यै तवाऽग्रे द्विजनन्दन ३४

राहोस्तु वृषभं केतोर्वृश्चिकं तुङ्गसंज्ञकम्
मूलत्रिकोणकं ज्ञेयं युग्मं चापं क्रमेण च ३५

कुम्भाली च गृहौ प्रोक्तौ कन्यामीनौ च केनचित्
तद्दाये बहुसौख्यं च धनधान्यादिसम्पदाम् ३६

मित्रप्रभुवशादिष्टं वाहनं पुत्रसम्भवः
नवीनगृहनिर्माणं धर्मचिन्ता महोत्सवः ३७

विदेशराजसन्मानं वस्त्रालङ्कारभूषणम्
शुभयुक्ते शुभैर्दृष्टे योगकारकसंयुते ३८

केन्द्रत्रिकोणलाभे वा दुश्चिक्ये शुभराशिगे
महाराजप्रसादेन सर्वसम्पत्सुखावहम् ३९

**34-39. In order to cl6thfy the effects of the Dasha of Rahu I shall first mention the exaltation and debilitation Rāśis of Rahu and Ketu. The exaltation Rāśi of Rahu is Taurus. The exaltation Rāśi of Ketu is Scorpio. The MulaTrikonaas of Rahu and Ketu are Gemini and Sagittarius. The own Rāśis of Rahu and Ketu are Aquarius and Scorpio. Some sages have expressed the view, that Virgo is the own Rāśi of Rahu and Pisces is the own Rāśi of Ketu. Should Rahu be in his exaltation Rāśi etc., there will be during the Dasha of Rahu great happiness from acquisition of wealth, agricultural products etc., acquisition of conveyances with the help of friends and Government, construction of a new house, birth of sons (children), religious inclinations, recognition from Government of foreign countries and gain of wealth, clothes etc. If Rahu be associated with, or receives a Aspect from benefics, be in a benefic Rāśi and be in 1st, 4th, 7th, 10th, 11th, or 3rd, there will be during his Dasha all kinds of comforts by the beneficence of the Government, acquisition of wealth through a foreign Government, or sovereign and felicity at home.**

यवनप्रभुसन्मानं गृहे कल्याणसम्भवम्
रन्ध्रे वा व्ययगे राहौ तद्दाये कष्टमादिशेत् ४०

पापग्रहेण सम्बन्धे मारकग्रहसंयुते
नीचराशिगते वापि स्थानभ्रंशो मनोव्यथा ४१

विनाशो दारपुत्राणां कुत्सितान्नं च भोजनम्
दशादौ देहपीडा च धनधान्यपरिच्युतिः ४२

दशामध्ये तु सौख्यं स्यात् स्वदेशे धनलाभकृत्
दशान्ते कष्टमाप्नोति स्थानभ्रंशो मनोव्यथा ४३

**40-43. If Rahu is in 8th, or 12th House, there will be during his Dasha all kinds of troubles and distress. If Rahu is associated with a malefic, or a Marak Planet, or is in his debilitation Rāśi, there will be loss of position, destruction of his residential house, mental agony, trouble to wife and children and misfortune of getting bad food. There will be loss of wealth at the commencement of the Dasha, some relief and gain of wealth in his own country and distress and anxieties during the last portion of the Dasha.**

यः सर्वेषु नाभोगेषु बुधैरतिशुभः स्मृतः
तस्य देवेन्द्रपूज्यस्य कथयामि दशाफलम् ४४

**44. Now I am going to describe the effects of the Dasha of Jupiter, the great benefic and preceptor of the Gods.**

स्वोच्चे स्वक्षेत्रगे जीवे केन्द्र लाभत्रिकोणगे
मूलत्रिकोणलाभे वा तुंगांशे स्वांशगेऽपि वा ४५

राज्यलाभं महापौरुषं राजसन्मानकीर्तनम्
गजवाजिसमायुक्तं देवब्राह्मणपूजनम् ४६

दारपुत्रादिसौख्यं च वाहनांबरलाभजम्
यज्ञादिकर्मसिद्धिः स्याद्वेदान्तश्रवणादिकम् ४७

महाराजप्रसादेनाऽभीष्टसिद्धिः सुखावहा
आन्दोलिकादिलाभश्च कल्याणं च महत्सुखम् ४८

**45-48. If Jupiter is in his exaltation, his own Rāśi, his MulaTrikonaa, in 10th, 5th, or 9th House, in his own Navāmśa, or in his exalted Navāmśa, there will be during his Dasha: acquisition of kingdom, great felicity, recognition by Government, acquisition of conveyances and clothes, devotion to deities and Brahmins, happiness in respect of his wife and children and success in the performance of religious sacrifices (oblations.**

पुत्रदारादिलाभश्च अन्नदानं महत्प्रियम्
नीचास्तपापसंयुक्ते जीवे रिष्फाष्टसंयुते ४९

स्थानभ्रंशं मनस्तापं पुत्रपीडामहद्भयम्
पश्चादिधनहानिश्च तीर्थयात्रादिकं लभेत् ५०

आदौ कष्टफलं चैव चतुष्पाज्जीवलाभकृत्
मध्यान्ते सुखमाप्नोति राजसम्मानवैभवम् ५१

**49-51. If Jupiter is in his debilitation Rāśi, combust, associated with malefics, or in 6th, or 8th, there will be during his Dasha loss of residential premises, anxiety, distress to children, loss of cattle and pilgrimage. The Dasha will give some unfavorable effects at its commencement only. During the later part of the Dasha there will be good effects, like gain of wealth, awards from and recognition by Government.**

अथ सर्वेषु खेटेषु योऽतिहीनः प्रकीर्तितः
तस्य भास्करपुत्रस्य कथयामि दशाफलम् ५२

**52. Now I will describe to you the effects of the Dasha of Saturn, who is considered the vilest and most inferior amongst all the Planets.**

स्वोच्चे स्वक्षेत्रगे मन्दे मित्रक्षेत्रेऽथ वा यदि
मूलत्रिकोणे भाग्ये वा तुंगांशे स्वांशगेऽपि वा ५३

दुश्चिक्ये लाभगे चैव राजसम्मानवैभवम्
सत्कीर्तिर्धनलाभश्च विद्यावादविनोदकृत् ५४

महाराजप्रसादेन गजवाहनभूषणम्
राजयोगं प्रकुर्वीत सेनाधीशान्महत्सुखम् ५५

लक्ष्मीकटाक्षचिह्नानि राज्यलाभं करोति च
गृहे कल्याणसम्पत्तिर्दारपुत्रादिलाभकृत् ५६

**53-56. If Saturn is in his exaltation, in his own Rāśi, or in MulaTrikonaa, or friendly Rāśi, in his own, or exalted Navāmśa and in 3rd, or 11th, there will be during his Dasha recognition by Government, opulence and glory, name and fame, success in the educational sphere, acquisition of conveyances and ornaments etc., gain of wealth, favours from Government, attainment of a high position, like Commander of an Army, acquisition of a kingdom, benevolence of goddess Lakshmi, gain of property and birth of children.**

षष्ठाषष्टमव्यये मन्दे नीचे वाऽस्तङ्गतेऽपि वा
विषशस्त्रादिपीडा च स्थानभ्रंशं महद्भयम् ५७

पितृमातृवियोगं च दारपुत्रादिपीडनम्
राजवैशम्यकार्याणि ह्यनिष्टं बन्धनं तथा ५८

शुभयुक्तेक्षिते मन्दे योगकारकसंयुते
केन्द्रत्रिकोणलाभे वा मीनगे कार्मुके शनौ ५९

राज्यलाभं महोत्साहं गजाश्वाम्बरसंकुलम् ६०

**57-60. If Saturn is in 6th, 8th, or 12th, in his debilitation Rāśi, or combust, there will be during his Dasha ill effects from poison, injury from weapons, separation from father, distress to wife and children, disaster, as a result of displeasure of Government, imprisonment etc. If Saturn receives a Aspect from, or is associated with a benefic, is placed in a Kendra, or in a Trikona, in Sagittarius, or in Pisces, there will be acquisition of a kingdom, conveyances and clothes.**

अथ सर्वनभोगेषु यः कुमारः प्रकीर्तितः
तस्य तारेशपुत्रस्य कथयामि दशाफलम् ६१

**61. Now I am going to describe the effects of the Dasha of Mercury, who is called a Kumar (in his teens) amongst all the Planets.**

स्वोच्चे स्वक्षेत्रसंयुक्ते केन्द्रलाभत्रिकोणगे
मित्रक्षेत्रसमायुक्ते सौम्ये दाये महत्सुखम् ६२

धनधान्यादिलाभं च सत्कीर्तिधनसम्पदाम्
ज्ञानाधिक्यं नृपप्रीतिं सत्कर्मगुणवर्द्धनम् ६३

पुत्रदारादिसौख्यं च देहारोग्यं महत्सुखम्
क्षीरेण भोजनं सौख्यं व्यापाराल्लभते धनम् ६४

शुभदृष्टियुते सौम्ये भाग्ये कर्माधिपे दशा
आधिपत्ये बलवती सम्पूर्णफलदायिका ६५

**62-65. If Mercury is in his exaltation, in his own, in a friendly Rāśi, or in 11th, 5th, or 9th, there will be during his Dasha acquisition of wealth, gain of reputation, improvement in knowledge, benevolence of Government, auspicious functions, happiness from wife and children, good health, availability of sweetish preparations, profits in business etc. If Mercury receives a Aspect from a benefic, is in 9th, or is the Lord of 10th, the aforesaid beneficial results will be experienced in full and there will be great felicity all-round.**

पापग्रहयुते दृष्टे राजद्वेषं मनोरुजम्
बन्धुजनविरोधं च विदेशगमनं लभेत् ६६

मरप्रेष्यं च कलहं मूत्रकृच्छ्रान्महन्भयम्
षष्ठाष्टमव्यये सौम्ये लाभभोगार्थनाशनम् ६७

वातपीडां धनं चैवं पाराडुरोगं विनिर्दिशेत्
नृपचौराग्निभीतिं च कृषिगोभूमिनाशनम् ६८

दशादौ धनधान्यं च विद्यालाभं महत्सुखम्
पुत्रकल्याणसम्पत्तिः सन्मार्गे धनलाभकृत् ६९

मध्ये नरेन्द्रसन्मानमन्ते दुःखं भविष्यति ७०

**66-70. If Mercury is associated with a malefic, there will be during his Dasha punishment by Government, inimical relations with kinsmen, journey to a foreign country, dependence on others and the possibility of urinary troubles. If Mercury is in 6th, 8th, or 12th, there will be loss of wealth, due to indulgence in lascivious activities, possibility of suffering from rheumatism and jaundice, danger of thefts and malevolence of Government, loss of land and cattle etc. At the commencement of the Dasha of Mercury, there will be gains of wealth, betterment in the educational sphere, birth of children and happiness. In the middle of the Dasha, there will be recognition from Government. The last part of the Dasha will be distressful.**

यस्तमोग्रहयोर्मध्ये कबन्धः कथ्यते बुधैः
तस्य केतोरिदानीं ते कथेयामि दशाफलम् ७१

**71. Now I will tell you about the Dasha of Ketu, who is a headless trunk (Kabandha) amongst all the Planets.**

केन्द्रे लाभे त्रिकोणे वा शुभराशौ शुभेक्षिते
स्वोच्चे वा शुभवर्गे वा राजप्रीतिं मनोनुगम् ७२

देशग्रामाधिपत्यं च वाहनं पुत्रसम्भवम्
देशान्तरप्रयाणं च निर्दिशेत् तत् सुखावहम् ७३

पुत्रदारसुखं चैव चतुष्पाज्जीवलाभकृत्
दुश्चिक्ये षष्ठलाभे वा केतुर्दाये सुखं दिशेत् ७४

राज्यं करोति मित्रांशं गजवाजिसमन्वितम्
दशादौ राजयोगाश्च दशामध्ये महद्भयम् ७५

अन्ते दूराटनं चैव देहविश्रमणं तथा
धने रन्ध्रे व्यये केतौ पापदृष्टियुतेक्षिते ७६

निगडं बन्धुनाशं च स्थानभ्रंशं मनोरुजम्
शूद्रसङ्गादिलाभं च कुरुते रोगसंकुलम् ७७

**72-77. If Ketu is in a Kendra, a Trikona, or in 11th, in a benefic Rāśi, in his exaltation, or in his own Rāśi, there will be during his Dasha cordial relations with the king, desired headship of a country, or village, comforts of conveyances, happiness from children, gain from foreign countries, happiness from wife and acquisition of cattle. If Ketu is in 3rd, 6th, or 11th, there will be in his Dasha acquisition of a kingdom, good relations with friends and opportunities for the acquisition of elephants. At the commencement of the Ketu Dasha there will be Raja Yoga. During the middle portion of the Dasha there will be possibilities of fearfulness and in the last part there will be sufferings from ailments and journeys to distant places. If Ketu is in 2nd, 8th, or 12th, or receives a Aspect from a malefic, there will be imprisonment, destruction of kinsmen and residential premises and anxieties, company of menials and diseases.**

अथ भूतेषु यः शुक्रा मदरूपेण तिष्ठति
तस्य दैत्यगुरोर्विप्र  कथयामि दशाफलम्  ७८

**78. Now I will describe the effects of the Dasha of Venus, who is the incarnate of intoxication, ecstasy, delight and pride amongst all the Planets.**

परमोच्चगते शुक्रे स्वोच्चे स्वक्षेत्रकेन्द्रगे
नृपाऽभिषेकसम्प्राप्तिर्वाहनाऽम्बरभूषणम्  ७९

गजाश्वपशुलाभं च नित्यं मिष्ठान्नभोजनम्
अखण्डमण्डलाधीशराजसन्मानवैभवम्  ८०

मृदङ्गवाद्यघोषं च गृहे लक्ष्मीकटाक्षकृत्
त्रिकोणस्थे निजे तस्मिन् राज्यार्थगृहहसम्पदः  ८१

विवाहोत्सवकार्याणि पुत्रकल्याणवैभवम्
सेनाधिपत्यं कुरुते इष्टबन्धुसमागमम्  ८२

**79-82. If Venus is in his exaltation, in his own Rāśi, or in a Kendra, or a Trikona, there will be during his Dasha acquisition of fancy clothes, ornaments, conveyances, cattle and land etc., availability of sweet preparations every day, recognition from the sovereign, luxurious functions of songs and dances etc. by the benevolence of Goddess Lakshmi. If Venus is in his MulaTrikonaa, during his Dasha there will definitely be acquisition of a kingdom, acquisition of a house, birth of children and grandchildren, celebration of marriage in the family, attainment of a high position, like the Commander of an Army, visits of friends, recovery of lost wealth, property, or kingdom.**

नष्टराज्याद्धनप्राप्तिं गृहे गोधनसङ्ग्रहम्
षष्ठाष्टमव्यये शुक्रे नीचे वा व्ययराशिगे  ८३

आत्मबन्धुजनद्वेषं दारवर्गादिपीडनम्
व्यवसायात्फलं नष्टं गोमहिष्यादिहानिकृत्  ८४

**83-84. If Venus is in 6th, 8th, or 12th, there will be during his Dasha inimical relations with kinsmen, distress to wife, losses in business, destruction of cattle and separation from relations.**

दारपुत्रादिपीडा वा आत्मबन्धुवियोगकृत्
भाग्यकर्माधिपत्येन लग्नवाहनराशिगे  ८५

तद्दशायां महत्सौख्यं देशग्रामाधिपालता
देवालयतडागादिपुण्यकर्मसु संग्रहः  ८६

अन्नदाने महत्सौख्यं नित्यं मिष्ठान्नभोजनम्
उत्साहः कीर्तिसम्पत्ती स्त्रीपुत्रधनसम्पदः  ८७

**85-87. If Venus is in 4th, as Lord of 9th, or 10th, there will be during his Dasha attainment of rulership of a country, or village, performance of pious deeds, like building of reservoirs and temples and giving grains etc. in ch6thty, availability of sweet preparations every day, vigor in work, name and fame and happiness from wife and children.**

स्वभुक्तौ फलमेवं स्याद्बलान्यन्यानि भुक्तिषु

द्वितीयद्यूननाथे तु देहपीडा भविष्यति  ८८

तद्दोषपरिहारार्थं रुद्रं वा त्र्यम्बकं जपेत्
श्वेतां गां महिषीं दद्यादारोग्यं च ततो भवेत्  ८९

**88-89. Similar are the effects of Venus in his sub-periods. If Venus is Lord of 2nd, or 7th, there will be during his Dasha physical pains and troubles. To get alleviation from those troubles the native should perform Shatarudriya, or Mrityunjaya Japa in the prescribed manner and give in ch6thty a cow, or female buffalo.**

अथ विशेषनक्षत्रदशाफलाध्यायः ४८
स्थानस्थितिवशेनैवं फलं प्रोक्तं पुरातनैः
मिथो भावेशसम्बन्धात्फलानि कथयाम्यहम् १

**Ch. 48. Distinctive Effects of the Nakshatra Dasha, or of the Dashas of the Lords (Vimshottari) of various Houses**

**1. If the Lord of 10th is placed in an auspicious House in his exaltation Rāśi etc., his Dasha effects will be favourable. The effects will be adverse, if the Lord of 10th is in his debilitation Rāśi and occupies an inauspicious House. This proves, that an inauspicious Planet in his exaltation Rāśi etc. will not produce unfavorable results, if placed in an auspicious House and a benefic, being in his debilitation Rāśi and being placed in an inauspicious House, will produce adverse effects. Now I will describe the effects of the Dasha of the Lords of various Houses, who are related to each other.**

लग्नेशस्य गशाकाले सत्कीतिर्देहजं सुखम्
धनेशस्य दशायां तु क्लेशो वा मृत्युतो भयम् २

सहजेशदशाकाले ज्ञेयं पापफलं नृणाम्
सुखाधीशदशायां तु गृहभूमिसुखं भवेत् ३

पञ्चमेशस्य पाके च विद्याप्तिः पुत्रजं सुखम्
रोगेशस्य दशाकाले देहपीडा रिपोर्भयम् ४

**2-4. There will be physical well-being in the Dasha of the Lord of Lagna, distress and possibility of death in the Dasha of the Lord of 2nd, unfavorable effects in the Dasha of the Lord of 3rd, acquisition of house and land in the Dasha of the Lord of 4th, progress in educational sphere and happiness from the children in the Dasha of the Lord of 5th and danger from enemies and ill health in the Dasha of the Lord of 6th.**

सप्तमेशस्य पाके तु स्त्रीपीडा मृत्युतो भयम्
अष्टमेशदशाकाले मृत्युभीतिर्धनक्षतिः ५

धर्मेशस्य दशायां च भूरिल्लाभो यशःसुखम्
दशमेशदशाकाले सम्मानं नृपसंसदि ६

लाभेशस्य दशाकाले लाभे बाधा रुजोभयम्
व्ययेशस्य दशा नृणां बहुकष्टप्रदा द्विज ७

दशारम्भे शुभस्थाने स्थितस्यापि शुभं फलम्
अशुभस्थानगस्यैवं शुभस्यापि न शोभनम् ८

पञ्चमेशेन युक्तस्य कर्मेशस्य दशा शुभा
नवमेशेन युक्तस्य कर्मेशस्यातिशभना ९

पञ्चमेशेन युक्तस्य ग्रहस्यापि दशा शुभा
तथा धर्मपयुक्तस्य दशा परमशोभना १०

सुखेशसहितस्यापि धर्मेशस्य दशा शुभा
पञ्चमस्थानगस्यापि मानेशस्य दशाशुभा ११

एवं त्रिकोणनाथानां केन्द्रस्थानां दशाः शुभाः
तथा कोणस्थितानां च केन्द्रेशानां दशाः शुभाः १२

केन्द्रेशः कोणभावस्थः कोणेशः केन्द्रगो यदि
तयोर्दशां शुभां प्राहुर्ज्योतिःशास्त्रविदो जनाः १३

**5-8. There will be distress to wife and the possibility of the death of the native in the Dasha of the Lord of 7th, the possibility of death and financial losses in the Dasha of the Lord of 8th, improvement in the educational sphere, religious-mindedness and unexpected gains of wealth in the Dasha of the Lord of 9th, recognition from and awards by the Government in the Dasha of the Lord of 10th, obstacles in gains of wealth and the possibility of diseases in the Dasha of the Lord of 11th and distress and danger from diseases in the Dasha of the Lord of 12th. A Planet, placed in an auspicious House, like Trikona etc., at the commencement of the Dasha, produces favourable results in his Dasha. The Planet, placed in 6th, 8th, or 12th at that time, yields only adverse results during his Dasha. It is therefore essential, that the placement of a Planet at the time of birth and at the commencement of the Dasha should both be taken into account for the assessment of the Dasha effects.**

षष्ठाष्टमव्ययाधीशा अपि कोणेशसंयुता
तेषां दशाऽपि शुभदा कथिता कालकोविदैः १४

कोणेशो यदि केम्द्रस्थः केन्द्रेशो यदि कोणगः
ताभ्यां युक्तस्य खेटस्य दृष्टियुक्तस्य चैतयोः १५

दशां शुभप्रदां प्राहुर्विद्वांसो दैवचिन्तकाः
लग्नेशो धर्मभावस्थो धर्मेशो लग्नगो यदि १६

एतयोस्तु दशाकाले सुखधर्मसमुद्भवः
कर्मेशो लग्नराशिस्थो लग्नेशः कर्मभावगः १७

**14-17. The Dasha of 6ths, 8ths, or 12ths Lord also becomes favourable, if they get associated with the Lord of a Trikona. If the Lord of a Kendra is in a Trikona, or the Lord of a Trikona is in a Kendra, the Dasha of the Planet, conjunct with either of them, becomes favourable. The Dasha of a Planet, receiving a Aspect from the Lord of a Kendra, or Trikona is also favourable. If 9ths Lord is in Lagna and Lagnas Lord is in 9th, the Dashas of both of them will produce extremely beneficial results. There will be acquisition of a kingdom in the Dashas of Lagnas Lord and 10ths Lord, if 10ths Lord is in Lagna and Lagnas Lord is in 10th.**

तयोर्दशाविपाके तु राज्यलाभो भवेद्ध्रुवम्
त्रिषडायगतानां च त्रिषडायाधिपैर्युजम् १८

शुभानामपि खेटानां दशा पापफलप्रदा
मारकस्थानगानां च मारकेशयुजामपि १९

रन्ध्रस्थानगतानां च दशाऽनिष्टफलप्रदा
एवं भावेशसम्बन्धादूरनीयं दशाफलम् २०

**18-20. The Dasha of 3rds, 6ths and 11ths Lord, of the Planets, placed in 3rd, 6th and 11th and of the Planets, conjunct with the above, will prove unfavorable. The Dasha of the Planets, associated with the Lords of Marak Houses, namely 2nd and 7th, in 2nd, or 7th and the Dashas of the Planets, placed in 8th, will produce unfavorable effects. Thus the Dashas should be considered favourable, after taking into account the placement of a Planet and his relationship of one Planet with the other. (Rahu and Ketu give favourable results in 3rd, 6th and 11th).**

अथ कालचक्रदशाफलाध्यायः ४९

कथयाम्यथ विप्रेन्द्र कालचक्रदशाफलम्
तत्रादौ राशिनाथानां सूर्यादीनां फलं ब्रुवे १

रक्तपित्तादितो व्याधिं नृणामर्कफलं वदेत्
धनकीर्तिप्रजावृद्धिवस्त्राभरणदः शशी २

ज्वरमाशु दिशेत् पैत्त्यं ग्रन्थिस्फोटं कुजस्तथा
प्रजानां च धनानां च सदा वृद्धिं बुधो दिशेत् ३

धनं कीर्तिं प्रजावृद्धिं नानाभोगं बृहस्पतिः
विद्यावृद्धिर्विवाहश्च गृहं धान्यं भृगोः फलम् ४

तापाधिक्यं महद्दुःखं बन्धुनाशः शनेः फलम्
एवमर्कादियोगेन वदेद्राशिदशाफलम् ५

## Ch. 49. Effects of the Kala Chakra

**1-5. Mahārṣi Parashara said. O Brahmin! I am now going to describe to you the effects of the Kala Chakra Dasha.During the Dasha of the Rāśi, owned, or occupied by Sun, there will be ill health, due to the blood, or bile troubles; … Moon, there will be gain of wealth and clothes, name and fame and birth of children; … Mars, there will be bilious fever, gout and wounds; … Mercury, there will be acquisition of wealth and birth of children; … Jupiter, there will be increase in the number of children, acquisition of wealth and enjoyment; … Venus, there will be acquisition of learning, marriage and gain of wealth; … occupied by Saturn, there will be all kinds of adverse happenings.The Effects of the Dashas on the Basis of the Navāmśa of each Rāśi**

मेषे तु रक्तपीडा च वृषभे धान्यवर्द्धनम्
मिथुने ज्ञानसम्पन्नश्चान्द्रे धनपतिर्भवेत् ६

सूर्यर्क्षे शत्रुबाधा च कन्या स्त्रीणां च नाशनं
तालिके राजमन्त्रित्वं वृश्चिके मरणं भवेत् ७

**6-7. In the Kala Chakra Dasha of Aries in Aries Navāmśa there will be distress, due to troubles, caused by the pollution of blood. In the Dasha of Aries in the Navāmśa of Taurus there will be increase in wealth and agricultural product. In the Navāmśa of Gemini there will be advancement of knowledge. In the Navāmśa of Cancer there will be acquisition of wealth, in the Leo Navāmśa danger from enemies, in the Virgo distress to wife, in the Libra kingship, in the Scorpio death and in the Sagittarius acquisition of wealth. Such will be the effects of the 9 Padas of Aries. In assessing the net effects the nature of the Planet, occupying the Rāśi, should also be taken into account.**

अर्थलाभो भवेच्चापे मेषस्य नवभागके
मकरे पापकर्माणि कुम्भे वाणिज्यमेव च ८

मीने सर्वार्थसिद्धिश्च वृश्चिकेष्वग्नितो भयम्
तौलिके राजपूज्यश्च कन्यायां शत्रुवर्धनम् ९

शशिभे दारसम्बाधा सिंहे च त्वचिरोगकृत्
मिथुने वृत्तिबाधा स्याद्वृषभस्य नवांशके १०

**8-10. In the Dasha of Capricorn Navāmśa in Taurus there will be tendency to perform undesirable deeds along with more adverse effects. In the Aquarius Navāmśa there will be profits in business, in the Pisces success in all ventures, in the Dasha of Scorpio Navāmśa danger from fire, in the Dasha of Libra Navāmśa recognition from Government and reverence from all, in the Dasha of Virgo Navāmśa danger from enemies, in the Dasha of Cancer Navāmśa distress to wife, in the Dasha of Leo Navāmśa diseases of eyes and in the Dasha of Gemini Navāmśa obstacles in earning livelihood. Such will be the effects of the 9 Navāmśaas of Taurus. Similar interpretation should be made of further verses on this subject.**

वृषभे त्वर्थलाभाश्च मेषे तु ज्वररोगकृत्
मीने तु मातुलप्रीतिः कुम्भे शत्रुप्रवर्द्धनम् ११

मृगे चौरस्य सम्बाधा धनुषि शस्त्रवर्धनम्
मेषे तु शस्त्रसंघातो वृषभे कलहो भवेत् १२

**11-12. In Gemini in the Dasha of the Taurus Ańśa there will be acquisition of wealth, in the Dasha of Aries Ańśa attacks of fever, in the Dasha of Pisces Ańśa affectionate relations with maternal uncle, in the Dasha of Aquarius Ańśa increase in the number of enemies, in the Dasha of Capricorn Ańśa danger from thieves, in the Dasha of Sagittarius Ańśa increase in the stock of weapons, in the Dasha of Taurus Ańśa injury by some weapon and in the Dasha of Gemini Ańśa enjoyment.**

मिथुने सुखमाप्नोति मिथुनस्य नवांशके
कर्कटे सङ्कटप्राप्तिः सिंहे राजप्रकोपकृत् १३

कन्यायां भ्रातृपूजा व तौलिके प्रियकृन्नरः
वृश्चिके पितृबाधा स्यात् चापे ज्ञानधनोदयः १४

मकरे जलभीतिः स्यात् कुम्भे धान्यविवर्धनम्
मीने च सुखसम्पत्तिः कर्कटस्य नवांशके १५

**13-15. In Cancer in the Dasha of Cancer Ańśa there will be distress, ... Leo displeasure of the sovereign, ... Virgo reverence from kinsmen, ... Libra beneficence, ... Scorpio creation of obstacles by father, ... Sagittarius increase of learning and wealth, ... Capricorn danger from water, ... Aquarius increase in the production of agricultural products and in the Dasha of the Pisces Ańśa acquisition of more wealth and enjoyment.**

वृश्चिके कलहः पीडा तौलिके ह्यधिकं फलम्
कन्यायामतिलाभश्च शशांके मृगबाधिका १६

सिंहे च पुत्रलाभश्च मिथुने शत्रुवर्द्धनम्
वृषेः चतुष्पदाल्लाभो मेषांशे पशुतो भयम्
मीने तु दीर्घयात्रा स्यात् सिंहस्य नवभागके १७

**16-17. In Leo in the Dasha of the Navāmśa of Scorpio there will be distress and disputes, ... Libra extraordinary gains, ... Virgo gains of wealth, ... Cancer danger from wild animals, ... Leo birth of a son, ... Gemini increase of enemies, ... Taurus gains from sale of cattle, ... Aries danger from animals and in the <u>Dasha of Pisces Ańśa journeys to distant places</u>.**

कुम्भे तु धनलाभश्च मकरे द्रव्यलाभकृत्
धनुषि भ्रातृसंसर्गो मेषे मातृविवर्द्धनम् १८

वृषभे पुत्रवृद्धिः स्यान्मिथुने शत्रुवर्द्धनम्
शशिभे तु स्त्रियां प्रीतिः सिंहे व्याधिविवर्द्धनम् १९

**18-19. In Virgo in the Dasha of Aquarius Ańśa there will be acquisition of wealth, ... Capricorn financial gains, ... Sagittarius mingling with kinsmen, ... Aries happiness from mother, ... Taurus birth of children, ... Gemini increase in enemies, ... Cancer love with some woman, ... Leo aggravation of diseases and in the**

कन्यायां पुत्रवृद्धिः स्यात्कन्याया नवमांशके
तुलायामर्थलाभश्च वृश्चिके भ्रातृवर्द्धनम्  २०

चापे च तातसौख्यं च मृगे मातृविरोधिता
कुम्भे पुत्रार्थलाभश्च मीने शत्रुविरोधिता  २१

अलौ जायाविरोधश्च तुले च जलबाधता
कन्यायां धनवृद्धिः स्यात् तुलाया नवभागके  २२

<u>**Dasha of Virgo Aṅśa birth of children.**</u>

**20-22. In Libra in the Dasha of Libra Aṅśa there will be financial gains, ... Scorpio good relations with kinsmen, ... Sagittarius happiness from father, ... Capricorn disputes with mother, ... Aquarius birth of a son and financial gains, ... Pisces entanglement with enemies, ... Scorpio disputes with women, ... Libra danger from water and in Dasha of Virgo Aṅśa more financial gains.**

कर्कटे ह्यर्थनाशश्च सिंहे राजविरोधिता
मिथुने भूमिलाभश्च वृषभे चाऽर्थलाभकृत्  २३

मेषे सर्पादिभीतिः स्यान्मीने चैव जलाद् भयम्
कुम्भे व्यापारतो लाभो मकरेऽपि रुजो भयम्  २४

**23-24. In Scorpio in the Dasha of Cancer Aṅśa there will be financial gains, ... Leo opposition to the king, ... Gemini acquisition of land, ... Taurus financial gains, ... Aries danger from reptiles, ... Pisces danger from water, ... Aquarius profits in business, ... Capricorn profits in business, ... Capricorn possibility of suffering from diseases and in the Dasha of Sagittarius Aṅśa financial gains.**

चापे तु धनलाभः स्याद् वृश्चिकस्य नवांशके
मेषे तु धनलाभः स्याद् वृषे भूमिविवर्द्धनम्  २५

मिथुने सर्वसिद्धिः स्यात्कर्कटे सर्वसिद्धिकृत्
सिंहे तु पूर्ववृद्धिः स्यात्कन्यायां कलहो भवेत्  २६

तौलिके चार्थलाभः स्याद् वृश्चिके रोगमाप्नुयात्
चापे तु सुतवृद्धिः स्याच्चापस्य नवमांशके  २७

**25-27. In Sagittarius in the Dasha of Aries Aṅśa there will be financial gains, ... Taurus acquisition of more land, ... Gemini success in ventures, ... Cancer success all round, ... Leo increase in the accumulated wealth, ... Virgo disputes, ... Libra financial gains, ... Scorpio affliction with diseases, ... Sagittarius happiness from children.**

मकरे पुत्रलाभः स्यात्कुम्भे धान्यविवर्द्धनम्
मीने कल्याणमाप्नोति वृश्चिके विषबाधिता  २८

तौलिके त्वर्थलाभश्च कन्यायां शत्रुवर्द्धनम्
शशिभे स्त्रियमाप्नोति सिंहे तु मृगबाधिता  २९

**28-29. In Capricorn in the Dasha of Capricorn Aṅśa there will be happiness from children, ... Aquarius gain of agricultural products, ... Pisces well being, ... Scorpio danger from poison, ... Libra financial gains, ... Virgo increase in enemies, ... Cancer acquisition of property, ... Leo danger from wild animals and in the**

मिथुने वृक्षबाधा च मृगस्य नवभागके

वृषभे त्वर्थलाभश्च मेषभे त्वक्षिरोगकृत् ३०

मीने तु दीर्घयात्रा स्यात्कुम्भे धनविवर्द्धनम्
मकरे सर्वसिद्धिः स्याच्चापे शत्रुविवर्द्धनम् ३१

मेषे सौख्यविनाशश्च वृषभे मरणं भवेत्
युग्मे कल्याणमाप्नोति कुम्भस्य नवमांशके ३२

**Dasha of Gemini Ańśa danger of falling from a tree.**

**30-32. In Aquarius in the Dasha of Taurus Ańśa there will be financial gains, … Aries diseases of the eyes, … Pisces journeys to distant places, … Aquarius increase in wealth, … Capricorn success in all kinds of ventures, … Sagittarius more enemies, … Aries loss of happiness and enjoyment, … Taurus death, … Gemini well being.**

कर्कटे धनवृद्धिः स्यात् सिंहे तु राजपूजनम्
कन्यायामर्थलाभस्तु तुलायां लाभमाप्नुयात् ३३

वृश्चिके ज्वरमाप्नोति चापे शत्रुविवर्द्धनम्
मृगे जायाविरोधश्च कुम्भे जलविरोधता ३४

**33-34. In the Pisces in the Dasha of Cancer Ańśa there will be increase in wealth, … Leo recognition by Government, … Virgo financial gains, … Libra gains from all sources, … Scorpio fever, … Sagittarius more enemies, … Capricorn conjugal disputes, … Aquarius danger from water and in the Dasha of Pisces Ańśa good fortune all-round. In this manner on the Kala Chakra, prepared on the basis of Pad of the Janmaa Nakshatra, the Dashas of the Navāmśa Rāśis and their duration can be assessed and prediction can be made for the whole life of the native. Appropriate remedial measures (recitation of Mantras, oblations etc.) should be taken to alleviate the adverse effects, caused by malefic Dashas.**

मीने तु सर्वसौभाग्यं मीनस्य नवभागके
दशाश्रंशक्रमेणैवं ज्ञात्वा सर्वफलं वदेत् ३५

क्रूरग्रहदशाकाले शान्तिं कुर्याद्विचक्षणः
यत् प्रोक्तं राजयोगादौ संज्ञाध्याये च यत् फलम् ३६

तत्सर्वं चक्रकाले हि सुबुद्ध्या योजयेद् बुधः
इति संक्षेपतः प्रोक्तं कालचक्रदशाफलम् ३७

**35-37. The effects of Dasha in Raja Yoga etc. have already been described in Vol. I of this book. The same should be applied in a judicious manner in the Kala Chakra. These are in brief effects of Kala Chakra Dasha.**

अथ चरादिदशाफलाध्यायः ५८

चरस्थिरादिसंज्ञा या दशाः प्रोक्ताः पुरा द्विज
शुभाऽशुभफलं तासां कथयामि तवाऽग्रतः १

लग्नादिद्वादशान्तानां भावानां फलकीर्तने
तत्तद्राशीशवीर्येण यथायोग्यं प्रयोजयेत् २

बलयुक्ते च राशीशे पूर्णं तस्य तदा फलम्
फलं मध्यबले मध्यं बलहीने विपर्ययः ३

## Ch. 50. Effects of the Char etc. Dashas

**1-3. Mahārśi Parashara said. O Brahmin! I have already described the Char etc. Dashas. Now I am going to tell you the effects of these Dashas. The effects of the Dashas of the Rāśis should be judged from the strength of the Lords of Rāśis and whether they are benefics, or malefics. If the Lord of a Rāśi possesses full strength, the effects of the Dasha of the Rāśi will be realized in full. The effects of the Dasha will be of medium nature, if the strength is medium. If the Lord of Rāśi possesses little strength, the effects will be experienced accordingly.**

यो यो दशाप्रदो राशिस्तस्य रन्ध्रत्रिकोणके
पापखेटयुते विप्र तद्दशा दुःखदायिका ४

तृतीयषष्ठगे पापे ज्यादिः परिकीर्तितः
शुभखेटयुते तत्र जायते च पराजयः ५

लाभस्थे च शुभे पापे लाभो भवति निश्चितः
यदा दशाप्रदो राशिः शुभखेटयुतो द्विज ६

शुभक्षेत्रे हि तद्राशेः शुभं ज्ञेयं दशाफलम्
पापयुक्ते शुभक्षेत्रे पूर्वं शुभमसत्परे ७

पापर्क्षे शुभसंयुक्ते पूर्वं सौख्यं ततोऽशुभम्
पापक्षेत्रे पापयुक्ते सा दशा सर्वदुखदा ८

शुभक्षेत्रदशा राशौ युक्ते पापशुभैर्द्विज ९

पूर्वं कष्टं सुखं पश्चान्निर्विशङ्कं प्रजायते
शुभक्षेत्रे शुभं वाच्यं पापर्क्षे त्वशुभं फलम् १०

**4-10. If there are malefics in the 8th, the 5th and the 9th from a Dasha Rāśi, the effects of the Dasha of that Rāśi will be distressful. If there are malefics in the 3rd and the 6th from a Dasha Rāśi, the effects of the Dasha will be victory over enemies and happiness. If there are benefics in the 3rd and the 6th from the Dasha Rāśi, there will be defeat in its Dasha. If there are benefics, or malefics in the 11th from the Dasha Rāśi, there will be conquests and happiness in the Dasha. If the Dasha Rāśi is occupied by, or is owned by a benefic, the effects of its Dasha will be beneficial. If a Dasha Rāśi, owned by a benefic, is occupied by a malefic, favourable effects will be experienced in the first part of the Dasha and they will be adverse in the latter part. If a Dasha Rāśi, owned by a malefic is occupied by a benefic, the effects of the Dasha will be the same. A Dasha Rāśi, owned and occupied by a malefic will always yield unfavorable results. The reverse will be the case in the case of the Dasha Rāśi, owned and occupied by a benefic. If a Dasha Rāśi, owned by a benefic, is occupied by both benefic and malefic Planets, the effects of Dasha will be adverse in its first part and favourable in the latter part.**

द्वितीये पञ्चमे सौम्ये राजप्रीतिर्जयो ध्रुवम्
पापे तत्र गते ज्ञेयमशुभं तद्दशाफलम् ११

चतुर्थे तु शुभं सौख्यमारोग्यं त्वष्टमे शुभे
धर्मवृद्धिर्गुरुजनात्सौख्यं च नवमे शुभे १२

विपरीते विपर्यासो मिश्रे मिश्रं प्रकीर्तितम्
पाके भोगे च पापाढ्ये देहपीडा मनोव्यथा १३

सप्तमे पाकभोगाभ्यां पापे दारार्तिरीरिता

चतुर्थे स्थानहानिः स्यात्पञ्चमे पुत्रपीडनम् १४

दशमे कीर्तिहानिः स्यान्नवमे पितृपीडनम्
पाकाद्रुद्रगते पापे पीडा सर्वाप्यबाधिका १५

उक्तस्थानगते सौम्ये ततः सौख्यं विनिर्दिशेत्
केन्द्रस्थानगते सौम्ये लाभः शत्रुजयप्रदः १६

जन्मकालग्रहस्थित्या सगोचरग्रहैरपि
विचारितैः प्रवक्तव्यं तत्तद्राशिदशाफलम् १७

**11-17. The assessment of the effects of the Dasha of the Dasha Rāśi should be made after taking into account the disposition of the Planets in the Rāśi at birth and the disposition of Planets during the Dasha. If the Dasha Rāśi is well disposed both at the time of birth and during its Dasha, the beneficial results will be realized in full. If it is ill-disposed during the Dasha, the effects will be of mixed nature. If the Dasha Rāśi is ill-disposed both at the time of birth and during its Dasha, only evil effects will be experienced.**

यश्च राशिः शुभाकान्तो यस्य पश्चाच्छुभग्रहाः
तद्दशा शुभदा प्रोक्ता विपरीते विपर्ययः १८

त्रिकोणरन्ध्ररिष्फस्थैः शुभपापैः शुभाऽशुभम्
तद्दशायां च वक्तव्यं फलं दैवविदा सदा १९

**18-19. The effects of the Dasha will be favourable, if it is occupied by a benefic and there is also a benefic in the Rāśi previous to it. If the Rāśi is occupied by a malefic, the effects will be of adverse nature. If there are benefics in 5th and 9th, the effects of its Dasha will be favourable. The reverse will be the case, if 5th and 9th are occupied by malefics.**

मेषकर्कतुलानक्रराशीनां च यथाक्रमम्
बाधा स्तानानि सम्प्रोक्ता कुम्भगोसिंहवृश्चिकाः २०

पाकेशाक्रान्तराशौ वा बाधास्थाने शुभेतरे
स्थिते सति महाशोको बन्धनव्यसनामयाः २१

**20-21. Aquarius, Taurus, Leo and Scorpio are Badhaka Houses for the four Movable Rāśis: Aries, Cancer, Libra and Capricorn. In other words the 11th Rāśi to a Movable Rāśi is its Badhaka House. If there is a malefic in the House, occupied by its Lord, or in Badhaka House of that Rāśi, there will be occasions of great sorrow, imprisonment and diseases during the Dasha.**

उच्चस्वर्क्षग्रहे तस्मिञ्छुभं सौख्यं धनागमः
तच्छून्यं चेदसौख्यं स्यात्तद्दशा न फलप्रदा २२

**22. The Dasha of a Rāśi will be favourable, if it is occupied by its own Lord, or an exalted Planet. The Dasha of a Rāśi, not occupied by any Planet, will be adverse.**

बाधकव्ययषडरन्ध्रे राहुयुक्ते महद्भयम्
प्रस्थाने बन्धनप्राप्ती राजपीडा रिपोभयम् २३

रव्याररराहुशनयो भुक्तिराशौ स्थिता यदि
तद्राशिभुक्तौ पतनं राजकोपान् महद्भयम् २४

भुक्तिराशित्रिकोणे तु नीचखेटः स्थितो यदि
तद्राशौ वा युते नीचे पापे मृत्युभयं वदेत् २५

**23-25. There will be great danger, imprisonment during a journey, displeasure of Government and danger from enemies in the Dasha and Antar Dasha of the Rāśi, from which its Badhaka House, 12th, 6th and 8th are occupied by Rahu. There will be loss, due to the displeasure of the king and danger there from in the Antar Dasha of the Rāśi, that is occupied by Sun, Mars, Rahu and Saturn. There will be the possibility of death, if the 5th and the 9th from the Antar Dasha Rāśi are occupied by a debilitated, or malefic Planet.**

भुक्तिराशौ स्वतुङ्गस्थे त्रिकोणे वापि खेचरे
यदा भुक्तिदशा प्राप्ता तदा सौख्यं लभेन्नरः २६

नगरग्रामनाथत्वं पुत्रलाभं धनागमम्
कल्याणं भूरिभाग्यं च सेनपत्यं महोन्नतम् २७

पाकेश्वरो जीवदृष्टः शुभराशिस्थितो यदि
तद्दशायां धनप्राप्तिर्मङ्गलं पुत्रसम्भवम् २८

**26-28. There will be enjoyment, acquisition of chiefship of a town, or village, birth of a son, financial gains, well-being, dawn of fortune, attainment of the position of a Commander of an Army and progress all-round, if there is an exalted Planet in the Trikona from the Antar Dasha Rāśi. There will be in his Dasha financial gains, well-being and birth of a son, if the Planet, who is the Lord of the Dasha, happens to be in a benefic Rāśi and receives a Aspect from Jupiter.**

सितासितभयुग्माश्च सूर्यस्य रिपुराशयः
कौर्पितौलिघटाश्चेन्द्रोर्भौमस्य रिपुराशयः २९

घटमीननृयुलतौलिकन्या ज्ञस्य ततः परम्
कर्कमीनालिकुम्भाश्च राशयो रिपवः स्मृताः ३०

वृषतौलिनृयुक्कन्याराशयो रिपवो गुरोः
सिंहालिकर्कचापाश्च शुकस्य रिपुराशयः ३१

मेषसिंहधनुःकौर्पिकर्कटा शनिशत्रवः
एवं ग्राहन्तरदशां चिन्तयेत्कोविदो द्विज ३२

**29-32. Taurus, Libra, Capricorn, Aquarius and Gemini are the inimical Rāśis of Sun. The inimical Rāśis of Moon and other Planets may be reckoned similarly. If a Planet is in an inimical Rāśi, his Dasha will be full of adversities. The effects of the Dasha of Rāśis and Planets should be judged after taking into account the above rules.**

ये राजयोगदा ये च शुभमध्यमता ग्रहाः
यस्माद्वा द्वित्रितुर्यस्थाः ग्रहाः शुभफलप्रदाः ३३

तद्दशायां शुभं ब्रूयाद्राजयोगादिसम्भवम्
शुभद्वयान्तरगतः पापोऽपि शुभदः स्मृतः ३४

**33-34. The Dashas of that Planet will be favourable, who is Raja Yoga Karak, who is disposed between two benefics (that is there are benefics in the 2nd and the 12th Houses to that Planet) and who has benefics in the 2nd, 3rd and 4th Houses from him. A malefic Planet becomes favourable, if he is disposed between benefics.**

गता शुभदशामध्यं दशा सौम्यस्य शोभना
शुभा यस्य त्रिकोणस्थस्तद्दशापि शुभप्रदा ३५

आरम्भान्तो मित्रशुभराश्योर्यदि फलं शुभम्
प्रतिराश्यैवमव्दाद्यं विभज्य तत्फलं वदेत् ३६

**35-36. The whole of the Dasha of a Planet, who is related to a friendly and benefic Planet at the commencement and the end of the Dasha, will be favourable. In an unfavorable Dasha the Antar Dasha of a benefic (Planet, or Rāśi) becomes favourable. The Dasha of a Planet, or Rāśi, who has benefics in the 5th, or the 9th from it, is also favourable. In this manner the effects of the Dasha should be judged, after taking into account the dispositions of the Planet, or Rāśi at the commencement and at the end of the Dasha.**

आरम्भात्तत्रिकोणे तु सौम्ये तु शुभभावहेत्
शुभराशौ शुभारम्भे दशा स्यादतिशोभना ३७

शुभादिराशौ पापश्चेद्दशारम्भे शुभा स्मृता
शुभारम्भे कथा केति प्रारम्भस्य फलं वदेत् ३८

आरम्भे पापराशौ वा यदीशो दुर्बलो द्विज
नीचादौ तद्दशाद्यन्ते वदेद्भाग्यविपर्ययम् ३९

**37-39. The Dasha of the Planets and Rāśis, who have benefics in the Trikona from them is favourable. If the Dasha of a benefic Rāśi commences in a benefic Rāśi, it will be very favourable. If an evil Dasha commences in a benefic Rāśi, it is also favourable. Therefore the commencement of a Dasha should always be kept in view in assessing the results of the Dasha. There will be loss of fortune, if at the commencement of the Dasha there is a malefic Rāśi, or, if the Lord of the Dasha Rāśi is in debilitation.**

यत्र स्थितो नीचखेटस्त्रिकोणे वाऽथ नीचगः
तथा राशीश्वरे नीचे सम्बन्धो नीचखेटकैः ४०

भाग्यस्य विपरीतत्वं करोत्येव द्विजोत्तम
धनधान्यादिहानिश्च देहे रोगभयं तथा ४१

**40-41. There will be loss of fortune, wealth and agricultural products and infliction with disease during the Dasha of the Rāśi, occupied by a debilitated Planet, or, if there is a debilitated Planet in the 5th from it, or in the 9th from it, or whose Lord is debilitated, or related to a debilitated Planet.**

राहोः केतोश्च कुम्भादि वृश्चिकादि चतुष्टयम्
स्वभं तत्र समारम्भस्तद्दशायां शुभं भवेत् ४२

**42. Four Rāśis from Aquarius and four Rāśis from Scorpio belong to Rahu and Ketu, respectively. If Rahu and Ketu are in any one of the aforesaid Rāśis, the Dasha will be productive of beneficial results.**

यद्दशायां शुभं ब्रूयात्स चेन्मारकसंस्थितः
यस्मिन् राशौदशान्तःस्यात्तस्मिन् दृष्टे युतेऽपि वा ४३

शुक्रेण विधुना वा स्याद्राजकोपाद्धनक्षयः
दशान्तश्चेदरिक्षेत्रे राहुदृष्टयुतेऽपि वा ४४

इदं फलं शनेः पाके न विचिन्त्यं द्विजोत्तम
दशाप्रदे नक्रराशौ न विचिन्त्यमिदं फलम् ४५

**43-45. If a Planet, whose Dasha is otherwise considered favourable, is placed in a Marak House, or, if the Rāśi, in which his Dasha comes to an end, receives a Aspect from Venus, or Moon, there will be in his Dasha displeasure of government and loss of wealth.**

राहोर्दशान्ते सर्वस्वनाशो मरणबन्धने
दशान्निर्वासनं वा स्यात्कष्टं वा महदश्नुते ४६

तत्त्रिकोणगते पापे निश्चयाद्दुःखमादिशेत्
एवं शुभाशुभं सर्वं निश्चयेन वदेद् बुधः ४७

**46-47. There will be loss of everything, imprisonment, death, exile from the country and great distress at the end of the Dasha of Rahu. The above effects will definitely be realized, if there are malefics in the 5th and the 9th from Rahu. Beneficial and adverse effects should be predicted in this manner.**

राह्वाद्याश्रितराशिस्तु भवेद्यदि दशाप्रदः
तत्र कालेऽपि पूर्वोक्तं चिन्तनीयं प्रयत्नतः ४८

दशारम्भो दशान्तो वा मारके चेन्न शोभनम्
तस्मिन्नेव च राहुश्चेन्निरोधो द्रव्यनाशनः ४९

यत्र क्वापि च भे राहौ दशारम्भे विनाशनम्
गृहभ्रंशः समुद्दिष्टो धने राहुर्धनार्तिकृत् ५०

**48-50. The same would be the effects in the Dasha of the Rāśi, occupied by malefics, like Rahu etc. The association of a Marak Planet with the Rāśi at the time of commencement of its Dasha is not productive of good effects. If such a Planet is Rahu, there will be imprisonment, or loss of wealth.**

चन्द्रशुक्रौ द्वादश चेद्राजकोपो भवेद्ध्रुवम्
भौमकेतू तत्र यदि वधोऽग्नेर्महती व्यथा ५१

चेन्द्रशुक्रौ धने विप्र यदि राज्यं प्रयच्छतः
दशारम्भे दशान्ते च द्वितीयस्थमिदं फलम् ५२

**51-52. The natural characteristics of the House, occupied by Rahu, are harmed at the commencement of the Dasha. If such a House is 2nd, there will be loss of wealth. If Moon and Venus are in 12th, there will be losses, due to the displeasure of government. If Mars and Ketu are so disposed, there will be death, or danger from fire. There will be acquisition of a kingdom, if Venus and Moon are in 2nd at the commencement of the Dasha. This means, that the effects of the House, in which Moon and Venus are placed at the commencement and end of a Dasha, are strengthened. Thus their disposition in 6th, 8th and 12th will produce only adverse effects.**

एवमर्गलभावानां फलं विज्ञैः प्रदर्शितम्
यस्य पापः शुभो वाऽपि ग्रहस्तिष्ठेच्छुभार्गले ५३

तेन द्रष्टेक्षितं लग्नं पाबल्यायोपकल्प्यते
यदि पश्येद्ग्रहस्तन्न विपरीतार्गलस्थितः ५४

तद्भावस्य दशायास्तु विपरीतफलं भवेत्
सद्दृष्टेऽपि शुभं ब्रूयान्निर्विशंकं द्विजोत्तम ५५

**53-55. Similarly the sages have described the effects of the House with Argal. If there is an auspicious Argal causing benefic, or malefic Planet of a Rāśi and Lagna receives a Aspect from him, that Rāśi will prevail. Here Lagna is the secondary condition. If the Planet, causing uninterrupted Argal, gives a Aspect to a Rāśi, that Rāśi will prevail. In other words good effects will be derived in the Dasha of that Rāśi. The Dasha of the Rāśi, which does not receive a Aspect from an auspicious Argal, or the Dasha of a Rāśi with Vipreet Argal will not be favourable. The Dasha of that Rāśi, which receives a Aspect from a benefic, will be favourable.**

यस्मिन्भावे शुभस्वामिसम्बन्धस्तुङ्गखेचरः
स्यात्तद्भावदशायां तु अत्यैश्वर्यमखण्डितम् ५६

यद्भावेशः स्वार्थराशिमधितिष्ठति पश्यति
स्यातद्भावदशाकाले धनलाभो महत्तरः ५७

यस्माद्व्ययगतो यस्तु तद्दशायां धनक्षयः
यस्मात्त्रिकोणगाः पापास्तत्रात्मशुभनाशनम् ५८

पुत्रहानिः पितुः पीडा मनस्तापो महान् भवेत्
यस्मात्त्रिकोणगा रिःफरन्ध्रेशार्कारसूर्यजाः ५९

**56-59. Financial gains will be derived in the Dasha of the Rāśi, which is occupied by its benefic Lord, or by an exalted Planet, who receives a Aspect from him. There will be loss of wealth, if such a Planet is in the 12th House to the Rāśi (or House). There will be destruction of all good effects, distress to children and father and mental agony in the Dasha of the Rāśi, if there are malefics in the 5th and the 9th from the Rāśi. Evil effects will be experienced in the Dasha of the Rāśi, which is occupied by 8ths Lord, 12ths Lord, Sun, Mars, or Saturn.**

पुत्रपीडा द्रव्यहानिस्तत्र केत्वहिसङ्गमे
विदेशभ्रमणं क्लेशो भयं चैव पदे पदे ६०

यस्मात्षष्ठाष्टमे क्रूरनीचखेटादयः स्थिताः
रोगशत्रुनृपालेभ्यो मुहुः पीडा सुदुःसहा ६१

यस्माच्चतुर्थः क्रूरः स्याद्भूगृहक्षेत्रनाशनम्
पशुहानिस्तत्र भौमे गृहदाहः प्रमादकृत् ६२

शनौ हृदयशूलं स्यात्सूर्ये राजप्रकोपनम्
सर्वस्वहरणं राहौ विषचौरादिजं भयम् ६३

**60-63. The Dasha of the Rāśi will cause distress to children, exile to a foreign country and continuous disturbances in life, if Rahu and Ketu are in the Trikona to the Rāśi. There will be danger from enemies, from the king and disease in the Dasha of the Rāśi, which is so posited, that the 6th and the 8th from it are occupied by malefic, debilitated, or combust Planets. There will be destruction of house, land and agricultural fields, if there is a malefic, or debilitated Planet in the 4th from the Rāśi. There will be loss of house, due to negligence, if such a Planet is Mars. There will be heart pain and danger from government, if the Planet is Saturn and there will be losses all round and danger from poison and thieves, if the Planet is Rahu.**

यस्माद् दशमभे राहुः पुण्यतीर्थाटनं भवेत्
यस्मात्कर्मायभाग्यर्क्षगतः शोभनखेचराः ६४

विद्यार्थधर्मसत्कर्मख्यातिपौरुषसिद्धयः
यतः पञ्चमकामारिगताः स्वोच्चशुभग्रहाः ६५

पुत्रदारादिसंप्राप्तिर्नृपपूजा महत्तरा
यस्मान्पुत्रायकर्माम्बुनवलग्नाधिपाः स्थिताः ६६

**64-66. There will be pilgrimage to holy places in the Dasha of the Rāśi, who has Rahu in the 10th to it. There will be gain of earnings, religious rites, gain of wealth, renown for good deeds and success in efforts and ventures in the Dasha of the Rāśi, which is so posited, that the 10th, the 11th and the 9th from it are occupied by benefics. There will be birth of children, happiness from wife and recognition by the Government in the Dasha of the Rāśi, from which the 5th, the 7th and the 9th are occupied by benefic, or exalted Planets. During the Dasha of the Houses (Rāśis), occupied by 5ths, 11ths, 10ths, 4ths, 9ths and Lagnas Lord, there will be growth of these Houses. The good effects will be in proportion to the strength of the Houses and the Planets, occupying them.**

तत्तद्भावार्थसिद्धिः स्याच्छ्रेयो योगानुसारतः
यस्मिन् गुरुर्वा शुक्रोवा शुभेशो वापि संस्थितः ६७

कल्याणं सर्वसंपत्तिर्देवब्राह्मणतर्पनम्
यच्चतुर्थे तुङ्गखेटाः शुभस्वामी ग्रहश्च वा ६८

वाहनग्रामलाभश्च पशुवृद्धिश्च भूयसी
तत्र चन्द्रे च लाभः स्याद्बहुधान्यरसान्वितः ६९

पूर्णे विधौ निधिप्राप्तिर्लभेद्वा मणिसञ्चयम्
तत्र शुक्रे भृदङ्गादिवाद्यगानपुरस्कृतः ७०

**67-70. In the Dasha of a Rāśi (House) there will be well-being, increase in opulence and glory and devotion to deities and Brahmins, if it is occupied by Jupiter, Venus, or the Lord of a Trikona. There will be acquisition of more conveyances and cattle etc. in the Dasha of the Rāśi (House), which is so posited, that the 4th from it is occupied by an exalted Planet, or Lord of a Trikona. Moon there will give things, like grains, Ghī etc. Full Moon will favour with a treasure and jewels etc. Venus there, will provide enjoyment from music etc.**

आन्दोलिकाप्तिर्जीवे तु कनकांदोलिका ध्रुवम्
लग्नकर्मेशभाग्येशतुङ्गस्थशुभयोगतः ७१

सर्वोत्कर्षमहैश्वर्यसाम्राज्यादिमहत्फलम्
एवं तत्तद्भावदायफलं यत्स्याद्विचिन्तयेत् ७२

**71-72. There will be enjoyment of the palanquin-like conveyance in the Dasha of the Rāśi (House), from which the 4th is occupied by Jupiter. There will be success in all ventures, great opulence and glory, acquisition of a kingdom during the Dasha of a Rāśi (House), which has the Yoga of the Lord of Lagna, 9ths Lord, 10ths Lord, an exalted Planet, or benefics. The effects of the Dashas of various Houses should be judged in this manner.**

एकैकोडुदशा स्वीयैर्गुणैरष्टादशात्मभि
भिन्नं फलविपाकं तु कुर्याद्वि चित्रसंयुतम् ७३

परमोच्चे तुङ्गमात्रे तदर्वाक्तदुपर्यपि
मूलत्रिकोणभे स्वर्क्षे स्वाधिमित्रग्रहस्य भे ७४

तत्कालसुहृदो गेहे उदासीनस्य भे तथा
शत्रोर्भेऽधिरिपोर्भे च नीचान्तादूर्ध्वदेशभे ७५

तस्मादर्वाङ् नीचमात्र नीचान्ते परमांशके
नीचारिवर्गे सखले स्ववर्गे केन्द्रकोणभे ७६

व्यवस्थितस्य खेटस्य समरे पीडितस्य च
गाढमूढस्य च दशापचितिः स्वगुणैः फलम् ७७

**73-77. The effects of the Dashas of each Rāśi, or Planet (Nakshatra Dasha) depend on their 18 different kinds of conditions. They are deep exaltation, exaltation, dispositions on their either side, MulaTrikonaa, own, Adhimitr, Tatkalik Mitras, neutral, enemy, Adhisatrus Rāśi, deep debilitation, debilitated, or enemy Varga, own Varga, disposition in a Kendra, disposition in a Trikona, defeated in war between Planets, deep combustion.**

परमोच्चगतो यस्तु योऽतिवीर्यसमन्वितः
सम्पूर्णाख्या दशा तस्य राज्यभोग्यशुभप्रदा ७८

लक्ष्मीकटाक्षचिह्नानां चिरावासगृहप्रदा
तुङ्गमात्रगतस्यापि तथा वीर्याधिकस्य च ७९

पूर्णाख्या बहुलैश्वर्यदायिन्यापि रुजप्रदा
अतिनीचगतस्यापि दुर्बलस्य ग्रहस्य तु ८०

रिक्ता त्वनिष्टफलदा व्याध्यनर्थमृतिप्रदा
अत्युच्चेऽप्यतिनीचस्थे मध्यगस्यावरोहिणी ८१

मित्रोच्चभावप्राप्तस्य मध्याख्या ह्यर्थदा दशा
नीचांतादुच्चभागान्तं भषट्के मध्यगस्य च ८२

दशा चारोहिणी नीचरिपुभांशगतस्य च
अधमाख्या भयक्लेशव्याधिदुःखविवर्धिनी ८३

**78-83. Acquisition of kingdom, enjoyment and acquisition of more property are the effects of the whole Dasha of the Planet, who is in deep exaltation and is fully equipped with all the six kinds of strength, great opulence and glory with some possibility of affliction with disease are the effects of the Planet, placed in his Rāśi of exaltation. The Dasha of a Planet in deep debilitation is called Rikt. Diseases, loss of wealth and danger of death are the effects of the Dasha of such a Planet. The Dasha of the Planet, who is in a condition in between deep exaltation and deep debilitation is known, as Avrohini (descending). The Dasha of the Planet in exaltation, or in a friends Rāśi is called Madhya (of middle order). This Dasha also yields moderately good effects. The Dasha of a Planet, placed in a condition in between deep debilitation and deep exaltation, is called Rohini (ascending). The Dasha of a Planet, placed in between the debilitated and enemy Navāmśa is called Adham (evil). Dangers of various kinds, distress and sorrows are the results of the Dasha of such a Planet. These Dashas give results, according to their nomenclature.**

नामानुरूपफलदाः पाककाले दशा इमाः
भाग्येशगुरुसम्बन्धो योगदृक्केन्द्रभादिभिः ८४

परेषामपि दायेषु भग्योपक्रममुन्नयेत्
जातको यस्तु फलदो भाग्ययोगप्रदोऽथ यः ८५

सफलो वक्रिमादूर्ध्वमन्यानपि च खेचरान्
दुर्बलानसमर्थांश्च फलदानेषु यागतः ८६

तारतम्यात्सुसम्बन्धा दशा ह्येताः फलप्रदाः
स्वकेन्द्रादिजुषां तेषां पूर्णार्द्धांघ्रिव्यवस्थया ८७

**84-87. The Dashas of other Planets become auspicious and augment the fortune, if the Lord of 9th and Jupiter are in any way related with Yoga, Kendra, or the House concerned etc. The Planet with Yoga of good fortune at birth produces good effects, when he is free from retrogression and becomes direct. The weakness, inabilities and Yogas of other Planets should also be taken into account in judging their effects. All those Dashas give full, medium and little effects in accordance with the disposition of the Planets in the Kendra, Panaphara and Apoklima.**

शीर्षोदयभगाः स्वस्वदशादौ स्वफलप्रदाः
उभयोदयराशिस्थदशा मध्यफलप्रदा ८८

पृष्ठोदयर्क्षगाः खेटाः स्वदशान्ते फलप्रदाः
निसर्गतश्च तत्काले सुहृदां हरणे शुभम् ८९

**88-89. The Planets in Shirshodaya, Ubhayodaya and Prishthodaya Rāśis, yield their results, respectively, at the commencement, in the middle and at the end of the Dasha. All the Planets yield auspicious results in the Antar Dasha of Naisargik (natural, constant) and Tatkalik (according to position) friends. The results will be adverse in the Antar Dasha of inimical Planets.**

**Antar Dashas of Rāśis**

सम्पादयेत्तदा कष्टं तद्विपर्ययगामिनाम्
दशेशाक्रांतभावर्क्षादारभ्य द्वादशर्क्षकम् ९०

भक्त्वा द्वादशराशीनां दशाभुक्ति प्रकल्पयेत्
एकैकराशेर्या तत्र सुहृत्स्वक्षेत्रगामिनी ९१

तस्यां राज्यादिसम्पत्तिपूर्वकं शुभमीरयेत्
दुःस्थानरिपुगेहस्थनीचक्रूरयुता च या ९२

तस्यामनर्थकलहं रोगमृत्युभयादिकम्
बिन्दुभूयस्त्वशून्यत्ववशात् स्वीयाष्टवर्गके ९३

वृद्धिं हानिं च तद्राशिभावस्य स्वगृहात्क्रमात्
भावयोजनया विद्यात्सुतस्त्र्यादिशुभाऽशुभम् ९४

धात्वादिराशिभेदाच्च धात्वादिग्रहयोगतः
शुभपापनशाभेदाच्छुभपापयुतैरपि ९५

इष्टानिष्टस्थानभेदात् फलभेदात् समुन्नयेत्
एवं सर्वग्रहाणां च स्वां स्वामन्तर्दशामपि ९६

**90-96. There are Antar Dashas of the 12 Rāśis, commencing from the Rāśi, in which the Lord of the Dasha is placed. There will be auspicious results, like acquisition of kingdom in the Antar Dasha of a Rāśi, which is occupied by its own Lord, or a friendly Planet. There will be inauspicious results, like loss of wealth, disputes, danger from diseases etc. in the Antar Dasha of the Rāśi, which may be 6th, 8th, or 12th, or is occupied by a malefic, debilitated Planet, or a Planet, placed in an inimical Rāśi. The Rāśi, which contained more auspicious marks in the Ashtak Varga will yield benefic effects in its Antar Dasha. Adverse will be the effects of the Antar Dasha of the Rāśi, which contains more inauspicious marks. For assessing the results the Rāśi, from which the Dasha commences, should be treated, as Lagna and the Houses thereafter should be assumed to have the characteristics, as if they are so from Lagna. Thus the 2nd House from that Rāśi will be the House of the wealth, the 3rd of co-borns and so on. There will be gains, or losses of Dhatus etc., assigned to the Rāśis and the Planets, in the Antar Dasha of the Rāśis concerned. In judging the effects of the Antar Dashas of the Planets their benefic and malefic nature, relations with the malefic, or benefic, Aspects on them and their disposition in 6th, 8th, or 12th etc. should all be kept in view.**

स्वराशितो राशिभुक्तिं प्रकल्प्य फलमीरयेत्
अन्तरन्तर्दशां स्वीयां विभज्यैवं पुनः पुनः ९७

**97. The results of the Antar Dashas Pratyantar Dashas of the Rāśis should be assessed in the manner, explained in this chapter**

अथाऽन्तर्दशाध्यायः ५१

दशाब्दाः स्वस्वमानघ्नाः सर्वायुर्योगभाजिताः
पृथगन्तर्दशा एवं प्रत्यन्तरदशादिकाः १

**Ch. 51. Working out of Antar Dashas of Planets and Rāśis in Vimshott6th etc. Dasha systems**

**1. For finding out the span of the Antar Dasha of a Planet in the Dasha of the same, or another Planet multiply the Dasha years of the former with the Dasha years of the latter and divide the product by the total Dasha years of all the Planets. For finding out the span of the Pratyantar Dasha of the same, or any other Planet in the Antar Dasha of another Planet multiply the years etc. of the Antar Dasha with the Dasha years of the other Planet and divide the product by the total Dasha years of all the Planets. The figure so available in months etc. will represent the Pratyantar Dasha of the former.**

आदावन्तर्दशा पाकपतेस्तत्क्रमतोऽपराः
एवं प्रत्यन्तरादौ च क्रमो ज्ञेयो विचक्षणैः २

**2. In every Dasha the first Antar Dasha belongs to the Lord of the Dasha. Then the further Antar Dashas belong to the other 8 Planets in the same order, as followed for the Dashas. The same applies to Pratyantar Dasha.**

**The Antar Dashas of Char Planets in Char etc. Dasha**

भुक्तिर्नवानां तुल्या स्याद् विभाज्या नवधा दशा
आदौ दशापतेर्भुक्तिस्तत्केन्द्रादियुजां ततः ३

विद्यात् क्रमेण भुक्त्यंशानेवं सूक्ष्मदशादिकम्
बलक्रमात् फलं विज्ञैर्वक्तव्यं पूर्वरीतितः ४

**3-4. The Antar Dashas of the Charadi Kendraadi Dasha of the Planets are worked out by dividing the Dasha years by 9. The first Dasha will inv6thably be of the Lord of the Dasha. Thereafter there will be Antar Dashas of Planets, placed in Kendraas, Panapharas and Apoklimas, respectively, according to their strength.**

कृत्वाऽर्कधा राशिदशां राशेर्भुक्तिं क्रमाद् वदेत्
प्रत्यन्तर्दशाद्येवं कृत्वा तत्तत्फलं वदेत् ५

**Antar Dashas of Rāśis**

**5. The Antar Dashas of Rāśis is worked out by dividing the Dasha years by 12. Pratyantar Dashas of the Antar Dashas are also calculated in the same manner.**

आद्यसप्तमयोर्मध्ये यो राशिर्बलवांस्ततः
ओजे दशाश्रये गण्याः क्रमादुत्क्रमतः समे ६

**6. The Antar Dashas will start from the Dasha Rāśi, or from the Rāśi 7th there from, whichever is stronger. The Antar Dashas are in the onwards order, if the Dasha Rāśi is odd and in the reverse order, if it is even.**

अत्राऽपरो विशेषोऽस्ति ब्रवीमि तमहं द्विज
चरेऽनुज्झितमार्गः स्यात् षष्ठषष्ठादिकाः स्थिरे ७

उभये कण्टकाज् ज्ञेया लग्नपञ्चमभाग्यतः
चरस्थिरद्विस्वभावेष्वोजेषुः प्राक् क्रमो मतः ८

तेष्वेव त्रिषु युग्मेषु ग्राह्यं व्युत्क्रमतोऽखिलम्
एवमुल्लिखितो राशि पाकराशिरुदीर्युते ९

स एव भोगराशिः स्यात् पर्याये प्रथमे स्मृतः
आद्याद् यावतिथः पाकः पर्याये यत्र दृश्यते १०
तस्मात् तावतिथो भोगः पर्याये तत्र गृह्यताम्
तदिदं चरपर्यायस्थिरपर्याययोर्द्वयोः ११

त्रिकोणाख्यदशायां च पाकभोगप्रकल्पनम्
पाके भोगे च पापाढ्ये देपपीडा नमोऽन्यथा १२

**7-12. O Brahmin! Now I will acquaint you with the special characteristics of the order of the Antar Dashas of the Rāśis. If the Dasha Rāśi is a Movable one, the Antar Dashas of the 12 Rāśis are in the onwards, or reverse order. If the Dasha Asraya Rāśi is a Fixed one, the Antar Dashas will start from it and thereafter there will be an Antar Dasha of every sixth Rāśi. If the Dasha Ashraya Rāśi is a Dual one, the first Antar Dasha will belong to it. Thereafter there will be Antar Dashas of Rāśis in Kendra to it, Rāśis in Kendra to the 5th from it and Rāśis in Kendra to the 9th from it. In the case of all kinds of Rāśis, namely Movable, Fixed, or Dual, the order will be onwards, if the Dasha Asraya Rāśi is an odd one and in the reverse order, if it is an even one. The so called Dasha Asraya Rāśi is known, as Pak Rāśi. In the first order Rāśi, which is Pak Rāśi, is also called Bhog Rāśi. Later, if the Dasha Prad Rāśi is even, then the Bhog Rāśi will be that, which is at the same Rāśi distance, as the Dasha Asraya Rāśi is from the Dasha Prad Rāśi. For the Char, Sthir and Trikona Dasha, the Pak and Bhog should be determined in this manner. If Pak and Bhog Rāśis are associated with malefics, there will be pain in the body and mental agony. There will be enjoyment, if they are associated with benefics. In the Kala Chakra Dasha, like the Vimshott6th Dasha system, the span of Dasha should be multiplied by the span of the Dasha of the Rāśi, whose Antar Dasha is required and the product should be divided by the total Dasha years of (all) the Rāśi(s). The years, months etc. as arrived at will represent the Antar Dasha of the Rāśi concerned.**

पिराडत्रिकदशायां तु ब्रविम्यन्तर्दशाविधिम्
पूर्ण दशापतिर्दद्यात् तदर्धं तेन संयुतः १३

त्रिकोणगस्तृतीयांशं तुर्यांशश्चतुरस्त्रगः
स्मरगः सप्तमं भागं बहुष्वेको बली ग्रहः १४

एवं सलग्नकाः खेटाः पाचयन्ति मिथः स्थिताः
समच्छेदीकृताः प्राप्ता अंशाश्छेदविवर्जिताः १५

दशाब्दाः पृथगंशघ्ना अंशयोगविभाजिताः
अन्तर्दशा भवन्त्येवं तत्प्रत्यन्तर्दशादिकाः १६

**13-16. Now I will tell you the method of working out the Antar Dashas in the Pinda, Aṅś and Nisarg Dashas. The Lord of Dasha is Dasha Pachak of full part, the Planet, associated with, is Pachak of part, the Planet in Trikona from him is Pachak of l/3 part and the Planet in the 4th and 8th from him are Pachak of ¼ part, the Planet in the 7th from him is Pachak of l/7 part of the Dasha. No Planet in any other House is Antar Dash Pachak. In this manner there are Antar Dasha Pachakas in the above-mentioned Houses from the various Houses, including Lagna. In any of such Houses, if there are more than one Planet, then the one, who is the strongest amongst them will be the Pachak. Take the fractions and reduce them in equivalent fractions with a common denominator. Add up the aliquot parts of the Dasha, representative of the various numerators, leaving out the denominators. The Antar Dashas will be arrived at, when the various aliquots are converted into years, months etc. within the main Dasha and divided by the above sum. (The calculations, given above, are not the literal translation of the text in the verses concerned, but their actual meaning and sense. This has been got confirmed by checking up with similar information, given in Kalyana Varmas Saravali and Varamihirs Brihat Jatak)**

अथ विंशोत्तरीमतेन सूर्यदशान्तर्दशाफलाध्यायः ५२
स्वोच्चे स्वभे स्थितः सूर्यो लाभे केन्द्रे त्रिकोणके
स्वदशायां स्वभुक्तौ च धनधान्यादिलाभकृत् १

नीचाद्यशुभराशिस्थो विपरीतं फलं दिशेत्
द्वितीयद्यूननाथेऽर्के त्वपमृत्युभयं वदेत् २

तद्दोषपरिहारार्थं मृत्युञ्जयजपं चरेत्
सूर्यप्रीतिकरीं शान्तिं कुर्यादारोग्यलब्धये ३

## Ch. 52. Effects of the Antar Dashas in the Dasha of Sun (Vimshott6th)

**1-3. Good effects, like acquisition of wealth and grains etc., are derived in the Antar Dasha of Sun in his own Dasha, if Sun is exalted, in his own House, in 11th, in a Kendra, or in a Trikona. Adverse results will be experienced, if Sun is debilitated, or in an inauspicious House, or Rāśi. Medium effects will be realized, if Sun is in other houses. If Sun is the Lord of 2nd, or 7th, there will be danger of premature death, or death-like sufferings. The remedial measures to be adopted are Mrityunjaya Japa, or the worship of Sun (by recitation of appropriate Mantras, ch6thty etc.).**

सूर्यस्याऽन्तर्गते चन्द्रे लग्नात्केन्द्रत्रिकोणगे
विवाहं शुभकार्यं च धनधान्यसमृद्धिकृत् ४
गृहक्षेत्राभिवृद्धिं च पशुवाहनसम्पदाम्
तुङ्गे वा स्वर्क्षगे वाऽपि दारसौख्यं धनागमम् ५

पुत्रलाभसुखं चैव सौख्यं राजसमागमम्
महाराजप्रसादेन इष्टसिद्धिसुखवाहम् ६

**4-6. Functions, like marriage etc., gain of wealth and property, acquisition of a house, of land, cattle and conveyances etc. will be the effects of the Antar Dasha of Moon in the Dasha of Sun, if Moon is in a Kendra, or in a Trikona. There will be marriage of the native, birth of children, beneficence of and favours from kings and fulfillment of all ambitions, if Moon is in his exaltation Rāśi, or in his own Rāśi.**

क्षीणे वा पापसंयुक्ते दारपुत्रादिपोडनम्
वैषम्यं जनसंवादं भृत्यवर्गविनाशनम् ७

विरोधं राजकलहं धनधान्यपशुक्षयम्
षष्ठाष्टमव्यये चन्द्रे जलभीतिं मनोरुजम् ८

बन्धनं रोगपीडां च स्थानविच्युतिकारकम्
दुःस्थानं चापि चित्तेन दायादजनविग्रहम् ९

निर्दिशेत् कुत्सितान्नं च चौरादिनृपपीडनम्
मूत्रकृच्छ्रादिरोगश्च देहपीडा तथा भवेत् १०

**7-10. Distress to wife and children, failures in ventures, disputes with others, loss of servants, antagonism with the king and destructions of wealth and grains will be the effects, if Moon is waning, or is associated with malefics. Effects, like danger from water, mental agony, imprisonment, danger from diseases, loss of position, journeys to difficult places, disputes with coparceners, bad food, trouble from thieves etc., displeasure of the king, urinary troubles, pains in the body will be experienced, if Moon is in 6th, 8th, or 12th.**

दायेशाल्लाभभाग्ये च केन्द्रे वा शुभसंयुते
भोगभाग्यादिसन्तोषदारपुत्रादिवर्द्धनम् ११

राज्यप्राप्तिं महत्सौख्यं स्थानप्राप्तिं च शाश्वर्ताम्
विवहां यज्ञदीक्षां च सुमाल्यामबरभूषणम् १२

**11-12. Luxuries, comforts, pleasures, dawn of fortune (Bhagyodaya), increase in the enjoyment from wife and children, acquisition of kingdom, performance of marriage and religious functions, gain of garments, land and conveyance and birth of children and grandchildren will be the auspicious effects, if there are benefics in the 1st, the 9th, or a Kendra from the Lord of the Dasha.**

वाहनं पुत्रपौत्रादि लभते सुखवर्द्धनम्
दायेशाद्रिपुरन्ध्रस्थे व्यये वा बलवर्जिते १३

अकाले भोजनं चैव देशाद्देशं गमिष्यति
द्वितीयद्यूननाथे च ह्यपमृत्युर्भविष्यति
श्वेतां गां महिषीं दद्याच्छान्ति कुर्यात्सुखाप्तये १४

**13-14. Unpalatable food, or course food, exile to outside places etc. will be the effects in the Antar Dasha, if Moon is in the 6th, the 8th, or the 12th from the Lord of the Dasha, or, if Moon is weak. There will be premature death, if Moon is the Lord of a Marak House. To acquire peace and comfort, the remedial measure is giving in ch6thty of a white cow and a female buffalo (Mahishi).**

सूर्यस्यान्तर्गति भौमे स्वोच्चे स्वक्षेत्रलाभगे
लग्नात्केन्द्रत्रिकोणे वा शुभकार्यं समादिशेत् १५

भूलाभं कृषिलाभं च धनधान्यविवर्धनम्
गृहक्षेत्रादि लाभं च रक्तवस्त्रादिलाभकृत् १६

लग्नाधिपेन संयुक्ते सौख्यं राजप्रियं वदेत्
भाग्यलाभाधिपैर्युक्ते लाभश्चैव भविष्यति १७

बहुसेनाधिपत्यं च शत्रुनाशं मनोदृढम्
आत्मबन्धुसुखं चैव भ्रातृवर्द्धनकं तथा १८

**15-18. Auspicious effects, like acquisition of land, gain of wealth and grains, acquisition of a house etc. will be derived in the Antar Dasha of Mars in the Dasha of Sun, if Mars is in his exaltation Rāśi, in his own Rāśi, in a Kendra, or in a Trikona. All-round gains, attainment of the position of a Commander of the Army, destruction of enemies, peace of mind, family comforts and increase in the number of co-borns will be the effects, if Mars is conjunct with the Lagnas Lord.**

दायेशाद्व्ययरन्ध्रस्थे पापैर्युक्ते च वीक्षिते
आधिपत्यबलैर्हीने क्रूरबुद्धिं मनोरुजम् १९

कारागृहे प्रवेशं च कथयेद् बन्धुनाशनम्
भ्रातृवर्गविरोधं च कर्मनाशमथापि वा २०

**19-20. Brutality, mental ailment, imprisonment, loss of kinsmen, disputes with brothers and failure in ventures will result, if Mars is in the 8th, or in the 12th from the Lord of the Dasha, if Mars is associated with malefics, or, if Mars is without dignity and strength.**

नीचे वा दुर्बले भौमे राजमूलाद्धनक्षयः
द्वितीयद्यूननाथे तु देहे जाड्यं मनोरुजम् २१

सुब्रह्मजपदानं च वृषोत्सर्गं तथैव च
शान्तिं कुर्वीत विद्विवदायुरारोग्यसिद्धिदाम् २२

**21-22. Destruction of wealth by the displeasure of the king will be the effect, if Mars is in his debilitation Rāśi, or be weak. Diseases of the mind and body will result, if Mars is the Lord of 2nd, or 7th House. Recovery from ill health, increase in longevity and success in adventures are possible, if remedial measure, like recitation of Vedas, Japa and Vrashotsarg are performed in the prescribed manner.**

सूर्यस्यान्तर्गते राहौ लग्नात्केन्द्रत्रिकोणगे
आदौ द्विमासपर्यन्तं धननाशो महद्भयम् २३

चौरादिव्रणभीतिश्च दारपुत्रादिपीडनम्
तत्परं सुखमाप्नोति शुभयुक्ते शुभांशके २४

देहारोग्यं मनस्तुष्टी राजप्रीतिकरं सुखम्
लग्नादुपचये राहौ योगकारकसंयुते २५

दायेशाच्छुभराशिस्थे राजसन्मानमादिशेत्
भाग्यवृद्धिं यशोलाभं दारपुत्रादिपीडनम् २६

**23-26. In the Antar Dasha of Rahu in the Dasha of Sun, if Rahu is in a Kendra, or in a Trikona from Lagna, there will be in the first two months loss of wealth, danger from thieves, snakes, infliction of wounds and distress to wife and children. After 2 months inauspicious effects will disappear and enjoyment and comforts, sound health, satisfaction, favours from the king and government etc. will be the favourable effects, if Rahu is conjunct with benefics, or, if Rahu is in the Navāmśa of a benefic. Recognition from the king, good fortune, name and fame, some distress to wife and children, birth of a son, happiness in the family etc. will be derived, if Rahu is in an Upachaya from Lagna, if Rahu is associated with a Yoga Karak, or is placed auspiciously from the Lord of the Dasha.**

पुत्रोत्सवादिसन्तोषं गृहे कल्याणशोभनम्
दायेशादथ रिष्फस्थे रन्ध्रे वा बलवर्जिते २७

बन्धनं स्थाननाशश्च कारागृहनिवेशनम्
चौरादिव्रणभीतिश्च दारपुत्रादिवर्द्धनम् २८

चतुष्पाज्जीवनाशश्च गृहक्षेत्रादिनाशनं
गुल्मक्षयादिरोगश्च ह्यतिसारादिपीडनम् २९

**27-29. Imprisonment, loss of position, danger from thieves and snakes, inflection of wounds, happiness to wife and children, destruction of cattle, house and agricultural fields, diseases, consumption (Gulma - enlargement of the skin), dysentery etc. will be the results, if Rahu is weak, or is in the 8th, or in the 12th from the Lord of the Dasha.**

द्विसप्तस्थे तथा राहौ तत्स्थानाधिपसंयुते
अपमृत्युभयं चैव सर्पभीतिश्च सम्भवेत् ३०

दुर्गाजपं च कुर्वीत् छागदानं समाचरेत्
कृष्णां गां महिषीं दद्याच्छान्तिमाप्नोत्यसंशयम् ३१

**30-31. Adverse effects, like premature death and danger from snakes will be derived, if Rahu is in 2nd, or 7th, or, if Rahu is associated with the Lords of either of these Houses. Worship of Goddess Durga, Japa, giving in ch6thty of a black cow, or female buffalo are the remedial measures for alleviation of the above evil effects, or total escape from them.**

सूर्यस्यान्तर्गते जीवे लग्नात्केन्द्रत्रिकोणगे
स्वोच्चे मित्रस्य वर्गस्थे विवाहं राजदर्शनम् ३२

धनधान्यादिलाभ च पुत्रलाभं महत्सुखं
महाराजप्रसादेन इष्टकार्यार्थलाभकृत् ३३

**32-33. Marriage of the native, favours by the king, gain of wealth and grains, birth of a son, fulfillment of the ambitions by the beneficence of the sovereign and gain of clothes will be the auspicious effects, derived in the Antar Dasha of Jupiter in the Dasha of Sun, if Jupiter is in a Kendra, or in a Trikona to Lagna, in his exaltation Rāśi, in his own Rāśi, or in his own Varga.**

ब्राह्मणप्रियसन्मानं प्रियवस्त्रादिलाभकृत्
भाग्यकर्माधिपवशाद्राज्यलाभं वदेद् द्विज ३४

नरवाहनयोगश्च स्थानाधिक्यं महत्सुखम्
दायेशाच्छुभराशिस्थे भाग्यवृद्धिः सुखावहा ३५
दीनधर्मक्रियायुक्तो देवताराधनप्रियः
गुरुभक्तिर्मनःसिद्धिः पुण्युकर्मादिसंग्रहः ३६

**34-36. Acquisition of a kingdom, comforts of conveyance, like palanquin (motor car in the present times), gain of position etc. will result, if Jupiter is the Lord of 9th, or 10th. Better fortune, charities, religious inclinations, worship of deities, devotion to preceptor, fulfillment of ambitions will be the auspicious effects, if Jupiter is well placed with reference to the Lord of the Dasha.**

राशेशाद्रिपुरन्ध्रस्थे नीचे वा पापसंयुते
दारपुत्रादिपीडा च देहपीडा महद्भयम् ३७

राजकोपं प्रकुरुतेऽभीष्टवस्तुविनाश्नम्
पापमूलाद्द्रव्यनाशं देहभ्रष्टं मनोरुजम् ३८

स्वर्णदानं प्रकुर्वीत स्वेष्टजाप्यं च कारयेत्
गवां कपिलवर्णानां दानेनारोग्यमादिशेत् ३९

**37-39. Distress to wife and children, pains in the body, displeasure of the king, non-achievement of desired goals, loss of wealth, due to sinful deeds, mental worries etc. will result in his Antar Dasha, if Jupiter is in the 6th, or in the 8th from the Lord of the Dasha, or is associated with malefics. Giving in ch6thty gold, a tawny-coloured cow (Kapila Gaya), worship of Isht Lord (Isht Dev) are the remedial measures to obtain alleviation of the evil effects and to achieve good health and happiness.**

सूर्यस्यान्तर्गते मन्दे लग्नात्केन्द्रत्रिकोणगे
शत्रुनाशो महत्सौख्यं स्वल्पधान्यार्थलाभकृत् ४०

विवाहादिसुकार्यञ्च गृहे तस्य शुभावहम्
स्वोच्चे स्वक्षेत्रगे मन्दे सुहृद्ग्रहसमन्विते ४१

गृहे कल्याणसम्पत्तिर्विवाहादिषु सत्क्रिया
राजसन्मानकीर्तिश्च नानावस्त्रधनागमः ४२

**40-42. Destruction of foes, full enjoyment, some gain of grains, auspicious functions, like marriage etc. at home will be the good effects, derived in the Antar Dasha of Saturn in the Dasha of Sun, if Saturn is in a Kendra, or in a Trikona from Lagna. Well-being, acquisition of more property, recognition by the king, achievement of renown in the country, gain of wealth from many sources will be the effects, if Saturn is in his exaltation, in his own, in a friendly Rāśi and, if Saturn is conjunct with a friendly Planet.**

दायेशादथ रन्ध्रस्थे व्यये वा पापसंयुते
वातशूलमहाव्याधिज्वरातीसारपीडनम् ४३

बन्धनं कार्यहानिश्च वित्तनाशो महद्भयम्
अकस्मात्कलहश्चैव दायादजनविग्रहः ४४

**43-44. Rheumatism, pains, fever, dysentery-like disease, imprisonment, loss in ventures, loss of wealth, quarrels, disputes with coparceners, claimants etc. will be the effects in the Antar Dasha, if Saturn is in the 8th, or the 12th from the Lord of the Dasha, or is associated with malefics.**

भुक्त्यादौ मित्रहानिःस्यान्मध्ये किञ्चित्सुखावहम्
अन्ते क्लेशकरं चैव नीचे तेषां तथैव च ४५

पितृमातृवियोगश्च गमनागममं तथा
द्वितीयद्यूननाथे तु अपमृत्युभयं भवेत् ४६

कृष्णां गां महिषीं दद्यान्मृत्युञ्जयजपं चरेत्
छागदानं प्रकुर्वीत सर्वसम्पत्प्रदायकम् ४७

**45-47. There will be loss of friends at the commencement, good effects during the middle part and distress at the end of the Dasha. In addition to other evil effects there will be separation from parents and wandering, if Saturn be in his Rāśi of debilitation. If Saturn is the Lord of 2nd, or 7th, there will be danger of premature death. Giving in ch6thty black cow, buffalo, goat and Mrityunjaya Japa, are the remedial measures for obtaining relief from the evil effects of the Antar Dasha. These measures help to achieve happiness and gain of wealth and property.**

सूर्यास्यान्तर्गते सौम्ये स्वोच्चे वा स्वर्क्षगेऽपि वा
केन्द्रत्रिकोणलाभस्थे बुधे वर्गबलैर्युते ४८

राज्यलाभो महोत्साहो दारपुत्रादिसौख्यकृत्
महाराजप्रसादेन वाहनाम्बरभूषणं ४९

**48-49. Acquisition of a kingdom, enthusiasm and vivacity, happiness from wife and children, acquisition of conveyance through the beneficence of the sovereign, gain of clothes, ornaments, pilgrimage to holy places, acquisition of a cow etc. will be the good effects in the Antar Dasha of Mercury in the Dasha of Sun, if Mercury is in a Kendra, or in a Trikona from Lagna.**

पुण्यतीर्थफलावाप्तिर्गृहे गोधनसंकुलम्
भाग्यलाभाधिपैर्युक्ते लाभवृद्धिकरो भवेत् ५०

भाग्यपंचमकर्मस्थे सन्मानो भवति ध्रुवम्
सुकर्मधर्मबुद्धिश्च गुरुदेवद्विजार्चनम् ५१

**50-51. Mercury becomes very beneficial, if he gets associated with the Lord of 9th. Reverence from and popul6thty amongst people, performance of pious deeds and religious rites, devotion to the preceptor and deities, increase in wealth and grains and birth of a son, will be the auspicious effects, if Mercury is in 9th, 5th, or 10th.**

धनधान्यादिसंयुक्तो विवाहः पुत्रसम्भवः
दायेशाच्छुभराशिस्थे सौम्ययुक्ते महत्सुखम् ५२

वैवाहिकं यज्ञकर्म दानधर्मजपादिकम्
स्वनामाङ्कितपद्यानि नामद्वयमथाऽपि वा ५३

**52-53. Marriage, offering of oblations, ch6thty, performance of religious rites, name and fame, becoming famous by assuming another name, good food, becoming happy, like Indra, by acquiring wealth, robes and ornaments will be the effects, if Mercury is in an auspicious House, like a Trikona etc. from the Lord of the Dasha.**

भोजनाम्बरभूषाप्तिरमरेशो भवेन्नरः
दायेशाद्रिपुरन्ध्रस्थे रिष्फगे नीचगेऽपि वा ५४

देहपीडा मनस्तापो दारपुत्रादिपीडनम्
भुक्त्यादौ दुःखमाप्नोति मध्ये किञ्चित्सुखावहम् ५५

अन्ते तु राजभीतिश्च गमनागमनं तथा
द्वितीये द्यूननाथे तु देहजाड्यं ज्वरादिकम् ५६
विष्णुनामसहस्रं च ह्यन्नदानं च कारयेत्
रजतप्रतिमादानं कुर्यादारोग्यसिद्धये ५७

**54-57. Body distress, disturbance of peace of mind, distress to wife and children, will be the evil effects in the Antar Dasha of Mercury, if he is in the 6th, the 8th, or the 12th from the Lord of the Dasha (Mercury cannot be in the 6th, or the 8th from Sun). There will be evil effects at the commencement of the Antar Dasha, some good effects in the middle part of the Antar Dasha and the possibility of displeasure of the king and exile to a foreign country at the end of the Dasha. If Mercury is the Lord of 2nd, or 7th, there will be pains in the body and attacks of fever. For relief from the evil effects and to regain good health and happiness the remedial measures are the recitation of Vishnu Sahasranam and giving in ch6thty grains and an idol, made of silver.**

सूर्यस्यान्तर्गते केतौ देहपीडा मनोव्यथा
अर्थव्ययं राजकोपं स्वजनादेरुपद्रवम् ५८

लग्नाधिपेन संयुक्ते आदौ सौख्यं धनागमम्
मध्ये तत्क्लेशमाप्नोति मृतवार्तागमं वदेत् ५९

**58-59. Body pains, mental agony, loss of wealth, danger from the king, quarrels with the kinsmen will be the effects of the Antar Dasha of Ketu in the Dasha of Sun. If Ketu is associated with the Lord of Lagna, there will be some happiness at the commencement, distress in the middle part and receipt of the news of death at the end of the Antar Dasha.**

अथाष्टमव्यये चैवं दायेशात्पापसंयुते
कपोलदन्तरोगश्च मूत्रकृच्छ्रस्य सम्भवः ६०

स्थानविच्युतिरर्थस्य मित्रहानिः पितुर्मृतिः
विदेशगमनं चैव शत्रुपीडा महद्भयम् ६१

**60-61. Diseases of teethe, or cheeks, urinary troubles, loss of position, loss of friends and wealth, death of father, foreign journey and troubles from enemies will be the results, if Ketu is in the 8th, or the 12th from the Lord of the Dasha.**

लग्नादुपचये केतौ योगकारकसंयुते
शुभांशे शुभवर्गे च शुभकर्मफलोदयः ६२

पुत्रदारादिसौख्यं च सन्तोषं प्रियवर्द्धनम्
विचित्रवस्त्रलाभश्च यशोवृद्धिः सुखावहा ६३

द्वितीयाद्यूननाथे वा ह्यपमृत्युभयं वदेत्
दुर्गाजपं च कुर्वीत छागदानं सुखाप्तये ६४

**62-64. Beneficial effects, like happiness from wife and children, satisfaction, increase of friends, gain of clothes etc. and renown will be derived, if Ketu is in 3rd, 6th, 10th, or 11th.**
**If Ketu is Lord of 2nd, or 7th (or is in any of those Houses), there will be danger of premature death. The remedial measures for obtaining relief from the evil effects are recitation of Mantras of Goddess Durga (Shat Chandi Path) and giving a goat in ch6thty.**

सूर्यस्यान्तर्गते शुक्रे त्रिकोणे केन्द्रगेऽपि वा
स्वोच्चे मित्रस्ववर्गस्थेऽभीष्टस्त्रीभोग्यसम्पदः ६५

ग्रामान्तरप्रयाणं च भाह्मणप्रभुदर्शनम्
राज्यलाभो महोत्साहश्छत्रचामरवैभवम् ६६

गृहे कल्याणसम्पत्तिर्नित्यं मिष्ठान्नभोजनम्
विद्रुमादिरत्नलाभो मुक्तावस्त्रादि लाभकृत् ६७

चतुष्पाज्जीवलाभः स्याद्बहुधान्यधनादिकम्
उत्साहः कीर्तिसम्पत्तिर्नरवाहनसम्पदः ६८

**65-68. Marriage and happiness, as desired from wife, gain of property, travels to other places, meeting with Brahmins and the king, acquisition of kingdom, riches, magnanimity and majesty, auspicious functions at the home, availability of sweet preparations, acquisition of pearls and other jewels, clothes, cattle, wealth, grains and conveyances, enthusiasm, good reputation etc. are the auspicious effects of the Antar Dasha of Venus in the Dasha of Sun, if Venus is placed in a Kendra, or in a Trikona, or, if Venus is in his exaltation Rāśi, in his own Rāśi, in his own Varga, or in a friendly Rāśi.**

षष्ठाष्टमव्यये शुक्रे दायेशाद्बलवर्जिते
राजकोपो मनःक्लेशः पुत्रस्त्रीधननाशनम् ६९

भुक्त्यादौ मध्यमं मध्ये लाभः शुभकरो भवेत्
अन्ते यशोनाशनं च स्थानभ्रंशमथापि वा ७०

बन्धुद्वेषं वदेद् वापि स्वकुलाद्भोगनाशनम्
भार्गवे द्यूननाथे तु देहे जाड्यं रुजोभयम् ७१

रन्ध्ररिष्फसमायुक्ते ह्यपमृत्युर्भविष्यति
तद्दोषपरिहारार्थं मृत्युञ्जयजपं चरेत् ७२

श्वेतां गां महिषीं दद्याद्रुद्रजाप्यं च कारयेत्
ततः शान्तिभवाप्नोति शङ्करस्य प्रसादतः ७३

**69-73. Displeasure of the king, mental agony and distress to wife and children will be the effects in the Antar Dasha of Venus, if he is in the 6th, the 8th, or the 12th from the Lord of the Dasha. The effects of the Antar Dasha would be moderate at its commencement, good during the middle portion and evil effects, like disrepute, loss of position, inimical relations with kinsmen and loss of comforts, will be derived at the end. If Venus is the Lord of 7th (and 2nd), there will be pains in the body and the possibility of suffering from diseases. There will be premature death, if Venus is associated with 6ths, or 8ths Lord. The remedial measures for obtaining relief from the evil effects are Mrityunjaya Japa, Rudra Japa and giving in ch6thty a tawny cow, or female buffalo.**

अथ चन्द्रान्तर्दशाफलाध्यायः ५३
स्वोच्चे स्वक्षेत्रगे चन्द्रे त्रिकोणे लाभगेऽपि वा
भाग्यकर्माधिपैर्युक्ते गजाश्वाम्बरसंकुलम् १

देवतागुरुभक्तिश्च पुण्यश्लोकादिकीर्तनम्
N राज्यलाभो महत्सौख्यं यशोवृद्धिः सुखावहा २

## Ch. 53. Effects of the Antar Dashas in the Dasha of Moon

**1-2. Acquisition of horses, elephants and clothes, devotion to deities and preceptor, recitation of religious songs in praise of God, acquisition of a kingdom, extreme happiness and enjoyment and name and fame will be the beneficial results in the Antar Dasha of Moon in her own Dasha, if she is placed in her exaltation Rāśi, her own Rāśi, in a Kendra, or in a Trikona, or is associated with the Lord of 9th, or 10th.**

पूर्णे चन्द्रे बलं पूर्णं सेनापत्यं महत्सुखम्
पापयुक्तेऽथवा चन्द्रे नीचे वा रिष्फषष्ठगे ३

तत्काले धननाशः स्यात्स्थानच्युतिरथापि वा
देहलस्यं मनस्तापो राजमन्त्रिविरोधकृत् ४

मातृक्लेशो मनोदुःखं निगडं बन्धुनाशनम्
द्वितीयद्यूननाथे तु रन्ध्ररिष्फेशसंयुते ५

देहजाड्यं महाभङ्गमपमृत्योर्भयं वदेत्
श्वेतां गां महिषीं दद्यात् स्वदशान्तर्गते विधौ ६

**3-6. Loss of wealth, loss of position, lethargy, agony, antagonism towards the king and ministers, distress to mother, imprisonment and loss of kinsmen will be the evil effects in her Antar Dasha, if Moon is in her debilitation Rāśi, if Moon is associated with malefics, or, if Moon is in 6th, 8th, or 12th. If Moon is the Lord of 2nd, or 7th, or is associated with 8ths, or with 12ths Lord, there will be pains in the body and danger of premature death. The remedial measures are giving in ch6thty of a tawny-coloured cow, or female buffalo.**

चन्द्रस्यान्तर्गते भौमे लग्नात्केन्द्रत्रिकोणगे
सौभाग्यं राजसन्मानं वस्त्राभरणभूषणम् ७

यत्नात् कार्यार्थसिद्धिस्तु भविष्यति न संशयः
गृहक्षेत्राभिवृद्धिश्च व्यवहारे जयो भवेत् ८

**7-8. Advancement of fortune, recognition by the government, gain of clothes and ornaments, success in all efforts, increase in agricultural production and prosperity at home and profits in business will be the favourable effects of the Antar Dasha of Mars in the Dasha of Moon, if Mars is in a Kendra, or in a Trikona. Great happiness and enjoyment of comforts will be derived, if Mars is in his exaltation Rāśi, or in his own Rāśi.**

कार्यलाभो महत्सौख्यं स्वोच्चे स्वक्षेत्रगे फलम्
तथाष्टमव्यये भौमे पापयुक्तेऽथ वा यदि ९

दायेशादशुभस्थाने देहार्तिः परवीक्षिते
गृहक्षेत्रादिहानिश्च व्यवहारे तथा क्षतिः १०

मृत्युवर्गेषु कलहो भूपालस्य विरोधनम्
आत्मबन्धुवियोगश्च नित्यं निष्ठुरभाषणम् ११

द्वितीये द्यूननाथे तु रन्ध्रे रन्ध्राधिपो यदा
तद्दोषपरिहारार्थं ब्राह्मणस्याऽर्चनं चरेत् १२

**9-12. Distress to the body, losses at home and in agricultural production, losses in business dealings, antagonism, or adverse relations with servants (employees) and the king, separation from kinsmen and hot temperament will be the evil effects in the Antar Dasha of Mars, if he is placed in 6th, 8th, or 12th from Lagna, be associated with, or receives a Aspect from malefics in the 6th, the 8th, or the 12th from the Lord of the Dasha.**

चन्द्रस्यान्तर्गते राहौ लग्नात्केन्द्रत्रिकोणगे
आदौ स्वल्पफलं ज्ञेयं शत्रुपीडा महद्भयम्  १३

चौराहिराजभीतिश्च चतुष्पाज्जिवपीडनम्
बन्धुनाशो मित्रहानिर्मानहानिर्मनोव्यथा  १४

**13-14. There will be some auspicious results at the commencement of the Antar Dasha of Rahu in the Dasha of Moon, but later there will be danger from the king, thieves and snakes, distress to cattle, loss of kinsmen and friends, loss of reputation and mental agony, if Rahu is placed in a Kendra, or in a Trikona.**

शुभयुक्ते शुभैर्दृष्टे लग्नादुपचयेऽपि वा
योगकारकसम्बन्धे सर्वकार्यार्थसिद्धिकृत्  १५

नैर्ऋत्ये पश्चिमे भागे क्वचित्प्रभुसमागमः
वाहनाम्बरलाभश्च स्वेष्टकार्यार्थसिद्धिकृत्  १६

**15-16. Success in all ventures, gain of conveyances, garments etc. from the king etc. in the South-West direction will be derived, if Rahu in his Antar Dasha receives a Aspect from benefics, if Rahu is in 3rd, 6th, 10th, or 11th, or, if Rahu is conjunct with a Yoga Karak Planet.**

दायेशादथ रन्ध्रस्थे व्यये वा बलवर्जिते
स्थानभ्रंशो मनोदुखं पुत्रक्लेशो महद्भयम्  १७

दारपीडा क्वचिज्ज्ञेया क्वचित्स्वाङ्गे रुजोभयम्
वृश्चिकादिविषाद्भीतिश्चौराहिनृपपीडनम्  १८

**17-18. Loss of position, mental agony, distress to wife and children, danger of diseases, danger from the king, scorpions and snakes etc. will happen, if Rahu is weak and is placed in the 8th, or the 12th from the Lord of the Dasha.**

दायेशात्केन्द्रकोणे वा दुश्चिक्ये लाभगेऽपि वा
पुण्यतीर्थफलावाप्तिर्देवतादर्शनं महत्  १९

परोपकारधर्मादिपुण्यकर्मादिसंग्रहः
द्वितीयद्यूनराशिस्थे देहबाधा भविष्यति  २०

तद्दोषपरिहारार्थं रुद्रजाप्यं समाचरेत्
छागदानं प्रकर्वीत देहारोग्यं प्रजायते  २१

**19-21. Pilgrimage to holy places, visits to sacred shrines, beneficence, inclination towards ch6thtable deeds etc. will be the results, if Rahu is in a Kendra, in a Trikona, or in the 3rd, or the 11th from the Lord of the Dasha. There will be body troubles (physical afflictions), if Rahu is in 2nd, or in 7th. Rahu Japa and giving a goat in ch6thty are the remedial measures for obtaining relief from the evil effects in the Antar Dasha of Rahu.**

चन्द्रस्यान्तर्गते जीवे लग्नात्केन्द्रत्रिकोणगे
स्वगेहे लाभगे स्वोच्चे राज्यलाभो महोत्सवः  २२

वस्त्राऽलङ्कारभूषाप्ती राजप्रीतिर्धनागमः
इष्टदेवप्रसादेन गर्भाधानादिकं फलम्  २३

तथा शोभनकार्याणि गृहे लक्ष्मीः कटाक्षकृत्
राजाश्रयं धनं भूमिगजवाजिसमन्वितम्  २४

**22-24. Acquisition of a kingdom, auspicious celebrations at home, gains of clothes and ornaments, recognition from the king beneficence of the Isht Lord (Isht Devata), gains of wealth, land, conveyances, success in all ventures by the beneficence of the king will be the beneficial effects in the Antar Dasha of Jupiter in the Dasha of Moon, if Jupiter is placed in a Kendra, or in a Trikona to Lagna, or, if Jupiter is in his own, or in his exaltation Rāśi.**

महाराजप्रसादेन स्वेष्टसिद्धिः सुखावहा
षष्ठाष्टमव्यये जीवे नीचे वास्तङ्गते यदि  २५

पापयुक्तेऽशुभं कर्म गुरुपुत्रादिनाशनम्
स्थानभ्रंशो मनोदुःखमकस्मात्कलहो ध्रुवम्  २६

गृहक्षेत्रादिनाशश्च वाहनाम्बरनाशनम्
दायेशात्केन्द्रकोणे वा दुश्चिक्ये लाभगेऽपि वा  २७

भोजनाम्बरपशवादिलाभं सौख्यं करोति च
भ्रात्रादिसुखसम्पत्तिं धैर्यं वीर्यपराक्रमम्  २८

**25-28. Destruction of preceptor (and father etc.) and children, loss of position, mental agony, quarrels, destruction of a house, conveyances and agricultural land will be the evil effects in his Antar Dasha, if Jupiter is in 6th, 8th, or 12th, if Jupiter is combust, in his debilitation Rāśi, or be associated with malefics. Gains of cattle, grains, clothes and happiness from brothers, acquisition of property, valor, patience, oblations, celebrations, like marriage etc., gain of a kingdom etc. will be the favourable effects, if Jupiter is in 3rd, or in the11th from the Lord of the Dasha.**

यज्ञव्रतविवाहादिराज्यश्रीधनसम्पदः
दायेशाद्रिपुरन्ध्रस्थे व्यये वा बलवर्जिते २९

करोति कुत्सिनान्नं च विदेशगमनं तथा
भुक्त्यादौ शोभनं प्रोक्तमन्ते क्लेशकरं भवेत् ३०

द्वितीयद्यूननाथे च ह्यपमृत्युर्भविष्यति
तद्दोषपरिहारार्थं शिवसाहस्रकं जपेत्
स्वर्णदानमिति प्रोक्तं सर्वकष्टनिवारकम् ३१

**29-31. Effects, like unpalatable food, journeys to places away from the homeland, will be derived, if Jupiter is weak and is placed in the 6th, the 8th, or the 12th from Moon. There will be good effects at the commencement of the Antar Dasha and distress at its end. There will be premature death, if Jupiter is 2nds, or 7ths Lord. Remedial measures for obtaining relief from the above evil effects are recitation of Shiva Sahasranam Japa and giving gold in ch6thty.**

चन्द्रस्यान्तर्गते मन्दे लग्नात्केन्द्रत्रिकोणगे
स्वक्षेत्रे स्वांशगे चैव मन्दे तुङ्गांशसंयुते ३२

शुभदृष्टयुते वाऽपि लाभे वा बलसंयुते
पुत्रमित्रार्थसम्पत्तिः शूद्रप्रभुसमागमात् ३३

व्यवसायात्फलाधिक्यं गृहे क्षेत्रादिवृद्धिदम्
पुत्रलाभश्च कल्याणं राजानुग्रहवैभवम् ३४

**32-34. Effects, like birth of a son, friendship, gain of wealth and property, profits in business with the help of Sudras, increase in agricultural production, gains from son, riches and glory by the beneficence of the king, will be experienced in the Antar Dasha of Saturn in the Dasha of Moon, if Saturn is in a Kendra, or in a Trikona from Lagna, or, if Saturn is in his own Rāśi, in his own Navāmśa, in his exaltation Rāśi, if Saturn receives a Aspect from, or is associated with benefics, or, if Saturn is in 11th with strength.**

षष्ठाष्टमव्यये मन्दे नीचे वा धनगेऽपि वा
तद्भुक्त्यादौ पुण्यतीर्थे स्नानं चैव तु दर्शनम् ३५

**35-35. Effects, like visits to holy places, bathing in holy rivers etc., the creation of troubles by many people and distress from enemies, will be derived in the Antar Dasha of Saturn, if Saturn is in 6th, 8th, 12th, or 2nd, or, if Saturn is in his debilitation Rāśi.**

अनेकजनत्रासश्च शस्त्रपीडा भविष्यति
दायेशात्केन्द्रराशिस्थे त्रिकोणे बलगेऽपि वा ३६

क्वचित्सौख्यं धनाप्तिश्च दारपुत्रविरोधकृत्
द्वितीयद्यूनरन्ध्रस्थे देहबाधा भविष्यति ३७

तद्दोषपरिहारार्थं मृत्युञ्जयजपं चरेत्
कृष्णां गां महिषीं दद्याद्दानेनारोग्यमादिशेत् ३८

**36-38. Effects, like enjoyments and gains of wealth some times, while opposition, or quarrels with wife and children at other times, will be realized, if Saturn is in a Kendra, or in a Trikona from the Lord of that Dasha, or is endowed with strength. If Saturn is in 2nd, 7th, or 8th, there will be physical distress. The remedial measures to be adopted for obtaining relief from the evil effects are Mrityunjaya Japa, giving in ch6thty a black cow, or female buffalo.**

चन्द्रस्यान्तर्गते सौम्ये केन्द्रलाभत्रिकोणगे
स्वर्क्षे निजांशके सौम्ये तुङ्गे वा बलसंयुते ३९

धनागमो राजमानप्रियवस्त्रादिलाभकृत्
विद्याविनोदसद्गोष्ठी ज्ञानवृद्धिः सुखावहा ४०

सन्तानप्राप्तिः सन्तोषो वाणिज्याद्धनलाभकृत्
वाहनच्छत्रसंयुक्तनानालङ्कारलाभकृत् ४१

**39-41. Effects, like acquisition of wealth, recognition by the king, gain of clothes etc., discussions on Shastras gain of knowledge from society with learned and holy people, enjoyments, birth of children, satisfaction, profits in business, acquisition of conveyance and ornaments etc. will be experienced in the Antar Dasha of Mercury in the Dasha of Moon, if Mercury is in a Kendra, or in a Trikona, if Mercury is in his own Rāśi, in his own Navāmśa, or in his exaltation Rāśi, endowed with strength.**

दायेशात्केन्द्रकोणे वा लाभे वा धनगेऽपि वा
विवाहो यज्ञदीक्षा च दानधर्मशुभादिकम् ४२

राजप्रीतिकरश्चैव विद्वज्जनसमागमः
मुक्तामणिप्रवालानि वाहनाम्बरभूषणम् ४३

**42-43.** Effects, like marriage, oblations (Yagya), charities, performance of religious rites, close relations with the king, social contacts with men of learning, acquisition of pearls, corals, Mani (jewels), conveyances, clothes, ornaments, good health, affections, enjoyments, drinking of Soma Rasa and other tasty syrups etc. will be derived in the Antar Dasha of Mercury, if he is in a Kendra, or in a Trikona, or in the 11th, or in the 2nd from the Lord of the Dasha.

आरोग्यप्रीतिसौख्यं च सोमपानादिकं सुखम्
दायेशाद्रिपुरन्ध्रस्थे व्यये वा नीचगेऽपि वा ४४

तद्भुक्तौ देहबाधा च कृषिगोभूमिनाशनम्
कारागृहप्रवेशाश्च दारपुत्रादिपीडनम् ४५

द्वितीयद्यूननाथे तु ज्वरपीडा महद्भयम्
छागदानं प्रकुर्वीत विष्णुसाहस्रकं जपेत् ४६

**44-46.** Pains in the body, loss in agricultural ventures, imprisonment, distress to wife and children will be the inauspicious effects, if Mercury be in the 6th, the 8th, or the 12th from the Lord of the Dasha, or be in his debilitation Rāśi. If Mercury is the Lord of 2nd, or 7th, there will be fear of fever. The remedial measures to be adopted for obtaining relief from the evil effects are recitation of Vishnu Sahasranam and giving a goat in ch6thty.

चन्द्रस्यान्तर्गते केतौ केन्द्रलाभत्रिकोणगे
दुश्चिक्ये बलसंयुक्ते धनलाभं महत्सुखम् ४७

पुत्रदारादिसौख्यं च विधिकर्म करोति च
भुक्त्यादौ धनहानिः स्यान्मध्यगे सुखमाप्नुयात् ४८

**47-48.** Effects, like gain of wealth, enjoyment, happiness to wife and children, religious inclination etc., will 6thse in the Antar Dasha of Ketu in the Dasha of Moon, if Ketu is in a Kendra, in a Trikona, or 3rd and is endowed with strength. There will be some loss of wealth at the commencement of the Antar Dasha. Later all will be well.

दायेशात्केन्द्रलाभे वा त्रिकोणे बलसंयुते
क्वचित्फलं दशादौ तु दद्यात् सौख्यं धनागमम् ४९

**49-49.** Gain of wealth, cattle etc. will be the effects, if Ketu is in a Kendra, in the 9th, the 5th, or the 11th from the Lord of the Dasha and is equipped with strength. There will be loss of wealth at the end of the Antar Dasha.

गोमहिष्यादिलाभं च भुक्त्यन्ते चार्थनाशनम्
पापयुक्तेऽथवा दृष्टे दायेशाद्रन्ध्ररिःफगे ५०

शत्रुतः कार्यहानिः स्यादकस्मात्कलहो ध्रुवम्
द्वितीयद्यूनराशिस्थे ह्यनारोग्यं महद्भयम् ५१

मृत्युञ्जयजपं कुर्यात् सर्वसम्पत्प्रदायकम्
ततः शान्तिमवाप्नोति शङ्करस्य प्रसादतः ५२

**50-52.** There will be obstacles in ventures, due to interference by enemies and quarrels, if Ketu be in the 8th, or the 12th from the Lord of the Dasha, or receives a Aspect from, or is associated with malefics. If Ketu is in 2nd, or in 7th, there will be danger of affliction of the body with diseases. Mrityunjaya Japa will give relief in all the evil effects and will ensure gain of wealth and property with the beneficence of Lord Shiva.

चन्द्रस्यान्तर्गते शुक्रे केन्द्रलाभत्रिकोणगे
स्वोच्चे स्वक्षेत्रगे वापि राज्यलाभं करोति च ५३

महाराजप्रसादेन वाहनाम्बरभूषणम्
चतुष्पाज्जिवलाभः स्याद्दारपुत्रादिवर्धनम् ५४

नूतनागारनिर्माणं नित्यं मिष्टान्नभोजनं
सुगन्धपुष्पमाल्यादिरम्यस्त्र्यारोग्यसम्पदम् ५५

**53-55.** Effects, like acquisition of a kingdom, gaining of clothes, ornaments, cattle, conveyances etc., happiness to wife and children, construction of a new house, availability of sweet preparations every day, use of perfumes, affairs with beautiful women, sound health etc. will be experienced in the Antar Dasha of Venus in the Dasha of Moon, if Venus is in a Kendra, in a Trikona, in 11th, 4th, or 9th, or in his exaltation Rāśi, or in his own Rāśi.

दशाधिपेन संयुक्ते देहसौख्यं महत्सुखम्
सत्कीर्तिसुखसम्पत्तिगृहक्षेत्रादिवृद्धिकृत् ५६

**56. Physical soundness, good reputation, acquisition of more land and houses, will result, if Venus is conjunct with the Lord of the Dasha.**

नीचे वाऽस्तङ्गते शुक्रे पापग्रहयुतेक्षिते
भूनाशः पुत्रमित्रादिनाशनं पत्निनाशनम् ५७

**57-57. There will be loss of landed property, children, wife and cattle and opposition from government, if Venus is in his debilitation Rāśi, combust, or receives a Aspect from, or is associated with malefics.**

चतुष्पाज्जिवहानिः स्याद्राजद्वारे विरोधकृत्
धनस्थानगते शुक्रे स्वच्चे स्वक्षेत्रसंयुते ५८

निधिलाभं महत्सौख्यं भू लाभं पुत्रसम्भवम्
भाग्यलाभादिपैर्युक्ते भाग्यवृद्धिः करोत्यसौ ५९

महाराजप्रसादेन स्वेष्टसिद्धिः सुखावहा
देवब्राह्मणभक्तिश्च मुक्ताविद्रुमलाभकृत् ६०

**58-60. If Venus is in 2nd in his exaltation Rāśi, or in his own Rāśi, or is there, associated with the Lord of 11th, there will be acquisition of an underground hidden treasure, gain of land, enjoyment, birth of a son etc. Advancement of good fortune, fulfillment of ambitions with the beneficence of the king, devotion to deities and Brahmins, gain of jewels, like pearls etc. will result, if Venus is conjunct with 9ths, or 11ths Lord.**

दायेशाल्लाभगे शुक्रे त्रिकोणे केन्द्रगेऽपि वा
गृहक्षेत्राभिवृद्धिश्च वित्तलाभो महत्सुखम् ६१

**61. Acquisition of more house property and agricultural land and gain of wealth and enjoyment will be the good effects, if Venus is in a Kendra, or in a Trikona from the Lord of the Dasha.**

दायेशाद्रिपुरन्ध्रस्थे व्यये वा पापसंयुते
विदेशवासदुःखार्तिमृत्युचौरादिपीडनम् ६२

**62. Deportation to foreign lands, sorrows, death and danger from thieves and snakes will be the results, if Venus is in the 6th, the 8th, or the 12th from the Lord of the Dasha.**

द्वितीयद्यूननाथे तु अपमृत्युभयं भवेत्
तद्दोषविनिवृत्त्यर्थं रुद्रजाप्यं च कारयेत् ६३

श्वेतां गां रजतं दद्याच्छन्तिमाप्नोत्यसंशयः
शङ्करस्य प्रसादेन नाऽत्र कार्या विचारणा ६४

**63-64. There will be danger of premature death, if Venus be the Lord of the 2nd, or 7th. The remedial measures to be adopted for obtaining relief from the evil effects are Rudra Japa and giving in ch6thty a white cow and silver.**

चन्द्रस्यान्तर्गते भानौ स्वोच्चे स्वक्षेत्रसंयुते
केन्द्रे त्रिकोणे लाभे वा धने वा सोदरालये ६५

नष्टराज्यधनप्राप्तिर्गृहे कल्याणशोभनम्
मित्रराजप्रसादेन ग्रामभूम्यादिलाभकृत् ६६
गर्भाधानफलप्राप्तिर्गृहे लक्ष्मीः कटाक्षकृत्
भुक्त्यन्ते देह आलस्यं ज्वरपीडा भविष्यति ६७

**65-67. Recovery of a lost kingdom and wealth, happiness in the family, acquisition of villages and land with the kind assistance of ones friends and the king, birth of a son, beneficence of Goddess Lakshmi, will be the beneficial results in the Antar Dasha of Sun in the Dasha of Moon, if Sun is in his exaltation Rāśi, in his own Rāśi, in a Kendra, or in 5th, or in 9th, or in 11th, or in 2nd, or in 3rd. At the end of the Antar Dasha there is the likelihood of attacks of fever and lethargy.**

दायेशादपि रन्ध्रस्थे व्यये वा पापसंयुते
नृपचौराहिभीतिश्च ज्वररोगादिसम्भवः ६८

विदेशगमने चार्ति लभते न संशयः
द्वितीयद्यूननाथे तु ज्वरपीडा भविष्यति ६९

तद्दोषपरिहारार्थं शिवपूजां च कारयेत्
ततः शान्तिमवाप्नोति शाङ्करस्य प्रसादतः ७०

**68-70. Danger from the government, thieves and snakes, affliction with fever and troubles in foreign journey are the likely results, if Sun is in the 8th, or 12th from the Lord of the Dasha. If Sun is the Lord of 2nd, or 7th, there will be sufferings from fever in his Antar Dasha. Worship of Lord Shiva is the remedial measure to obtain relief from the above evil effects.**

अथ कुजदशान्तर्दशाफलाध्यायः ५४

कुजे स्वान्तर्गते विप्र लग्नात्केन्द्रत्रिकोणगे
लाभे वा शुभसंयुक्ते दुषचिक्ये धनसंयुते १

लग्नाधिपेन संयुक्ते राजाऽनुग्रहवैभवम्
लक्ष्मीकटोक्षचिह्नानि नष्टराज्यार्थलाभकृत् २

## Ch. 54. Effects of Antar Dashas in the Dasha of Mars

**1-2. Effects, like gains of wealth by the beneficence of the king, beneficence of Goddess Lakshmi, recovery of a lost kingdom and of wealth, birth of a son, will 6thse in the Antar Dasha of Mars in his own Dasha, if he is in a Kendra, in 5th, in 9th, in 11th, in 3rd, or in 2nd, or be associated with the Lord of Lagna.**

पुत्रोत्सवादिसन्तोषो गृहे गोक्षीरसङ्कलम्
स्वोच्चे वा स्वर्क्षगे भौमे स्वांशे वा बलसंयुते ३

गृहक्षेत्राभिवृद्धिश्च गोमहिष्यादिलाभकृत्
महाराजप्रसादेन स्वेष्टसिद्धिः सुखावहा ४

**3-4. Fulfillment of ambitions by the beneficence of the king and acquisition of a house, land, cow, buffalo etc. will be the effects, if Mars is in his exaltation, in his own Rāśi, or in his own Navāmśa and is endowed with strength.**

अथाऽष्टमव्यये भौमे पापदृग्योगसंयुते
मूत्रकृच्छ्रादिरोगश्च कष्टाधिक्यं व्रणाद्भयम् ५

**5-5. Urinary troubles, wounds, danger from snakes and the king will be the results, if Mars is in 8th, or 12th, or is associated with, or receives a Aspect from malefics.**

चौराहिराजपीडा च धनधान्यपरुक्षयः
द्वितीये द्यूननाथे तु देहजाड्यं मनोव्यथा ६

तद्दोषपरिहारार्थं रुद्रजाप्यं च कारयेत्
अनड्वाहं प्रदद्याच्च कुजदोषनिवृत्तये ७

तेन तुष्टो भवेद् भौमः शङ्करस्य प्रसादतः
आरोग्यं कुरुते तस्य सर्वसम्पत्तिदायकम् ८

**6-8. There will be mental agony and body pains, if Mars is the Lord of 2nd, or 7th. Lord Shiva will give relief by restoring health and providing gains of wealth and happiness, if the person concerned performs Rudr Japa and gives a red-coloured bull in ch6thty.**

कुजस्यान्तर्गते राहौ स्वोच्चे मूलत्रिकोणगे
शुभैर्युक्ते शुभैर्दृष्टे केन्द्रलाभत्रिकोणगे ९

तत्काले राजसम्मानं गृहभूम्यादिलाभकृत्
कलत्रपुत्रलाभः स्याद्व्यवसायात्फलाधिकम् १०

**9-10. Effects, like recognition from government, gain of house, land etc., happiness from son, extraordinary profits in business, bathing in holy rivers, like Ganges and foreign journeys, will be the auspicious effects in the Antar Dasha of Rahu in the Dasha of Mars, if Rahu is in his MulaTrikonaa, in his exaltation Rāśi, in a Kendra, in 11th, 5th, or 9th and is associated with benefics.**

गङ्गास्नानफलावाप्तिं विदेशगमनं तथा
तथाऽष्टमव्यये राहौ पापयुक्तेऽथ वीक्षिते ११

चौराहिव्रणभीतिश्च चतुष्पाज्जीवनाशनम्
वातपित्तरुजोभीतिः कारागृहनिवेशनम् १२

धनस्थानगते राहौ धननाशं महद्भयम्
सप्तमस्थानगे वाऽपि ह्यपमृत्युभयं महत् १३

नागपूजां प्रकुर्वीत देवब्राह्मणभोजनं
मृत्युञ्जयजपं कुर्यादायुरारोग्यलब्धये १४

**11-14. Danger from snakes, wounds, destruction of cattle, danger from animals, diseases, due to imBalaance of bile and wind, imprisonment etc. will be the results, if Rahu is in 8th, or 12th, or receives a Aspect from, or is associated with malefics. There will be loss of wealth, if Rahu is in 2nd and great danger of premature death, if he is in 7th. The remedial measure to be adopted to obtain relief from the above evil effects are Naga Puja, offering food to Brahmins and Mrityunjaya Japa. They will help in the prolongation of longevity.**

कुजस्यान्तर्गते जीवे त्रिकोणे केन्द्रगेऽपि वा
लाभे वा धनसंयुक्ते तुङ्गांशे स्वांशगेपि वा १५

सत्कीर्ती राजसम्मानं धनधान्यस्य वृद्धिकृत्
गृहे कल्याणसम्पत्तिर्दारपुत्रादिलाभकृत् १६

**15-16. Effects, like good reputation and renown, honors by government, increase in wealth and grains, happiness at home, gain of property, happiness from wife and children etc. will be realized in the Antar Dasha of Jupiter in the Dasha of Mars, if Jupiter is in 9th, or 5th, in a Kendra, or in 11th, or in 2nd, or, if Jupiter is in his exalted, or own Navāmśa.**

दायेशात्केन्द्रराशिस्थे त्रिकोणे लाभगेऽपि वा
भाग्यकर्माधिपैर्युक्ते वाहनाधिपसंयुते १७

लग्नाधिपसमायुक्ते शुभांशे शुभवर्गगे
गृहक्षेत्राभिवृद्धिश्च गृहे कल्याणसम्पदः १८

देहारोग्यं महत्कीर्तिगृहे गोकुलसंग्रहः
चतुष्पाज्जीवलाभः स्याद्व्यवसायात्फलाधिकम् १९

**17-19. Acquisition of a house, land, well-being, gain of property, sound health, good reputation, gains of cattle, success in business, happiness to wife and children, reverence from government, gain of wealth etc. will be beneficial effects, if Jupiter is in a Kendra, in a Trikona, or in the 11th from the Lord of the Dasha, or, if Jupiter is associated with the Lord of 9th, 10th, or 4th, or Lagna, or, if Jupiter is in a benefic Navāmśa etc.**

कलपुत्रसौख्यं च राजसम्मानवैभवम्
षष्ठाष्टमव्यये जीवे नीचे वास्तंगते सति २०

पापग्रहेण संयुक्ते दृष्टे वा दुर्बले सति
चौराहिनृपभीतिश्च पित्तरोगादिसम्भवम् २१

प्रेतबाधा भृत्यनाशः सोदराणां विनाशनम्
द्वितीयद्यूननाथे तु ह्यपमृत्युज्वरादिकम्

तद्दोषपरिहारार्थं शिवसाहस्रकं जपेत् २२

**20-22. Danger from thieves, snakes, wrath of the king, bilious diseases, oppression by goblins (Prot), loss of servants and co-borns, will be evil effects, if Jupiter is in 6th, 8th, or in 12th, or, if Jupiter is in his debilitation Rāśi, or, if Jupiter is associated with, or receives a Aspect from malefics, or, if Jupiter is otherwise weak. There will be suffering from fever, or danger of premature death, if Jupiter is the Lord of 2nd. The remedial measure to be adopted to combat the above evil effects is recitation of Shiva Sahasranam.**

कुजस्यान्तर्गते मन्दे स्वर्क्षे केन्द्रत्रिकोणगे
मूलत्रिकोणकेन्द्रे वा तुङ्गांशे स्वांशगे सति २३

लग्नाधिपतिना वापि शुभदृष्टियुतेऽसिते
राज्यसौख्यं यशोवृद्धिः स्वग्रामे धान्यवृद्धिकृत् २४

पुत्रपौत्रसमायुक्तो गृहे गोधनसंग्रहः
स्ववारे राजसम्मानं स्वमासे पुत्रवृद्धिकृत् २५

**23-25. Effects, like recognition from the king, increase in reputation, gain of wealth and grains, happiness from children and grandchildren, increase in the number of cows etc. will be experienced in the Antar Dasha of Saturn in the Dasha of Mars, if Saturn is in a Kendra, in a Trikona, in his MulaTrikonaa, in his exalted, or his own Navāmśa, or, if Saturn is associated with the Lord of Lagna, or, if Saturn is associated with benefics. Results will generally fructify on Saturdays in the month of Saturn.**

नीचादिक्षेत्रगे मन्दे तथाऽष्टव्ययराशिगे
म्लेच्छवर्गप्रभुभयं धनधन्यादिनाशनम् २६

**26-26. Danger from Yavana kings (foreign dignit6thes), loss of wealth, imprisonment, possibility of affliction with diseases, loss in agricultural production will result, if Saturn is in his debilitation Rāśi, or in an enemy Rāśi, or, if Saturn is in 8th, or in 12th.**

निगडे बन्धनं व्याधिरन्ते क्षेत्रनाशकृत्
द्वितीयद्यूननाथे तु पापयुक्ते महद्भयम् २७

धननाशश्च सञ्चारे राजद्वेषो मनोव्यथा
चौराग्निनृपपीडा च सहोदरविनाशनम् २८

बन्धुद्वेषः प्रमाद्यैश्च जीवहानिश्च जायते
अकस्माच्च मृतेर्भीतिः पुत्रदारादिपीडनम् २९

**27-29. Effects, like great danger, loss of life, wrath of king, mental agony, danger from thieves and fire, punishment by the king, loss of co-borns, dissensions amongst members of the family, loss of cattle, fear of death, distress to wife and children, imprisonment etc. will be felt, if Saturn is 2nds, or 7ths Lord and is associated with malefics.**

कारागृहादिभीतिश्च राजदण्डो महद्भयम्
दायेशात्केन्द्रराशिस्थे लाभस्थे वा त्रिकोणगे ३०

विदेशयानं लभते दुष्कीर्तिर्विविधा तथा
पापकर्मरतो नित्यं बहुजीवादिहिंसकः ३१

विक्रयः क्षेत्रहानिश्च स्थानभ्रंशो मनोव्यथा
रणे पराजयश्चैव मूत्रकृच्छ्रान्महद्भयम् ३२

**30-32. There will be journeys to foreign lands, loss of reputation, violent actions, loss from sale of agricultural lands, loss of position, agony, defeat in battle, urinary troubles etc., if Saturn is in a Kendra, in the 11th, or in the 5th from the Lord of the Dasha.**

दायेशादथ रन्ध्रे वा व्यये वा पापसंयुते
तद्भुक्तौ मरणं ज्ञेयं नृपचौरादिपीडनम् ३३

वातपीडा च शूलादिज्ञातिशत्रुभयं भवेत् ३४

तद्दोषपरिहारार्थं मृत्युञ्जयजपं चरेत्
ततः सुखमवाप्नोति शङ्करस्य प्रसादतः ३५

**33-35. Effects, like death, danger from the king and thieves, rheumatism, pains, danger from the enemy and members of the family, will be experienced, if Saturn is in the 8th, or the 12th from the Lord of the Dasha and is associated with malefics. There will be relief from the evil effects by the beneficence of Lord Shiva, if Mrityunjaya is performed in the prescribed manner.**

कुजस्यान्तर्गते सौम्ये लग्नात्केन्द्रत्रिकोणगे
सत्कथाश्चाऽजपादानं धर्मबुद्धिर्महद्यशः ३६

नीतिमार्गप्रसङ्गश्च नित्यं मिष्टान्नभोजनम्
वाहनाम्बरपश्वादिर्राजकर्म सुखानि च ३७

**36-37. Effects, like association with pious and holy persons, performance of Ajaya Japa, charities, observance of religious rites, gain of reputation, inclination towards diplomacy, availability of sweetish preparations, acquisition of conveyances, clothes and cattle etc., conferment of authority in the kings retinue, success in agricultural projects etc., will be experienced in the Antar Dasha of Mercury in the Dasha of Mars, if Mercury is in a Kendra, or in a Trikona from Lagna.**

कृषिकर्मफले सिद्धिर्वारणाम्बरभूषणम्
नीचे वास्तङ्गते वापि षष्ठाष्टव्ययगेऽपि वा ३८

हृद्रोगं मानहानिश्च निगडं बन्धुनाशनम्
दारपुत्रार्थनाशः स्याच्चतुष्पाज्जीवनाशनम् ३९

**38-39. Diseases of heart, imprisonment, loss of kinsmen, distress to wife and children, destruction of wealth and cattle etc. will result, if Mercury is in his debilitation Rāśi, if Mercury is combust, or, if Mercury is in 6th, 8th, or 12th.**

दशाधिपेन संयुक्ते शत्रुवृद्धिर्महद्भयम्
विदेशगमनं चैव नानारोगास्तथैव च ४०

**40-40. There will be journeys to foreign lands, increase in the number of enemies, affliction with many kind of ailments, antagonism with the king, quarrels with kinsmen etc., if Mercury be associated with the Lord of the Dasha.**

राजद्वारे विरोधश्च कलहः स्वजनैरपि
द्रायेशात्केन्द्रत्रिकोणे वा स्वोच्चे युक्तार्थलाभकृत् ४१

अनेकधननाथत्वं राजसम्मनमेव च
भूपालयोगं कुरुते धनाम्बरविभूषणम् ४२

भूरिवाद्यमृदंगादि सेनापत्यं महत्सुखम्
विद्याविनोदविमला वस्त्रवाहनभूषणम् ४३

**41-43. Fulfillment of all ambitions, gain of wealth and grains, recognition by the king, acquisition of a kingdom, gain of clothes and ornaments, attachment to many kind of musical instruments, attainment of the position of a Commander of an Army, discussions on Shastras and Puranas, gain of riches to wife and children and beneficence of Goddess Lakshmi will be the very auspicious results, if Mercury is in a Kendra, or Trikona from the Lord of the Dasha, or, if Mercury is in his exaltation Rāśi.**

दारपुत्रादिविभवं गृहे लक्ष्मीः कटाक्षकृत्
दायेशात्षष्ठरिःफस्थे रन्ध्रे वा पापसंयुते ४४

तद्दाये मानहानिः स्यात्क्रूरबुद्धिस्तु क्रूरवाक्
चौराग्निनृपपीडा च मार्गे दस्युभयादिकम् ४५

**44-45. Effects, like defamation, sinful thinking, harsh speech, danger from thieves, fire and the king, quarrels without reason, fear of attacks by thieves and dacoits (armed robber bands) during travels, will be derived, if Mercury is in the 6th, the 8th, or the 12th from Mars, or is associated with malefics.**

अकस्मात्कलहश्चैव बुधमुक्तौ न संशयः
द्वितीयद्यूननाथे तु महाव्याधिर्भयङ्करः ४६

अश्वदानं प्रकुर्वीत विष्णोर्नामसहस्रकम्
सर्वसम्पत्प्रदं विप्र सर्वारिष्टप्रशान्तये ४७

**46-47. There will be a possibility of critical illness in the Antar Dasha of Mercury, if he is 2nds, or 7ths Lord. Remedial measures to obtain relief from these evil effects are recitation of Vishnu Sahasranam and giving a horse in ch6thty.**

कुजस्यान्तर्गते केतौ त्रिकोणे केन्द्रगेऽपि वा
दुश्चिक्ये लाभगे वाऽपि शुभयुक्ते शुभेक्षिते ४८

राजानुग्रहशान्तिश्च बहुसौख्यं धनागमः
किञ्चित्फलं दशादौ तु भूलाभः पुत्रलाभकृत् ४९

**48-49. Beneficence of the king, gain of wealth, little gains of land at the commencement of the Dasha and substantial later, birth of a son, conferment of authority by government, gain of cattle etc. will be the results in the Antar Dasha of Ketu in the Dasha of Mars, if Ketu is in a Kendra, in a Trikona, in 3rd, or 11th, or, if Ketu is associated with, or receives a Aspect from benefics.**

राजसंलाभकार्याणि चतुष्पाज्जीवलाभकृत्
योगकारकसंस्थाने बलवीर्यसमन्विते ५०

पुत्रलाभो यशोवृद्धिर्गृहे लक्ष्मीः कटाक्षकृत्
भृत्यवर्गधनप्राप्तिः सेनापत्यं महत्सुखम् ५१

**50-51. Birth of a son, increase in reputation, beneficence of Goddess Lakshmi, gains of wealth from employees, attainment of the position of a Commander of an Army, friendship with the king, performance of oblations, gains of clothes and ornaments etc. will be the beneficial effects, if Ketu is a Yoga Karak and is endowed with strength. (Ketu assumes the role of a Yoga Karak, if he is conjunct with a Yoga Karak Planet (Lord of a Kendra and a Trikona)).**

भूपालमित्रं कुरुते यागाम्बरादिभूषणम्
दायेशात्षष्ठरिःफस्थे रन्ध्रे वा पापसंयुते ५२

कलहो दन्तरोगश्च चौरव्याघ्रादिपीडनम्
ज्वरातिसारकुष्ठादिदारपुत्रादिपीडनम् ५३

द्वितीयसप्तमस्थाने देहे व्याधिर्भविष्यति
अपमानमनस्तापौ धनधान्यादिप्रच्युतिम् ५४

**52-54. Effects, like quarrels, tooth trouble, distress from thieves and tigers, fever, dysentery, leprosy and distress to wife and children etc. will be experienced, if Ketu is in the 6th, the 8th, or the 12th from the Lord of the Dasha. If Ketu is in 2nd, or in 7th, there will be diseases, disgrace, agony and loss of wealth.**

कुजस्यान्तर्गते शुक्रे केन्द्रलाभत्रिकोणगे
स्वोच्चे वा स्वर्क्षगे वाऽपिशुभस्थानाधिपेऽथवा ५५

राज्यलाभो महत्सौख्यं गजाश्वाम्बरभूषणम्
लग्नाधिपेन सम्बन्धे पत्रदारादिवर्धनम् ५६

**55-56. Effects, like acquisition of a kingdom, great enjoyment and comfort of luxuries, gain of elephants, horses, clothes etc., will be derived in the Antar Dasha of Venus in the Dasha of Mars, if Venus is in a Kendra to Lagna, if Venus is in his exaltation, or in his own Rāśi, or, if Venus is Lagnas, 5ths, or 9ths Lord. If Venus is related to Lagnas Lord, there will be happiness to wife and children, opulence and glory and increased good fortune.**

आयुषो वृद्धिरैश्वर्यं भाग्यवृद्धिसुखं भवेत्
दायेशात्केन्द्रकोणस्थे लाभे वा धनगेऽपि वा ५७

तत्काले श्रियमाप्नोति पुत्रलाभं महत्सुखम्
स्वप्रभोश्च महत्सौख्यं धनवस्त्रादिलाभकृत् ५८

महाराजप्रसादेन ग्रामभूम्यादिलाभदम्
भुक्त्यन्ते फलमाप्नोति गीतनृत्यादिलाभकृत् ५९

पुण्यतीर्थस्नानलाभं कर्माधिपसमन्विते
पुण्यधर्मदयाकूपतडागं कारयिष्यति ६०

**57-60. Gain of property, celebrations on the birth of a son, gain of wealth from the employer, acquisition of a house, land, villages etc. by the beneficence of the sovereign, will be the results, if Venus is in the 5th, the 9th, the 11th, or the 2nd from the Lord of the Dasha. In the last part of the Dasha there will be functions of songs and dances and bathing in holy water. If Venus is connected with, or related to the Lord of 10th, there will be construction of wells, reservoirs etc. and performance of religious, ch6thtable and pious deeds.**

दायेशाद्रन्ध्ररिष्फस्थे षष्ठे वा पापसंयुते
करोति दुःखबाहुल्यं देहपीडां धनक्षयम् ६१

राजचौरादिभीतिश्च गृहे कलहमेव च
दारपुत्रादिपीडां च गोमहिष्यादिनाशकृत् ६२

**61-62. There will be sorrows, physical distress, loss of wealth, danger from thieves and the king, dissensions in the family, distress to wife and children and destruction of cattle, if Venus be in the 6th, the 8th, or the 12th from the Lord of the Dasha, or be associated with malefics.**

द्वितीयद्यूननाथे तु देहबाधा भविष्यति
श्वेतां गां महिषीं दद्यादायुरारोग्यवृद्धये ६३

**63. If Venus be the Lord of the 2nd, or the 7th, there will be pains in the body in his Antar Dasha. For regaining good health the remedial measure to be adopted is giving a cow, or female buffalo in ch6thty.**

कुजस्यान्तर्गते सूर्ये स्वोच्चे स्वक्षेत्रकेन्द्रगे
मूलत्रिकोणलाभे वा भाग्यकर्मेशसंयुते ६४

तद्भुक्तौ वाहनं कीर्तिं पुत्रलाभं च विन्दति
धनधान्यसमृद्धिः स्याद् गृहे कल्याणसम्पदः ६५

क्षेमारोग्यं महद्धैर्यं राजपूज्यं महत्सुखम्
व्यवसायात्फलाधिक्यं विदेशे राजदर्शनम् ६६

**64-66. Effects, like acquisition of conveyances, gain of reputation, birth of a son, growth of wealth, amicable atmosphere in the family, sound health, potency, recognition by the the king, extraordinary profits in business and audience with the king etc. will be experienced in the Antar Dasha of Sun in the Dasha of Mars, if Sun is in his exaltation, in his own Rāśi, or, if Sun is in a Kendra, in a Trikona, or in 11th along with 10ths Lord and with 11ths Lord.**

दायेशात्षष्ठरिष्फे वा व्यये वा पापसंयुते
देहपीडा मनस्तापः कार्यहानिर्महद्भयम् ६७

**67-67. Distress to the body, agony, failure in ventures, possibilities of suffering from troubles in the forehead, fever, dysentery etc. will be the effects, if Sun is in the 6th, the 8th, or the 12th from the Lord of the Dasha, or, if Sun is associated with malefics.**

शिरोरोगो ज्वरादिश्च अतिसारमथापि वा
द्वितीयद्यूननाथे तु सर्पज्वरविषाद्भयम् ६८

सुतपीडाभयं चैव शान्ति कुर्याद्यथाविधि
देहारोग्यं प्रकुरुते धनधान्यचयं तथा ६९

**68-69. There will be attacks of fever, danger from snakes and poison and distress to son, if Sun be the Lord of the 2nd, or the 7th. The remedial measure to gain good health and wealth is to perform worship of Sun in the prescribed manner.**

कुजस्यान्तर्गते चन्द्रे स्वोच्चे स्वक्षेत्रकेन्द्रगे
भार्यवाहनकर्मेशलग्नाधिपसमन्विते ७०

करोति विपुलं राज्यं गन्धमाल्याम्बरादिकम्
तडागं गोपुरादीनां पुण्यधर्मादिसंग्रहम् ७१

विवाहोत्सवकर्माणि दारपुत्रादिसौख्यकृत्
पितृमातृसुखावाप्तिं गृहे लक्ष्मीः कटाक्षकृत् ७२

महारजप्रसादेन स्वेष्टसिद्धिसुखादिकम्
पूर्णे चन्द्रे पूर्णफलं क्षीणे स्वल्पफलं भवेत् ७३

**70-73. Acquisition of more kingdom, gain of perfumes, clothes, construction of reservoirs, shelters for cows etc., celebrations of auspicious functions, like marriage etc., happiness to wife and children, good relations with parents, acquisition of property by the beneficence of the sovereign, success in the desired projects will be the effects in the Antar Dasha of Moon in the Dasha of Mars, if Moon is in her exaltation Rāśi, or in her own Rāśi, or in a Kendra, or in 9th, or in 4th, or in 10th, or in Lagna along with the Lords of those Houses. The good effects will be realized in full, if Moon is waxing. Waning Moon will reduce the impact of the effects to some extent.**

नीचारिस्थऽष्टमे षष्ठे दायेशाद्रिपुरन्ध्रके
मरणं दारपुत्राणां कष्टं भूमिविनाशनम् ७४

पशुधान्यक्षयश्चैव चौरादिरणभीतिकृत्
द्वितीयद्यूननाथे तु ह्यपमृत्युर्भविष्यति ७५

देहजाड्यं मनोदुःखं दुर्गा लक्ष्मीजपं चरेत्
श्वेतां गां महिषीं दद्यादनेनारोग्यमादिशेत् ७६

**74-76. The effects, like death, distress to wife and children, loss of lands, wealth and cattle and danger of a war etc. will be experienced, if Moon is in his debilitation Rāśi, or, if Moon is in his enemy Rāśi, or, if Moon is in 6th, in 8th, or in 12th from Lagna, or from the Lord of the Dasha. There will be the possibility of premature death, distress to the body and mental agony, if Moon is 2nds, or 7ths Lord. The remedial measures to be adopted to obtain relief from the above evil effects, are recitation of Mantras of the Goddess Durga and the Goddess Lakshmi.**

अथ रह्वन्तर्दशाफलाध्यायः ५५

कुलीरे वृश्चिके राहौ कन्यत्यां चापगेऽपि वा
तद्भुक्तो राजसम्मानं वस्त्रवाहनभूषणम् १

व्यवसायात्फलाधिक्यं चतुष्पाज्जीवलाभकृत्
प्रयाणं पश्चिमे भागे वाहनाम्बरलाभकृत् २

लग्नादुपचये राहौ शुभग्रहयुतेक्षिते
मित्रांशे तुङ्गभागांशे योगकारकसंयुते ३
राज्यलाभं महोत्साहं राजप्रीतिं शुभादहम्
करोति सुखसम्पत्तिं दारपुत्रादिवर्द्धनम् ४

## Ch. 55. Effects of the Antar Dashas in the Dasha of Rahu

**1-4. Effects, like acquisition of a kingdom, enthusiasm, cordial relations with the king, happiness from wife and children and increase in property, will be derived in the Antar Dasha of Rahu in the Dasha of Rahu, if Rahu is in Cancer, Scorpio, Virgo, or Sagittarius and is in 3rd, 6th, 10th, or 11th, or is conjunct with a Yoga Karak Planet in his exaltation Rāśi.**

लग्नाष्टमे व्यये राहौ पापयुक्तेऽथ वीक्षिते
चौरादिव्रणपीडा च सर्वत्रैवं भवेद्द्विज ५

राजद्वारजनद्वेष इष्टबन्धुविनाशनम्
दारपुत्रादिपीडा च भवत्येव न संशयः ६

**5-6. There will be danger from thieves, distress from wounds, antagonism with government officials, destruction of kinsmen, distress to wife and children, if Rahu is in 8th, or 12th, or be associated with malefics.**

द्वितीयद्यूननाथे वा सप्तमस्थानमाश्रिते
सदा रोगो महाकष्टं शान्तिं कुर्याद्यथाविधि
आरोग्यं सम्पदश्चैव भविष्यन्ति तदा द्विज ७

**7. If Rahu is 2nds, or 7ths Lord, or is in 2nd, or 7th, there will be distress and diseases. To obtain relief from the above evil effects Rahu should be worshipped (by recitation of his Mantras) and by giving in ch6thty things, connected with, or ruled by Rahu.**

राहोरन्तर्गते जीवे लग्नात्केन्द्रत्रिकोणगे
स्वोच्चे स्वक्षेत्रगे वापि तुङ्गस्वर्क्षांशगेऽपि वा ८

स्थानलाभं मनोधैर्यं शत्रुनाशं महत्सुखम्
राजप्रीतिकरं सौख्यं जनोऽतीव समश्नुते ९

दिनेदिने वृद्धिरपि सितपक्षे शशी यथा
वाहनादिधनं भूरि गृहे गोधनसंकुलम् १०

नैर्ऋत्ये पश्चिमे भागे प्रयाणं राजदर्शनम्
युक्तकार्यार्थसिद्धिः स्यात्स्वदेशे पुनरेष्यति ११

उपकारो ब्राह्मणानां तीर्थयात्रादिकर्मणाम्
वाहनग्रामलाभश्च देवब्राह्मणपूजनम् १२

**8-12. Effects, like gain of position, patience, destruction of foes, enjoyment, cordial relations with the king, regular increase in wealth and property, like the growth of Moon of the bright half of the month (Shukla Paksh), gain of conveyance and cows, audience with the king by performing journey to the West, or South-East, success in the desired ventures, return to ones homeland, doing good for Brahmins, visit to holy places, gain of a village, devotion to deities and Brahmins, happiness from wife, children and grand children, availability of sweetish preparations daily etc. will be derived in the Antar Dasha of Jupiter in the Dasha of Rahu, if Jupiter is in his exaltation, in his own Rāśi, in his own Navāmśa, or in his exalted Navāmśa, or, if Jupiter is in a Kendra, or in a Trikona with reference to Lagna.**

पुत्रोत्सवादिसन्तोषो नित्यं मिष्टान्नभोजनम्
नीचे वाऽस्तङ्गते वापि षष्ठाष्टव्ययराशिगे १३
शत्रुक्षेत्रे पापयुक्ते धनहानिर्भविष्यति
कर्मविघ्नो भवेत्तस्य मानहानिश्च जायते १४

**13-14. Loss of wealth, obstacles in work, defamation, distress to wife and children, heart disease, entrustment of governmental authority etc. will result, if Jupiter is in his debilitation Rāśi, is combust, is in 6th, 8th, or 12th, is in an enemy Rāśi, or is associated with malefics.**

कलत्रपुत्रपीडा च हृद्रोगो राजकार्यकृत्
दायेशात्केन्द्रकोणे वा लाभे वा धमगेऽपि वा १५

दुश्चिक्ये बलसम्पूर्णे गृहक्षेत्रादिवृद्धिकृत्
भोजनाम्बरपश्चादिदानधर्मजपादिकम् १६

भुक्त्यन्ते राजकोपाच्च द्विमासं देहपीडनम्
ज्येष्ठभ्रातुर्विनाशश्च मातृपित्रादिपीडनम् १७

**15-17. There will be gains of land, good food, gains of cattle etc., inclinations towards ch6thtable and religious work etc., if Jupiter is in a Kendra, in a Trikona, the 11th, the 2nd, or the 3rd from the Lord of the Dasha and is endowed with strength.**

दायेशात्षष्ठरन्ध्रे वा रिःफे वा पापसंयुते
तद्भुक्तौ धनहानिः स्याद्देहपीडा भविष्यति १८

द्वितीयद्यूननाथे वा ह्यपमृत्युर्भविष्यति
स्वर्णस्य प्रतिमादानं शिवपूजं च कारयेत् १९

स्त्रीशम्भोश्च प्रसादेन ग्रहस्तुष्टो द्विजोत्तम
देहारोग्यं प्रकुरुते शान्तिं कुर्याद्विचक्षणः २०

**18-20. Loss of wealth and distress to body will result, if Jupiter is in the 6th, the 8th, or the 12th from the Lord of the Dasha, or, if Jupiter is associated with malefics. There will be danger of premature death, if Jupiter is 2nds, or 7ths Lord. The person will get relief from the above evil effects and enjoy good health by the beneficence of the Lord Shiva, if he worships his idol, made of gold.**

राहोरन्तर्गते मन्दे लग्नात्केन्द्रत्रिकोणगे
स्वोच्चे मूलत्रिकोणे वा दुश्चिक्ये लाभराशिगे २१

तद्भुक्तौ नृपतेः सेवा राजप्रीतिकरी शुभा
विवाहोत्सवकार्याणि कृत्वा पुण्यानि भूरिशः २२

आरामकरणे युक्तो तडागं कारयिष्यति
शूद्रप्रभुवशादिष्टलाभो गोधनसंग्रहः २३

प्रयाणं पश्चिमे भागे प्रभुमूलाद्धनक्षयः
देहालस्यं फलाल्पत्वं स्वदेशे पुनरेष्यति २४

**21-24. Effects, like pleasure of the king for devotion in his service, auspicious functions, like celebration of marriage etc. at home, construction of a garden, reservoir etc., gain of wealth and cattle from well-to-do persons, belonging to the Sudra class, loss of wealth caused by the king during journey to the West, reduction in income, due to lethargy, return to homeland, will be derived in the Antar Dasha of Saturn in the Dasha of Rahu, if Saturn is in a Kendra, in a Trikona, in his exaltation, in his own Rāśi, in his MulaTrikonaa, in 3rd, or in 11th.**

नीचारिक्षेत्रगे मन्दे रन्ध्रे वा व्ययगेऽपि वा
नीचारिराजभीतिश्च दारपुत्रादिपीडनम् २५

आत्मबन्धुमनस्तापं दायादजनविग्रहम्
व्यवहारे च कलहमकस्माद्भूषणं लभेत् २६

**25-26. Danger from menials, the king and enemies, distress to wife and children, distress to kinsmen, disputes with the coparceners, disputes in dealings with others, but sudden gain of ornaments, will result, if Saturn is in his debilitation Rāśi, in his enemy Rāśi, or in 8th, or 12th.**

दायेशात्षष्ठरिष्फे वा रन्ध्रे वा पापसंयुते
हृद्रोगो मानहानिश्च विवादः शत्रुपीडनम् २७

अन्यदेशादिसञ्चारो गुल्मवद्व्याधिभाग्भवेत्
कुभोजनं कोद्रवादि जातिदुःखाद्भयं भवेत् २८

द्वितीयद्यूननाथे तु ह्यपमृत्युर्भविष्यति
कृष्णां गां महिषीं दद्याद्दानेमारोग्यमादिशेत् २९

**27-29. There will be heart disease, defamation, quarrels, danger from enemies, foreign journeys, affliction with Gulma, unpalatable food and sorrows etc., if Saturn is in the 6th, the 8th, or the 12th from the Lord of the Dasha. Premature death is likely, if Saturn is 2nds, or 7ths Lord. Remedial measure to obtain relief from the above evil effects and to regain good health is giving a black cow, or a she-buffalo in ch6thty.**

राहोरन्तर्गते सौम्ये भाग्ये वा स्वर्क्षगेऽपि वा
तुङ्गे वा केन्द्रराशिस्थे पुत्रे वा बलगेऽपि वा ३०

राजयोगं प्रकुरुते गृहे कल्याणवर्द्धनम्
व्यापारेण धनप्राप्तिविद्यावाहनमुत्तमम् ३१

विवाहोत्सवकार्याणि चतुष्पाज्जीवलाभकृत्
सौम्यमासे महत्सौख्यं स्ववारे राजदर्शनम् ३२

सुगन्धपुष्पशय्यादि स्त्रीसौख्यं चातिशोभनम्
महाराजप्रसादेन धनलाभो महद्यशः ३३

**30-33. Auspicious effects, like Raja Yoga, well being in the family, profits and gain of wealth in business, comforts of conveyances, marriage and other auspicious functions, increase in the number of cattle, gain of perfumes, comforts of bed, women etc., will be derived in the Antar Dasha of Mercury in the Dasha of Rahu, if Mercury is in his exaltation Rāśi, in a Kendra, or in 5th and, if Mercury is endowed with strength. Good results, like Raja Yoga, beneficence of the king and gain of wealth and reputation, will be realized particularly on Wednesday in the month of Mercury.**

दायेशात्केन्द्रलाभे वा दुश्चिक्ये भाग्यकर्मगे
देहारोग्यं हृदुत्साह इष्टसिद्धिः सुखावहा ३४
पुण्यश्लोकादिकीर्तिश्च पुराणश्रवणादिकम्
विवाहो यज्ञदीक्षा च दानधर्मदयादिकम् ३५

**34-35. Sound health, Isht Siddhi, attending discourse on Puranas and ancient history, marriage, offering of oblations, charities, religious inclination and sympathetic attitude towards others will result, if Mercury is in a Kendra, in the 11th, 3rd, 9th, or 10th from the Lord of the Dasha.**

षष्ठाष्टमव्यये सौम्ये मन्देनापि युतेक्षिते
दायेशात्षष्ठरिःफे वा रन्ध्रे वा पापसंयुते ३६

देवब्राह्मणनिन्दा च भोगभाग्यविवर्जितः
सत्यहीनश्च दुर्बुद्धिश्चौराहिनृपपीडनम् ३७

अकस्मात्कलहश्चैव गुरुपुत्रादिनाशनम्
अर्थव्ययो राजकोपो दारपुत्रादिपीडनम् ३८

**36-38. There will be opprobrium (Ninda) of deities and Brahmins by the native, loss of fortune, speaking lies, unwise actions, fear from snakes, thieves and the government, quarrels, distress to wife and children etc., if Mercury is in 6th, 8th, or 12th, or, if Mercury receives a Aspect from Saturn.**

द्वितीयद्यूननाथे वा ह्यपमृत्युभयं वदेत्
तद्दोषपरिहारार्थं विष्णुसाहस्रकं जपेत् ३९

**39. If Mercury is 2nds, or 7ths Lord, there will be fear of premature death. Remedial measure to obtain relief from the above evil effects is recitation of Vishnu Sahasranam.**

राहोरन्तर्गते केतौ भ्रमणं राजतो भयम्
वातज्वरादिरोगश्च चतुष्पाज्जीवहानिकृत् ४०

अष्टमाधिसंयुक्ते देहजाड्यं मनोव्यथा
शुभयुक्ते शुभैर्दृष्टे देहसौख्यं धनागमः
राजसम्मानभूषाप्तिर्गृहे शुभकरो भवेत् ४१

**40-41. During the Antar Dasha of Ketu in the Dasha of Rahu there will be journeys to foreign countries, danger from the king, rheumatic fever etc. and loss of cattle. If Ketu is conjunct with 8ths Lord, there will be distress to the body and mental tension. Enjoyment, gain of wealth, recognition by the king, acquisition of gold etc. will be the results, if Ketu is associated with, or receives a Aspect from benefics.**

लग्नाधिपेन सम्बन्धे इष्टसिद्धिः सुखावहा
लग्नाधिपसमायुक्ते लाभो वा भवति ध्रुवम् ४२

**42-42. There will be Isht Siddhi, if Ketu is related to the Lord of Lagna. If he is associated with the Lord of Lagna, there will definitely be gain of wealth. There will also definitely be increase in the number of cattle, if Ketu is in a Kendra, or in a Trikona.**

चतुष्पाज्जीवलाभः स्यात्केन्द्रे वाथ त्रिकोणगे
रन्ध्रस्थानगते केतौ व्यये वा बलवर्जिते ४३

तद्भुक्तौ बहुरोगः स्याच्चोराहिव्रणपीडनम्
पितृमातृवियोगश्च भ्रातृद्वेषो मनोरुजा ४४

द्वितीयद्यूननाथे तु देहबाधा भविष्यति
तद्दोषपरिहारार्थं छागदानं च कारयेत् ४५

**43-45. Effects, like danger from thieves and snakes, distress from wounds, separation from parents, antagonistic relations with kinsmen, mental agony etc. will be derived, if Ketu is without strength in 8th, or 12th. If Ketu is 2nds, or 7ths Lord, there will be distress to the body. The remedial measure to obtain relief from the above evil effects is giving a goat in ch6thty.**

राहोरन्तर्गते शुक्रे लग्नात्केन्द्रगत्रिकोणगे
लाभे वा बलसंयुक्ते योगप्राबल्यमादिशेत् ४६

विप्रमूलाद्धनप्राप्तिर्गोमहिष्यादिलाभकृत्
पुत्रोत्सवादिसन्तोषो गृहे कल्याणसम्भवः ४७

**46-47. Effects, like gains of wealth through Brahmins, increase in the number of cattle, celebrations for the birth of a son, well-being, recognition from government, acquisition of a kingdom, attainment of a high position in government, great enjoyment and comforts etc. will be experienced in the Antar Dasha of Venus in the Dasha of Rahu, if Venus is with strength in a Kendra, in a Trikona, or in 11th.**

सम्मानं राजसम्मनं राज्यलाभो महत्सुखम्
स्वोच्चे वा स्वर्क्षगे वापि तुङ्गांशे स्वांशगेऽपि वा ४८

नूतनं गृहनिर्माणं नित्यं मिष्ठान्नभोजनम्
कलत्रपुत्रविभवं मित्रसंगः सुभोजनम् ४९

अन्नदानं प्रियं नित्यं दानधर्मादिसंग्रहः
महाराजप्रसादेन वाहनाम्बरभूषणम् ५०

**48-50. Construction of a new house, availability of sweet preparations, happiness from wife and children, association with friends, giving of grains etc. in ch6thty, beneficence of the king, gain of conveyances and clothes, extraordinary profits in business, celebration of Upasayan ceremony of we6thng the sacred thread (Janou) etc. will be the auspicious results, if Venus be in his exaltation, in his own Rāśi, in is exalted, or in his own Navāmśa.**

व्यवसायात्फलाधिक्यं विवाहो मौञ्जिबन्धनम्
षष्ठाष्टमव्यये शुक्रे नीचे शत्रुगृहे स्थिते ५१

मन्दारफणिसंयुक्ते तद्भुक्तौ रोगमादिशेत्
अकस्मात्कलहं चैव पितृपुत्रवियोगकृत् ५२

स्वबन्धुजनहानिश्च सर्वत्र जनपीडनम्
दायादकलहश्चैव स्वप्रभोः स्वस्य मृत्युकृत् ५३

**51-53. There will be diseases, quarrels, separation from ones son, or father, distress to kinsmen, disputes with coparceners, danger of death to oneself, or to ones employer, unhappiness to wife and children, pain in the stomach etc., if Venus is in 6th, 8th, or 12th, in his debilitation, or in an enemy Rāśi, or, if Venus is associated with Saturn, Mars, or Rahu.**

कलत्रपुत्रपीडा च शूलरोगादिसम्भवः
दायेशात्केन्द्रराशिस्थे त्रिकोणे वा समन्विते ५४

लाभे वा कर्मराशिस्थे क्षेत्रपालमहत्सुखम्
सुगन्धवस्त्रशय्यादि गानवाद्यसुखं भवेत् ५५

**54-55, Enjoyments from perfumes, bed, music etc., gain of a desired object, fulfillment of desires will be the results, if Venus is in a Kendra, in a Trikona, in the 11th, or in the 10th from the Lord of the Dasha.**

छत्रचामरभूषाप्तिः प्रियवस्तुसमन्विता
दायेशाद्रिपुरन्ध्रस्थे व्यये वा पापसंयुते ५६

विप्राहिनृपचौरादिमूत्रकृच्छ्रान्महद्भयम्
प्रमेहाद्रौधिरो रोगः कुत्सितान्नं शिरोव्यथा ५७

कारागृहप्रवेशश्च राजदण्डाद्धनक्षयः
द्वितीयद्यूननाथे वा दारपुत्रादिनाशनम् ५८

आत्मपीडा भयं चैव ह्यपमृत्युभयं भवेत्
दुर्गालक्ष्मीजपं कुर्यात् ततःसुखमवाप्नुयात् ५९

**56-59. Effects, like danger from the wrath of Brahmins, snakes and the king, possibility of affliction with diseases, like stoppage of urine, diabetes, pollution of blood, anaemia, availability of only coarse food, nervous disorder, imprisonment, loss of wealth, as a result of penalties, or fines, imposed by government, will be derived, if Venus is associated with malefics in the 6th, 8th, or 12th from the Lord of the Dasha. There will be distress to wife and children, danger of premature death to oneself, if Venus is 2nds, or 7ths Lord. Remedial measures to obtain relief from the above evil effects are worship of Goddess Durga and Goddess Lakshmi.**

राहोरन्तर्गते सूर्ये स्वोच्चे स्वक्षेत्रकेन्द्रगे
त्रिकोणे लाभगे वाऽपि तुङ्गांशे स्वांशगेऽपि वा ६०

शुभग्रहेण सन्दृष्टे राजप्रीतिकरं शुभम्
धनधान्यसमृद्धिश्च ह्यल्पमान सुखवाहम् ६१

**60-61. Effects, like cordial relations with the king, increase in wealth and grains, some popul6thty/respect, some possibility of becoming head of a village etc., will be experienced in the Antar Dasha of Sun in the Dasha of Rahu, if Sun is in his exaltation, in his own Rāśi, in 11th, in a Kendra, or in a Trikona, or in his exalted, or own Navāmśa.**

अल्पग्रामाधिपत्यं च स्वल्पलाभो भविष्यति
भाग्यलग्नेशसंयुक्ते कर्मेशेन निरीक्षिते ६२

राजाश्रयो महाकीर्तिर्विदेशगमनं तथा
देशाधिपत्ययोगश्च गजाश्वाम्बरभूषणम् ६३

**62-63. There will be good reputation and encouragement and assistance by government, journeys to foreign countries, acquisition of the sovereignty of the country, gains of elephants, horses, clothes, ornaments, fulfillment of ambitions, happiness to children etc., if Sun is associated with, or receives a Aspect from Lagnas, 2nds, or 10ths Lord.**

मनोऽभीष्टप्रदानं च पुत्रकल्याणसम्भवम्
दयेशाद्रिःफरन्ध्रस्थे षष्ठे वा नीचगेऽपि वा ६४

ज्वरातिसाररोगश्च कलहो राजविग्रहः
प्रयाणं शत्रुवृद्धिश्च न्रिपचौराग्निपीडनम् ६५

**64-65. Fevers, dysentery, other diseases, quarrels, antagonism with the king, travels, danger from foes, thieves, fire etc. will be the results, if Sun is in his debilitation Rāśi, or, if Sun is in the 6th, 8th, or 12th from the Lord of the Dasha.**

दायेशात्केन्द्रकोणे वा दुश्चिक्ये लाभगेऽपि वा
विदेशे राजसम्मानं कल्याणं च शुभावहम् ६६

**66. Well-being in every way and recognition from kings in foreign countries will be the results, if Sun is in a Kendra, in a Trikona, in the 3rd, or in the 11th from the Lord of the Dasha.**

द्वितीयद्यूननाथे तु महारोगो भविष्यति
सूर्यप्रणामं शान्तिं च कुर्यादारोग्यसम्भवाम् ६७

**67. There will be danger of critical illness, if Sun is 2nds, or 7ths Lord. Worship of Sun is the remedial measure, recommended to obtain relief from the above evil effects.**

राहोरन्तर्गते चन्द्रे स्वक्षेत्रे स्वोच्चगेऽपि वा
केन्द्रत्रिकोणलाभे वा मित्रर्क्षे शुभसंयुते ६८

राजत्वं राजपूज्यत्वं धनार्थं धनलाभकृत्
आरोग्यं भूषणं चैव मित्रस्त्रीपुत्रसम्पदः ६९

पूर्णे चन्द्रे फलं पूर्णं राजप्रीत्या शुभावहम्
अश्ववाहनलाभः स्याद्गृहक्षेत्रादिवृद्धिकृत् ७०

**68-70. Effects, like acquisition of a kingdom, respect from the king, gains of wealth, sound health, gains of garments and ornaments, happiness from children, comforts of conveyances, increase in house and landed property etc., will be derived in the Antar Dasha of Moon in the Dasha of Rahu, if Moon is in his exaltation, in his own Rāśi, in a Kendra, Trikona, or in 11th, or, if Moon is in a friendly Rāśi, receiving a Aspect from benefics.**

दायेशात्सुखभाग्यस्थे केन्द्रे वा लाभगेऽपि वा
लक्ष्मीकटाक्षचिह्नानि गृहे कल्याणसम्भवः ७१

सर्वकार्यसिद्धिः स्याद्धनधान्यसुखावहा
सत्कीर्तिलाभसम्मानं देव्याराधनमाचरेत् ७२

**71-72. Beneficence of the Goddess Lakshmi, all-round success, increase in wealth and grains, good reputation and worship of deities will be the results, if Moon is in the 5th, 9th, in a Kendra, or in the 11th from the Lord of the Dasha.**

दायेशात्षष्ठरन्ध्रस्थे व्यये वा बलवर्जिते
पिशाचक्षुद्रव्याघ्राद्यैर्गृहक्षेत्रार्थनाशनम् ७३

मार्गे चौरभयं चैव व्रणाधिक्य महोदयम्
द्वितीयद्यूननाथे तु अपमृत्युस्तदा भवेत् ७४

श्वेतां गां महिषीं दद्याद् विप्रायारोग्यसिद्धये
ततः सौख्यमवाप्नोति चन्द्रग्रहप्रसादतः ७५

**73-75. There will be the creation of disturbances at home and in the agricultural activities by evil spirits, leopards and other wild animals, danger from thieves during journeys and stomach disorders, if Moon is bereft of strength in the 6th, 8th, or 12th from the Lord of the Dasha. There will the possibility of premature death, if Moon is 2nds, or 12ths Lord. The remedial measure to obtain relief from the above evil effects is to give in ch6thty a white cow, or a female buffalo.**

राहोरन्तर्गते भौमे लग्नाल्लाभत्रिकोणगे
केन्द्रे वा शुभसंयुक्ते स्वोच्चे स्वक्षेत्रगेऽपि वा ७६

नष्टराज्यधनप्राप्तिर्गृहक्षेत्राभिवृद्धिकृत्
इष्टदेवप्रसादेन सन्तानसुखभाग्भवेत् ७७

**76-77. Effects, like the recovery of a lost kingdom and recovery of lost wealth, property at home and increase in agricultural production, gain of wealth, blessings by the household deity (Isht Dev), happiness from children, enjoyment of good food etc., will be derived in the Antar Dasha of Mars in the Dasha of Rahu, if Mars is in 11th, 5th, or 9th, or, if Mars is in a Kendra, if Marsreceives a Aspect from benefics, or, if Mars is in his exaltation, or in his own Rāśi.**

च्चिप्रभोज्यान्महत्सौख्यं भूषणाश्वाम्बरादिकृत्
दायेशात्केन्द्रकोणे वा दुश्चिक्ये लाभगेऽपि वा ७८

रक्तवस्त्रादिलाभः स्यात्प्रयाणं राजदर्शनम्
पुत्रवर्गेषु कल्याणं स्वप्रभोश्च महत्सुखम् ७९

**78-79. There will be acquisition of red-coloured garments, journeys, audience with the king, well-being of children and employer, attainment of the position of a Commander of the Army, enthusiasm and gain of wealth through kinsmen, if Mars is in a Kendra, in the 5th, 9th, 3rd, or in the 11th from the Lord of the Dasha.**

सेनापत्यं महोत्साहो भ्रातृवर्गधनागमः
दायेशाद्रन्ध्ररिःफे वा षष्ठे पापसमन्विते ८०

पुत्रदारादिहानिश्च सोदराणां च पीडनम्
स्थानभ्रंशो बन्धुवर्गदारपुत्रविरोधनम् ८१

चौराहिव्रणभीतिश्च स्वदेहस्य च पीडनम्
आदौ क्लेशकरं चैव मध्यान्ते सौख्यमाप्नुयात् ८२

**80-82. Distress to wife, children and co-borns, loss of position, antagonistic relations with children, wife and other close relations, danger from thieves, wounds and pain in the body etc. will result, if Mars is in the 6th, 8th, or 12th from the Lord of the Dasha, receiving a Aspect from malefics.**

द्वितीयद्यूननाथे तु देहालस्यं महद्भयम्
अनड्वाहं च गां दद्यादारोग्यसुखलब्धये ८३

**83. There will be lethargy and danger of death, if Mars is 2nds, or 7ths Lord. The remedial measure to obtain relief from the above evil effects is giving a cow, or a bull in ch6thty.**

अथ जीवान्तर्दशाफलाध्यायः ५६
स्वोच्चे स्वक्षेत्रगे जीवे लग्नात्केन्द्रत्रिकोणगे
अनेकराजाधीशो वा सम्पन्नो राजपूजितः १

गोमहिष्यादिलाभश्च वस्त्रवाहनभूषणम्
नूतनस्थाननिर्माणं हर्म्यप्राकारसंयुतम् २

गजान्तैश्वर्यसम्पत्तिर्भाग्यकर्मफलोदयः
ब्राह्मणप्रभुसम्मानं समानं प्रभुदर्शनम् ३

## Ch. 56. Effects of the Antar Dashas in the Dasha of Jupiter

**1-3. Effects, like sovereignty over many kings, very well endowed with riches, revered by the king, gains of cattle, clothes, ornaments, conveyances, construction of a new house and a decent mansion, opulence and glory, dawn of fortune, success in ventures, meetings with Brahmins and the king, extraordinary profits from the employer and happiness to wife and children, will be experienced in the Antar Dasha of Jupiter in his own Dasha, if Jupiter is in his exaltation Rāśi, in his own Rāśi, in a Kendra, or Trikona.**

स्वप्रभोः स्वफलाधिक्य दारपुत्रादिलाभकृत्
नीचांशे नीचराशिस्थे षष्ठाष्टमव्ययराशिगे ४

नीचसङ्गो महादुःखं दायादजनविग्रहः
कलहो न विचारोस्य स्वप्रभुष्वपमृत्युकृत् ५

**4-5. Association with the menials, great distress, slander by coparceners, wrath of the employer, danger of premature death, separation from wife and children and loss of wealth and grains will be the results, if Jupiter is in his debilitation Rāśi, in his debilitated Navāmśa, or in 6th, 8th, or 12th.**

पुत्रदारवियोगश्च धनधान्यार्थहानिकृत्
सप्तमाधिपदोषेण देववाधा भविष्यति ६

तद्दोषपरिहारार्थं शिवसाहस्त्रकं जपेत्
रुद्रजाप्यं च गोदानं कुर्यात् स्वाऽभीष्टलब्धये ७

**6-7. There will be pains in the body, if Jupiter is the Lord of 7th (or of 2nd). The remedial measure to obtain relief from the above evil effects and to get fulfillment of ambitions is recitation of Rudr Japa and Shiva Sahasranam.**

जीवस्यान्तर्गते मन्दे स्वोच्चे स्वक्षेत्रमित्रभे
लग्नात्केन्द्रत्रिकोणस्थे लाभे वा बलसंयुते ८

राज्यलाभो महत्सौख्यं वस्त्राभरणसंयुतम्
धनधान्यादिलाभश्च स्त्रीलाभो बहुसौख्यकृत् ९

वाहनाम्बरपश्वादिभूलाभः स्थानलाभकृत्
पुत्रमित्रादिसौख्यं च नरवाहनयोगकृत् १०

नीलवस्त्रादिलाभश्च नीलाश्वं लभते च सः
पश्चिमां दिशमाश्रित्य प्रयाणं राजदर्शनम् ११

**8-11. Effects, like acquisition of a kingdom, gain of clothes, ornaments, wealth, grains, conveyances, cattle and position, happiness from son and friends etc., gains specially of a blue-coloured horse, journey to the West, audience with the king and receipt of wealth from him, will be derived in the Antar Dasha of Saturn in the Dasha of Jupiter, if Saturn is in his exaltation, in his own Rāśi, in a Kendra, or Trikona endowed with strength.**

अनेकयानलाभं च निर्दिशेन्मन्दभुक्तिषु
लग्नात्षष्ठाष्टमे मन्दे व्यये नीचेऽस्तगेऽप्यरौ १२

धनधान्यादिनाशश्च ज्वरपीडा मनोरुजः
स्त्रीपुत्रादिषु पीडा वाव्रणार्त्यादिकमुद्भवेत् १३

गृहे त्वशुभकार्याणि भृत्यवर्गादिपीडनम्
गोमहिष्यादिहानिश्च बन्धुद्वेषी भविष्यति १४

**12-14. Loss of wealth, affliction with fever, mental agony, infliction of wounds to wife and children, inauspicious events at home, loss of cattle and employment, antagonism with kinsmen etc. will be results, if Saturn is in 6th, 8th, or 12th, if Saturn is combust, or, if Saturn is in an enemy Rāśi.**

दायेशात्केन्द्रकोणस्थे लाभे वा धनगेऽपि वा
भूलाभश्चार्थलाभश्च पुत्रलाभसुखं भवेत् १५

**15-15. There will be gain of land, house, son and cattle, acquisition of riches and property through the enemy etc., if Saturn is in Kendra, Trikona, the 11th, or in the 2nd from the Lord of the Dasha.**

गोमहिष्यादिलाभश्च शूद्रमूलाद्धनं तथा
दायेशाद्रिपुरन्ध्रस्थे व्यये वा पापसंयुते १६

धनधान्यादिनाशश्च बन्धुमित्रविरोधकृत्
उद्योगभङ्गो देहार्तिः स्वजनानां महद्भयम् १७

**16-17. Effects, like loss of wealth, antagonistic relations with kinsmen, obstacles in industrial ventures, pains in the body, danger from the members of the family etc. will be realized, if Saturn is in the 6th, 8th, or 12th from the Lord of the Dasha, or, if Saturn is associated with a malefic.**

द्विसप्तमाधिपे मन्दे ह्यपमृत्युर्भविष्यति
तद्दोषपरिहारार्थं विष्णुसाहस्रकं जपेत् १८

कृष्णां गां महिषीं दद्यादनेनारोग्यमादिशेत्
मन्दग्रहप्रसादेन सत्यं सत्यं द्विजोत्तम १९

**18-19. There will be fear of premature death, if Saturn is 2nds, or 7ths Lord. The remedial measures to obtain relief from these evil effects and to enjoy sound health are recitation of Vishnu Sahasranam and giving in ch6thty a black cow, or a female buffalo.**

जीवस्यान्तर्गते सौम्ये केन्द्रलाभत्रिकोणगे
स्वोच्चे वा स्वर्क्षगे वापि दशाधिपसमन्विते २०

अर्थलाभो देहसौख्यं राज्यलाभो महत्सुखम्
महाराजप्रसादेन स्वेष्टसिद्धिः सुखावहा २१

**20-21. Effects, like gains of wealth, bodily felicity, acquisition of a kingdom, gain of conveyances, clothes and cattle etc., will be derived in the Antar Dasha of Mercury in the Dasha of Jupiter, if Mercury is in his exaltation, in his own Rāśi, or in Kendra, in Trikona, or, if Mercury is associated with the Lord of the Dasha.**

वाहनाम्बरपश्वादिगोधनैस्संकुलं गृहम्
महीसुतेन संदृष्टे शत्रुवृद्धिः सुखक्षयः २२

**22-22. There will be increase in the number of enemies, loss of enjoyment and comforts, loss in business, affliction with fever and dysentery, if Mercury receives a Aspect from Mars.**

व्यवसायात्फलं नेष्टं ज्वरातीसारपीडनम्
दायेशाद्भाग्यकोणे वा केन्द्रे वा तुङ्गराशिगे २३

स्वदेशे धनलाभश्च पितृमातृसुखावहा
गजवाजिसमायुक्तो राजमित्रप्रसादतः २४

**23-24 Gains of wealth in his own country, happiness from parents and acquisition of conveyances by the beneficence of the king will result, if Mercury is in a Kendra, in the 5th, or 9th from the Lord of the Dasha, or, if Mercury is in his exaltation Rāśi.**

दायेशात्षष्ठरन्ध्रस्थे व्यये वा पापसंयुते
शुभदृष्टिविहीने च धन्धान्यपरिच्युतिः २५

विदेशगमनं चैव मार्गे चौरभयं तथा
व्रणदाहाक्षिरोगश्च नानादेशपरिभ्रमः २६

**25-26. There will be loss of wealth, journeys to foreign countries, danger from thieves while traveling, wounds, burning sensations, eye troubles, wanderings in foreign lands, if Mercury is in the 6th, 8th, or 12th from the Lord of the Dasha, or, if Mercury is associated with a malefic without receiving a Aspect from a benefic.**

लग्नात्षष्ठाष्टमभावे वा व्यये वा पापसंयुते
अक्समात्कलहश्चैव गृहे मिष्ठुरभावणम् २७

चतुष्पाज्जीवहानिश्च व्यवहारे तथैव च
अपमृत्युभयं चैव शत्रूणां कलहो भवेत् २८

**27-28. Distress without reason, anger, loss of cattle, loss in business, fear of premature death etc. will be the results, if Mercury be associated with a malefic, or malefics in 6th, in 8th, or in 12th.**

शुभदृष्टे शुभैर्युक्ते दारसौख्यं धनागमः
आदौ शुभं देहसौख्यं वाहनाम्बरलाभकृत् २९

**29-29. There will be enjoyment, gains of wealth, conveyances and clothes at the commencement of the Antar Dasha, even if Mercury is associated with a malefic, but receives a Aspect from a benefic. At the end of the Dasha, however, there will be loss of wealth and bodily distress.**

अन्ते तु धनहानिश्चेत्स्वात्मसौख्यं न जायते
द्वितीयद्यूननाथे वा ह्यपमृत्युर्भविष्यति ३०

तद्दोषपरिहारार्थं विष्णुसाहस्रकं जपेत्
आयुर्वृद्धिकरं चैव सर्वसौभाग्यदायकम् ३१

**30-31. Premature death may be expected, if Mercury is 2nds, or 7ths Lord. The most effective and beneficial remedial measure for prolongation of longevity and to obtain relief from other evil effects is recitation of Vishnu Sahasranam.**

जीवस्यान्तर्गते केतौ शुभग्रहसमन्विते
अल्पसौख्यधनाव्याप्तिः कुत्सितान्नस्य भोजनम् ३२

**32-32. Moderate enjoyment, moderate gain of wealth, coarse food, or food, given by others, food, given at the time of death ceremonies and acquisition of wealth through undesirable means will be the results, in the Antar Dasha of Ketu in the Dasha of Jupiter, if Ketu is associated with, or receives a Aspect from a benefic.**

परान्नं चैव श्राद्धान्नं पापमूलाद्धनानि च
दायेशाद्रिपुरन्ध्रस्थे व्यये वा पापसंयुते ३३

राजकोपो धनच्छेदो बन्धनं रोगपीडनम्
बलहानिः पितृद्वेषो भ्रातृद्वेषो मनोरुजः ३४

**33-34. Effects, like loss of wealth by the wrath of the king, imprisonment, diseases, loss of physical strength, antagonism with father and brother and mental agony, will be experienced, if Ketu be in the 6th, 8th, or 12th from the Lord of the Dasha, or be associated with malefics.**

दायेशात्सुतभाग्यस्थे वाहने कर्मगेऽपि वा
नरवाहनयोगश्च गजाश्वाम्बरसङ्कुलम् ३५

महाराजप्रसादेन स्वेष्टकार्यार्थलाभकृत्
व्यवसायात्फलाधिक्यं गोमहिष्यादिलाभकृत् ३६

**35-36. Acquisition of a palanquin, elephants etc., beneficence of the king, success in the desired spheres, profits in business, increase in the number of cattle, gain of wealth, clothes etc. from a Yavana king (Muslim dignitary) will be the auspicious effects, if Ketu is in the 5th, 9th, 4th, or 10th from the Lord of the Dasha.**

यवनप्रभुमूलाद्वा धनवस्त्रादिलाभकृत्
द्वितीयद्यूननाथे तु देहवाधा भविष्यति ३७

छागदानं प्रकुर्वीत मृत्युञ्जयजपं चरेत्
सर्वदोषोपशमनीं शान्तिं कुर्याद्विधानतः ३८

**37-38. There will be physical distress, if Ketu is 2nds, or 7ths Lord (or, if Ketu is in 2nd, or in 7th. The remedial measure to obtain relief from the above evil effects is performance of Mrityunjaya Japa in the prescribed manner.**

जीवस्यान्तर्गते शुक्रे भाग्यकेन्द्रेशसंयुते
लाभे वा सुतराशिस्थे स्वक्षेत्रे शुभसंयुते ३९

नरवाहनयोगश्च गजाश्वाम्बरसंयुतः
महाराजप्रसादेन लाभाधिक्यं महत्सुखम्
नीलाम्बराणां रक्तानां लाभश्चैव भविष्यति ४०

पूर्वस्यां दिशि विप्रेन्द्र प्रयाणं धनलाभदम्
कल्याणं च महाप्रीतिः पितृमातृसुखावहा ४१

देवतागुरुभक्तिश्च अन्नदानं महत्तथा
तडागगोपुरादीनि दिशेत् पुण्यानि भूरिशः ४२

षष्ठाष्टमव्यये नीचे दायेशाद्वा तथैव च
कलहो बन्धुवैषम्यं दारपुत्रादिपीडनम् ४३

**39-43. Effects, like acquisition of conveyances, like palanquin, elephants etc., gain of wealth by the beneficence of the king, enjoyment, gain of blue and red articles, extraordinary income from journeys to the East, well-being in the family, happiness from parents, devotion to deities, construction of reservoirs, charities etc., will be derived in the Antar Dasha of Venus, if Venus is in a Kendra, Trikona, or in 11th, or, if Venus is in his own Rāśi and receives a Aspect from a benefic, or from benefics.**

मन्दारराहुसंयुक्ते कलहो राजतो भयम्
स्त्रीमूलात्कलहश्चैव श्वसुरात्कलहस्तथा ४४

**44-44. Evil effects, like quarrels, antagonism with kinsmen, distress to wife and children, will be felt, if Venus is in the 6th, 8th, or 12th from the Lord of the Dasha, or Lagna, or, if Venus is in his debilitation Rāśi.**
**There will be quarrels, danger from the king, antagonism with the wife, disputes with the father-in-law and with brothers, loss of wealth etc., if Venus is associated with Saturn, or Rahu, or with both.**

सोदरेण विवादः स्याद्धनधान्यपरिच्युतिः
दायेशात्केन्द्रराशिस्थे धने वा भाग्यगेऽपि वा ४५

धनधान्यादिलाभश्च श्रीलाभो राजदर्शनम् ४६

वाहनं पुत्रलाभश्च पशुवृद्धिर्महत्सुखम्
गीतावाद्यप्रसङ्गादिर्विद्वज्जनसमागमः ४७

**45-47. There will be gain of wealth, happiness from wife, meeting with the king, increase in the number of children, conveyances and cattle, enjoyment of music, society with men of learning, availability of sweetish preparations, giving help and assistance to kinsmen etc., if Venus is in a Kendra, Trikona, or in the 2nd from the Lord of the Dasha.**

दिव्यान्नभोजनं सौख्यं स्वबन्धुजनपोषकम्
द्विसप्तमाधिपे शुक्रे तद्दशायां धनक्षतिः ४८

अपमृत्युभयं तस्य स्त्रीमूलादौषधादितः
तस्य रोगस्य शान्त्यर्थं शान्तिकर्म समाचरेत् ४९

श्वेतां गां महिषीं दद्यादायुरारोग्यवृद्धये
शुक्रग्रहप्रसादेन ततः सुखमवाप्नुयात् ५०

**48-50. Loss of wealth, fear of premature death, antagonism with wife etc. will be experienced, if Venus is 2nds, or 7ths Lord. The remedial measure to obtain relief from these evil effects is giving a tawny-coloured cow, or a female buffalo in ch6thty.**

जीवस्यान्तर्गते सूर्ये स्वोच्चे स्वक्षेत्रगेऽपि वा
केन्द्रे वाऽथत्रिकोणे च दुश्चिक्ये लाभगेऽपि वा ५१

धने वा बलसंयुते दायेशाद्वा तथैव च
तत्काले धनलाभः स्याद्राजसम्मानवैभवम् ५२

वाहनाम्बरपश्वादिभूषणं पुत्रसम्भवः
मित्रप्रभुवशादिष्टं सर्वकार्ये शुभावहम् ५३

**51-53. Gain of wealth, reverence, happiness and acquisition of conveyances, clothes, ornaments etc., birth of children, cordial relations with the king, success in ventures etc. will be the auspicious results in the Antar Dasha of Sun in the Dasha of Jupiter, if Sun is in his exaltation, in his own Rāśi, in a Kendra, Trikona, or in 3rd, 11th, or 2nd and be endowed with strength.**

लग्नादष्टमव्यये सूर्ये दायेशाद्वा तथैव च
शिरोरोगादिपीडा च ज्वरपीडा तथैव च ५४

सत्कर्मसु तदा हीनः पापकर्मचयस्तथा
सर्वत्र जनविद्वेषो ह्यात्मबन्धुवियोगकृत् ५५

**54-55. Effects, like nervous disorder, fever, laziness, or reluctance in the performance of good deeds, indulgence in sins, antagonistic attitude towards all, separation from kinsmen and distress without reasons, will be experienced, if Sun is in 6th, 8th, or 12th, or, if Sun is in the 6th, 8th, or 12th from the Lord of the Dasha.**

अकस्मात्कलहश्चैव जीवस्यान्तर्गते रवौ
द्वितीयद्यूननाथे तु देहपीडा भविष्यति ५६

तद्दोषपरिहारार्थमादित्यहृदयं जपेत्
सर्वपीडोपशमनं श्रीसूर्यस्य प्रसादतः ५७

**56-57. There will be physical distress, if Sun is 2nds, or 7ths Lord. The remedial measure to obtain relief from the above evil effects and to enjoy good health is recitation of Adhitya Hridaya Path.**

जीवस्यान्तर्गते चन्द्रे केन्द्रे लाभत्रिकोणगे
स्वोच्चे वा स्वक्षेत्रराशिस्थे पूर्णे चैव बलैर्युते ५८

दायेशाच्छुभराशिस्थे राजसम्मानवैभवम्
दारपुत्रादिसौख्यं च क्षीराणं भोजनं तथा ५९

सत्कर्म च तथा कीर्तिः पुत्रपौत्रादिवृद्धिदा
महाराजाप्रसादेन सर्वसौख्यं धनागमः ६०

**58-60. Effects, like reverence from the king, opulence and glory, happiness from wife and children, availability of good food, gain of reputation by performance of good deeds, increase in the number of children and grandchildren, comforts by the beneficence of the king, religious and ch6thtable inclinations etc., will be derived in the Antar Dasha of Moon in the Dasha of Jupiter, if Moon is in a Kendra, Trikona, or in 11th, or, if Moon is in her exaltation, or in her own Rāśi and, if Moon is full and strong and in an auspicious House from the Lord of the Dasha.**

अनेकजनसौख्यं च दानधर्मादिसंग्रहः
षष्ठाष्टमव्यये चन्द्रे स्थिते वा पापसंयुते ६१

दायेशात्षष्ठरन्ध्रे वा व्यये वा बलवर्जिते
मानार्थबन्धुहानिश्च विदेशपरिविच्युतिः ६२

नृपचौरादिपीडा च दायादजनविग्रहः
मातुलादिवियोगश्च मातृपीडा तथैव च ६३

**61-63. There will be loss of wealth and kinsmen, wanderings in foreign lands, danger from the king, thieves, quarrels with coparceners, separation from a maternal uncle, distress to mother etc., if Moon is weak, or is associated with malefics, or, if Moon is in 6th, 8th, or 12th, or, if Moon is in the 6th, 8th, or 12th from the Lord of the Dasha.**

द्वितीयषष्ठयोरीशे देहपीडा भविष्यति
तद्दोषपरिहारार्थं दुर्गापाठं च कारयेत् ६४

**64. Physical distress will be experienced, if Moon is 2nds, or 7ths Lord. The remedial measure to obtain relief from the above effects is Durga Saptashati Path.**

जीवस्यान्तर्गते भौमे लग्नात्केन्द्रत्रिकोणगे
स्वोच्चे वा स्वर्क्षगे वापि तुङ्गांशे स्वांशगेऽपि वा ६५

विद्याविवाहकार्याणि ग्रामभूम्यादिलाभकृत्
जनसामर्थ्यमाप्नोति सर्वकार्यार्थसिद्धिदम् ६६

**65-66. Effects, like the celebration of functions, such as marriage etc., gain of land, or villages, growth of strength and valor and success in all ventures, will be derived in the Antar Dasha of Mars in the Dasha of Jupiter, if Mars is in his exaltation, in his own Rāśi, or in his exalted, or own Navāmśa.**

दायेशात्केन्द्रकोणस्थे लाभे वा धनगेऽपि वा
शुभयुक्ते शुभैर्दृष्टे धनधान्यादिसम्पदः ६७

मिष्ठान्नदानविभवं राजप्रीतिकरं शुभम्
स्त्रीसौख्यं च सुतावाप्तिः पुण्यतीर्थफलं तथा ६८

**67-68. There will be gain of wealth and grains, availability of good sweetish preparations, pleasure of the king, happiness from wife and children and other auspicious effects, if Mars is in a Kendra, Trikona, in 11th, or 2nd and is associated with, or receives a Aspect from benefics.**

दायेशाद्रन्ध्रभावे वा व्यये वा नीचगेऽपि वा
पापयुतेक्षिते वापि धान्यार्थगृहनाशनम् ६९

नानारोगभयं दुःखं नेत्ररोगादिसम्भवः
पूर्वार्द्धे कष्टमधिकमपरार्द्धे महत्सुखम् ७०

द्वितीयद्यूननाथे तु देहजाड्यं मनोरुजः
वृषभस्य प्रदानं तु सर्वसम्पत्प्रदायकम् ७१

**69-71. Loss of wealth and house, eye trouble and other inauspicious effects will be the results, if Mars is in the 8th, or 12th from the Lord of the Dasha, or, if Mars is in his debilitation Rāśi, associated with, or receiving a Aspect from malefics. The effects will be particularly adverse at the commencement of the Antar Dasha. There will be some mitigation of evil effects later. There will be physical distress and mental agony, if Mars is the Lord of 2nd, or 7th. The remedial measure to obtain relief from the above evil effects and to get gains of wealth and property is to give a bull in ch6thty.**

जीवस्यान्तर्गते राहौ स्वोच्चे वा केन्द्रगेऽपि वा
मूलत्रिकोणे भाग्ये च केन्द्राधिपसमन्विते ७२

शुभयुतेक्षिते वापि योगप्रीतिं समादिशेत्
भुक्त्यादौ पञ्चमासांश्च धनधान्यादिकं लभेत् ७३

देशग्रामाधिकारं च यवनप्रभुदर्शनम्
गृहे कल्याणसम्पत्तिर्बहुसेनाधिपत्यकम् ७४

दूरयात्रादिगमनं पुण्यधर्मादिसंग्रहः
सेतुस्नानफलावाप्तिरिष्टसिद्धिः सुखावहा ७५

**72-75. Effects, like attachment to Yoga, gain of wealth and grains during the first five months, sovereignty over a village, or country, meeting with a foreign king, well-being in the family, journeys to distant lands, bathing in holy places, will be derived in the Antar Dasha of Rahu in the Dasha of Jupiter, if Rahu is in his exaltation, in his own Rāśi, in his MulaTrikonaa, or, if Rahu is in a Kendra, or Trikona, or, if Rahu receives a Aspect from the Lord of a Kendra, or, if Rahu is associated with, or receives a Aspect from a benefic.**

दायेषाद्रन्ध्रभावे वा व्यये वा पापसंयुते
चौराहिव्रणभीतिश्च राजवैषम्यमेव च ७६

गृहे कर्मकलापेन व्याकुलो भवति ध्रुवम्
सोदरेण विरोधः स्याद्दायादजनविग्रहः ७७

गृहे त्वशुभकार्याणि दुःस्वप्नादिभयं ध्रुवम्
अकस्मात्कलहश्चैव चूद्रशून्यादिरोगकृत् ७८

**76-78. Danger from thieves, snakes, the king, wounds, troubles in domestic affairs, antagonism with co-borns and coparceners, bad dreams, quarrels without reason, danger from diseases etc. will result, if Rahu is associated with a malefic, if Rahu is in the 8th, or 12th from the Lord of the Dasha.**

द्विसप्तमस्थिते राहौ देहवाधां विनिर्दिशेत्
तद्दोषपरिहारार्थं मृत्युञ्जयजपं चरेत् ७९

छागदानं प्रकुर्वीत सर्वसौख्यमवाप्नुयात्
देवपूजाप्रसादेन राहुतुष्ट्या द्विजोत्तम ८०

**79-80. There will be physical distress, if Rahu is in 2nd, or in 7th. The remedial measures to obtain relief from the above evil effects are Mrityunjaya Japa and giving a goat in ch6thty.**

अथ शन्यन्तर्दशाफलाध्यायः ५७

मूलत्रिकोणे स्वर्क्षे वा तुलायामुच्चगेऽपि वा
केन्द्रत्रिकोणलाभे वा राजयोगादिसंयुते १

राज्यलाभो महत्सौख्यं दारपुत्रादिवर्धनम्
वाहनत्रयसंयुक्तं गजाश्वाम्बरसङ्कुलम् २

महाराजप्रसादेन सेनापत्यादिलाभकृत्
चतुष्पाज्जीवलाभः स्याद्ग्रामभूम्यादिलाभकृत् ३

## Ch. 57. Effects of the Antar Dashas in the Dasha of Saturn

**1-3. Effects, like acquisition of a kingdom, happiness from wife and children, acquisition of conveyances, like elephants, gain of clothes, attainment of the position of a Commander of the Army by the beneficence of the king, acquisition of cattle, villages and land etc., will be derived in the Antar Dasha of Saturn in the Dasha of Saturn, if Saturn is in his own, in his exaltation Rāśi, or in deep exaltation, or, if Saturn is in a Kendra, or Trikona, or, if Saturn is a Yoga Karak**

तथाऽष्टमे व्यये मन्दे नीचे वा पापसंयुते
तद्भुक्त्यादौ राजभीतिर्विषशस्त्रादिपीडनम् ४

रक्तस्त्रावो गुल्मरोगो ह्यतिसारादिपीडनम्
मध्ये चौरादि भीतिश्च देशत्यागो मनोरुजः ५

**.4-5. Fear, or danger from the king, getting inflicted with injuries with some weapon, bleeding gums, dysentery etc. will be the evil effects at the commencement of the Dasha, if Saturn is in 8th, or 12th, or, if Saturn is associated with malefics in his debilitation Rāśi. There will be danger from thieves etc., going away from the homeland, mental agony etc. in the middle portion of the Dasha. The last part of the Dasha will yield beneficial results.**

अन्ते शुभकरी चैव शनेरन्तर्दशा द्विज
द्वितीयद्यूननाथे तु ह्यपमृत्युर्भविष्यति ६
तद्दोषपरिहारार्थं मृटयुञ्जयजपं चरेत्
ततः शान्तिमवाप्नोति शङ्करस्य प्रसादतः ७

**6-7. There will be danger of premature death, if Saturn is 2nds, or 7ths Lord. Lord Shiva will afford protection and render relief, if Mrityunjaya Japa is performed in the prescribed manner.**

मन्दस्यान्तर्गते सौम्ये त्रिकोणे केन्द्रगेऽपि वा
सम्मानं च यशः कीर्तिं विद्यालाभं धनागमम् ८

स्वदेशे सुखमाप्नोति वाहनादिफलैर्युतम्
यज्ञादिकर्मसिद्धिश्च राजयोगादिसम्भवम् ९

देहसौख्यं हृदुत्साहं गृहे कल्याणसम्भवम्
सेतुस्नानफलावाप्तिस्तीर्थयात्रादिकर्मणा १०

वाणिज्याद्धनलाभश्च पुराणश्रवणादिकम्
अन्नदानफलं चैव नित्यं मिष्ठान्नभोजनम् ११

**8-11. Effects, like reverence from the people, good reputation, gain of wealth, comforts of conveyances etc., inclination towards performance of religious sacrifices (Yagyas), Raja Yoga, bodily felicity, enthusiasm, well-being in the family, pilgrimage to holy places, performance of religious rites, listening to Puranas, charities, availability of sweetish preparations etc., will be derived in the Antar Dasha of Mercury in the Dasha of Saturn, if Mercury is in a Kendra, or Trikona.**

षष्ठाष्टमव्यये सौम्ये नीचे वास्तंगते सति
रव्यारफणिसंयुक्ते दायेशाद्वा तथैव च १२

नृपाभिषेकमर्थाप्तिर्देशग्रामाधिपत्यता
फलमीदृशमादौ तु मध्यान्ते रोगपीडनम् १३

**12-13. Acquisition of a kingdom, gain of wealth, headship of a village will be the effects at the commencement of the Dasha, if Mercury is in 6th, 8th, or 12th from Lagna, or from the Lord of the Dasha, or, if Mercury is associated with Sun, Mars and Rahu. Affliction with diseases, failure in all ventures, anxiety and feeling of danger etc. will be experienced in the middle portion and in the last part of the Dasha.**

नष्टानि सर्वकार्याणि व्याकुलत्वं महद्भयम्
द्वितीयसप्तमाधिशे देहबाधा भविष्यति १४

तद्दोषपरिहारार्थं विष्णुसाहस्रकं जपेत्
अन्नदानं प्रकुर्वीत सर्वसम्पत्प्रदायकम् १५

**14-15. There will be physical distress, if Mercury is 2nds, or 7ths Lord. The remedial measures to obtain relief from the above evil effects and to regain enjoyment in life are recitation of Vishnu Sahasranam and giving grains in ch6thty.**

मन्दस्यान्तर्गते केतौ शुभदृष्टियुतेक्षिते
स्वोच्चे वा शुभराशिस्थे योगकारकसंयुते १६

केन्द्रकोणगते वापि स्थानभ्रंशो महद्भयम्
दरिद्रबन्धनं भीतिः पुत्रदारादिनाशनम् १७

स्वप्रभोश्च महाकष्टं विदेशगमनं तथा
लग्नाधिपेन संयुक्ते आदौ सौख्यं धनागमः १८

**16-18. Evil effects, like loss of position, dangers, poverty, distress, foreign journeys etc., will be derived in the Antar Dasha of Ketu in the Dasha of Saturn, even if Ketu is in his exaltation, in his own, in a benefic Rāśi, or in a Kendra, or Trikona, or, if Ketu is associated with, or receives a Aspect from benefics. If Ketu is related to the Lagnas Lord, there will be gain of wealth and enjoyment and bathing in holy places and visit to a sacred shrine at the commencement of the Antar Dasha.**

गङ्गादिसर्वतीर्थेषु स्नानं दैवतदर्शनम्
दायेशात्केन्द्रकोणे वा तृतीयभवराशिगे १९

**19-19. Gain of physical strength and courage, religious thoughts, audience with the king (high dignit6thes of government, like president, prime minister, governor, ministers) and all kinds of enjoyments will be experienced, if Ketu is in a Kendra, in a Trikona, in the 3rd, or 11th from the Lord of the Dasha.**

समर्थो धर्मबुद्धिश्च सौख्यं नृपसमागमः
तथाऽष्टमे व्यये केतौ दायेशाद्वा तथैव च २०

अपमृत्युभयं चैव कुत्सितान्नस्य भोजनम्
शीतज्वरातिसारश्च व्रणचौरादिपीडनम् २१

**20-21. Fear of premature death, coarse food, cold fever, dysentery, wounds, danger from thieves, separation from wife and children etc., will be the results, if Ketu is in 8th, or 12th from Lagna, or from the Lord of the Dasha.**

दारपुत्रवियोगश्च संसारे भवति ध्रुवम्
द्वितियद्यूनराशिस्थे देह पीडा भविष्यति २२

छागदानं प्रकुर्वीत ह्यपमृत्युनिवारणम्
केतुग्रहप्रसादेन सुखशान्तिमवाप्नुयात् २३

**22-23. There will be physical distress, if Ketu is in 2nd, or 7th. Remedial measure to obtain relief from the above evil effects and to regain enjoyments of life by the beneficence of Ketu is giving a goat in ch6thty.**

मन्दस्यान्तर्गते शुक्रे स्वोच्चे स्वक्षेत्रगेऽपि वा
केन्द्रे वा शुभसंयुक्ते त्रिकोणे लाभगेऽपि वा २४

दारपुत्रधनप्राप्तिर्देहारोग्यं महोत्सवः
गृहे कल्याणसम्पत्ति राज्यलाभं महत्सुखम् २५

महाराजप्रसादेन हीष्टसिद्धिः सुखावहा
सम्मानं प्रभुसम्मानं प्रियवस्त्रादिलाभकृत् २६

द्विपान्तराद्वस्त्रलाभः श्वेताश्वो महिषी तथा
गुरुचारवशाद्भाग्यं सौख्यं च धनसम्पदः २७

**24-27. Effects, like marriage, birth of a son, gain of wealth, sound health, well-being in the family, acquisition of a kingdom, enjoyments by the beneficence of the king, honors, gain of clothes, ornaments, conveyance and other desired objects, will be derived in the Antar Dasha of Venus in the Dasha of Saturn, if Venus is in a Kendra, Trikona, or in 11th, associated with, or receiving a Aspect from benefics. If during the period of Antar Dasha of Venus Jupiter is favourable in transit, there will be dawn of fortune and growth of property. If Saturn is favourable in transit, there will be Raja Yoga effects, or the accomplishment of Yoga rites (Yoga Triya Siddhi).**

शनिचारान्मनुष्योऽसौ योगमाप्नोत्यसंशयम्
शत्रुनीचास्तगे शुक्रे षष्ठाष्टमव्ययराशिगे २८

दारनाशो मनःक्लेशः स्थाननाशो मनोरुजः
दारानां स्वजनक्लेशः सन्तापो जनविग्रहः २९

**28-29. Distress to wife, loss of position, mental agony, quarrels with close relations etc. will be the results, if Venus is in his debilitation Rāśi, if Venus is combust, or, if Venus is in 6th, 8th, or 12th.**

दायेशाद्भाग्यगे चैव केन्द्रे वा लाभसंयुते
राजप्रीतिकरं चैव मनोऽभीष्टप्रदायकम् ३०

दानधर्मदयायुक्तं तीर्थयात्रादिकं फलम्
शास्त्रार्थकाव्यरचनां वेदान्तश्रवणादिकम् ३१

**30-31. Fulfillment of ambitions by the beneficence of the king, charities, performance of religious rites, creation of interest in the study of Shastras, composition of poems, interest in Vedanta etc., listening to Puranas, happiness from wife and children will be experienced, if Venus is in 9th, 11th, or Kendra from the Lord of the Dasha.**

दारपुत्रादिसौख्यं च लभते नाऽत्र संशयः
दायेशाद्व्ययगे शुक्रे षष्ठे वा ह्यष्टमेऽपि वा ३२

नेत्रपीडा ज्वरभयं स्वकुलाचारवर्जितः
कपोले दन्तशूलादि हृदि गुह्ये च पीडनम् ३३

जलभीतिर्मनस्तापो वृक्षात्पतनसम्भवः
राजद्वारे जनद्वेषः सोदरेण विरोधनम् ३४

**32-34. There will be eye trouble, fevers, loss of good conduct, dental problems, heart disease, pain in arms, danger from drowning, or falling from a tree, antagonism towards relations with the officials of government and brothers, if Venus is in the 6th, 8th, or 12th from the Lord of the Dasha.**

द्वितीयसप्तमाधीशे आत्मक्लेशो भविष्यति
तद्दोषपरिहारार्थं दुर्गादेवीजपं चरेत् ३५

श्वेतां गां महिषीं दद्यादायुरारोग्यवृद्धिदाम्
जगदम्बाप्रसादेन ततः सुखमवाप्नुयात् ३६

**35-36. There will be physical distress, if Venus is 2nds, or 7ths Lord. The remedial measures to obtain relief from the above evil effects and to regain enjoyment and good health is by the beneficence of Goddess Durga and the performance of Durga Saptashati Path and giving a cow, or a female buffalo in ch6thty.**

मन्दस्यान्तर्गते सूर्ये स्वोच्चे स्वक्षेत्रगेऽपि वा
भाग्याधिपेन संयुक्ते केन्द्रलाभत्रिकोणगे ३७

शुभदृष्टियुते वापि स्वप्रभोश्च महत्सुखम्
गृहे कल्याणसम्पत्तिः पुत्रादिसुखवर्द्धनम् ३८

**37-38. Effects, like good relations with ones employer, well-being in the family, happiness from children, gain of conveyances and cattle etc., will be derived in the Antar Dasha of Sun in the Dasha of Saturn, if Sun is in his exaltation, in his own Rāśi, or, if Sun is associated with 9ths Lord, or, if Sun is in a Kendra, or Trikona, associated with, or receiving a Aspect from benefics.**

वाहनाम्बरपश्वादिगोक्षीरैस्संकुलं गृहम्
लग्नाष्टमव्यये सूर्ये दायेशाद्वा तथैव च ३९

हृद्रोगो मानहानिश्च स्थानभ्रंशो मनोरुजा
इष्टबन्धुवियोगश्च उद्योगस्य विनाशनम् ४०

तापज्वरादिपीडा च व्याकुलत्वं भयं तथा
आत्मसम्बन्धिमरणमिष्टवस्तुवियोगकृत् ४१

**39-41. There will be heart disease, defamation, loss of position, mental agony, separation from close relatives, obstacles in industrial ventures, fevers, fears, loss of kinsmen, loss of articles, dear to the person, if Sun is in 8th, or 12th, or, if Sun is in the 8th, or 12th from the Lord of the Dasha.**

द्वितीयद्यूननाथे तु देहबाधा भविष्यति
तद्दोषपरिहारार्थं सूर्यपूजां च कारयेत् ४२

**42. There will be physical distress, if Sun is 2nds, or 7ths Lord. The worship of Sun is the remedial measure to obtain relief from the above evil effects.**

मन्दस्यान्तर्गते चन्द्रे जीवदृष्टिसमन्विते
स्वोच्चे स्वक्षेत्रकेन्द्रस्थे त्रिकोणे लाभगेऽपि वा ४३

पूर्णे शुभग्रहैर्युक्ते राजप्रीतिसमागमः
महाराजप्रसादेन वाहनाम्बरभूषणम् ४४

सौभाग्यं सुखवृद्धिं च भृत्यानां परिपालनम्
पितृमातृकुले सौख्यं पशुवृद्धिः सुखावहा ४५

**43-45. Effects, like gains of conveyance, garments, ornaments, improvement of fortune and enjoyments, taking care of brothers, happiness in both maternal and paternal homes, increase in cattle wealth etc., will be derived in the Antar Dasha of Moon in the Dasha of Saturn, if Moon is full, in her exaltation, or in her own Rāśi, or in a Kendra, or Trikona, or in the 11th from the Dasha Lord, or, if Moon receives a Aspect from benefics.**

क्षीणे वा पापसंयुक्ते पापदृष्टे वा नीचगे
क्रूरांशकगते वापि क्रूरक्षेत्रगतेऽपि वा ४६

जातकस्य महत्कष्टं राजकोपो धनक्षयः
पितृमातृवियोगश्च पुत्रीपुत्रादिरोगकृत् ४७

व्यवसायात्फलं नेष्टं नानामार्गे धनव्ययः
अकाले भोजनं चैव मौषधस्य च भक्षणम् ४८

**46-48. There will be great distress, wrath, separation from parents, ill health of children, losses in business, irregular meals, administration of medicines, if Moon is waning, if Moon is associated with, or receives Aspect from malefics, or, if Moon is in his debilitation Rāśi, or, if Moon is in malefic Navāmśa, or, if Moon is in the Rāśi of a malefic Planet. There will, however, be good effects and some gain of wealth at the commencement of the Antar Dasha.**

फलमेतद्विजानीयादादौ सौख्यं धनागमः
दायेशात्केन्द्रराशिस्थे त्रिकोणे लाभगेऽपि वा ४९

वाहनाम्बरपश्वादिभ्रातृवृद्धिः सुखावहा
पितृमातृसुखावाप्तिः स्त्रीसौख्यं च धनागमः ५०

**49-50. Enjoyment of conveyances and garments, happiness from kinsmen, happiness from parents, wife, employer etc. will be the results, if Moon is in a Kendra, Trikona, or in the 11th from the Lord of the Dasha.**

मित्रप्रभुवशादिष्टं सर्वसौख्यं शुभावहम्
दायेशाद्द्वादशे भावे रन्ध्रे वा बलवर्जिते ५१

शयनं रोगमालस्यं स्थानभ्रष्टं सुखापहम्
शत्रुवृद्धिविरोधं च बन्धुद्वेषमवाप्नुयात् ५२

**51-52. Effects, like sleepiness, lethargy, loss of position, loss of enjoyments, increase in the number of enemies, antagonism with kinsmen, will be experienced, if Moon is weak and is in the 6th, 8th, or 12th from the Lord of the Dasha.**

द्वितीयद्यूननाथे तु देहालस्य भविष्यति
तद्दोषशमनार्थं च तिलहोमादिकं चरेत् ५३

गुडं घृतं च दध्नाक्तं तण्डुलं च यथाविधि
श्वेतां गां महिषीं दद्यादायुरारोग्यवृद्धये ५४

**53-54. There will be lethargy and physical distress, if Moon is 2nd, or 7ths Lord. The remedial measures to obtain relief from the above evil effects and prolongation of longevity are Havan and giving jaggery, Ghī, rice, mixed with curd, a cow, or a female buffalo in ch6thty.**

मन्दस्यान्तर्गते भौमे केन्द्रलाभत्रिकोणगे
तुङ्गे स्वक्षेत्रगे वापि दशाधिपसमन्विते ५५

लग्नाधिपेन संयुक्ते आदौ सौख्यं धनागमः
राजप्रीतिकरं सौख्यं वाहनाम्बरभूषणम् ५६

सेनापत्यं नृपप्रीतिः कृषिगोधान्यसम्पदः
नूतनस्थाननिर्माणं भ्रातृवर्गेष्टसौख्यकृत् ५७

**55-57. Effects, like enjoyments, gain of wealth, reverence from the king, gain of conveyances, clothes and ornaments, attainment of the position of a Commander of the Army, increase in agricultural and cattle wealth, construction of a new house, happiness to kinsmen, will be derived from the very commencement of the Antar Dasha of Mars in the Dasha of Saturn, if Mars is in his exaltation, in his own Rāśi, or, if Mars is associated with Lagnas Lord, or with the Dasha Lord.**

नीचे चास्तङ्गते भौमे लग्नादष्टव्ययस्थिते
पापदृष्टियुते वापि धनहानिर्भविष्यति ५८

चौराहिव्रणशस्त्रादिग्रन्थिरोगादिपीडनम्
भ्रातृपित्रादिपीडा च दायादजनविग्रहः ५९

चतुष्पाज्जीवहानिश्च कुत्सितान्नस्य भोजनम्
विदेशगमनं चैव नानामार्गे धनव्ययः ६०

**58-60. There will be loss of wealth, danger of wounds, danger from thieves, snakes, weapons, gout and other similar diseases, distress to father and brothers, quarrels with copartners, loss of kinsmen, coarse food, going away to foreign lands, unnecessary expenditure etc., if Mars is in his debilitation Rāśi, or combust, or in 8th, or 12th and associated with, or receiving a Aspect from malefics.**

अष्टमद्यूननाथे तु द्वितीयस्थेऽथ वा यदि
अपमृत्युभयं चैव नानाकष्टं पराभवः ६१

तद्दोषपरिहारार्थं शान्तिहोमं च कारयेत्
वृषदानं प्रकुर्वीत सर्वारिष्टनिवारणम् ६२

**61-62. Great distress, dependence on others and fear of premature death, may be expected, if Mars is in 2nd, or, if Mars is 7ths, or 8ths Lord. The remedial measures to obtain relief from the above evil effects are performance of Havan and giving a bull in ch6thty.**

मन्दस्यान्तर्गते राहौ कलहश्च मनोव्यथा
देहपीडा मनस्तापः पुत्रद्वेषो रुजोभयम् ६३

अर्थव्ययो राजभयं स्वजनादिविरोधिता
विदेशगमनं चैव गृहक्षेत्रादिनाशनम् ६४

**63-64. Effects, like quarrels, mental agony, physical distress, agony, antagonism with the sons, danger from diseases, unnecessary expenditure, discord with close relations, danger from the government, foreign journeys, loss of house and agricultural lands, will be derived in the Antar Dasha of Rahu in the Dasha of Saturn, if Rahu not be in his house of exaltation, or any other auspicious position.**

लग्नाधिपेन संयुक्ते योगकारकसंयुते
स्वोच्चे स्वक्षेत्रगे केन्द्रे दायेशाल्लाभराशिगे ६५

आदौ सौख्यं धनावाप्तिं गृहक्षेत्रादिसम्पदम्
देवब्राह्मणभक्तिं च तीर्थयात्रादिकं लभेत् ६६

चतुष्पाज्जीवलाभः स्याद्गृहे कल्याणवर्द्धनम्
मध्ये तु राजभीतिश्च पुत्रमित्रविरोधनम् ६७

**65-67. Enjoyment, gains of wealth, increase in agricultural production, devotion to deities and Brahmins, pilgrimage to holy places, increase in cattle wealth, well-being in the family will be the results at the commencement of the Antar Dasha, if Rahu is associated with Lagnas Lord, or a Yoga Karak Planet, or, if Rahu is in his exaltation, or in his own Rāśi, or, if Rahu is in a Kendra, or 11th from Lagna, or from the Lord of the Dasha. There will be cordiality with the king and happiness from friends in the middle portion of the Antar Dasha.**

मेषे कन्यागते वापि कुलीरे वृषभे तथा
मीनकोदण्डसिंहेषु गजान्तैश्वर्यमादिशेत् ६८

**68-68. There will be acquisition of elephants, opulence and glory, cordial relations with the king, gains of valuable clothes, if Rahu is in Aries, Virgo, Cancer, Taurus, Pisces, or Sagittarius.**

राजसम्मानभूषाप्तिं मृदुलाम्बरसौख्यकृत्
द्विसप्तमाधिपैर्युक्ते देहबाधा भविष्यति ६९
मृत्युञ्जयं प्रकुर्वीत छागदानं च कारयेत्
वृषदानं प्रकुर्वीत सर्वसम्पत्सुखावहम् ७०

**69-70. There will be physical distress, if Rahu is associated with 2nds, or 7ths Lord. The remedial measures to obtain relief from the above evil effects are Mrityunjaya Japa and giving a goat in ch6thty.**

मन्दस्यान्तर्गते जीवे केन्द्रे लाभत्रिकोणगे
लग्नाधिपेन संयुक्ते स्वोच्चे स्वक्षेत्रगेऽपि वा ७१

सर्वकार्यार्थसिद्धिः स्याच्छोभनं भवति ध्रुवम्
महाराजप्रसादेन धनवाहनभूषणम् ७२

सन्मानं प्रभुसम्मानं प्रियवस्त्रार्थलाभकृत्
देवतागुरुभक्तिश्च विद्वज्जनसमागमः ७३

**71-73. Effects, like success all-round, well-being in the family, gain of conveyances, ornaments and clothes by the beneficence of the king, reverence, devotion to deities and the preceptor, association with men of learning, happiness from wife and children etc., will be derived in the Antar Dasha of Jupiter in the Dasha of Saturn, if Jupiter is in a Kendra, or in a Trikona, or, if Jupiter is associated with Lagnas Lord, or, if Jupiter is in his own, or in his exaltation Rāśi.**

दारपुत्रादिलाभश्च पुत्रकल्याणवैभवम्
षष्ठाष्टमव्यये जीवे नीचे वा पापसंयुते ७४

निजसम्बन्धिमरणं धनधान्यविनाशनम्
राजस्थाने जनद्वेषः कर्यहानिर्भविष्यति ७५

**74-75. Results, like death of the near relations, loss of wealth, antagonism with the government officials, failure in projects, journeys to foreign lands, affliction with diseases, like leprosy etc., will be experienced, if Jupiter is in his debilitation Rāśi, or, if Jupiter is associated with malefics, or, if Jupiter is in 6th, 3rd, or 12th.**

विदेशगमनं चैव कुष्ठरोगादिसम्भवः
दायेशात्केन्द्रकोणे वा धने वा लाभगेऽपि वा ७६

विभवं दारसौभाग्यं राजश्रीधनसम्पदः
भोजनाम्बरसौख्यं च दानधर्मादिकं भवेत् ७७

ब्रह्मप्रतिष्ठासिद्धिश्च क्रतुकर्मफलं तथा
अन्नदानं महाकीर्तिर्वेदान्तश्रवणादिकम् ७८

**76-78. There will be opulence and glory, happiness to wife, gains through the king, comforts of good food and clothes, religious-mindedness, name and fame in the country, interest in Vedas and Vedanta, performance of religious sacrifices, giving grains etc. in ch6thty, if Jupiter is in the 5th, 9th, 11th, 2nd, or Kendra from the Lord of the Dasha.**

दायेशात्षष्ठरन्ध्रे वा व्यये वा बलवर्जिते
बन्धुद्वेषो मनोदुःखं कलहः पदविच्युतिः ७९

कुभोजनं कर्महानी राजदण्डाद्धनव्यय
कारागृहप्रवेशश्च पुत्रदारादिपीडनम् ८०

**79-80. Antagonism with kinsmen, mental agony, quarrels, loss of position, losses in ventures, loss of wealth, as a result of imposition of fines, or penalties by government, imprisonment distress to wife and son will be the results, if Jupiter is weak and is in the 6th, 8th, or 12th from the Lord of the Dasha.**

द्वितीयद्यूननाथे तु देहवाधा मनोरुजः
आत्मसम्बन्धिमरणं भविष्यति न संशयः ८१

तद्दोषपरिहारार्थं शिवसाहस्त्रकं जपेत्
स्वर्णदानं प्रकुर्वीत ह्यारोग्यं भवति ध्रुवम् ८२

**81-82. There will be physical distress, agony, death of the native, or any member of the family, if Jupiter is 2nds, or 7ths Lord. Remedial measures to obtain relief from the above evil effects are recitation of Shiva Sahasranam and giving gold in ch6thty.**

अथ बुधान्तर्दशाफलाध्यायः ५८
मुक्ताविद्रुमलाभश्च ज्ञानकर्मसुखादिकम्
विद्यामहत्त्वं कीर्तिश्च नूतनप्रभुदर्शनम् १

विभवं दारपुत्रादि पितृमातृसुखावहम्
स्वोच्चादिस्थेऽथ नीचेऽस्ते षष्ठाष्टमव्ययराशिगे २

पापयुक्तेऽथवा दृष्टे धनधान्यपशुक्षयः
आत्मबन्धुविरोधश्च शूलरोगादिसम्भवः ३

## Ch. 58. Effects of the Antar Dashas in the Dasha of Mercury

**1-3. Gain of jewels, like pearls etc., learning, increase in happiness and performance of pious deeds, success in the educational sphere, acquisition of name and fame, meeting with new kings, gain of wealth and happiness from wife, children and parents will be the effects in the Antar Dasha of Mercury in his own Dasha, if Mercury is placed in his exaltation Rāśi, or is otherwise well placed.There will be loss of wealth and cattle, antagonism with kinsmen, diseases, like stomach pains, piety in discharging duties, as a government official, if Mercury is in his debilitation Rāśi etc., or, if Mercury is in 6th, 8th, or 12th, or, if Mercury is associated with malefics.**

राजकार्यकलापेन व्याकुलो भवति ध्रुवम्
द्वितीयद्यूननाथे तु दारक्लेशो भविष्यति ४

आत्मसम्बन्धिमरणं वातशूलादिसम्भवः
तद्दोषपरिहारार्थं विष्णुसाहस्रकं जपेत् ५

**4-5. Distress to wife, death of members of the family, affliction with diseases, like rheumatism and stomach pains etc. will result, if Mercury is 2nds, or 7ths Lord. Remedial measure to obtain relief from the above evil effects, is recitation of Vishnu Sahasranam.**

बुधस्यान्तर्गते केतौ लग्नात्केन्द्रत्रिकोणगे
शुभयुक्ते शुभैर्दृष्टे लग्नाधिपसमन्विते ६

योगकारकसम्बन्धे दायेशात्केन्द्रलाभगे
देहसौख्यं धनाल्पत्वं बन्धुस्नेहमथादिशेत् ७

चतुष्पाज्जीवलाभः स्यात्संचारेण धनागमः
विद्याकीर्तिप्रसङ्गश्च समानप्रभुदर्शनम् ८

**6-8. Effects, like physical fitness, little gain of wealth, affectionate relations with kinsmen, increase in cattle wealth, income from industries, success in the educational sphere, acquisition of name and fame, honors, audience with the king and joining a banquet with him, comforts of clothes etc., will be experienced, if Ketu is associated with benefics in a Kendra, or Trikona, or, if Ketu is conjunct with Lagnas Lord, or with a Yoga Karak. The same will be the results, if Ketu is in a Kendra, or in the 11th from the Lord of the Dasha.**

भोजनाम्बरसौख्यं च ह्यादौ मध्ये सुखावहम्
दायेशाद्यदि रन्ध्रस्थे व्यये वा पापसंयुते ९

वाहनात्पतनं चैव पुत्रक्लेशादिसम्भवः
चौरादिराजभीतिश्च पापकर्मरतः सदा १०

वृश्चिकादिविषाद्भीतिर्नीचैः कलहसंभवः
शोकरोगादिदुःखं च नीचसङ्गादिकं भवेत् ११

**9-11. Fall from a conveyance, distress to son, danger from the king, indulgence in sinful deeds, danger from scorpions etc., quarrels with the menials, sorrow, diseases and association with menials etc. will be the results, if Ketu is conjunct with malefics in the 8th, or 12th from the Lord of the Dasha.**

द्वितीयद्यूननाथे तु देहजाड्यं भविष्यति
तद्दोषपरिहाराय छागदानं तु कारयेत् १२

**12. There will be physical distress, if Ketu is 2nds, or 7ths Lord. The remedial measure to obtain relief from the above evil effects, is giving a goat in ch6thty.**

सौम्यस्यान्तर्गते शुक्रे केन्द्रे लाभे त्रिकोणगे
सत्कथापुण्यधर्मादिसंग्रहः पुण्यकर्मकृत् १३

मित्रप्रभुवशादिष्टं क्षेत्रलाभः सुखं भवेत्
दशाधिपात्केन्द्रगते त्रिकोणे लाभगेऽपि वा १४

तत्काले श्रियमाप्नोति राजश्रीधनसम्पदः
वापीकूपतडागादिदानधर्मादिसंग्रहः १५

**13-15. Effects, like inclination to perform religious rites, fulfillment of all ambitions through the help of the king and friends, gains of agricultural lands and happiness etc. will be derived in the Antar Dasha of Venus in the Dasha of Mercury, if Venus is in a Kendra, in 11th, in 5th, or in 9th. There will be acquisition of a kingdom, gain of wealth and property, construction of a reservoir, readiness to give charities and to perform religious rites, extraordinary gain of wealth and gains in business, if Venus is in a Kendra, in the 5th, 9th, or 11th from the Lord of the Dasha.**

व्यवसायात्फलाधिक्यं धनधान्यसमृद्धिकृत्
दायेशात्षष्ठरन्ध्रस्थे व्यये वा बलवर्जिते १६

हृद्रोगो मानहानिश्च ज्वरातीसारपीडनम्
आत्मबन्धुवियोगश्च संसारे भवति ध्रुवम् १७

**16-17. Heart disease, defamation, fevers, dysentery, separation from kinsmen, physical distress and agony will result, if Venus is weak in the 6th, 8th, or 12th from the Lord, or the Dasha.**

आत्मकष्टं मनस्तापदायकं द्विजसत्तम
द्वितीयद्यूननाथे तु ह्यपमृत्युर्भविष्यति १८

तद्दोषपरिहारार्थं दुर्गादेवीजपं चरेत्
जगदम्बाप्रसादेन ततः शान्तिमवाप्नुयात् १९

**18-19. There will be fear of premature death, if Venus is 2nds, or 7ths Lord. The remedial measure to obtain relief from the above evil effects is to recite Mantras of Goddess Durga.**

सौम्यस्यान्तर्गते सूर्ये स्वोच्चे स्वक्षेत्रकेन्द्रगे
त्रिकोणे धनलाभे तु तुङ्गांशे स्वांशगेऽपि वा २०

राजप्रसादसुभाग्यं मित्रप्रभुवशात्सुखम्
भूम्यात्मजेन संदृष्टे आदौ भूलाभमादिशेत् २१

लग्नाधिपेन संदृष्टे बहुसौख्यं धनागमम्
ग्रामभूम्यादिलाभं च भोजनाम्बरसौख्यकृत् २२

**20-22. Effects, like dawn of fortune by the beneficence of the king, happiness from friends etc., will be derived in the Antar Dasha of Sun in the Dasha of Mercury, if Sun is in his own, or in his exaltation Rāśi, or in a Kendra, or Trikona, or in 2nd, or 11th, or in his exalted, or own Navāmśa. There will be acquisition of land, if Sun receives a Aspect from Mars and comforts of good food and clothes, if such a Sun receives a Aspect from Lagnas Lord.**

लग्नाष्टमव्यये वापि शन्यारफणिसंयुते
दायेशाद्रिपुरन्ध्रस्थे व्यये वा बलवर्जिते २३

चौराग्निशस्त्रपीडा च पित्ताधिक्यं भविष्यति
शिरोरुङ्मनसस्ताप इष्टबन्धुवियोगकृत् २४

**23-24. Fear, or danger from thieves, fire and weapons, bilious troubles, headaches, mental agony and separation from friends etc. will be the results, if Sun is in 6th, 8th, or 12th from Lagna, or from the Lord of the Dasha and, if Sun is weak and associated with Saturn, Mars and Rahu.**

द्वितीयसप्तमाधीशे ह्यपमृत्युर्भविश्यति
तद्दोषपरिहारार्थं शान्तिं कुर्याद्यथाविधि २५

**25. There will be fear of premature death, if Sun is 2nds, or 7ths Lord. Worship of Sun is the remedial measure to obtain relief from the above evil effects.**

सौम्यस्यान्तर्गते चन्द्रे लग्नात्केन्द्रत्रिकोणगे
स्वोच्चे वा स्वर्क्षगे वापि गुरुदृष्टिसमन्विते २६

योगस्थानाधिपत्येन योगप्राबल्यमादिशेत्
स्त्रीलाभं पुत्रलाभं च वस्त्रवाहनभूषणम् २७

**26-27. The Yoga becomes very strong for beneficial effects, if in the Antar Dasha of Moon in the Dasha of Mercury Moon is in a Kendra, or Trikona from Lagna, or, if Moon is in her exaltation, or in her own Rāśi, associated with, or receiving a Aspect from Jupiter, or, if Moon is a Yoga Karak herself. Then there will be marriage, birth of a son and gain of clothes and ornaments.**

नूतनालयलाभं च नित्यं मिष्ठान्नभोजनम्
गीतवाद्यप्रसंगं च शास्त्रविद्यापरिश्रमम् २८

दक्षिणां दिशमाश्रित्य प्रयाणं च भविष्यति
द्वीपान्तरादिवस्त्राणां लाभश्चैव भविष्यति २९

**28-29. In the circumstances, mentioned above, there will also be construction of a new house, availability of sweetish preparations, enjoyment of music, study of Shastras, journey to the South, gains of clothes from beyond the seas, gain of gems, like pearls etc.**

मुक्ताविद्रुमरत्नानि धौतवस्त्रादिकं लभेत्
नीचारिक्षेत्रसंयुक्ते देहबाधा भविष्यति ३०

दायेशात्केन्द्रकोणस्थे दुश्चिक्ये लाभगेऽपि वा
तद्भुक्त्यादौ पुण्यतीर्थस्थानदैवतदर्शनम् ३१

**30-31. There will be physical distress, if Moon is in her debilitation, or in an enemy Rāśi. If Moon is in a Kendra, Trikona, in the 3rd, or 11th from the Lord of the Dasha, there will be at the commencement of the Antar Dasha visits to sacred shrines, patience, enthusiasm and gains of wealth from foreign countries.**

मनोधैर्यं हृदुत्साहो विदेशधनलाभकृत्
दायेशात्षष्ठरन्ध्रे वा व्यये वा पापसंयुते ३२

चोराग्निनृपभीतिश्च स्त्रीसमागमतो भवेत्
दुष्कृतिर्धनहानिश्च कृषिगोश्वादिनाशकृत् ३३

**32-33. Danger from the king, fire and thieves, defamation, or disgrace and loss of wealth on account of wife, destruction of agricultural lands and cattle etc. will be the results, if Moon is weak and is in the 6th, 8th, or 12th from the Lord of the Dasha.**

द्वितीयद्यूननाथे तु देहबाधा भविष्यति
तद्दोषपरिहारार्थं दुर्गादेवीजपं चरेत् ३४

वस्त्रदानं प्रकुर्वीत आयुर्वृद्धिसुखावहम्
जगदम्बाप्रसादेन ततः सुखमवाप्नुयात् ३५

**34-35. There will be physical distress, if Moon is 2nds, or 7ths Lord. There will be relief, prolongation of longevity and restoration of comforts by the beneficence of Goddess Durga, if the Mantras of the Goddess are recited in the prescribed manner and clothes are given in ch6thty.**

सौम्यस्यान्तर्गते भौमे लग्नात्केन्द्रत्रिकोणगे
स्वोच्चे वा स्वर्क्षगे वापि लग्नाधिपसमन्विते ३६

राजानुग्रहशान्तिं च गृहे कल्याणसम्भवम्
लक्ष्मीकटाक्षचिह्नानि नष्टराज्यार्थमाप्नुयात् ३७

पुत्रोत्सवादिसन्तोषं गृहे गोधनसंकुलम्
गृहक्षेत्रादिलाभं च गजवाजिसमन्वितम् ३८

**36-38. Effects, like well-being and enjoyments in the family by the beneficence of the king, increase in property, recovery of a lost kingdom etc., birth of a son, satisfaction, acquisition of cattle, conveyances and agricultural lands, happiness from wife etc., will be derived in the Antar Dasha of Mars in the Dasha of Mercury, if Mars is in his exaltation, in his own Rāśi, in a Kendra, or Trikona, or, if Mars is associated with Lagnas Lord.**

राजप्रीतिकरं चैव स्त्रीसौख्यं चातिशोभनम्
नीचक्षेत्रसमायुक्ते ह्यष्टमे वा व्ययेऽपि वा ३९

पापदृष्टियुते वापि देहपीडा मनोव्यथा
उद्योगभङ्गो दशादौ स्वग्रामे धान्यनाशनम् ४०

**39-40. Physical distress, mental agony, obstacles in industrial ventures, loss of wealth, gout, distress from wounds and danger from weapons and fever etc. will be the results, if Mars be associated with, or receives a Aspect from malefics in 8th, or in 12th.**

ग्रंथिशस्त्रव्रणादीनां भयं तापज्वरादिकम्
दायेशात्केन्द्रगे भौमे त्रिकोणे लाभगेऽपि वा ४१

शुभदृष्टे धनप्राप्तिर्देहसौख्यं भवेन्नृणाम्
पुत्रलाभो यशोवृद्धिर्भ्रातृवर्गो महाप्रियः ४२

**41-42. There will be gain of wealth, physical felicity, birth of a son, good reputation, affectionate relations etc. with kinsmen etc., if Mars recieves a Aspect from benefics in a Kendra, Trikona, or in the 11th from the Lord of the Dasha.**

दायेशादथ रन्ध्रस्थे व्यये वा पापसंयुते
तद्भुक्त्यादौ महाक्लेशो भ्रातृवर्गे महद्भयम् ४३

नृपाग्निचौरभीतिश्च पुत्रमित्रविरोधनम्
स्थानभ्रंशो भवेदादौ मध्ये सौख्यं धनागमः ४४

**43-44. If Mars be associated with malefics in the 8th, or 12th from the Lord of the Dasha, there will be distress, danger from kinsmen, wrath of the king and fire, antagonism with the son, loss of position at the commencement of the Antar Dasha, enjoyments and gains of wealth in the middle portion of the Antar Dasha, danger from the king and loss of position at the end of the Antar Dasha.**

अन्ते तु राजभीतिः स्यात्स्थानभ्रंशोह्यथापिवा
द्वितीयद्यूननाथे तु ह्यपमृत्युभयं भवेत् ४५

गोदानं च प्रकुर्वीत मृत्युञ्जयजपं चरेत्
शङ्करस्य प्रसादेन ततः सुखमवाप्नुयात् ४६

**45-46. There will be fear of premature death, if Mars is 2nds, or 7ths Lord. The remedial measures to be adopted to obtain relief from the above evil effects are Mrityunjaya Japa and giving a cow in ch6thty.**

बुधस्यान्तर्गते राहौ केन्द्रलाभत्रिकोणगे
कुलीरे कुम्भगे वापि कन्यायां वृषभेपि वा ४७

राजसम्मानकीर्ती च धनं च प्रभविष्यति
पुण्यतीर्थस्थानलाभो देवतादर्शनं तथा ४८

इष्तापूर्ते च महतो मानश्चाम्बरलाभकृत्
भुक्त्यादौ देहपीडा च त्वन्ते सौख्यं विनिर्दिशेत् ४९

लग्नाष्टव्ययराशिस्थे तद्भुक्तौ धननाशनम्
भुक्त्यादौ देहनाशश्च वातज्वरमजीर्णकृत् ५०

**47-50. Effects, like reverence from the king, good reputation, gain of wealth, visits to sacred shrines, performance of religious sacrifices and oblations, recognition, gain of clothes etc., are derived in the Antar Dasha of Rahu in the Dasha of Mercury, if Rahu is in a Kendra, or Trikona, or, if Rahu is in Aries, Aquarius, Virgo, or Taurus. There will be some evil effects at the commencement of the Antar Dasha, but all will be well later.**

लग्नादुपचये राहौ शुभग्रहसमन्विते
राजसंलापसन्तोषो नूतनप्रभुदर्शनम् ५१

**51. There will be an opportunity to have conversation, or a meeting with the king, if Rahu is in 3rd, 8th, 10th, or 11th. In this position, if Rahu be associated with a benefic, there will be a visit to a new king.**

दायेशाद्द्वादशे वापि ह्यष्टमे पापसंयुते
निष्ठुरं राजकार्याणि स्थानभ्रंशो महद्भयम्  ५२

बन्धनं रोगपीडा च निजबन्धुमनोव्यथा
हृद्रोगो मानहानिश्च धनहानिर्भविष्यति  ५३

**52-53. Pressure of hard work, as a government functionary, loss of position, fears, imprisonment, diseases, agony to self and kinsmen, heart disease, loss of reputation and wealth, will be the results, if Rahu is associated with a malefic, or malefics in the 8th, or 12th from the Lord of the Dasha.**

द्वितीयसप्तमस्थे वा ह्यपमृत्युर्भविष्यति
तद्दोषपरिहारार्थं दुर्गालक्ष्मीजपं चरेत्  ५४

श्वेतां गां महिषीं दद्यादायुरारोग्यदायिनीम्
जगदम्बाप्रसादेन ततः सुखमवाप्नुयात्  ५५

**54-55. There will be fear of premature death, if Rahu is in 2nd, or in 6th. The remedial measures to obtain relief from the above evil effects, are recitation of Mantras of Goddess Durga and Goddess Lakshmi in the prescribed manner and giving a tawny-coloured cow, or female buffalo in ch6thty.**

बुधस्यान्तर्गते जीवे लग्नात्केन्द्रत्रिकोणगे
स्वोच्चे वा स्वर्क्षगे वापि लाभे वा धनराशिगे  ५६

देहसौख्यं धनावाप्ती राजप्रीतिस्तथैव च
विवाहोत्सवकार्याणि नित्यं मिष्ठान्नभोजनम्  ५७

गोमहिष्यादिलाभश्च पुराणश्रवणादिकम्
देवतागुरुभक्तिश्च दानधर्ममखादिकम्  ५८

**56-58. Effects, like physical felicity, gain of wealth, beneficence of the king, celebration of auspicious functions, like marriage etc., at home, availability of sweetish preparations, increase in cattle wealth, attending discourses on Puranas etc., devotion to deities and the preceptor, interest in religion, charities etc., worship of Lord Shiva etc., will be derived in the Antar Dasha of Jupiter in the Dasha of Mercury, if Jupiter is in a Kendra, Trikona, or in 11th, or, if Jupiter is in his exaltation, or in his own Rāśi.**

यज्ञकर्मप्रवृद्धिश्च शिवपूजाफलं तथा
नीचे वास्तंगते वापि षष्ठाष्टव्ययगेऽपि वा  ५९

शन्यारदृष्टसंयुक्ते कलहो राजविग्रहः
चौरादिदेहपीडा च पितृमातृविनाश्नम्  ६०
मानहानि राजदण्डो धनहानिर्भविष्यति
विषाहिज्वरपीडा च कृषिभूमिविनाशनम्  ६१

**59-61. Discord with king and kinsmen, danger from thieves etc., death of parents, disgrace, punishment from government, loss of wealth, danger from snakes and poison, fever, losses in agricultural production, loss of lands etc., will be the results, if Jupiter is in his debilitation Rāśi, is combust, or is in 6th, 8th, or in 12th, or, if Jupiter is associated with, or receives a Aspect from Saturn and Mars.**

दयेशात्केन्द्रकोणे वा लाभे वा बलसंयुते
बन्धुपुत्रहृदुत्साहो शुभं च धनसंयुतम्  ६२

पशुवृद्धिर्यशोवृद्धिरन्नदानादिकं फलम्
दायेशात्षष्ठरन्ध्रे वा व्यये वा बलवर्जिते  ६३

**62-63. There will be happiness from kinsmen and from ones son, enthusiasm, increase in wealth and name and fame, giving grains etc. in ch6thty, if Jupiter is in a Kendra, Trikona, or in the 11th from the Lord of the Dasha and, if Jupiter is endowed with strength.**

अङ्गतापश्च वैकल्यं देहबाधा भविष्यति
कलत्रबन्धुवैषम्यं राजकोपो धनक्षयः  ६४

**64-64. Agony, anxiety, danger from diseases, antagonism with wife and kinsmen, wrath of the king, quarrels, loss of wealth, danger from Brahmins will be the results, if Jupiter is weak and, if Jupiter is in the 6th, 8th, or 12th from the Lord of the Dasha.**

अकस्मात्कलहाद्भीतिः प्रमादो द्विजतो भयम्
द्वितीयसप्तमस्थे वा देहबाधा भविष्यति ६५

तद्दोषपरिहारार्थं शिवसाहस्रकं जपेत्
गोभूहिरण्यदानेन सर्वारिष्टं व्यपोहति ६६

**65-66. There will be physical distress, if Jupiter is 2nds, or 7ths Lord, or, if Jupiter is in 2nd, or 7th. The remedial measures to obtain relief from the above evil effects are recitation of Shiva Sahasranam and giving a cow and gold in ch6thty.**

सौम्यस्यान्तर्गते मन्दे स्वोच्चे स्वक्षेत्रकेन्द्रगे
त्रिकोणलाभगे वापि गृहे कल्याणवर्द्धनम् ६७

राज्यलाभं महोत्साहं गृहं गोधनसंकुलम् ६८

**67-68. Effects, like well-being in the family, acquisition of a kingdom, enthusiasm, increase in cattle wealth, gain of a position, visits to sacred shrines etc., will be derived in the Antar Dasha of Saturn in the Dasha of Mercury, if Saturn is in his exaltation, his in his own Rāśi, or in a Kendra, or Trikona, or in 11th.**

शुभस्थानफलवाप्तिं तीर्थवासं तथादिशेत्
अष्टमे वा व्यये मन्दे दायेशाद्वा तथैव च ६९

अरातिदुःखबाहुल्यं दारपुत्रादिपीडनम्
बुद्धिभ्रंशो बन्धुनाशः कर्मनाशो मनोरुजः ७०

**69-70. Danger from enemies, distress to wife and children, loss of thinking power, loss of kinsmen, loss in ventures, mental agony, journeys to foreign lands and bad dreams will be the results, if Saturn is in the 8th, or 12th from the Lord of the Dasha.**

विदेशगमनं चैव दुःस्वप्नादिप्रदर्शनम्
द्वितीयद्यूननाथे तु ह्यपमृत्युर्भविष्यति ७१

तद्दोषपरिहारार्थं मृत्युञ्जयजपं चरेत्
कृष्णां गां महिषीं दद्यादायुरारोग्यवृद्धये ७२

**71-72. There will be fear of premature death, if Saturn is 2nds, or 7ths Lord. The remedial measures to obtain relief from the above evil effects and to regain sound health are performance of Mrityunjaya Japa and giving a black cow and female buffalo in ch6thty.**

अथ केत्वन्तर्दशाफलाध्यायः ५६
केन्द्रे त्रिकोणलाभे वा केतौ लग्नेशसंयुते
भाग्यकर्मसुसम्बन्धे वाहनेशसमन्विते १

तद्भुक्तौ धनधान्यादि चतुष्पाज्जीवलाभकृत्
पुत्रदारादिसौख्यं च राजप्रीतिमनोरुजः २

## Ch. 59. Effects of the Antar Dashas in the Dasha of Ketu

**1-2. Effects, like happiness from wife and children, recognition from the king, but mental agony, gain of land, village etc. will be derived in the Antar Dasha of Ketu in his own Dasha, if Ketu is in a Kendra, or Trikona, or, if Ketu is related to 9ths, 10ths, or 4ths Lord.**

ग्रामभूम्यादिलाभश्च गृहं गोधनसंकुलम्
नीचास्तखेटसंयुक्ते ह्यष्टमे व्ययगेऽपि वा ३

हृद्रोगो मानहानिश्च धनधान्यपशुक्षयः
दारपुत्रादिपीडा च मनश्चांचल्यमेव च ४

**3-4. Heart disease, defamation, destruction of wealth and cattle, distress to wife and children, instability of mind etc. will we be the results, if Ketu is in his debilitation Rāśi and, if Ketu is in 8th, or 12th along with a combust Planet.**

द्वितीयद्यूननाथेन सम्बन्धे तत्र संस्थिते
अनारोग्यं महत्कष्टमात्मबन्धुवियोगकृत् ५

दुर्गादेवीजपं कुर्यान्मृत्युञ्जयजपं चरेत्
एवं स्वान्तर्गते केतौ ततः सुखमवाप्नुयात् ६

**5-6. There will be danger from diseases, great distress and separation from kinsmen, if Ketu is related to 2nds, or 7ths Lord, or, if Ketu is in 2nd, or 7th. The remedial measures to obtain relief from the above evil effects are performance of Durga Saptashati Japa and Mrityunjaya Japa.**

केतोरन्तर्गते शुक्रे स्वोच्चे स्वक्षेत्रसंयुते
केन्द्रत्रिकोणलाभे वा राज्यनाथेन संयुते ७

राजप्रीतिं च सौभाग्यं दिशोत्स्वाम्बरसंकुलम्
तत्काले श्रियमाप्नोति भाग्यकर्मेशसंयुते ८

नष्टराज्यधनप्राप्तिं सुखवाहनमुत्तमम्
सेतुस्नानादिकं चैव देवतादर्शनं महत् ९

**7-9. Effects, like beneficence from the king, good fortune, gain of clothes etc., recovery of lost kingdom, comforts of conveyances etc., visits to sacred shrines and gain of lands and villages by the beneficence of the king, will be derived in the Antar Dasha of Venus in the Dasha of Ketu, if Venus is in his exaltation, in his own Rāśi, or, if Venus is associated with 10ths Lord in a Kendra, or Trikona and there will be dawn of fortune, if in such position he is associated with 9ths Lord also.**

महाराजप्रसादेन ग्रामभूम्यादिलाभकृत्
दायेशात्केन्द्रकोणे वा दुश्चिक्ये लाभगेऽपि वा १०

देहारोग्यं शुभं चैव गृहे कल्याणशोभनम्
भोजनाम्बरभूषाप्तिरथदोलादिलाभकृत् ११

**10-11. Sound health, well-being in the family and gains of good food and conveyances etc. will be the results, if Venus is in a Kendra, Trikona, or in the 3rd, or 11th from the Lord of the Dasha.**

दायेशाद्रिपुरन्ध्रस्थे व्यये वा पापसंयुते
अकस्मात्कलहं चैव पशुधान्यादिपीडनम् १२

नीचस्थे खेटसंयुक्ते लग्नात्षष्ठाष्टराशिगे
स्वबन्धुजनवैषम्यं शिरोक्षिव्रणपीडनम् १३

हृद्रोगं मानहानिं च धनधान्यपशुक्षयम्
कलत्रपुत्रपीडायाः सञ्चारं च समादिशेत् १४

**12-14. There will be quarrels without any cause, loss of wealth, distress to cattle, if Venus is in the 6th, 8th, or 12th from the Lord of the Dasha. If Venus is in his debilitation Rāśi, or, if Venus is associated with a debilitated Planet, or, if Venus is in 6th, or 8th, there will be quarrels with kinsmen, headaches, eye troubles, heart disease, defamation, loss of wealth and distress to cattle and wife.**

द्वितीयद्यूननाथे तु देहजाड्यं मनोरुजम्
तद्दोषपरिहारार्थं दुर्गादेवीजपं चरेत्
श्वेतां गां महिषीं दद्यादायुरोग्यवृद्धये १५

**15. Physical distress and mental agony will be caused, if Venus is 2nds, or 7ths Lord. The remedial measures to obtain relief from the above evil effects are performance of Durga Path and giving a tawny-coloured cow, or female buffalo in ch6thty.**

केतोरन्तर्गते सूर्ये स्वोच्चे स्वक्षेत्रगेऽपि वा
केन्द्रत्रिकोणलाभे वा शुभयुक्तनिरीक्षिते १६

धनधान्यादिलाभश्च राजानुग्रहवैभवम्
अनेकशुभकार्याणि चेष्टसिद्धिः सुखावहा १७

**16-17. The effects, like gains of wealth, beneficence of the king, performance of pious deeds and fulfillment of all ambitions, will be derived in the Antar Dasha of Sun in the Dasha Ketu, if Sun is in his exaltation, in his own Rāśi, or, if Sun is associated with, or receives a Aspect from a benefic in a Kendra, Trikona, or in 11th.**

अष्टमव्ययराशिस्थे पापग्रहसमन्विते
तद्भुक्तौ राजभीतिश्च पितृमातृवियोगकृत् १८

विदेशगमनं चैव चौराहिविषपीडनम्
राजमित्रविरोधश्च राजदण्डाद्धनक्षयः १९

**18-19. Danger from the king, separation from parents, journeys to foreign lands, distress from thieves, snakes and poison, punishment by government, antagonism with the friends, sorrows, danger from fever etc. will be the results, if Sun is associated with a malefic, or malefics in 8th, or in 12th.**

शोकरोगभयं चैव उष्णाधिक्यं ज्वरो भवेत्
दायेशात्केन्द्रकोणे वा लाभे वा धनसंस्थिते २०

देहसौख्यं चार्थलाभो पुत्रलाभो मनोदृढम्
सर्वकार्यार्थसिद्धिः स्यात्स्वल्पग्रामाधिपत्ययुक् २१

**20-21. There will be physical fitness, gain of wealth, or the birth of a son, success in performance of pious deeds, headship of a small village etc., if Sun is in a Kendra, Trikona, in the 2nd, or 11th from the Lord of the Dasha.**

दायेशाद्रन्ध्ररिःफे वा स्थिते वा पापसंयुते
अन्नविघ्नो मनोभीतिर्धनधान्यपशुक्षयः २२

आदौ मध्ये महाक्लेशानन्ते सौख्यं विनिर्दिशेत्
द्वितीयसप्तमाधीशे ह्यपमृत्युर्भविष्यति २३

तस्य शान्तिं प्रकुर्वीत स्वर्णं धेनुं प्रदापयेत्
भास्करस्य प्रसादेन ततः सुखमवाप्नुयात् २४

**22-24. Obstacles in availability of food, fears and loss of wealth and cattle will be the results, if Sun is associated with evil Planets in the 8th, or 12th from the Lord of the Dasha. There will be distress at the commencement of the Antar Dasha with some mitigation at its end. There will be fear of premature death, if Sun is 2nds, or 7ths Lord. The remedial measure to obtain relief from the above evil effects and to regain comforts by the beneficence of Sun is to give a cow and gold in ch6thty.**

केतोरन्तर्गते चन्द्रे स्वोच्चे स्वक्षेत्रगेऽपि वा
केन्द्रत्रिकोणलाभे वा धने शुभसमन्विते २५

राजप्रीतिर्महोत्साहः कल्याणं च महत्सुखम्
महाराजप्रसादेन गृहभूम्यादिलाभकृत् २६

भोजनाम्बरपश्वादिव्यवसायेऽधिकं फलम्
अश्ववाहनलाभश्च वस्त्राभरणभूषणम् २७

देवालयतडागादिपुण्यधर्मादिसङ्ग्रहम्
पुत्रदारादिसौख्यं च पूर्णचन्द्रः प्रयच्छति २८

**25-28. Effects, like recognition from the king, enthusiasm, well-being, enjoyments, acquisition of a house, lands etc., abnormal gains of food, clothes, conveyances, cattle etc., success in business, construction of reservoirs etc. and happiness to wife and children, will be derived in the Antar Dasha of Moon in the Dasha of Ketu, if Moon is in her exaltation, in her own Rāśi, in a Kendra, Trikona, in 11th, or in 2nd. The beneficial results will be realized fully, if Moon is waxing.**

देवालयतडागादिपुण्यधर्मादिसङ्ग्रहम्
पुत्रदारादिसौख्यं च पूर्णचन्द्रः प्रयच्छति २८

क्षीणे वा नीचगे चन्द्रे षष्ठाष्टव्ययराशिगे
आत्मसौख्यं मनस्तापं कार्यविघ्नं महद्भयम् २९

पितृमातृवियोगं च देहजाड्यं मनोव्यथाम्
व्यवसायात्फलं कष्टं पशुनाशं भयं वदेत् ३०

**29-30. Unhappiness and mental agony, obstacles in ventures, separation from parents, losses in business, destruction of cattle etc. will be caused, if Moon is in her debilitation Rāśi, or in 6th, 8th, or 12th.**

दायेशात्केन्द्रकोणे वा लाभे वा बलसंयुते
कृषिगोभूमिलाभं च इष्टबन्धुसमागमम् ३१

तस्मात्स्वकार्यसिद्धिं च गृहे गोक्षीरमेव च
भुक्त्यादौ शुभमारोग्यं मध्ये राजप्रियं शुभम् ३२

अन्ते तु राजभीतिं च विदेशगमनं तथा
दूरयात्रादिसञ्चारं सम्बन्धिजनपूजनम् ३३

**31-33. There will be the acquisition of a cow, or cows, land, agricultural lands, meeting kinsmen and the achievement of success through them, increase in cows milk and curd, if Moon is in a Kendra, Trikona, or in the 11th from the Lord of the Dasha and, if Moon is endowed with strength. There will be auspicious results at the commencement of the Antar Dasha, cordial relations with the king in the middle portion of the Antar Dasha and danger from the king, foreign journey, or journeys to distant places at its end.**

दायेशात्षष्ठरिःफे वा रन्ध्रे वा बलवर्जिते
धनधान्यादिहानिश्च मनोव्यात्कुलमेव च ३४

स्वबन्धुजनवैरं च भ्रातृपीडा तथैव च
निधनाधिपदोषेण द्विसप्तपतिसंयुते ३५

अपमृत्युभयं तस्य शान्तिं कुर्याद्यथाविधि
चन्द्रप्रीतिकरीं चैव ह्यायुरारोग्यसिद्धये ३६

**34-36. Loss of wealth, anxiety, enmity with kinsmen and distress to brother, will be the results, if Moon is in the 6th, 8th, or 12th from the Lord of the Dasha. If Moon is 2nds, 7ths, or 8ths Lord, there will be fear of premature death. The remedial measures to obtain relief from the above effects are recitation of Mantras of Moon and giving in ch6thty things, connected with Moon.**

केतोरन्तर्गते भौमे लग्नात्केन्द्रत्रिकोणगे
स्वोच्चे स्वक्षेत्रगे वाऽपि शुभग्रहयुतेक्षिते ३७

आदौ शुभफलं चैव ग्रामभूम्यादिलाभकृत्
धनधान्यादिलाभश्च चतुष्पाज्जीवलाभकृत् ३८

गृहारामक्षेत्रलाभो राजानुग्रहवैभवम्
भाग्ये कर्मेशसम्बन्धे भूलाभः सौख्यमेव च ३९

**37-39. Effects, like acquisition of land, village etc., increase in wealth and cattle, laying out of a new garden, gain of wealth by the beneficence of the king, will be derived in the Antar Dasha of Mars in the Dasha of Ketu, if Mars is in his exaltation, in his own Rāśi, if Mars is associated with, or, receives a Aspect from benefics. If Mars is related to 9ths, or 10ths Lord, there will definitely be gain of land and enjoyment.**

दायेशात्केन्द्रकोणे वा दुश्चिक्ये लाभगेऽपि वा
राजप्रीतियशोलाभः पुत्रमित्रादिसौख्यकृत् ४०

**40. There will be recognition from the king, great popul6thty and reputation and happiness from children and friends, if Mars is in a Kendra, Trikona, or in the 3rd, or 11th from the Lord of the Dasha.**

तथाऽष्टमव्यये भौमे दायेशाद्धनगेऽपि वा
द्रुतं करोति मरणं विदेशे चापदं भ्रमम् ४१

प्रमेहमूत्रकृच्छ्रादिचौरादिनृपपीडनम्
कलहादि व्यथायुक्तं किञ्चित्सुखविवर्द्धनम् ४२

**41-42. There will be fear of death/disaster during a foreign journey, diabetes, unnecessary troubles, danger from thieves and the king and quarrels, if Mars is in the 8th, 12th, or 2nd from the Lord of the Dasha. In the above circumstances amidst evil effects there will be some auspicious effects also.**

द्वितीयद्यूननाथे तु तापज्वरविषाद्भयम्
दारपीडा मनःक्लेशमपमृत्युभयं भवेत् ४३

अनड्वाहं प्रदद्यात्तु सर्वसम्पत्सुखावहम्
ततः शान्तिमवाप्नोति भौमग्रहप्रसादतः ४४

**43-44. High fever, danger from poison, distress to wife, mental agony and fear of premature death will be the results, if Mars is 2nds, or 7ths Lord. By the beneficence of Mars there will be enjoyment and gain of property, if, as a remedial measure, a bull is given in ch6thty.**

केतोरन्तर्गते राहौ स्वोच्चे मित्रस्वराशिगे
केन्द्रत्रिकोणे लाभे वा दुश्चिक्ये धनसंज्ञके ४५

तत्काले धनलाभः स्यात्सञ्चारो भवति ध्रुवम्
म्लेच्छप्रभुवशात्सौख्यं धन्धान्यफलादिकम् ४६

चतुष्पाज्जीवलाभः स्याद्ग्रामभूम्यादिलाभकृत्
भुक्त्यादौ क्लेशमाप्नोति मध्यान्ते सौख्यमाप्नुयात् ४७

**45-47. Effects, like increase of wealth and gain of wealth, grains, cattle, lands, village from a Yavan king, will be derived in the Antar Dasha of Rahu in the Dasha of Ketu, if Rahu is in his exaltation, his own, in a friends Rāśi, or in a Kendra, or Trikona, or in 11th, or 3rd, or 2nd. There will be some trouble at the commencement of the Dasha, but all will be well later.**

रन्ध्रे वा व्ययगे राहौ पापसंदृष्टसंयुते
बहुमूत्रं कृशं देहं शीतज्वरविषाद्भयम् ४८

चातुर्थिकज्वरं चैव क्षुद्रोपद्रवपीडनम्
अकस्मात्कलहं चैव प्रमेहं शूलमादिशेत् ४९

द्वितीयसप्तमस्थे वा तदा क्लेशं महद्भयम्
तद्दोषपरिहारार्थं दुर्गादेवीजपं चरेत् ५०

**48-50. Frequent urination, weakness in the body, cold fever, danger from thieves, intermittent fever, opprobrium, quarrels, diabetes, pain in stomach will be the results, if Rahu is associated with a malefic in 8th, or in 12th. There will be distress and danger, if Rahu is in 2nd, or in 7th. The remedial measure to obtain relief from the above evil effects is Durga Saptashati Path.**

केतोरन्तर्गते जीवे केन्द्रे लाभे त्रिकोणगे
स्वोच्चे स्वक्षेत्रगे वापि लग्नाधिपसमन्विते ५१

कर्मभाग्याधिपैर्युक्ते धनधान्यार्थसंपदम्
राजप्रीतिं तदोत्साहमश्वांदोल्यादिकं दिशेत् ५२

गृहे कल्याणसम्पतिं पुत्रलाभं महोत्सवम्
पुण्यतीर्थं महोत्साहं सत्कर्म च सुखावहम् ५३

इष्टदेवप्रसादेन विजयं कार्यलाभकृत्
राजसंल्लापकार्याणि नूतनप्रभुदर्शनम् ५४

**51-54. Effects, like increase in wealth and grains, beneficence of the king, enthusiasm, gain of conveyances etc., celebration, like birth of a son at home, performance of pious deeds, Yagyas, conquest of the enemy and enjoyments, will be derived in the Antar Dasha of Jupiter in the Dasha of Ketu, if Jupiter is in his exaltation, in his own Rāśi, or is associated with Lagnas, 9ths, or 10ths Lord in a Kendra, or Trikona.**

षष्ठाष्टमव्यये जीवे दायेशान्नीचगेऽपि वा
चौराहिव्रणभीतिं च धनधान्यादिनाशनम् ५५

पुत्रदारावियोगं च त्वतीवक्लेशसम्भवम्
आदौ शुभफलं चैव अन्ते क्लेशकरं वदेत् ५६

**55-56. Danger from thieves, snakes and wounds, destruction of wealth, separation from wife and children, physical distress etc. will be the results, if Jupiter is in his debilitation Rāśi, or in 6th, 8th, or 12th. Though some good effects may be felt at the commencement of the Antar Dasha, there will be only adverse results later.**

दायेशात्केन्द्रकोणे वा दुश्चिक्ये लाभगेऽपि वा
शुभयुक्ते नृपप्रीतिर्विचित्राम्बरभूषणम् ५७

दूरदेशप्रयाणं च स्वबन्धुजनपोषणम्
भोजनाम्बरपश्वादि भुक्त्यादौ देहपीडनम् ५८

**57-58. There will be gains of many v6theties of garments, ornaments by the beneficence of the king, foreign journeys, taking care of kinsmen, availability of decent food, if Jupiter is associated with a benefic in a Kendra, Trikona, in the 3rd, or 11th from the Lord of the Dasha.**

अन्ते तु स्थानचलनमकस्मात्कलहो भवेत्
द्वितीयद्यूननाथे तु ह्यपमृत्युर्भविष्यति ५९

तद्दोषपरिहारार्थं शिवसाहस्रकं जपेत्
महामृत्युञ्जयं जाप्यं सर्वोपद्रवनाशनम् ६०

**59-60. Fear of premature death will be caused, if Jupiter is 2nds, or 7ths Lord. The remedial measures to obtain relief from the above evil effects are Mrityunjaya Japa and recitation of Shiva Sahasranama.**

केतोरन्तर्गते मन्दे स्वदशायां तु पीडनम्
बन्धोः क्लेशो मनस्तापश्चतुष्पाज्जीवलाभकृत् ६१
राजकार्यकलापेन धननाशो महद्भयम्
स्थानाच्च्युतिः प्रवासश्च मार्गे चौरभयं भवेत् ६२

**61-62. Effects, like distress to oneself and ones kinsmen, agony, increase in cattle wealth, loss of wealth, as a result of imposition of fines by government, resignation from the existing post, journeys to foreign lands and danger of thieves during traveling, will be derived in the Antar Dasha of Saturn in the Dasha of Ketu, if Saturn is deprived of strength and dignity. There will be loss of wealth and lethargy, if Saturn is in 8th, or 12th.**

आलस्यं मनसो हानिश्चाष्टमे व्ययराशिगे
मीनत्रिकोणगे मन्दे तुलायां स्वर्क्षगेऽपि वा ६३

केन्द्रत्रिकोणलाभे वा दुश्चिक्ये वा शुभांशके
शुभदृष्टयुते चैव सर्वकार्यार्थसाधनम् ६४

स्वप्रभोश्च महत्सौख्यं भ्रमणं च सुखावहम्
स्वग्रामे सुखसम्पत्तिः स्ववर्गे राजदर्शनम् ६५

**63-65. Success in all ventures, happiness from the employer, comforts during journeys, increase in happiness and property in ones own village, audience with the king etc. will be the results, if Saturn is in a Trikona in Pisces, in Libra, in his own Rāśi, or, if Saturn is in an auspicious Navāmśa, or is associated with a benefic in a Kendra, Trikona, or in 3rd. (According to Brihat Jatak, Saturn in Libra, Pisces, Sagittarius, Capricorn and Aquarius in Lagna gives Raja Yoga).**

दायेशात्षष्ठरिःफे वा अष्टमे पापसंयुते
देहतापो मनस्तापः कार्ये विघ्नो महद्भयम् ६६

आलस्यं मानहानिश्च पितृमात्रोर्विनाशनम्
द्वितीयद्यूननाथे तु ह्यपमृत्युभयं भवेत् ६७

तद्दोषपरिहारार्थं तिलहोमं च कारयेत्
कृष्णां गां महिषीं दद्यादायुरारोग्यवृद्धये ६८

**66-68. There will be physical distress, agony, obstacles in ventures, lethargy, defamation, death of parents, if Saturn is associated with a malefic, in the 6th, 8th, or 12th from the Lord of the Dasha. Fear of premature death may be expected, if Saturn is 2nds, or 7ths Lord. The remedial measures to obtain relief from the above evil effects are performance of Havan with sesame seeds (Til) and giving a black cow, or female buffalo in ch6thty.**

केतोरन्तर्गते सौम्ये केन्द्रलाभत्रिकोणगे
स्वोच्चे स्वक्षेत्रसंयुक्ते राज्यलाभो महत्सुखम् ६९

सत्कथाश्रवणं दानं धर्मसिद्धिः सुखावहा
भूलाभः पुत्रलाभश्च शुभगोष्ठीधनागमः ७०

अयत्नाद्धर्मलब्धिश्च विवाहश्च भविष्यति
गृहे शुभकरं कर्म वस्त्राभरणभूषणम् ७१

**69-71. Effects, like acquisition of a kingdom, enjoyments, charities, gain of wealth and land, birth of a son, celebration of religious functions and functions, like marriage suddenly, well-being in the family, gain of clothes, ornaments etc., will be derived in the Antar Dasha of Mercury in the Dasha of Ketu, if Mercury is in a Kendra, or Trikona, or, if Mercury is in his exaltation, or in his own Rāśi.**

भाग्यकर्माधिपैर्युक्ते भाग्यवृद्धिः सुखावहा
विद्वद्गोष्ठीकथाभिश्च कालक्षेपो भविष्यति ७२

**72. There will be association with men of learning, dawn of fortune and listening to religious discourses, if Mercury is associated with 9ths, or 10ths Lord.**

षष्ठाष्टमव्यये सौम्ये मन्दाराहियुतेक्षिते
विरोधो राजवर्गैश्च परगेहनिवासनम् ७३

वाहनाम्बरपश्वादिधनधान्यादिनाशकृत्
भुक्त्यादौ शोभनं प्रोक्तं मध्ये सौख्यं धनागमः ७४

**73-74. Antagonism with government officials, residing in other peoples houses, destruction of wealth, clothes, conveyances and cattle will be the results, if Mercury is associated with Saturn, Mars, or Rahu in 6th, 8th, or 12th. There will be some beneficial effects at the commencement of the Dasha, still better results in the middle, but inauspicious at the end.**

अन्ते क्लेशकरं चैव दारपुत्रादिपीडनम्
दायेशात्केन्द्रगे सौम्ये त्रिकोणे लाभगेऽपि वा ७५

देहारोग्यं महांल्लाभः पुत्रकल्याणवैभवम्
भोजनाम्बरपश्वादिव्यवसायेऽधिकं फलम् ७६

**75-76. There will be good health, happiness from ones son, opulence and glory, availability of good food and clothes and abnormal profits in business, if Mercury is in a Kendra, Trikona, or in the 11th from the Lord of the Dasha.**

दायेशात्षष्ठरन्ध्रे वा व्यये वा बलवर्जिते
तद्भुक्त्यादौ महाक्लेशो दारपुत्रादिपीडनम् ७७

राजभीतिकरश्चैव मध्ये तीर्थकरो भवेत्
द्वितीयद्यूननाथे तु ह्यपमृत्युर्भविष्यति ७८

तद्दोषपरिहारार्थं विष्णुसाहस्रकं जपेत्
ततः सुखमवाप्नोति श्रीहरेश्च प्रसादतः ७९

**77-79. Distress, unhappiness and troubles to wife and children and danger from the king may be expected at the commencement of the Antar Dasha, if Mercury is weak in the 6th, 8th, or 12th from the Lord of the Dasha. There will, however, be visits to sacred places in the middle of the Dasha. Fear of premature death will be caused, if Mercury is 2nds, or 7ths Lord. The remedial measure to obtain relief from the above evil effects is recitation of Vishnu Sahasranam.**

अथ शुक्रान्तर्दशाफलाध्यायः ६०

अथ स्वान्तर्गते शुक्रे लग्नात्केन्द्रत्रिकोणगे
लाभे वा बलसंयुक्ते तद्भुक्तौ च शुभं फलम् १

विप्रमूलाद्धनप्राप्तिर्गोमहिष्यादिलाभकृत्
पुत्रोत्सवादिसन्तोषो गृहे कल्याणसम्भवः २

## Ch. 60. Effects of the Antar Dashas in the Dasha of Venus

**1-2. Effects, like gain of wealth, cattle etc. through Brahmins, celebrations in connection with the birth of a son, well-being, recognition from the king, acquisition of a kingdom, will be derived in the Antar Dasha of Venus in his own Dasha, if Venus is in a Kendra, Trikona, or in 11th and, if Venus is endowed with strength.**

सन्मानं राजसम्मानं राज्यलाभो महत्सुखम्
स्वोच्चे वा स्वर्क्षगे वापि तुङ्गांशे वांशगेऽपि वा ३

नूतनालयनिर्माणं नित्यं मिष्ठान्नभोजनम्
कलत्रपुत्रविभवं मित्रसंयुक्तभोजनम् ४

अन्नदानं प्रियं नित्यं दानधर्मादिसङ्ग्रहः
महाराजप्रसादेन वाहनाम्बरभूषणम् ५

व्यवसायात्फलाधिक्यं चतुष्पाज्जीवलाभकृत्
प्रयाणं पश्चिमे भागे वाहनाम्बरलाभकृत् ६

**3-6. Construction of a new house, availability of sweet preparations, happiness to wife and children, companionship with a friend, giving grains etc. in ch6thty, beneficence of the king, gain of clothes, conveyances and ornaments, success in business, increase in the number of cattle, gain of garments by performing journeys in the western direction etc. will be the results, if Venus is in his exaltation, in his own Rāśi, or, if Venus is in his exalted, or own Navāmśa.**

लग्नाद्युपचये शुक्रे शुभग्रहयुतेक्षिते
मित्रांशे तुङ्गलाभेशयोगकारकसंयुते ७

राज्यलाभो महोत्साहो राजप्रीतिः शुभावहा
गृहे कल्याणसम्पत्तिर्दारपुत्रादिवर्द्धनम् ८

**7-8. There will be acquisition of a kingdom, enthusiasm, beneficence of the king, well-being in the family, increase in the number of wives, children and wealth etc., if Venus is associated with, or receives a Aspect from a benefic and is in a friendly Navāmśa, in 3rd, 6th, or 11th.**

षष्ठाष्टमव्यये शुक्रे पापयुक्तेऽथ वीक्षिते
चौरादिव्रणभीतिश्च सर्वत्र जनपीडनम् ९

राजद्वारे जनद्वेष इष्टबन्धुविनाशनम्
दारपुत्रादिपीडा च सर्वत्र जनपीडनम् १०

**9-10. Danger from thieves etc., antagonistic relations with government officials, destruction of friends and kinsmen, distress to wife and children may be expected, if Venus is associated with, or receives a Aspect from a malefic in 6th, 8th, or 12th.**

द्वितीयद्यूननाथे तु स्थिते चेन्मरणं भवेत्
तत्र दुर्गाजपं कुर्याद्धनुदानं च कारयेत् ११

**11. There will be fear of death, if Venus is 2nds, or 7ths Lord. Remedial measures to obtain relief from the above evil effects are Durga Path and giving a cow in ch6thty.**

शुक्रस्यान्तर्गते सूर्ये सन्तापो राजभिः कलिः
दायादात् कलहश्चैव शुभक्षेत्रात्य राशिगे १२

**12. There will be a period of agony, wrath of the king, quarrels with the coparceners etc. in the Antar Dasha of Sun in the Dasha of Venus, if Sun is in any Rāśi, other than his exaltation, or debilitation Rāśi. (This verse does not appear to be correctly worded, because Sun does produce good effects in a position, other than exaltation, or debilitation. The position is correctly stated in the Chowkambh version of this verse)**

स्वोच्चे स्वक्षेत्रगे सूर्ये मित्रर्क्षे केन्द्रकोणगे
दायेशात्केन्द्रकोणे वा लाभे वा धनगेऽपि वा १३

तद्भुक्तौ धनलाभः स्याद्राज्यस्त्रीधनसम्पदः
स्वप्रभोश्च महत्सौख्यमिष्टबन्धोः समागमः १४

पितृमात्रोः सुखप्राप्तिं भ्रातृलाभं सुखावहम्
सत्कीर्तिं सुखसौभाग्यं पुत्रलाभं च विन्दति १५

**13-15. Effects, like acquisition of a kingdom and wealth, happiness from wife and children, happiness from employer, meeting with friends, happiness from parents, marriage, name and fame, betterment of fortune, birth of a son etc., will be experienced, if Sun is in his exaltation, in his own Rāśi, in a Kendra, Trikona, in 2nd, or 11th, or in Kendra, Trikona, in the 2nd, or 11th from the Lord of he Dasha.**

तथाष्टमे व्यये सूर्ये रिपुराशिस्थितेऽपि वा
नीचे वा पापवर्गस्थे देहतापो मनोरुजः १६

स्वजनोपरिसंक्लेशो नित्यं निष्ठुरभाषणम्
पितृपीडा बन्धुहानी राजद्वारे विरोधकृत् १७

व्रणपीडाहिबाधा च स्वगृहे च भयं तथा
नानारोगभयं चैव गृहक्षेत्रादिनाशनम् १८

**16-18. Distress, agony, distress to members of the family, harsh language, distress to father, loss of kinsmen, wrath of the king, danger at home, many diseases, destruction of agricultural production etc. will be the results, if Sun is in 6th, 8th, or 12th, or, if Sun is in his debilitation, or in an enemy Rāśi.**

सप्तमाधिपतौ सूर्ये ग्रहबाधा भविष्यति
तद्दोषपरिहारार्थं सूर्यप्रीतिं च कारयेत् १९

शुक्रस्यान्तर्गते चन्द्रे केन्द्रलाभत्रिकोणगे
स्वोच्चे स्वक्षेत्रगे चैव भाग्यनाथेनसंयुते २०

**19-20. There will be evil influence of the Planets, if Sun is 2nds, or 7ths Lord. Worship of Sun is the remedial measure to obtain relief from the above evil effects.**

शुभयुक्ते पूर्णचन्द्रे राज्यनाथेन संयुते
तद्भुक्तौ वाहनादीनां लाभं गेहे महत्सुखम् २१

महाराजप्रसादेन गजान्तैश्वर्यमादिशेत्
महानदीस्नानपुण्यं देवब्राह्मणपूजनम् २२

**21-22. Effects, like gain of wealth, conveyances, clothes by the beneficence of the king, happiness in the family, great opulence and glory, devotion to deities and Brahmins, will be derived in the Antar Dasha of Moon in the Dasha of Venus, if Moon is in her exaltation, or in her own Rāśi, or is associated with the Lord of 9th, benefics, or with 10ths Lord, or, if Moon is in a Kendra, Trikona, or 11th.**

गीतवाद्यप्रसङ्गादिविद्वज्जनविभूषणम्
गोमहिष्यादिवृद्धिश्च व्यवसायेऽधिकं फलम् २३

**23-23. In the above circumstances there will also be association with musicians and men of learning and receiving of decorations, gain of cows, buffaloes and other cattle, abnormal profits in business, dining with brothers etc.**

भोजनाम्बरसौख्यं च बन्धुसंयुक्तभोजनम्
नीचे वास्तङ्गते वापि षष्ठाष्टमव्ययराशिगे २४

दायेशात्षष्ठगे वापि रन्ध्रे वा व्ययराशिगे
तत्काले धननाशः स्यात्सञ्चरेत महद्भयम् २५

देहायासो मनस्तापो राजद्वारे विरोधकृत्
विदेशगमनं चैव तीर्थयात्रादिकं फलम् २६

**24-26. Loss of wealth, fears, physical distress, agony, wrath of the king, journeys to foreign lands, or pilgrimage, distress to wife and children and separation from kinsmen will be the results, if Moon is in her debilitation Rāśi, is combust, or is in 6th, 8th, or 12th, or, if Moon is in the 6th, 8th, or 12th from the Lord of the Dasha.**

दारपुत्रादि पीडा च निजबन्धुवियोगकृत्
दायेशात्केन्द्रलाभस्थे त्रिकोणे सहजेऽपि वा २७

राजप्रीतिकरी चैव देशग्रामाधिपत्यता
धैर्यं यशः सुखं कीर्तिर्वाहनाम्बरभूषणम् २८

कूपारामतडागादिनिर्माणं धनसङ्ग्रहः
भुक्तयादौ देहसौख्यं स्यादन्ते क्लेशस्तथा भवेत् २९

**27-29. There will be sovereignty over a province, or village by the beneficence of the king, clothes etc., construction of a reservoir, increase in wealth etc., if Moon is in a Kendra, or Trikona, or in the 3rd, or 11th from the Lord of the Dasha. There will be physical fitness at the commencement of the Antar Dasha and physical distress in its last portion.**

शुक्रस्यान्तर्गते भौमे लग्नात्केन्द्रत्रिकोणगे
स्वोच्चे वा स्वर्क्षगे भौमे लाभे वा बलसंयुते ३०

लग्नाधिपेन संयुक्ते कर्मभाग्येशसंयुते
तद्भुक्तौ राजयोगादिसम्पदं शोभनां वदेत् ३१

**30-31. Effects, like acquisition of kingdom, property, clothes, ornaments, land and desired objects, will be derived in the Antar Dasha of Mars in the Dasha of Venus, if Mars is in a Kendra, or Trikona, or in 11th, or, if Mars is in his exaltation Rāśi, or is in one of his own Rāśis, or is associated with the Lagnas, 9ths, or 10ths Lord.**

वस्त्राभरणभूम्यादेरिष्टसिद्धिः सुखावहा
तथाऽष्टमे व्यये वाऽपि दायेशाद्वा तथैव च ३२

शीतज्वरादिपीडा च पितृमातृभयावहा
ज्वराद्यधिकरोगाश्च स्थानभ्रंशो मनोरुजा ३३

स्वबन्धुजनहानिश्च कलहो राजविग्रहः
राजद्वारजनद्वेषो धनधान्यव्ययोऽधिकः ३४

**32-34. There will be fever from cold, diseases (like fever) to parents, loss of position, quarrels, antagonism with the king and government officials, extravagant expenditure etc., if Mars is in 6th, 8th, or 12th, or, if Mars is in the 6th, 8th, or 12th from the Lord of the Dasha.**

व्यवसायात्फलं नेष्टं ग्रामभूम्यादिहानिकृत्
द्वितीयद्यूननाथे तु देहबाधा भविष्यति ३५

**35. Physical distress, losses in profession, loss of village, land etc. will be the results, if Mars is the 2nds, or 7ths Lord.**

शुक्रस्यान्तर्गते राहौ केन्द्रलाभत्रिकोणगे
स्वोच्चे वा शुभसंदृष्टे योगकारकसंयुते ३६

तद्भुक्तौ बहुसौख्यं च धनधान्यादिलाभकृत्
इष्टबन्धुसमाकीर्णं भवनं च समादिशेत् ३७

**36-37. Effects, like great enjoyment, gain of wealth, visits of friends, successful journeys, gain of cattle and land etc., will be derived in the Antar Dasha of Rahu in the Dasha of Venus, if Rahu is in a Kendra, or Trikona, or in 11th, or, if Rahu is in his exaltation, or in his own Rāśi, or is associated with, or receives a Aspect from benefics.**

यातुः कार्यार्थसिद्धिः स्यात् पशुक्षेत्रादिसम्भवः
लग्नाद्युपचये राहौ तद्भुक्तिः सुखदा भवेत् ३८

शत्रुनाशो महोत्साहो राजप्रीतिकरी शुभा
भुक्त्यादौ शरमासांश्च अन्ते ज्वरमजीर्णकृत् ३९

**38-39. Enjoyments, destruction of enemy, enthusiasm and beneficence of the king will be the results, if Rahu is in 3rd, or 6th, or 10th, or 11th. Good effects will be experienced up to 5 months from the commencement of the Antar Dasha, but at the end of the Dasha there will be danger from fevers and indigestion.**

कार्यविघ्नमवाप्नोति सञ्चरे च मनोव्यथा
परं सुखं च सौभाग्यं महाराज इवाऽश्नुते ४०

नैर्ऋतीं दिशमाश्रित्य प्रयाणं प्रभुदर्शनम्
यातुः कार्यार्थसिद्धिः स्यात्स्वदेशे पुनरेष्यति ४१

**40-41. In the above circumstances, except for obstacles in ventures and journeys and worries, there will be all enjoyment, like those of a king. Journeys to foreign lands will bring success and the person will return safely to his homeland. There will also be blessings from Brahmins and auspicious results consequent to visits to holy places.**

उपकारो ब्राह्मणानां तीर्थयात्राफलं भवेत्
दायेशाद्रन्ध्रभावस्थे व्यये वा पापसंयुते ४२

अशुभं लभते कर्म पितृमातृजनावधि
सर्वत्र जनविद्वेषं नानारूपं द्विजोत्तम ४३

द्वितीये सप्तमे वापि देहालस्य विनिर्दिशेत्
तद्दोषपरिहारार्थं मृत्युञ्जयजपं चरेत् ४४

**42-44. There will be inauspicious effects on oneself and ones parents and antagonism with people, if Rahu be associated with a malefic in the 8th, or 12th from the Lord of the Dasha. Physical distress will be caused, if Rahu is 2nds, or 7ths Lord. The remedial measure to obtain relief from the above evil effects is Mrityunjaya Japa.**

शुक्रस्यान्तर्गते जीवे स्वोच्चे स्वक्षेत्रकेन्द्रगे
दायेशाच्छुभराशिस्थे भाग्ये वा पुत्रराशिगे ४५

नष्टराज्याद्धनप्राप्तिमिष्टार्थाम्बरसम्पदम्
मित्रप्रभोश्च सन्मानं धनधान्यं लभेन्नरः ४६

राजसम्मानकीर्तिं च अश्वान्दोलादिलाभकृत्
विद्वत्प्रभुसमाकीर्णं शास्त्रापरिश्रमम् ४७

पुत्रोत्सवादिसन्तोषमिष्टबन्धुसमागमम्
पितृमातृसुखप्राप्तिं पुत्रादिसौख्यमादिशेत् ४८

**45-48. Effects, like recovery of the lost kingdom, acquisition of desired grains, clothes and property etc., reverence from ones friend and the king and gain of wealth, recognition from the king, good reputation, gain of conveyances, association with an employer and with men of learning, industriousness in the study of Shastras, birth of a son, satisfaction, visits of close friends, happiness to parents and son etc., will be derived in the Antar Dasha of Jupiter in the Dasha of Venus, if Jupiter is in his exaltation, in his own Rāśi, or in a Kendra, or Trikona to Lagna, or to the Lord of the Dasha.**

दायेशात्षष्ठराशिस्थे व्यये वा पापसंयुते
राजचौरादिपीडा च देहापीडा भविष्यति ४९

आत्मरुग्बन्धुकष्टं स्यात्कलहेन मनोव्यथा
स्थानच्युतिं प्रवासं च नानारोगं समाप्नुयात् ५०

**49-50. There will be danger from the king and from thieves, distress to oneself and to kinsmen, quarrels, mental agony, loss of position, going away to foreign lands and danger of many kinds of diseases, if Jupiter is in the 6th, 8th, or 12th from the Lord of the Dasha and be associated with a malefic.**

द्वितीयसप्तमाधीशे देहबाधा भविष्यति
तद्दोषपरिहारार्थं महामृत्युञ्जयं चरेत् ५१

**51. There will be physical distress, if Jupiter is 2nds, or 7ths Lord. The remedial measure to obtain relief from the above evil effects is Mrityunjaya Japa.**

शुक्रस्यान्तर्गते मन्दे स्वोच्चे तु परमोच्चगे
स्वर्क्षकेन्द्रत्रिकोणस्थे तुङ्गांशे स्वांशगेऽपि वा ५२

तद्भुक्तौ बहुसौख्यं स्यादिष्टबन्धुसमागमः
राजद्वारे च सम्मानं पुत्रिकाजन्मसम्भवः ५३

पुण्यतीर्थफलावाप्तिर्दानधर्मादिपुण्यकृत्
स्वप्रभोश्च पदावाप्तिः नीचस्थे क्लेशभाग्यभवेत् ५४

**52-54. Effects, like great enjoyments, visits of friends and kinsmen, recognition from the king, birth of a daughter, visits to holy places and sacred shrines, conferment of authority by the king, will be derived in the Antar Dasha of Saturn in the Dasha of Venus, if Saturn is in his exaltation, in his own Rāśi, in a Kendra, Trikona, or in his own Navāmśa.**

देहालस्यमवाप्नोति तथायादधिकव्ययम्
तथाष्टमे व्यये मन्दे दायेशाद्वा तथैव च ५५

भुक्त्यादौ विविधा पीडा पितृमातृजनावधि
दारपुत्रादिपीडा च परदेशादिविभ्रमः ५६

व्यवसायात्फलं नष्टं गोमहिष्यादिहानिकृत्
द्वितीयसप्तमाधीशे देहबाधा भविष्यति ५७

**55-57. There will be lethargy and more expenditure than income, if Saturn is in his debilitation Rāśi. Many kinds of distresses and troubles at the commencement of the Antar Dasha, like stress to parents, wife and children, going away to foreign lands, losses in profession, destruction of cattle etc., will be the results, if Saturn is in 8th, or 11th, or 12th, or, if Saturn is in the 8th, 11th, or 12th from the Lord of the Dasha. There will be physical distress, if Saturn is 2nds, or 7ths Lord.**

तद्दोषपरिहारार्थं तिलहोमं च कारयेत्
मृत्युञ्जयजपं कुर्याच्चण्डीपाठमाथपि वा ५८

स्वयं वा ब्राह्मणद्वारा यथाशक्ति यथाविधि
ततः शान्तिमवाप्नोति शिवाशम्भुप्रसादतः ५९

**58-59. The remedial measures to obtain relief from the above evil effects, are Havan with sesame seeds (Til), Mrityunjaya Japa, Durga Saptashati Path (by oneself, or through a Brahmin).**

शुक्रस्यान्तर्गते सौम्ये केन्द्रे लाभत्रिकोणगे
स्वोच्चे वा स्वर्क्षगे वापि राजप्रीतिकरं शुभम् ६०

सौभाग्यं पुत्रलाभश्च सन्मार्गेण धनागमः
पुराणधर्मश्रवणं शृङ्गारिजनसंगमः ६१

इष्टबन्धुजनाकीर्णं शोभितं तस्य मन्दिरम्
स्वप्रभोश्च महत्सौख्यं नित्यं मिष्ठान्नभोजनम् ६२

**60-62. Effects, like dawn of fortune, birth of a son, gain of wealth through judgment of court, listening to stories from the Puranas, association with persons, competent in poetry etc., visits of close friends, happiness from employer, availability of sweetish preparations etc., will be derived in the Antar Dasha of Mercury in the Dasha of Venus, if Mercury is in a Kendra, or Trikona, or in 11th (from Lagna, or from the Lord of the Dasha), or is in his exaltation, or in his own Rāśi.**

दायेशात्षष्ठरन्ध्रे वा व्यये वा बलवर्जिते
पापदृष्टे पापयुक्ते चतुष्पाज्जीवहानिकृत् ६३

अन्यालयनिवासश्च मनोवैकल्यसम्भवः
व्यापारेषु च सर्वेषु हानिरेव न संशयः ६४

भुक्त्यादौ शोभनं प्रोक्तं मध्ये मध्यफलं दिशेत्
अन्ते क्लेशकरं चैव शीतवातज्वरादिकम् ६५

**63-65. If Mercury is in the 6th, 8th, or 12th from the Lord of Dasha, or, if Mercury is weak, or is associated with a malefic, there will be agony, loss of cattle, residence in other peoples houses and losses in business. There will be some good effects at the commencement, moderate in the middle portion and distress from fever etc. at the end of the Antar Dasha.**

सप्तमाधीशदोषेण देहपीडा भविष्यति
तद्दोषपरिहारार्थं विष्णुसाहस्रकं जपेत् ६६

**66. There will be physical distress, if Mercury is 2nds, or 7ths Lord. The remedial measure to obtain relief from the above evil effects is the recitation of Vishnu Sahasranam.**

शुक्रस्यान्तर्गते केतौ स्वोच्चे वा स्वर्क्षगेऽपि वा
योगकारकसम्बन्धे स्थानवीर्यसमन्विते ६७

भुक्त्यादौ शुभमाधिक्यान्नित्यं मिष्ठान्नभोजनम्
व्यवसायात्फलाधिक्यं गोमहिष्यादिवृद्धिकृत् ६८

**67-68. Auspicious effects, like availability of sweetish preparations, abnormal gains in profession and increase in cattle wealth, will be derived from the very commencement of the Antar Dasha of Ketu in the Dasha of Venus, if Ketu is in his exaltation, or in his own Rāśi, or is related to a Yoga Karak Planet, or, if Ketu is possessed of positional strength. (It is not laid down anywhere, in which House Ketu does get positional strength).**

धनधान्यसमृद्धिश्च संग्रामे विजयो भवेत्
भुक्त्यन्ते हि सुखं चैव भुक्त्यादौ मध्यमं फलम् ६९

**69-69. In the above circumstances there will be definite victory in war at the end of the Antar Dasha. Moderate results will be experienced in the middle portion of the Antar Dasha and sometimes there will also be the feeling of distress.**

मध्ये मध्ये महत्कष्टं पश्चादारोग्यमादिशेत्
दायेशाद्रन्ध्रभावस्थे व्यये वा पापसंयुते ७०

चौराहिव्रणपीडा च बुद्धिनाशो महद्भयम्
शिरोरुजं मनस्तापमकर्मकलहं वदेत् ७१

प्रमेहभवरोगं च नानामार्गे धनव्ययः
भार्यापुत्रविरोधश्च गमनं कार्यनाशनम् ७२

**70-72. There will be danger from snakes, thieves and wounds, loss of power of thinking, headache, agony, quarrels without any cause, or reason, diabetes, excessive expenditure, antagonism with wife and children, going away to foreign land, loss in ventures, if Ketu is in the 8th, or 12th from the Lord of the Dasha, or, if Ketu is associated with a malefic.**

द्वितीयद्यूननाथे तु देहबाधा भविष्यति
तद्दोषपरिहारार्थं मृत्युञ्जयजपं चरेत् ७३

छागदानं प्रकुर्वीत सर्वसम्पत्प्रदायकम्
शुक्रप्रीतिकरीं शान्तिं ततः सुखमवाप्नुयात् ७४

**73-74. There will be physical distress, if Ketu is 2nds, or 7ths Lord. The remedial measures to obtain relief from the above effects are Mrityunjaya Japa and giving a goat in ch6thty. Remedial measures for appeasing Venus will also**

अथ प्रत्यन्तर्दशाफलाध्यायः ६१

पृथक् स्वस्वदशामानैर्हन्यादन्तर्दशामितिम्
भजेत्सर्वदशायोगैः फलं प्रत्यन्तरं क्रमात् १

## Ch. 61. Effects of Pratyantar Dashas in Antar Dashas

**1. By multiplying the years etc. of the Antar Dasha of the Planets separately by the Dasha years of each Planet and by dividing the product by the total span of the Vimshott6th Dasha, namely 120 years, we will arrive at the Pratyantar Dasha of each Planet.**

विवादो वित्तहानिश्च दारार्तिः शिरसि व्यथा
रव्यन्तरे बुधैर्ज्ञेयं तस्य प्रत्यन्तरे फलम् २

**2. Sun-Sun (Pratyantar Dasha of Sun in the Antar Dasha of Sun). Argument with other persons, loss of wealth, distress to wife, headache etc. The above are general effects. Such inauspicious effects will not be produced, if Sun is in a Trikona etc., if Sun is the Lord of an auspicious House, or is in a auspicious House and in a benefic Varga. All other Pratyanta effects should be judged in this manner.**

उद्वेगः कलहश्चैव वित्तहानिर्मनोव्यथा
रव्यन्तरे विजानीयात् चन्द्रप्रत्यन्तरे फलम् ३

**3. ...-Moon. Excitement, quarrels, loss of wealth, mental agony etc.**

राजभीतिः शस्त्रभीतिर्बन्धनं बहुसंकटम्
शत्रुवह्निकृता पीडा कुजप्रत्यन्तरे फलम् ४

**4. ...-Mars. Danger from the king and from weapons, imprisonment and distress from enemies and fire.**

श्लेष्मव्याधिः शस्त्रभीतिर्धनहानिर्महद्भयम्
राजभङ्गस्तथा त्रासो राहुप्रत्यन्तरे फलम् ५

**5. ...-Rahu. Disorder of phlegm, danger from weapons, loss of wealth, destruction of a kingdom and mental agony.**

शत्रुनाशो जयो वृद्धिर्वस्त्रहेमादिभूषणम्
अश्वयानादिलाभश्च गुरुप्रत्यन्तरे फलम् ६

**6. ...-Jupiter. Victory, increase in wealth, gains of gold, garments, conveyances etc.**

धनहानिः पशोः पीडा महोद्वेगो महारुजः
अशुभं सर्वमाप्नोति शनिप्रत्यन्तरे जनः ७

**7 ...-Saturn. Loss of wealth, distress to cattle, excitement, diseases etc.**

विद्यालाभो बन्धुसङ्ग भोज्यप्राप्तिर्धनागमः
धर्मलाभो नृपात्पूजा बिधप्रत्यन्तरे भवेत् ८

**8. ...-Mercury. Affectionate relations with kinsmen, availability of good food, gains of wealth, religious-mindedness, reverence from the king.**

प्राणभीतिर्महाहानी राजभीतिश्च विग्रहः
शत्रुणाञ्च महावादो केतोः प्रत्यन्तरे भवेत् ९

**9. .....Ketu. Danger to life, loss of wealth, danger from the king, trouble with enemies**

दिनानि समरूपाणि लाभोऽप्यल्पो भवेदिह
स्वल्पा च सुखसम्पत्तिः शुक्रप्रत्यन्तरे भवेत् १०

**10. ...-Venus. Moderate effects, or some gains of wealth may be expected.**

भूमोज्यधनसम्प्राप्ती राजपूजामहत्सुखम्
लाभश्चन्द्रान्तरे ज्ञेयं चन्द्रप्रत्यान्तरे फलम् ११

**11. ...Moon-Moon. Acquisition of land, wealth and property, reverence from the king and availability of sweetish preparations.**

मतिवृद्धिर्महापूज्यः सुखं बन्धुजनैः सह
धनागमः शत्रुभयं कुजप्रत्यन्तरे भवेत् १२

**12. …-Mars. Wisdom and discretion, reverence from the people, increase in wealth, enjoyments to kinsmen, but there will be danger from an enemy.**

भवेत्कल्याणसम्पत्ती राजवित्तसमागमः
अशुभैरल्पमृत्युश्च राहुप्रत्यन्तरे द्विज १३

**13. …-Rahu. Well-being, gain of wealth from the king and danger of death, if Rahu is conjunct with a malefic.**

वस्त्रलाभो महातेजो ब्रह्मज्ञानं च सद्गुरोः
राज्यालंकरणावाप्तिर्गुरुप्रत्यन्तरे फलम् १४

**14. …-Jupiter. Enjoyments, increase in dignity and glory, gain of knowledge through the preceptor, acquisition of a kingdom and acquisition of gems etc.**

दुर्दिने लभते पीडां वातपित्ताद्विशेषतः
धनधान्ययशोहानिः शनिप्रत्यन्तरे भवेत् १५

**15. …-Saturn. Bilious troubles, loss of wealth and name and fame.**

पुत्रजन्महयप्राप्तिर्विद्यालाभो महोन्नतिः
शुक्लवस्त्रान्नलाभश्च बुधप्रत्यन्तरे भवेत् १६

**16. …-Mercury. Birth of a son, acquisition of a horse and other conveyances, success in education, progress, gain of white garments and grains.**

ब्राह्मणेन समं युद्धमपमृत्युः सुखक्षयः
सर्वत्र जायते क्लेशः केतोः प्रत्यन्तरे भवेत् १७

**17. …-Ketu. Quarrels with Brahmins, fear of premature death, loss of happiness and distress all-round.**

धनलाभो महत्सौख्यं कन्याजन्म सुभोजनम्
प्रीतिश्च सर्वलोकेभ्यो भृगुप्रत्यन्तरे विधोः १८

**18. …-Venus. Gain of wealth, enjoyments, birth of a daughter, availability of sweet preparations and cordial relations with all.**

अन्नागमो वस्त्रलाभः शत्रुहानिः सुखागमः
सर्वत्र विजयप्राप्तिः सूर्यप्रत्यन्तरे विधोः १९

**19. …-Sun. Gain of happiness, grains and garments, victories everywhere.**

शत्रुभीतिं कलिं घोरं रक्तस्त्रावं मृतेर्भयम्
कुजस्यान्तर्दशायां च कुजप्रत्यन्तरे वदेत् २०

**20. ….Mars-Mars. Danger from enemies, quarrels and fear of premature death on account of blood diseases.**

बन्धनं राजभङ्गश्च धनहानिः कुभोजनम्
कलहः शत्रुभिर्नित्यं राहुप्रत्यन्तरे भवेत् २१

**21. …-Rahu. Destruction of wealth and kingdom (fall of government), unpalatable food and quarrels with the enemy.**

मतिनाशस्तथा दुःखं सन्तापः कलहो भवेत्
विफलं चिन्तितं सर्वं गुरोः प्रत्यन्तरे भवेत् २२

**22. …-Jupiter. Loss of intelligence, distress, sorrows to children, fear of premature death, negligence, quarrels and no fulfillment of any ambition.**

स्वामिनाशस्तथा पीडा धनहानिर्म्महाभयम्

वैकल्यं कलहस्त्रासो शनेः प्रत्यन्तरे भवेत् २३

**23. Saturn. Destruction of the employer, distress, loss of wealth, danger from enemies, anxiety, quarrels and sorrows.**

सर्वथा बुद्धिनाशश्च धनहानिर्ज्वरस्तनौ
वस्त्रान्नसुहृदां नाशो बुधप्रत्यन्तरे भवेत् २४

**24. …-Mercury. Loss of intelligence, loss of wealth, fevers and loss of grains, garments and friends.**

आलस्यं च शिरःपीडा पापरोगोऽपमृत्युकृत्
राजभीतिः शस्त्रघातो केतोः प्रत्यन्तरे भवेत् २५

**25. …-Ketu. Distress from diseases, lethargy, premature death, danger from the king and weapons.**

चाण्डालात्सङ्कटस्त्रासो राजशास्त्रभयं भवेत्
अतिसाराऽथ वमनं भृगोः प्रत्यन्तरे भवेत् २६

**26. …-Venus. Distress from Chandal, sorrows, danger from the king and from weapons, dysentery and vomiting.**

भूमिलाभोऽर्थसम्पत्तिः सन्तोषो मित्रसङ्गतिः
सर्वत्र सुखमाप्नोति रवेः प्रत्यन्तरे जनः २७

**27. …-Sun. Increase in landed property and wealth, satisfaction, visits of friends, happiness all-round.**

याम्यां दिशि भवेल्लाभः सितवस्त्रविभूषणम्
संसिद्धिः सर्वकार्याणां विधोः प्रत्यन्तरे भवेत् २८

**28. …-Moon. Gains of white garments etc. from the southern direction, success in all ventures.**

बन्धनं बहुधा रोगो बहुघातः सुहृद्भयम्
राह्वन्तर्दशायां च ज्ञेयं राह्वन्तरे फलम् २९

**29. ….Rahu-Rahu. Imprisonment, disease, danger of injuries from weapons.**

सर्वत्र लभते मानं गजाश्वं च धनागमम्
राहोरन्तर्दशायां च गुरोः प्रत्यन्तरे जनः ३०

**30. …-Jupiter. Reverence everywhere, acquisition of conveyances, like elephants etc., gain of wealth.**

बन्धनं जायते घोरं सुखहानिर्महद्भयम्
प्रत्यहं वातपीडा च शनेः प्रत्यन्तरे भवेत् ३१

**31. …-Saturn. Rigorous imprisonment, loss of enjoyments, danger from enemies, affliction with rheumatism.**

सर्वत्र बहुधा लाभः स्त्रीसङ्गाच्च विशेषतः
परदेशभवा सिद्धिर्बुधप्रत्यन्तरे भवेत् ३२

**32. …-Mercury. Gain in all ventures, abnormal gain through wife.**

बुद्धिनाशो भयं विघ्नो धनहानिर्महद्भयम्
सर्वत्र कलहोद्वेगौ केतोः प्रत्यन्तरे फलम् ३३

**33. …-Ketu. Loss of intelligence, danger from enemies, obstacles, loss of wealth, quarrels, excitement.**

योगिनीभ्यो भयं भूयादश्वहानिः कुभोजनम्
स्त्रीनाशः कुलजं शोकं शुक्रप्रत्यन्तरे भवेत् ३४

**34. …-Venus. Danger from a Yogini, danger from the king, loss of conveyances, availability of unpalatable food, loss of a wife, sorrow in the family.**

ज्वररोगो महाभीतिः पुत्रपौत्रादिपीडनम्
अल्पमृत्युः प्रमादश्च रवेः प्रत्यन्तरे भवेत् ३५

**35. …-Sun. Danger from enemies, fevers, distress to children, fear of premature death, negligence.**

उद्वेगकलहो चिन्ता मानहानिर्महद्भयम्
पितुर्विकलता देहे विद्योः रवेः प्रत्यन्तरे भवेत् ३६

**36. …-Moon. Excitement, quarrels, worries, loss of reputation, fear, distress to father.**

भगन्दरकृता पीडा रक्तपित्तप्रपीडनम्
अर्थहानिर्महोद्वेगः कुजप्रत्यन्तरे फलम् ३७

**37. …-Mars. Septic boil in the anus (Bhagandhar), distress, due to a bite and pollution of blood, loss of wealth, excitement.**

हेमलाभो धान्यवृद्धि कल्याणं सुफलोदयः
गुरोरन्तर्दशायां च भवेद् गुर्वन्तरे फलम् ३८

**38. …Jupiter-Jupiter. Acquisition of gold, increase in wealth etc.**

गोभूमिहयलाभः स्यात्सर्वत्र सुखसाधनम्
संग्रहो ह्यन्नपानादेः शनेः प्रत्यन्तरे भवेत् ३९

**39. …-Saturn. Increase in lands, conveyances and grains.**

विद्यालाभो वस्त्रलाभो ज्ञानलाभः समौक्तिकः
सुहृदां सङ्गमः स्नेहो बुधप्रत्यन्तरे भवेत् ४०

**40. …-Mercury. Success in the educational sphere, acquisition of clothes and gems, like pearls etc., visits of friends.**

जलभीतिस्तथा चौर्यं बन्धनं कलहो भवेत्
अपमृत्युर्भयं घोरं केतोः प्रत्यन्तरे द्विज ४१

**41. …-Ketu. Danger from water and thieves.**

नानाविद्यार्थसम्प्राप्तिर्हेमवस्त्रविभूषणम्
लभते क्षेमसन्तोषं भृगोः प्रत्यन्तरे जनः ४२

**42. …-Venus. Several kinds of learning, gain of gold, clothes, ornaments, well-being and satisfaction.**

नृपाल्लाभस्तथा मित्रात्पितृतो मातृतोऽपि वा
सर्वत्र लभते पूजां रवेः प्रत्यन्तरे जनः ४३

**43. …-Sun. Gain from the king, friends and parents, reverence everywhere.**

सर्वदुःखविमोक्षश्च मुक्तालाभो हयस्य च

सिद्धयन्ति सर्वकार्याणि विधो प्रत्यन्तरे द्विज ४४

**44. …-Moon. No distress, gain of wealth and conveyances, success in ventures.**

शस्त्रभीतिर्गदे पीडा वह्निमान्द्यमजीर्णता
पीडा शत्रुकृता भूरिर्भौमप्रत्यन्तरे भवेत् ४५

**45. …-Mars. Danger from weapons, pain in anus, burning in the stomach, indigestion, distress from enemies.**

चाण्डालेन विरोधः स्याद्भयं तेभ्यो धनक्षतिः
कष्टं जीवान्तरे ज्ञेयं राहोः प्रत्यन्तरे ध्रुवम् ४६

**46. …-Rahu. Antagonism with menials (Chandaldhi) and loss of wealth and distress through them.**

देहपीडा कलेर्भीतिर्भयमन्त्यजलोकतः
दुःखं शन्यन्तरे नाना शनेः प्रत्यन्तरे भवेत् ४७

**47. ….Saturn-Saturn. Physical distress, quarrels, danger from menials.**

बुद्धिनाशः कलेर्भीतिरन्नपानादिहानिकृत्
धन्हानिर्भयं शत्रोः शनेः प्रत्यन्तरे बुधे ४८

**48. …-Mercury. Loss of intelligence, quarrels, dangers, anxiety about availability of food, loss of wealth, danger from enemy.**

बन्धः शत्रोर्गृहे जातो वर्णहानिर्बहुक्षुधा
चित्ते चिन्ता भयं त्रासः केतो प्रत्यन्तरे भवेत् ४९

**49. …-Ketu. Imprisonment in the camp of the enemy, loss of luster, hunger, anxiety and agony.**

चिन्तितं फलितं वस्तु कल्याणं स्वजने सदा
मनुष्यकृतितो लाभः भृगोः प्रत्यन्तरे द्विज ५०

**50. …-Venus. Fulfillment of ambitions, well-being in the family, success in ventures and gains there from.**

राजतेजोऽधिकारित्वं स्वगृहे जायते कलिः
ज्वरादिव्याधिपीडा च रवेः प्रत्यन्तरे भवेत् ५१

**51. …-Sun. Conferment of authority by the king, quarrels in the family, fevers.**

स्फीतबुद्धिर्महारम्भो मन्दतेजा बहुव्ययः
बहुस्त्रीभिः समं भोगो विधोः प्रत्यन्तरे शनौ ५२

**52. …-Moon. Development of intelligence, inauguration of big a venture, loss of luster, extravagant expenditure, association with many women.**

तेजोहानि पुत्रघातो वह्निभीती रिपोर्भयम्
वातपित्तकृता पीडा कुजप्रत्यन्तरे भवेत् ५३

**53. …-Mars. Loss of valor, distress to son, danger from fire and enemy, distress from bile and wind.**

धननाशो वस्त्रहानिर्भूमिनाशो भयं भवेत्
विदेशगमनं मृत्युः राहो प्रत्यन्तरे शनौ ५४

**54. …-Rahu. Loss of wealth, clothes, land, going away to foreign lands, fear of death.**

गृहेषु स्वीकृतं छिद्रं ह्यसमर्थो निरीक्षणे
अथ वा कलिमुद्वेगं गुरोः प्रत्यन्तरे वदेत् ५५

**55. …-Jupiter. Inability to prevent losses, caused by women, quarrels, excitement.**

बुद्धिर्विद्यार्थलाभो वा वस्त्रलाभो महत्सुखम्
बुधस्यान्तर्दशायाञ्च बुधप्रत्यन्तरे भवेत् ५६

**56. ….Mercury-Mercury. Gain of intelligence, education, wealth, clothes etc.**

कठिनान्नस्य सम्प्राप्तिरुदरे रोगसम्भवः
कामलं रक्तपित्तं च केतोः प्रत्यन्तरे भवेत् ५७

**57. …-Ketu. Coarse food, stomach troubles, eye troubles, distress from bilious and blood disorders.**

उत्तरस्यां भवेल्लाभो हानिः स्यात्तु चतुष्पदात्
अधिकारो नृपागारे भृगोः प्रत्यनतरे भवेत् ५८

**58. …-Venus. Gains from a northern direction, loss of cattle, acquisition of authority from government.**

तेजोहानिर्भवेद्रोगस्तनुपीडा यदा कदा
जायते चित्तवैकल्यं रवेः प्रत्यन्तरे बुधे ५९

**59. …-Sun. Loss of splendor and distress through diseases, distress in the heart.**

स्त्रीलाभश्चार्थसम्पत्तिः कन्यालाभो महद्धनम्
लभते सर्वतः सौख्यं विधोः प्रत्यन्तरे जनः ६०

**60. …-Moon. Marriage, gain of wealth and property, birth of a daughter, enjoyments all-round.**

धर्मधीधनसम्प्राप्तिश्चौराग्न्यादिप्रपीडनम्
रक्तवस्त्रं शस्त्रघातं भौमप्रत्यन्तरे भवेत् ६१

**61. …-Mars. Religious-mindedness, increase in wealth, danger from fire and enemies, gain of red clothes, injury from a weapon.**

कलहो जायते स्त्रीभिरकस्माद्भयसम्भवः
राजशस्त्राकृता भीतिः राहोः प्रत्यन्तरे द्विज ६२

**62. …-Rahu. Quarrels, danger from wife, or some other woman, danger from the king.**

राज्यं राज्याधिकारो वा पूजा राजसमुद्भवा
विद्याबुद्धिसमृद्धिश्च गुरोः प्रत्यन्तरे भवेत् ६३

**63. …-Jupiter. Acquisition of a kingdom, conferment of authority by the king, reverence from the king, education, intelligence.**

वातपित्तमहापीडा देहघातसमुद्भवा
धननाशमवाप्नोति शनेः प्रत्यन्तरे जनः ६४

**64. …-Saturn. Bilious and windy troubles, injuries to the body, loss of wealth.**

आपत्समुद्भवोऽकस्माद्देशन्तरसमागमः

केत्वन्तरेऽर्थहानिश्च केतोः प्रत्यन्तरे भवेत् ६५

**65. ….Ketu-Ketu. Sudden disaster, going away to foreign lands, loss of wealth.**

म्लेच्छभीरर्थनाशो वा नेत्ररोगः शिरोव्यथा
हानिश्चतुष्पदानां च भृगोः प्रत्यन्तरे भवेत् ६६

**66. …-Venus. Loss of wealth through a non-Hindu king, eye troubles, headache, loss of cattle.**

मित्रैः सह विरोधश्च स्वल्पमृत्युः पराजयः
मतिभ्रंशो विवादश्च रवेः प्रत्यन्तरे भवेत् ६७

**67. …-Sun. Antagonism with friends, premature death, defeat, exchange of arguments.**

अन्ननाशो याशोहानिर्देहपीडा मतिभ्रमः
आमवातादिवृद्धिश्चविधोः प्रत्यन्तरे भवेत् ६८

**68. …-Moon. Loss of grains, physical distress, misunderstanding, dysentery.**

शस्त्रघातेन पातेन पीडितो वह्निपीडया
नीचाद्भीती रिपोः शङ्का कुजप्रत्यन्तरे भवेत् ६९

**69. …-Mars. Injury from weapons, distress from fire, danger from menials and enemies.**

कामिनीभ्यो भयं भूयात्तथा वैरिसमुद्भवः
क्षुद्रादपि भवेद्भीती राहोः प्रत्यन्तरे भवेत् ७०

**70. …-Rahu. Danger from women and enemies, distress, caused by menials.**

धनहानिर्महोत्पातो शस्त्रमित्रविनाशनम्
सर्वत्र लभते क्लेशं गुरोः प्रत्यन्तरे फलम् ७१

**71. …-Jupiter. Loss of friends, wealth and garments, opprobrium in the house, troubles from everywhere.**

गोमहिष्यादिमरणं देहपीडा सुहृद्वधः
स्वल्पाल्पलाभकरणं शनेः प्रत्यन्तरे फलम् ७२

**72. …-Saturn. Death of cattle and friends, physical distress, very meager gain of wealth.**

बुद्धिनाशो महोद्वेगो विद्याहानिर्महाभयम्
कार्यसिद्धिर्न जायते ज्ञस्य प्रत्यन्तरे फलम् ७३

**73. …-Mercury. Loss of understanding, excitement, failure in education, dangers, failure in all ventures.**

श्वेताश्ववस्त्रमुक्ताद्यं दिव्यस्त्रीजङ्गजं सुखम्
लभते शुक्रन्तरे प्राप्ते शुक्रप्रत्यन्तरे जनः ७४

**74. ….Venus-Venus. Gains of white clothes, conveyances, gems, like pearls etc., association with beautiful damsel.**

वातज्वरः शिरःपीडा राज्ञः पीडा रिपोरपि
जायते स्वल्पलाभोऽपि रवेः प्रत्यन्तरे फलम् ७५

**75. …-Sun. Rheumatic fever, headache, danger from the king and enemies and meager gain of wealth.**

कन्याजन्म नृपाल्लाभो वस्त्राभरणसंयुतः
राज्याधिकारसंप्राप्तिः चन्द्रप्रत्यन्तरे भवेत् ७६

**76. …-Moon. Birth of a daughter, gain of clothes etc. from the king, acquisition of authority.**

रक्तपित्तादिरोगश्च कलहस्ताडनं भवेत्
महान्क्लेशो भवेदत्र कुजप्रत्यन्तरे द्विज ७७

**77. …-Mars. Blood and bile troubles, quarrels, many kinds of distresses.**

कलहो जायते स्त्रीभिरकस्माद्भयसम्भवः
राजतः शत्रुतः पीडा राहोः प्रत्यन्तरे भवेत् ७८

**78. …-Rahu. Quarrels with wife, danger, distress from the king and enemies.**

महद्द्रव्यं महद्राज्यं वस्त्रमुक्तादिभूषणम्
गजाश्वादिपदप्राप्तिः गुरोः प्रत्यन्तरे भवेत् ७९

**79. …-Jupiter. Acquisition of kingdom, wealth, garments, gems, ornaments and conveyance, like elephants etc.**

खरोष्ट्रछागसम्प्राप्तिर्लोहमाषतिलादिकम्
लभते स्वल्पपीडादि शनेः प्रत्यन्तरे जनः ८०

**80. …-Saturn. Acquisition of donkey, camel, goat, iron, grains, sesame seeds, physical pains.**

धनज्ञानमहल्लाभो राजराज्याधिकारिता
निक्षेपाद्धनलाभोऽपि ज्ञस्य प्रत्यन्तरे भवेत् ८१

**81. …-Mercury. Gains of wealth, knowledge, authority from the king, gain of money, distributed by others.**

अपमृत्युभयं ज्ञेयं देशाद्देशान्तरागमः
लाभोऽपि जायते मध्ये केतोः प्रत्यन्तरे द्विज ८२

**82. …-Ketu. Premature death, going away from homeland, gains of wealth at times.**

अथ सूक्ष्मान्तर्दशाध्यायः ६२
गुणया स्वस्वदशावर्षैः प्रत्यन्तरदशामितिः
खार्क्रैभक्ता पृथग्लब्धिः सूक्ष्मान्तरदशा भवेत् १

## Ch. 62. Effects of Sukshmantar Dashas in Pratyantar Dashas

**1. The Sukshmantar Dasha is arrived at by multiplying the periods of Pratyantar Dasha separately for each Planet by the Dasha years of that Planet and then by dividing the product by 120.**

निजभूमिपरित्यागो प्राणनाशभयं भवेत्
स्थाननाशो महाहानिः निजसूक्ष्मगते रवौ २

**2….. Sun-Sun (Sukshm Dasha of Sun in Pratyantar Dasha of Sun). Going away from homeland, danger of death, loss of position, losses all-round.**

देवब्राह्मणभक्तिश्च नित्यकर्मरतस्तथा
सुप्रीतिः सर्वमित्रश्चैव रवेः सूक्ष्मगते विधौ ३

**3. …-Moon. Devotion towards deities and Brahmins, interest in pious deeds, affectionate relations with friends.**

क्रूरकर्मरतिस्तिग्मशत्रुभिः परिपीडनम्
रक्तस्रावादिरोगाश्च रवेः सूक्ष्मगते कुजे ४

**4. …-Mars. Indulgence in sinful deeds, distress from cruel enemies, bleeding**

चौराग्निविषभीतिश्च रणे भङ्गः पराजयः
दानधर्मादिहीनश्च रवेः सूक्ष्मगते ह्यगौ ५

**5. …-Rahu. Danger from thieves, fire and poison, defeat in war, religious inclination.**

नृपसत्काराजार्हः सेवकैः परिपूजितः
राजचक्षुर्गतः शान्तः सूर्यसूक्ष्मगते गुरौ ६

**6. …-Jupiter. Recognition by government, respected by government employees, becoming favourite of the king.**

चौर्यसाहसकर्मार्थी देवब्राह्मणपीडनम्
स्थानच्युतिं मनोदुखं रवेः सूक्ष्मगते शनौ ७

**7. …-Saturn. Causing trouble to respected persons and Brahmins by theft and by other bold deeds, going away from ones own place, mental agony.**

दिव्याम्बरादिलब्धिश्च दिव्यस्त्रीपरिभोगिता
अचिन्तितार्थसिद्धिश्च रवेः सूक्ष्मगते बुधे ८

**8. …-Mercury. Gains of fancy garments, association with a beautiful damsel, sudden success in ventures.**

गुरुतार्थविनाशश्च भृत्यदारभवस्तथा
क्वचित्सेवकसम्बन्धो रवेः सूक्ष्मगते ध्वजे ९

**9. …-Ketu. Achievement of glory through wife and employees, loss of wealth, comforts from servants.**

पुत्रमित्रकलत्रादिसाख्यसम्पन्न एव च
नानाविधा च सम्पत्ती रवेः सूक्ष्मगते भृगौ १०

**10. …-Venus. Happiness from son, friends and wife, acquisition of many kinds of properties.**

भूषणं भूमिलाभश्च सम्मानं नृपपूजनम्
तामसत्त्वं गुरुत्वं च निजसूक्ष्मगते विधौ ११

**11. ….Moon-Moon. Gain of ornaments and land, reverence, recognition from the king, anger, glory.**

दुःखं शत्रुविरोधश्च कुक्षिरोगः पितुर्मृतिः
वातपित्तकफोद्रेकः विधोः सूक्ष्मगते कुजे १२

**12. …-Mars. Distress, antagonism with the enemy, stomach troubles, death of father, troubles, due to imBalaance of wind and bile.**

क्रोधनं मित्रबन्धूनां देशत्यागो धनक्षयः
विदेशान्निगडप्राप्तिर्विधोः सूक्ष्मगतेप्यगौ १३

**13. …-Rahu. Disharmony with friends and kinsmen, going away from homeland, loss of wealth, imprisonment.**

छत्रचामरसंयुक्तं वैभवं पुत्रसम्पदः

सर्वत्र सुखमाप्नोति विधोः सूक्ष्मगते गुरौ १४

**14. …-Jupiter. Opulence and glory with royal symbols, birth of a son, gain of property, enjoyments all-round.**

राजोपद्रवभीतिः स्याद्व्यवहारे धनक्षयः
चौरर्वं विप्रभीतिश्च विधोः सूक्ष्मगते शनौ १५

**15. …-Saturn. Wrath of the king, loss of wealth in business dealings, danger from thieves and Brahmins.**

राजमानं वस्तुलाभो विदेशाद्वाहनादिकम्
पुत्रपौत्रसमृद्धिश्च विधोः सूक्ष्मगते बुधे १६

**16. …-Mercury. Reverence from the king, gain of wealth, gain of conveyance from a foreign land, increase in the number of children.**

आत्मनो वृत्तिहननं सस्यशृङ्गवृषादिभिः
अग्निसूर्यादिभीतिः स्याद्विधोः सूक्ष्मगते ध्वजे १७

**17. …-Ketu. Loss in the livelihood, earned by sale etc., grains, medicines, cattle etc., danger from fire and the Sun's rays (sun-stroke).**

विवाहो भूमिलाभश्च वस्त्राभरणवैभवम्
राज्यलाभश्च कीर्तिश्च विधोः सूक्ष्मगते भृगौ १८

**18. …-Venus. Marriage, gain of a kingdom, land, garments, ornaments, reputation etc.**

क्लेशात्क्लेशः कार्यनाशः पशुधान्यधनक्षयः
गात्रवैषम्यभूमिश्च विधोः सूक्ष्मगते रवौ १९

**19. …-Sun. Troubles, losses in ventures, destruction of grains and cattle, physical distress.**

भूमिहानिर्मनःखेदो ह्यपस्मारी च बन्धुयुक्
पुरक्षोभमनस्तापो निजसूक्ष्मगते कुजे २०

**20. ….Mars-Mars. Sorrows on account of loss of lands, epilepsy, imprisonment, unhappiness.**

अङ्गदोषो जनाद्भीतिः प्रमदावंशनाशनम्
वह्निसर्पभयं घोरं भौमे सूक्ष्मगतेऽप्यहौ २१

**21. …-Rahu. Physical distress, danger from the people (due to unpopul6thty), loss of wife and children, danger from fire.**

देवपूजारतिश्चात्र मन्त्राभ्युत्थानतत्परः
लोके पूजा प्रमोदश्च भौमे सूक्ष्मगते गुरौ २२

**22. …-Jupiter. Devotion towards deities, Mantra Siddhi, reverence from the people, enjoyments.**

बन्धनान्मुच्यते बद्धो धनधान्यपरिच्छदः
भृत्यार्थबहुलः श्रीमान् भौमे सूक्ष्मगते शनौ २३

**23. …-Saturn. Release from imprisonment, happiness on account of wealth, gains of clothes and servants.**

वाहनं छत्रसंयुक्तं राज्यभोगपरं सुखम्
कासश्वासादिका पीडा भौमे सूक्ष्मगते बुधे २४

**24. …-Mercury. Comforts of Chatr, Chamar etc. (receiving respect, as that of a king), breathing troubles.**

परप्रेरितबुद्धिश्च सर्वत्राऽपि च गर्हिता
अशुचिः सर्वकालेषु भौमे सूक्ष्मगते ध्वजे २५

**25. …-Ketu. Indulgence in undesirable deeds at the instance of others, one always remains filthy.**

इष्टस्त्रीभोगसम्पत्तिरिष्टभोजनसंग्रहः
इष्टार्थस्यापि लाभश्च भौमे सूक्ष्मगते भृगौ २६

**26. …-Venus. Enjoyment with women of choice, gain of wealth, food etc.**

राजद्वेषो द्विजात्क्लेशः कार्याभिप्रायवंचकः
लोकेऽपि निन्द्यतामेति भौमे सूक्ष्मगते रवौ २७

**27. …-Sun. Wrath of the king, distress through Brahmins, failure in ventures, odium in public (Loka Nindha).**

शुद्धत्वं धनसम्प्राप्तिर्देवब्राह्मणवत्सलः
व्याधिना परिभूयेत् भौमे सूक्ष्मगते विधौ २८

**28. …-Moon. Piousness, gain of wealth, devotion towards deities and Brahmins, danger from diseases.**

लोकोपद्रवबुद्धिश्च सर्वकार्ये मतिविभ्रमः
शून्यता चित्तदोषः स्यात् स्वीये सूक्ष्मगतेऽप्यगौ २९

**29. ….Rahu-Rahu. Tendering to create turbulence by people, lack of wisdom in performance of duties, affliction of the mind.**

दीर्घरोगी दरिद्रश्च सर्वेषां प्रियदर्शनः
दानधर्मरतः शस्तो राहोः सूक्ष्मगते गुरौ ३०

**30. …-Jupiter. Affliction with a chronic disease, poverty, but revered by the people and the religious-mindedness.**

कुमार्गात्कुत्सितोर्थश्च दुष्टश्च परसेवकः
असत्सङ्गमतिर्मूढो राहोः सूक्ष्मगते शनौ ३१

**31. …-Saturn. Gain of wealth through unfair means, wicked, or mean nature, performing other persons duties, undesirable association.**

स्त्रीसम्भोगमतिर्वाग्मी लोकसम्भावनावृतः
अन्नमिच्छंस्तनुग्लानी राहोः सूक्ष्मगते बुधे ३२

**32. …-Mercury. Increase in desires for sexual acts with women, eloquence, hunger, physical distress.**

माधुर्यं मानहानिश्च बन्धनं चाप्रमाकरम्
पारुष्यं जीवहानिश्च राहोः सूक्ष्मगते ध्वजे ३३

**33. …-Ketu. Politeness, loss of reputation, imprisonment, cold heartedness, loss of public money.**

बन्धनान्मुच्यते बद्धः स्थानमानार्थसञ्चयः
कारणाद् द्रव्यलाभश्च राहोः सूक्ष्मगते भृगौ ३४

**34. …-Venus. Freedom from imprisonment, gain of position and wealth.**

व्यक्तार्शो गुल्मरोगश्च क्रोधहानिस्तथैव च

वाहनादिसुखं सर्वं राहोः सूक्ष्मगते रवौ ३५

**35. …-Sun. Settling down in foreign lands, affliction with Gulma, even temperament, comforts of conveyances.**

मणिरत्नधनावाप्तिर्विद्योपासनशीलवान्
देवार्चनपरो भक्त्या राहोः सूक्ष्मगते विधौ ३६

**36. …-Moon. Gain of gems (money), wealth, education, attachment to prayers, good behavior and devotion towards deities.**

निर्जितो जनविद्रावो जने क्रोधश्च बन्धनम्
चौर्यशीलरतिर्नित्यं राहोः सूक्ष्मगते कुजे ३७

**37. …-Mars. Fleeing after defeat, anger, imprisonment, indulgence in thefts and stealing.**

शोकनाशो धनाधिक्यमग्निहोत्रं शिवार्चनम्
वाहनं छत्रसंयुक्तं स्वीये सूक्ष्मगते गुरौ ३८

**38. ….Jupiter-Jupiter. Banishment of sorrows, increase in wealth, performing Havan, devotion to Lord Shiva, gains of conveyance, marked with royal symbols.**

व्रतभङ्गो मनस्तापो विदेशे वसुनाशनम्
विरोधो बन्धुवर्गैश्च गुरोः सूक्ष्मगते शनौ ३९

**39. …-Saturn. Obstacles in fasting, agony, foreign journeys, loss of wealth, antagonism with kinsmen.**

विद्याबुद्धिविवृद्धिश्च ससम्मानं धनागमः
गृहे सर्वविधं सौख्यं गुरोः सूक्ष्मगते बुधे ४०

**40. …-Mercury. Success in education, increase in intelligence, reverence from the people (popul6thty), gains of wealth, all sorts of enjoyments and comforts at home.**

ज्ञानं विभवपाण्डित्ये शास्त्रश्रोता शिवार्चनम्
अग्निहोत्रं गुरोर्भक्तिर्गुरोः सूक्ष्मगते ध्वजे ४१

**41. …-Ketu. Knowledge, glory, learning, study of Shastras, worship of Lord Shiva, Havan, devotion toward preceptor.**

रोगान्मुक्तिः सुखं भोगो धनधान्यसमागमः
पुत्रदारादिसौख्यं च गुरोः सूक्ष्मगते भृगौ ४२

**42. …-Venus. Recovery from diseases, enjoyments, gain of wealth, happiness from wife and children.**

वातपित्तप्रकोपश्च श्लेष्मोद्रेकस्तु दारुणः
रसव्याधिकृतं शूलं गुरोः सूक्ष्मगते रवौ ४३

**43. …-Sun. Troubles of wind and bile, stomach pains through imBalaance of phlegm and Rasas.**

छत्रचामरसंयुक्तं वैभवं पुत्रसम्पदः
नेत्रकुक्षिगता पीडा गुरोः सूक्ष्मगते विधौ ४४

**44. ...-Moon. Glory with umbrella with royal symbols, celebrations on the birth of a son, distress in eyes and stomach.**

स्त्रीजनाच्च विषोत्पत्तिर्बन्धनं च रुजोभयम्
देशान्तरगमो भ्रान्तिर्गुरोः सूक्ष्मगते कुजे ४५

**45. ...-Mars. Administration of poison by wife, imprisonment, danger from diseases, going away to foreign lands, confusion and misunderstandings.**

व्याधिभिः परिभूतःस्याच्चौरैरपहृतं धनम्
सर्पवृश्चिकभीतिश्च गुरोः सूक्ष्मगतेऽप्यगौ ४६

**46. ...-Rahu. Danger from thieves, snakes and scorpions, diseases and distress.**

धनहानिर्महाव्याधिः वातपीडा कुलक्षयः
भिन्नाहारी महादुःखी निजसूक्ष्मगते शनौ ४७

**47. ....Saturn-Saturn. Loss of wealth, diseases, like rheumatism etc., destruction of the family, taking meals separately from the family, full of sorrows.**

वाणिज्यवृत्तेर्लाभश्च विद्याविभवमेव च
स्त्रीलाभश्च महीप्राप्तिः शनेः सूक्ष्मगते बुधे ४८

**48. ...-Mercury. Profits in business, progress in education, increase in wealth and lands.**

चौरोपद्रवकुष्ठादिवृत्तिक्षयविगुम्फनम्
सर्वाङ्गपीडनं व्याधिः शनेः सूक्ष्मगते ध्वजे ४९

**49. ...-Ketu. Turbulence by thieves, leprosy, loss of livelihood, physical pains.**

ऐश्वर्यमायुधाभ्यासः पुत्रलाभोऽभिषेचनम्
आरोग्यं धनकामौ च शनेः सूक्ष्मगते भृगौ ५०

**50. ...-Venus. Opulence and glory, learning the use of weapons, birth of a son, coronation, good health and fulfillment of all ambitions.**

राजतेजोविकारत्वं स्वगृहे जायते कलिः
किञ्चित्पीडा स्वदेहोत्था शनेः सूक्ष्मगते रवौ ५१

**51. ...-Sun. Wrath of the king, quarrels in the family, physical distress.**

स्फीतबुद्धिर्महारम्भो मन्दतेजा बहुव्ययः
स्त्रीपुत्रैश्च समं सौख्यं शनेः सूक्ष्मगते विधौ ५२

**52. ...-Moon. Development of intelligence, inauguration of a big project, loss of luster, extravagance, happiness from wife and children.**

तेजोहानिर्महोद्वेगो वह्निमान्द्यं भ्रमः कलिः
वातपित्तकृता पीडा शनेः सूक्ष्मगते कुजे ५३

**53. ...-Mars. Loss of luster, excitement, burning in the stomach, misunderstanding, quarrels and wind and bile disorders.**

पितृमातृविनाशश्च मनोदुःखं गुरुव्ययम्
सर्वत्र विफलत्वं च शनेः सूक्ष्मगतेऽप्यहौ ५४

**54. …-Rahu. Death of parents, agony, extravagance, failure in ventures.**

सन्मुद्राभोगसम्मानं धनधान्यविवर्द्धनम्
छत्रचामरसम्प्राप्तिः शनेः सूक्ष्मगते गुरौ ५५

**55. …-Jupiter. Acquisition of gold coins, reverence from the public, increase in wealth and grains, acquisition of Chatr with royal symbols.**

सौभाग्यं राजसम्मानं धनधान्यादिसम्पदः

सर्वेषां प्रियदर्शी च निजसूक्ष्मगते बुधे ५६

**56. ….Mercury-Mercury. Dawn of fortune, reverence from the king, increase in wealth and property and affectionate relations with all.**

बालग्रहोग्निभीस्तापः स्त्रीगदोद्भवदोषभाक्
कुमार्गी कुत्सिताशी च बौधे सूक्ष्मगते ध्वजे ५७

**57. …-Ketu. Danger from fire, agony, distress to wife, coarse food and immoral tendencies.**

वाहनं धनसम्पत्तिर्जलजान्नार्थसम्भवः
शुभकीर्तिर्महाभोगो बौधे सूक्ष्मगते भृगौ ५८

**58. …-Venus. Gain of conveyances, wealth, grains, produced in water, good repute and enjoyments.**

ताडनं नृपवैषम्यं बुद्धिस्खलनरोगभाक्
हानिर्जनापवादं च बौधे सूक्ष्मगते रवौ ५९

**59. …-Sun. Injuries, wrath of the king, confusion in the mind, diseases, loss of wealth, ridicule in public.**

सुभगः स्थिरबुद्धिश्च राजसन्मानसम्पदः
सुहृदां गुरुसंचारो बौधे सूक्ष्मगते विधौ ६०

**60. …-Moon. Good fortune, stability of mind, reverence from the king, gains of property, visits of friends and the preceptor.**

अग्निदाहो विषोत्पत्तिर्जडत्वं च दरिद्रता
विभ्रमश्च महोद्वेगो बौधे सूक्ष्मगते कुजे ६१

**61. …-Mars. Danger from fire and poison, idiocy, poverty, confusion of mind, excitement.**

अग्निसर्पनृपाद्भीतिः कृच्छ्रादिरिपराभवः
भूतावेशभ्रमाद्भ्रन्तिर्बौधे सूक्ष्मगतेप्यहौ ६२

**62. …-Rahu. Danger from fire and snakes and the victory over an enemy (with difficulty), opprobrium from goblins (evil, mischievous spirit).**

गृहोपकरणं भव्यं दानं भोगादिवैभवम्
राजप्रसादसम्पत्तिर्बौधे सूक्ष्मगते गुरौ ६३

**63. …-Jupiter. Construction of a house, interest in charities, comforts and enjoyments, increase in opulence, gain of wealth from the king.**

वाणिज्यवृत्तिलाभश्च विद्याविभवमेव च
स्त्रीलाभश्च महाव्याप्तिर्बौधे सूक्ष्मगते शनौ ६४

**64. …-Saturn. Profits in business, progress in education and increase in wealth, marriage, circumambience of comprehensiveness.**

पुत्रदारादिजं दुःखं गात्रवैषम्यमेव च
दारिद्र्याद् भिक्षुवृत्तिश्च नैजे सूक्ष्मगते ध्वजे ६५

**65. ....Ketu-Ketu. Happiness from wife and children, physical troubles, poverty, begging.**

रोगनाशोऽर्थलाभश्च गुरुविप्रानुवत्सलः
सङ्गमः स्वजनैः सार्द्धकेतोः सूक्ष्मगते भृगौ ६६

**66. ...-Venus. Freedom from diseases, gains of wealth, devotion towards Brahmins and the preceptor, union with members of the family.**

युद्धं भूमिविनाशश्च विप्रवासः स्वदेशतः
सुहृद्विपातिरार्तिश्च केतोः सूक्ष्मगते रवौ ६७

**67. ...-Sun. Quarrels, loss of land, residence in foreign lands, disaster upon friends.**

दासीदाससमृद्धिश्च युद्धे लब्धिर्जयस्तथा
ललिता कीर्तिरुत्पन्ना केतोः सूक्ष्मगते विधौ ६८

**68. ...-Moon. Promotion in service, victory in war, good reputation in public.**

आसने भयमश्वादेश्चौरदुष्टादिपीडनम्
गुल्मपीडा शिरोरोगः केतोः सूक्ष्मगते कुजे ६९

**69. ...-Mars. Danger of falling down from a horse etc., distress from thieves and the wicked, suffering from Gulma and headache.**

विनाशः स्त्रीगुरूणां च दुष्टस्त्रीसङ्गमाल्लघुः
वमनं रुधिरं पित्तं केतोः सूक्ष्मगतेऽप्यगौ ७०

**70. ...-Rahu. Destruction of wife, father etc., defamation, due to association with a wicked woman, vomiting, blood pollution, bilious diseases.**

रिपोर्विरोधः सम्पत्तिः सहसा राजवैभवम्
पशुक्षेत्रविनाशार्तिः केतोः सूक्ष्मगते गुरौ ७१

**71. ...-Jupiter. Antagonism with the enemy, increase in property and opulence, distress, due to losses in cattle, wealth and agricultural production.**

मृषा पीडा भवेत्क्षुद्रमुखोत्पत्तिश्च लङ्घनम्
स्त्रीविरोधः सत्यहानिः केतोः सूक्ष्मगते शनौ ७२

**72. ...-Saturn. Imaginary distress, little comfort, fasting, antagonism with wife, indulgence in falsehood.**

नानाविधजनाप्तिश्च विप्रयोगोऽरिपीडनम्
अर्थसम्पत्समृद्धिश्च केतोः सूक्ष्मगते बुधे ७३

**73. ...-Mercury. Union and separation from many kinds of people, distress to the enemy, increase in wealth and property.**

शत्रुहानिर्महत्सौख्यं शङ्करालयनिर्मितिः
तडागकूपनिर्माणं निजसूक्ष्मगते भृगौ ७४

**74. ....Venus-Venus. Destruction of enemies, enjoyments, construction of temples of Lord Shiva etc. and reservoirs.**

उरस्तापो भ्रमश्चैव गतागतविचेष्टितम्
क्वचिल्लाभः क्वचिद्धानिर्भृगोः सूक्ष्मगते रवौ ७५

**75. ...-Sun. Agony in mind and heart, confusion of mind, wanderings, both losses and gains at different times.**

आरोग्यं धनसम्पात्तिः कार्यलाभो गतागतैः
बुद्धिविद्याविवृद्धिः स्याद् भृगोः सूक्ष्मगते विधौ ७६

**76. ...-Moon. Sound health, increase in wealth, success in ventures through business dealings, progress in education and increase of intelligence.**

जडत्वं रिपुवैषम्यं देशभ्रंशो महद्भयम्

व्याधिदुःखसमृत्पत्तिर्भृगोः सूक्ष्मगते कुजे ७७

**77. ...-Mars. Idiocy, danger from an enemy, going away from ones homeland, danger from diseases.**

राज्याग्निसर्पजा भीतिर्बन्धुनाशो गुरुव्यथा
स्थानच्युतिर्महाभीतिर्भृगोः सूक्ष्मगतेऽप्यहौ ७८

**78. ...-Rahu. Danger from fire and snakes, destruction of kinsmen, resignation from position (service etc.).**

सर्वत्र कार्यलाभश्च क्षेत्रार्थविभवोन्नतिः
वणिग्वृत्तेर्महालब्धिर्भृगोः सूक्ष्मगते गुरौ ७९

**79. ...-Jupiter. Success in ventures, increase in wealth and agricultural production, abnormal profits from purchase and sale business.**

शत्रुपीडा महद्दुःखं चतुष्पादविनाशनम्
स्वगोत्रगुरुहानिः स्याद् भृगोः सूक्ष्मगते शनौ ८०

**80. ...-Saturn. Distress from an enemy, sorrows, destruction of cattle, loss of persons, belonging to the Gotra of the native and elders (preceptors).**

बांधवादिषु सम्पत्तिर्व्यवहारो धनोन्नतिः
पुत्रदारादितः सौख्यं भृगोः सूक्ष्मगते बुधे ८१

**81. ...-Mercury. Increase in wealth with the assistance of kinsmen, gain of wealth through business, happiness from wife and children.**

अग्निरोगो महापीडा मुखनेत्रशिरोव्यथा
सञ्चितार्थात्मनः पीडा भृगोः सूक्ष्मगते ध्वजे ८२

**82. ...-Ketu. Danger from fire, distress from diseases, distress in mouth, eyes and forehead, loss of accumulated wealth, mental agony.**

अथ प्राणदशाफलाध्यायः ६३
पृथक् खगदशावर्षैर्हन्यात् सूक्ष्मदशामितिम्
खसूर्यैर्विभजेल्लिब्धर्ज्ञेया प्राणदशामितिः १

## Ch. 63. Effects of Prana Dashas in Sukshma Dashas

**1. If we multiply the Sukshma Dasha spans by the Dasha years of each Planet and divide the product by 120, we will get the Prana Dasha.**

पौंश्चल्यं विषजा बाधा चौराग्निनृपजं भयम्
कष्टं सूक्ष्मदशाकाले रवौ प्राणदशां गते २

**2. Sun-Sun. Interest in unnatural sexual intercourse, danger from thieves, fire and the king, physical distress.**

सुखं भोजनसम्पत्तिः संस्कारो नृपवैभवम्
उदारादिकृपाभिश्च रवेः प्राणगते विधौ ३

**3. …-Moon. Enjoyments, availability of good food, development of intelligence, opulence and glory, like that of a king, by the beneficence of generous people.**

भूपोपद्रवमन्यार्थे द्रव्यनाशो महद्भयम्
महत्यपचयप्राप्ती रवेः प्राणगते कुजे ४

**4. …-Mars. Antagonism with the king with the connivance of others, dangers and great losses.**

अन्नोद्भवा महापीडा विषोत्पत्तिर्विशेषतः

अर्थाग्निराजभिः क्लेशो रवेः प्राणगतेऽप्यहौ ५

**5. …-Rahu. Hunger, danger from poison, loss of wealth, as a result of punishment by the king.**

नानाविद्यार्थसम्पत्तिः कार्यलाभो गतागतैः
नृपविप्राश्रमे सूक्ष्मे रवेः प्राणगते गुरौ ६

**6. …-Jupiter. Success in many educational spheres, gain of wealth, success in ventures, as a result of the exchange of visits with the king and Brahmins.**

बन्धनं प्राणनाशश्च चित्तोद्वेगस्तथैव च
बहुबाधा महाहानी रवेः प्राणगते शनौ ७

**7. …-.Saturn. Imprisonment, death, excitement, obstacles and losses in ventures.**

राजान्नभोगः सततं राजलाञ्छानतत्पदम्
आत्मा सन्तर्पयेदेवं रवेः प्राणगते बुधे ८

**8. …-.Mercury. Feeding from the kings kitchen, acquisition of Chatr and Chamar with royal symbols, attainment of the position of a high dignitary in government.**

अन्योऽन्यं कलहश्चैव वसुहानिः पराजयः
गुरुस्त्रीबन्धुविर्गैश्च सूर्यप्राणगते ध्वजे ९

**9. …-.Ketu. Loss of wealth, due to quarrels with the preceptor (elders), wife and kinsmen.**

राजपूजा धनाधिक्यं स्त्रीपुत्रादिभवं सुखम्
अन्नपानादिभोगादि सूर्यप्राणगते भृगौ १०

**10. …-Venus. Recognition, or reverence from the king, increase in wealth, happiness from wife and children, enjoyments from eating and drinking.**

स्त्रीपुत्रादिसुखं द्रव्यं लभते नूतनाम्बरम्
योगसिद्धिं समाधिञ्च निजप्राणगते विधौ ११

**11. ….Moon-Moon. Happiness from wife and children, gain of wealth and clothes, Yoga Sidhi.**

क्षयं कुष्ठं बन्धुनाशं रक्तस्त्रावान्महद्भयम्
भूतावेशादि जायेत विधोः प्राणगते कुजे १२

12. …-Mars. Consumption, leprosy, destruction of kinsmen, bleeding, creation of turbulence by friends and goblins.

सर्पभीतिविशेषेण भूतोपद्रवान् सदा
दृष्टिक्षोभो मतिभ्रंशो विधोः प्राणगतेऽप्यगौ १३

13. …-Rahu. Danger from snakes, creation of turbulance by evil spirits, weakness of eyesight, confusion of mind.

धर्मवृद्धिः क्षमाप्राप्तिर्देवब्राह्मणपूजनम्
सौभाग्यं प्रियदृष्टिश्च चन्द्रप्राणगते गुरौ १४

14. …-Jupiter. Growth of religious-mindedness, forgiveness, devotion towards deities and Brahmins, good fortune, meeting with near and dear ones.

सहसा देहपतनं शत्रूपद्रववेदना
अन्धत्वं च धनप्राप्तिश्चन्द्रप्राणगते शनौ १५

15. …-Saturn. Unexpected and sudden physical distress, creation of troubles by enemies, weakness of eyesight, gain of wealth.

चामरच्छत्रसम्प्राप्ती राज्यलाभो नृपात्ततः
समत्वं सर्वभूतेषु चन्द्रप्राणगते बुधे १६

16. …-Mercury. Gift of Chamar and Chatr by the king, acquisition of a kingdom, even-mindedness in people.

शस्त्राग्निरिपुजा पीडा विषाग्निः कुक्षिरोगता
पुत्रदारवियोगश्च चन्द्रप्राणगते ध्वजे १७

17. …-Ketu. Danger from weapons, from fire, from an enemy and from poison, stomach troubles, separation from wife and children.

पुत्रमित्रकलत्राप्तिविदेशाच्च धनागमः
सुखसम्पत्तिरर्थश्च चन्द्रप्राणगते भृगौ १८

18. …-Venus. Acquisition of friends and wife, gain of wealth from foreign lands, all kinds of enjoyments.

क्रूरता कोपवृद्धिश्च प्राणहानिर्मनोव्यथा
देशत्यागो महाभीतिश्चन्द्रप्राणगते रवौ १९

19. …-Sun. Brutality, increase in anger, fear of death, agony, going away from the homeland, dangers.

कलहो रिपुभिर्बन्धः रक्तपित्तादिरोगभीः
निजसूक्ष्मदशामध्ये कुज प्राणगते फलम् २०

20. ….Mars-Mars. Quarrels with the enemy, imprisonment, bilious and blood pollution troubles.

विच्युतः सुतदारैश्च बन्धूपद्रवपीडितः
प्राणत्यागो विषेणैव भौमप्राणगतेऽप्यहौ २१

21. …-Rahu. Separation from wife and children, distress, as a result of oppression by kinsmen, fear of death, poison.

देवार्चनपरः स्त्रीमान्मन्तानुष्ठानतत्परः
पुत्रपौत्रसुखावाप्तिर्भौमप्राणगते गुरौ २२

22. …-Jupiter. Devotion towards deities, gain of wealth, competence in Mantra rituals.

अग्निबाधा भवेन्मृत्युरर्थनाशः पदच्युतिः
बन्धुभिबन्धुतावाप्तिर्भौमप्राणगते शनौ २३

**23. ...-Saturn. Danger from fire, death, loss of wealth, loss of position, but good relations with kinsmen.**

दिव्याम्बरसमुत्पत्तिर्दिव्याभरणभूषितः
दिव्याङ्गनायाः सम्प्राप्तिर्भौमप्राणगते बुधे २४

**24. ...-Mercury. Gains of splendid garments, ornaments, marriage.**

पतनोत्पातपीडा च नेत्रक्षोभो महद्भयम्
भुजङ्गाद् द्रव्यहानिश्च भौमप्राणगते ध्वजे २५

**25. ...-Ketu. Fear of falling down from a high place, eye troubles, danger from snakes, loss of reputation.**

धनधान्यादिसम्पत्तिर्लोकपूजा सुखागमा

नानाभोगैर्भवेद्भोगी भौमप्राणगते भृगौ २६

**26. ...-Venus. Gain of wealth, reverence amongst people, enjoyment of many kinds of luxuries.**

ज्वरोन्मादः क्षयोऽर्थस्य राजविस्नेहसम्भवः
दीर्घरोगी दरिद्रः स्याद्भौमप्राणगते रवौ २७

**27. ...-Sun. Fevers, lunacy, loss of wealth, wrath of the king, poverty.**

भोजनादिसुखप्राप्तिर्वस्त्राभरणजं सुखम्
शीतोष्णव्याधिपीडा च भौमप्राणगते विधौ २८

**28. ...-Moon. Comforts of good food and garments, distress from heat and cold.**

अन्नाशने विरक्तश्च विषभीतिस्तथैव च
साहसाद्धननाशश्च राहौ प्राणगते भवेत् २९

**29. ....Rahu-Rahu. Loss of taste in eating, danger from poison, loss of wealth through rashness.**

अङ्गसौख्यं विनिर्भीतिर्वाहनादेश्च सङ्गता
नीचैः कलहसम्प्राप्ती राहोः प्राणगते गुरौ ३०

**30. ...-Jupiter. Physical well-being, fearlessness, gain of conveyance and quarrels with menials.**

गृहदाहः शरीरे रुङ् नीचैरपहृत धनम्
तथा बन्धनसम्प्राप्ती राहोः प्राणगते शनौ ३१

**31. ...-Saturn. Danger from fire, diseases, loss of wealth through menials, imprisonment.**

गुरूपदेशविभवो गुरुसत्कारवर्द्धनम्
गुणवाञ्छीलवांश्चापि राहोः प्राणगते बुधे ३२

**32. ...-Mercury. Devotion towards the preceptor and increase of wealth through his beneficence, good qualities and well cultured.**

स्त्रीपुत्रादिविरोधश्च गृहान्निष्क्रमणादपि
साहसात्कायहानिश्च राहोः प्राणगते ध्वजे ३३

**33. ...-Ketu. Antagonism with wife and children, going away from home, loss of wealth through rashness.**

छत्रवाहनसम्पत्तिः सर्वार्थफलसञ्चयः
शिवार्चनगृहारम्भो राहोः प्राणगते भृगौ ३४

**34. ...-Venus. Acquisition of Chatr, Chamar, conveyances etc., success in all ventures, worship of Lord Shiva, construction of a house.**

अर्शादिरोगभीतिश्च राज्योपद्रवसम्भवः
चतुष्पादादिहानिश्च राहोः प्राणगते रवौ ३५

**35. ...-Sun. Affliction with piles, wrath of the king, loss of cattle.**

सौमनस्यं च सद्बुद्धिः सत्कारो गुरुदर्शनम्
पापाद्भीतिर्मनःसौख्यं राहोः प्राणगते विधौ ३६

**36. ...-Moon. Development of mental powers and intelligence, popul6thty, visits of preceptors, danger of committing sins.**

चाण्डालाग्निवशाद्भीतिः स्वपदच्युतिरापदः
मलिनः श्वादिवृत्तिश्च राहोः प्राणगते कुजे ३७

**37. ...-Mars. Dangers from menials and fire, loss of position, disaster, filthiness and meanness.**

हर्षागमो धनाधिक्यमग्निहोत्रं शिवार्चनम्
वाहनं छत्रसंयुक्तं निज प्राणगते गुरौ ३८

**38. ...Jupiter-Jupiter. Happiness, increase in wealth, performance of Havan, worship of Lord Shiva, acquisition of Chatr and conveyances.**

व्रतहानिर्विषादश्च विदेशे धननाशनम्
विरोधो बन्धुवर्गैश्च गुरोः प्राणगते शनौ ३९

**39. ...-Saturn. Failure in fasting, unhappiness, going away to foreign lands, loss of wealth, antagonism with kinsmen.**

विद्याबुद्धिविवृद्धिश्च लोके पूजा धनागमः
स्त्रीपुत्रादिसुखप्राप्तिर्गुरोः प्राणगते बुधे ४०

**40. ...-Mercury. Progress in education, increase in intelligence, happiness to wife and children, popul6thty, gain of wealth.**

ज्ञानं विभवपाण्डित्यं शास्त्रज्ञानं शिवार्चनम्
अग्निहोत्रं गुरोर्भक्तिर्गुरोः प्राणगते ध्वजे ४१

**41. ...-Ketu. Opulence and glory, learnedness, gain of knowledge of Shastras, worship of Lord Shiva, performance of Havan, devotion towards preceptor.**

रोगान्मुक्तिः सुखं भोगो धनधान्यसमागमः
पुत्रदारादिजं सौख्यं गुरोः प्राणगते भृगौ ४२

**42. ...-Venus. Freedom from diseases, enjoyments, increase in wealth, happiness from wife and children.**

वातपित्तप्रकोपं च श्लेष्मोद्रेकं तु दारुणम्
रसव्याधिकृतं शूलं गुरोः प्राणगते रवौ ४३

**43. ...-Sun. Disorders of wind, bile and phlegm, pains, due to disorders of juices in the body.**

छत्रचामरसंयुक्तं वैभवं पुत्रसम्पदः
नेत्रकुक्षिगता पीडा गुरोः प्राणगते विधौ ४४

**44. ...-Moon. Acquisition of Chatr with royal symbol, opulence and glory, increase in children, eye and stomach troubles.**

स्त्रीजनाच्च विषोत्पत्तिर्बन्धनं चातिनिग्रहः
देशान्तरगमो भ्रान्तिर्गुरोः प्राणगते कुजे ४५

**45. ...Mars. Danger of administration of poison by wife, imprisonment, foreign journeys, confusion of mind.**

व्याधिभिः परिभूतः स्याच्चौरैरपहृतं धनम्
सर्पवृश्चिकभीतिश्च गुरोः प्राणगतेऽप्यहौ ४६

**46. …Rahu. Distress from diseases, troubles from thieves, danger from snakes, scorpions etc.**

ज्वरेण ज्वलिता कान्तिः कुष्ठरोगोदरादिरुक्

जलाग्निकृतमृत्युः स्यान्निजप्राणगते शनौ ४७

**47. ….Saturn-Saturn: Loss of luster, due to fevers, leprosy, stomach troubles, danger of death from fire.**

धनं धान्यं च माङ्गल्यं व्यवहाराभिपूजनम्
देवब्राह्मणभक्तिश्च शनेः प्राणगते बुधे ४८

**48. …-Mercury. Gain of wealth and grains, profits in business, reverence, devotion towards deities and Brahmins.**

मृत्युवेदनदुःखं च भूतोपद्रवसम्भवः
परदाराभिभूतत्वं शनेः प्राणगते ध्वजे ४९

**49. …-Ketu. Death-like distress, creation of turbulence by evil spirits, insult from a woman, other than ones wife.**

पुत्रार्थविभवैः सौख्यं क्षितिपालादितः सुखम्
अग्निहोत्रं विवाहश्च शनेः प्राणगते भृगौ ५०

**50. …-Venus. Enjoyments through wealth, son and beneficence of the king, performance of Havanas, marriage etc.**

अक्षिपीडा शिरोव्याधिः सर्पशत्रुभयं भवेत्
अर्थहानिर्महाक्लेशः शनेः प्राणगते रवौ ५१

**51. …-Sun. Troubles in the eyes and forehead, danger from snakes and enemies, loss of wealth, distress.**

आरोग्यं पुत्रलाभश्च शान्तिपौष्टिकवर्धनम्
देवब्राह्मणभक्तिश्च शनेः प्राणगते विधौ ५२

**52. …-Moon. Sound health, birth of a son, relief, thriving strength, devotion towards deities and Brahmins.**

गुल्मरोगः शत्रुभीतिर्मृगया प्राननाशनम्
सर्पाग्निविषतो भीतिः शनेः प्राणगते कुजे ५३

**53. …-Mars. Affliction with Gulma, danger from enemy, danger of death during hunting, danger from snakes, from fire and from poison.**

देशत्यागो नृपाद्भीतिर्मोहनं विषभक्षणम्
वातपित्तकृता पीडा शनेः प्राणगतेऽप्यहौ ५४

**54. …-Rahu. Going away from the homeland, danger from the king, bewitchment, taking of poison, troubles from wind and bile.**

सेनापत्यं भूमिलाभः संगमः स्वजनैः सह
गौरवं नृपसम्मानं शनेः प्राणगते गुरौ ५५

**55. …-Jupiter. Attainment of the position of a Commander in the Army, gain of land, association with ascetics, reverence from the king.**

आरोग्यं सुखसम्पत्तिर्धर्मकर्मादिसाधनम्
समत्वं सर्वभुतेषु निजप्राणगते बुधे ५६

**56. ….Mercury-Mercury. Increase in enjoyments, wealth and religious-mindedness, even-mindedness in all living beings.**

वह्नितस्करतो भीतिः परमाधिर्विषोद्भवः
देहान्तकरणं दुःखं बुधप्राणगते ध्वजे ५७

**57. …-Ketu. Danger from thieves, from fire and from poison, death-like suffering.**

प्रभुत्वं धनसम्पत्तिः कीर्तिर्धर्मः शिवार्चनम्
पुत्रदारादिकं सौख्यं बुधप्राणगते भृगौ ५८

**58. …-Venus. Supremacy over others, increase in wealth, reputation and religious-mindedness, devotion to Lord Shiva, happiness from son.**

अन्तर्दाहो ज्वरोन्मादौ बान्धवानां रति स्त्रियाः
प्राप्यते स्तेयसम्पत्तिर्बुधप्राणगते रवौ ५९

**59. …-Sun. Agony, fevers, lunacy, affectionate relations with wife and kinsmen, receipt of stolen property.**

स्त्रीलाभश्चार्थसम्पत्तिः कन्यालाभो धनागमः
लभते सर्वतः सौख्यं बुधप्राणगते विधौ ६०

**60. …-Moon. Happiness from wife, birth of a daughter, gain of wealth and enjoyments all-round.**

पतितः कुक्षिरोगी च दन्तनेत्रादिजा व्यथा
अर्शांसि प्राणसन्देहो बुधप्राणगते कुजे ६१

**61. …-Mars. Tendency to indulge in nef6thous activities, pain in eyes, teeth and stomach, piles, danger from death.**

वस्त्राभरणसम्पत्तिर्वियोगो विप्रवैरिता
सन्निपातोद्भवं दुखं बुधप्राणगतेऽप्यहौ ६२

**62. …-Rahu. Gain of clothes, ornaments and wealth, separation from ones own people, antagonism with Brahmins, delirium.**

गुरुत्वं धनसम्पत्तिर्विद्या सद्गुणसंग्रहः
व्यवसायेन सल्लाभो बुधप्राणगते गुरौ ६३

**63. …-Jupiter. Sublimately, progress in education, increase in wealth and good qualities, profits in business.**

चौर्येण निधनप्राप्तिर्विधनत्वं दरिद्रता
याचकत्वं विशेषेण बुधप्राणगते शनौ ६४

**64. …-Saturn. Danger of death from thieves, poverty, beggary.**

अश्वपातेन घातश्च शत्रुतः कलहागमः
निर्विचारवधोत्पत्तिर्निजप्राणगते ध्वजे ६५

**65. ….Ketu-Ketu. Danger of fall from a conveyance, quarrels with the enemy, committing a murder inadvertently.**

क्षेत्रलाभो वैरिनाशो हयलाभो मनःसुखम्
पशुक्षेत्रधनाप्तिश्च केतोः प्राणगते भृगौ ६६

**66. …-Venus. Gain of land and conveyance, happiness, destruction of enemy, increase in cattle wealth.**

स्तेयाग्निरिपुभीतिश्च धनहानिर्मनोव्यथा
प्राणान्तकरणं कष्टं केतोः प्राणगते रवौ ६७

**67. …-Sun. Danger from fire and enemy, loss of wealth, mental agony, death-like suffering.**

देवद्विजगुरोः पूजा दीर्घयात्रा धनं सुखम्

कर्णे वा लोचने रोगः केतोः प्राणगते विधौ ६८

**68. …-Moon. Devotion towards deities and Brahmin, journeys to distant places, gain of wealth and happiness, eye and ear troubles.**

पित्तरोगो नसावृद्धिर्विभ्रमः सन्निपातजः
स्वबन्धुजनविद्वेषः केतोः प्राणगते कुजे ६९

**69. …-Mars. Bilious troubles, enlargement of veins, delirium, antagonism with kinsmen.**

विरोधः स्त्रीसुताद्यैश्च गृहान्निष्क्रमणं भवेत्
स्वसाहसात्कार्यहानिः केतोः प्राणगतेऽप्यहौ ७०

**70. …-Rahu. Antagonism with son and wife, going away from home, loss in ventures, due to rashness.**

शस्त्रव्रणैर्महारोगो हृत्पीडादिसमुद्भवः
सुतदारवियोगश्च केतोः प्राणगते गुरौ ७१

**71. …-Jupiter. Injuries from weapons, wounds, heart disease, separation from wife and children.**

मतिविभ्रमतीक्ष्णत्वं क्रूरकर्मरतिः सदा
व्यवसनाद्बन्धनं दुःखं केतोः प्राणगते शनौ ७२

**72. …-Saturn. Confusion of mind, tendencies towards nef6thous deeds, imprisonment on account of addictions (in drugs etc.), distress.**

कुसुमं शयनं भूषा लेपनं भोजनादिकम्
सौख्यं सर्वाङ्गभोग्यं च केतोः प्राणगते बुधे ७३

**73. …-Mercury. Enjoyments of bed, perfumery, ornaments and sandal, good food and availability of all kinds of comforts.**

ज्ञानमीश्वरभक्तिश्च सन्तोषश्च धनागमः
पुत्रपौत्रसमृद्धिश्च निजप्राणगते भृगौ ७४

**74…... Venus-Venus. Learning, devotion to deities, satisfaction, gain of wealth, increase in the number of children.**

लोकप्रकाशकीर्तिश्च सुतसौख्यविवर्जितः
उष्णादिरोगजं दुखं शुक्रप्राणगते रवौ ७५

**75. …-Sun. Good reputation in public, loss of happiness in respect of children, heat troubles.**

देवार्चने कर्मरतिर्मन्त्रतोषणतत्परः
धनसौभाग्यसम्पत्तिः शुक्रप्राणगते विधौ ७६

**76. …-Moon. Devotion towards deities, competence, relief by the application of Mantras, increase in wealth and fortune.**

ज्वरो मसूरिकास्फोटकण्डूचिपिटकादिकाः
देवब्राह्मणपूजा च शुक्रप्राणगते कुजे ७७

**77. …-Mars. Fevers, wounds, ringworms, itches, devotion towards deities and Brahmins.**

नित्यं शत्रुकृता पीडा नेत्रकुक्षिरुजादयः
विरोधः सुहृदां पीडा शुक्रप्राणगतेऽप्यहौ ७८

**78. …-Rahu. Distress from an enemy, eye and stomach troubles, antagonism with friends.**

आयुरारोग्यमैश्वर्यं पुत्रस्त्रीधनवैभवम्
छत्रवाहनसंप्राप्तिः शुक्रप्राणगते गुरौ ७९

**79. …-Jupiter. Good longevity, sound health, happiness from wealth, wife and children, acquisition of Chatr and conveyances.**

राजोपद्रवजा भीतिः सुखहानिर्महारुजः
नीचैः सह विवादश्च भृगोः प्राणगते शनौ ८०

**80. …-Saturn. Danger from the king, loss of happiness, critical disease, controversy with menials.**

सन्तोषो राजसम्मानं नानादिग्भूमिसम्पदः
नित्यमुत्साहवृद्धिः स्याच्छुक्रप्राणगते बुधे ८१

**81. …-Mercury. Satisfaction, reverence from the king, gains of land and wealth from many directions, increase in enthusiasm.**

जीवितात्मयशोहानिर्धनधान्यपरिक्षयः
त्यागभोगधनानि स्युः शुक्रप्राणगते ध्वजे ८२

एवमृक्षदशानां हि सान्तराणां मया द्विज
फलानि कथितान्यत्र संक्षेपादेव तेऽग्रतः ८३

**82. …-Ketu. Loss of life, wealth and reputation, only some money is left for charities and sustenance.**

M

अथ कालचक्रान्तर्दशाफलाध्यायः ६४
जगद्धिताय प्रोक्तानि पुरा यानि पुरारिणा
तानि चक्रान्तर्दशाफलानि कथयाम्यहम् १

## Ch. 64. Effects of Antar Dashas in the Kala Chakra

**1. Mahārśi Parashara said. Now I am going to describe to you the effects of Antar Dashas in the Kala Chakra Dasha, as related by Lord Shiva to the Goddess Parvati.**

मेषांशे स्वान्तरे भौमे ज्वरश्च व्रणसम्भवः
बुधशुक्रेन्दुजीवेषु सुखं शत्रुभयं रवौ २

**2. Dasha of Aries Ańś. There will be wounds and fever in the Antar Dasha of Mars in the Dasha of Aries Ańś. In the same Dasha and Antar Dasha of the Rāśis, owned by Mercury, Venus, Moon and Jupiter, all kinds of happiness will be enjoyed. Danger from an enemy will be experienced in the Antar Dasha of Sun.**

वृषांशे स्वान्तरे सौरे कलहो रोगसम्भवः
विद्यालाभस्तनौ सौख्यं गुरौ तत्र गते फलम् ३

देशत्यागो मृतिर्वापि शस्त्रघातो ज्वरोऽथवा
वृषभस्वांशके विप्र कुजे तत्र गते फलम् ४

वस्त्राभरणलाभश्च स्त्रीसुयोगो महत् सुखम्
शुक्रेन्दुसुतचन्द्रेषु वृषभस्वांशके फलम् ५

**3-5. Dasha of Taurus Ańś. Effects, like quarrels and diseases, will be experienced in Antar Dasha of Saturn. There will be gains of education and physical felicity in the Antar Dasha of Jupiter, going away from home, death, or distress from fevers in the Antar Dasha of Mars and gains of garments, happy association with women in the Antar Dashas of the Rāśis, owned by Venus and Mercury. Danger from the king and violent animals may be expected in the Antar Dasha of Rāśi, owned by Sun.**

नृपाद् भयं पितृमृतिः स्ववदाद्यैर्भयं रवौ
मिथुने स्वांशके शुक्रे धनवस्त्रसमागमः ६

पितृमातृमृतेर्भीतिर्ज्वरश्च व्रणसम्भवः
दूरदेशप्रयाणं च मिथुने स्वांशके कुजे ७

बुद्धिविद्याविवृद्धिश्च महाविभवसम्भवः
लोके मानश्च प्रीतिश्च मिथुने स्वांशके गुरौ ८

विदेशगमनं व्याधिर्मरणं धननाशनम्
बन्धुनाशोऽथवा विप्र मिथुने स्वांशके शनौ ९

विद्यावस्त्रादिलाभश्च दारपुत्रादिजं सुखम्
सर्वत्र मानमाप्नोति मिथुने स्वांशके बुधे १०

**6-10. Dasha of Gemini Ańś. The effects in the Antar Dashas of the Rāśis concerned will be, as follows. Venus - gain of wealth and garments. Mars- death of parents, danger, fever, wounds and travels to distant places. Jupiter - increase in intelligence, success in education, opulence and glory, popul6thty and affection towards others. Saturn - foreign journeys, diseases, fear of death, loss of wealth and kinsmen. Mercury - success in education, gains of garments etc., happiness from wife and children and reverence from all quarters.**

कर्क स्वांशगते चन्द्रे पुत्रदारसुखं महत्
ऐश्वर्यं लभते लोके मानं प्रीतिं तथैव च ११

शत्रुभ्यश्च पशुभ्यश्च भयं राजकुलात् तथा
आधिव्याधिभयं चैव कर्के स्वांशगते रवौ १२

पुत्रदारसुहृत्सौख्यं धनवृद्धिस्तथैव च
लोके मानं यशश्चैव कर्कांशे बुधशुक्रयोः १३

विषशस्त्रमृतेर्भीतिं ज्वररोगादिसम्भवाम्
पीडां चैव समाप्नोति कर्के स्वांशगते कुजे १४

विभवस्यातिलाभश्च शरीरेऽपि सुखं तथा
नृपात् सम्मानलाभश्च कर्के स्वांशगते गुरौ १५

वातव्याधिभयं घोरं सर्पवृश्चिकतो भयम्
नानाकष्टमवाप्नोति कर्के स्वांशगते शनौ १६

**11-16. Dasha of Cancer Ańś. The effects in the various Antar Dashas of the Rāśis concerned will be, as follows. Moon - happiness from wife and children, gain of wealth and reverence from the public. Sun - danger from enemies, animals and the royal family, mental agony and fear of diseases. Mercury and Venus - happiness from wife, children and friends, increase in wealth, popularity and name and fame. Mars- danger from poison, weapons and diseases, like fever. Jupiter - gains of wealth, physical felicity, honors from the king. Saturn - rheumatism, danger from snakes and scorpions and distress of all kinds.**

सिंहांशे स्वांशगे भौमे मुखरोगभयं दिशेत्
पित्तज्वरकृतां वाधां शस्त्रक्षतमथापि वा १७

धनवस्त्रादिलाभश्च स्त्रीपुत्रादिसुखं तथा
बुधभार्गवयोर्विप्र सिंहांशे स्वान्तरस्थयोः १८

उच्चात् पतनभीतिश्च स्वल्पद्रव्यसमागमः
विदेशगमनं चैव सिंहे स्वान्तर्गते विधौ १९

भयं शत्रुजनेभ्यश्च ज्वरादिव्याद्धिसम्भवः
ज्ञानहानिर्मृतिर्भीतिः सिंहे स्वान्तर्गते रवौ २०

धनधान्यादिलाभं च प्रसादं द्विजभूपयोः
विद्यावृद्धिमवाप्नोति सिंहे स्वान्तर्गते गुरौ २१

**17-21. Dasha of Leo Ańś. … Mars- diseases of the mouth, bilious fever and danger from weapon. Mercury and Venus - gain of clothes, happiness from wife and children. Moon - danger from fall from some height, meager gains of wealth, foreign journeys. Sun - danger from enemies, fevers, loss of wisdom, fear of death. Jupiter - gains of wealth and grains, beneficence of the king and Brahmins, progress in education.**

कन्यायां स्वांशगे सौरे कष्टं प्राप्नोति मानवः
द्रयाणं च ज्वरं चैव क्षुद्रवं वैक्लवं तथा २२

नृपप्रसादमैश्वर्यं सुहृद्बन्धुसमागमम्
विद्यावृद्धिमवाप्नोति कन्यायां स्वांशके गुरौ २३

पित्तज्वरभवा पीडा विदेशे गमनं तथा
शस्त्रघातोऽग्निभीतिश्च कन्यायां स्वान्तरे कुजे २४

भृत्यपुत्रार्थलाभश्च नानासुखसमागमः
बुधभार्गवचन्द्रेषु कन्यास्वांशगतेषु च २५

प्रयाणं रोगभीतिश्च कलहो बन्धुभिः सह
शस्त्रघातभयं चैव कन्यांशे स्वांशगे रवौ २६

**22-26. Dasha of Virgo Ańś. … Saturn - many kinds of troubles, travels to distant places, fevers, distress from hunger. Jupiter - gains of wealth through the beneficence of the king, arrival of friends and kinsmen and success in education. Mars- bilious fever, travels to distant places, danger from fire and from weapons. Mercury, Venus and Moon - gains of wealth through sons and employees, many enjoyments. Sun - travel to distant lands, danger from diseases, quarrels with kinsmen, danger of assaults by weapons.**

तुले स्वान्तर्गते शुक्रे सद्बुद्धिश्च सुखोदयः
स्त्रीपुत्रधनवस्त्रादिलाभो भवति निश्चितः २७

पितृकष्टं सुहृद्वैरं शिरोरोगो ज्वरोदयः
विषशस्त्राग्निभीतिश्च तुले स्वान्तर्गते कुजे २८

द्रव्यरत्नादिलाभश्च धर्मकार्यं नृपादरः
सर्वत्र सुखसम्प्राप्तिस्तुले स्वांशगते गुरौ २९

प्रयाणं च महाव्याधिः क्षेत्रादेः क्षतिरेव च
शत्रुवाधा च कार्येषु तुले स्वांशगते शनौ च ३०

पुत्रजन्म धनप्राप्तिः स्त्रीसुखं च मनःप्रियम्
भाग्योदयश्च विज्ञेयस्तुले स्वान्तर्गते बुधे ३१

**27-31. Dasha of Libra Ańś. … Venus - wisdom, comforts, happiness from wife and children and from wealth, garments etc. Mars- distress to father, enmity with friends, danger from disease of forehead, fevers, poison, weapons etc. Jupiter - gain of wealth, acquisition of a kingdom, performance of religious rites, honors from the king and happiness all-round. Saturn - travels to distant places, critical diseases, loss in the agricultural sphere, danger from enemies. Mercury - birth of a son, gain of wealth, happiness from ones wife, joy, dawn of fortune.**

शशाङ्कबुधशुक्रेषु वृश्चिके स्वांशगेषु च
नानाधान्यधनप्राप्तिर्व्याधिविनाशो महत् सुखम् ३२

शत्रुक्षोभभयं व्याधिमर्थनाशं पितुर्भयम्
श्वापदाद् भयमाप्नोति वृश्चिके स्वांशगे रवौ ३३

**32-33. Dasha of Scorpio Ańś. The following effects will be experienced in the Antar Dashas of the Rāśis concerned. Moon, Mercury and Venus - gain of wealth and grains in different ways, freedom from diseases, enjoyments of many kinds. Sun - danger from enemies, loss of wealth, distress to father, danger from wild and violent animals. Mars- troubles from wind and bile, wounds, danger from fire and from weapons. Jupiter - gains of wealth, grains,. and gems, devotion towards deities and Brahmins, beneficence of the king. Saturn - loss of wealth, separation from kinsmen, mental anxiety, danger from enemies, diseases.**

वातपित्तभयं चैव मसूरीव्रणमादिशेत्
अग्निशस्त्रादिभीतिश्च वृश्चिके स्वांशगे कुजे ३४

धनं धान्यञ्च रत्नं च देवब्राह्मणपूजनम्
राजप्रसादमाप्नोति वृश्चिके स्वांशगे गुरौ ३५

धनबन्धुविनाशश्च जायते मानसी व्यथा
शत्रुवाधा महाव्याधिर्वृश्चिके स्वांशगे शनौ ३६

अतिदाहं ज्वरं छर्दि मुखरोगं विशेषतः

नानाक्लेशमवाप्नोति चापांशे स्वांशगे कुजे ३७

श्रियं विद्यां च सौभाग्यं शत्रुनाशं नृपात् सुखम्
भार्गवेन्दुचन्द्राणां चापे स्वस्वांशके दिशेत् ३८

भार्यावित्तविनाशं च कलहं च नृपाद् भयम्
दूरयात्रामवाप्नोति चापांशे स्वांशगे रवौ ३९

दानधर्मतपोलाभं राजपूजनमाप्नुयात्
भार्याविभवलाभं च चापे स्वांशगते गुरौ ४०

**34-40. Dasha of Sagittarius Aṅś. The following effects will be derived in the various Antar Dashas of the Rāśis, owned by… Mars- heart burn, fevers, cold, diseases of the mouth, many kinds of troubles. Venus, Mercury and Moon - increase in wealth and property and fortune, progress in education, destruction of enemies, happiness from the king. Sun - loss of wife and wealth, quarrels, danger from the king, travels to distant lands. Jupiter - ch6thty, self-mortifications, honors from the king, increase in religious-mindedness, happiness from wife, gain of wealth.**

द्विजदेवनृपोद्भूतं कोपं बन्धुविनाशनम्
देशत्यागमवाप्नोति मकरस्वांशगे शनौ ४१

देवार्चनं तपोध्यानं सम्मानं भूपतेः कुले
भार्गवज्ञेन्दुजीवानां मृगांशेऽन्तर्दशाफलम् ४२

शिरोरोगं ज्वरं चैव करपादक्षतं दिशेत्
रक्तपित्तातिसारांश्च मृगस्वांशगते कुजे ४३

विनाशं पितृबन्धूनां ज्वररोगादिकं दिशेत्
नृपशत्रुभयं चैव मृगांशस्वांशगे शनौ ४४

**41-44. Dasha of Capricorn Aṅś. The following effects will be experienced in the various Antar Dashas of the Rāśis, owned by… Saturn - wrath of Brahmins, deities and the king, loss of kinsmen, abandonment of the homeland. Venus, Mercury, Moon and Jupiter - devotion towards deities, self-mortification, honors from the government. Mars- disease of the forehead, assaults on hands and feet, danger from dysentery, blood pollution and bilious troubles. Saturn - loss of father and kinsmen, fevers, danger from the king and the enemies.**

नानाविद्यार्थलाभश्च पुत्रस्त्रीमित्रजं सुखम्
शरीरारोग्यमैश्वर्यं कुम्भे स्वांशगते भृगौ ४५

ज्वराग्निचोरजा पीडा शत्रुणां च महद् भयम्
मनोव्यथामवाप्नोति घटांशस्वान्तरे कुजे ४६

नैरुज्यं च सुखं चैव सम्मानं भूपतेः द्विजात्
मनःप्रसादमाप्नोति कुम्भांशस्वांशगे गुरौ ४७

धातुत्रयप्रकोपं च कलहं देशविभ्रमम्
क्षयव्याधिमवाप्नोति कुंभांशस्वांशगे शनौ ४८

पुत्रमित्रधनस्त्रीणां लाभं चैव मनःप्रियम्
सौभाग्यवृद्धिमाप्नोति कुम्भांशस्वांशगे बुधे ४९

**45-49. Dasha of Aquarius Aṅś. … Venus - many kinds of educational attainments, gains of property, happiness from wife and children, sound health and increase in wealth. Mars- fevers, danger from fire and from enemies, distress from enemies and mental agony. Saturn - danger of troubles from wind, bile and phlegm, quarrels, foreign journey, danger of suffering from tuberculosis. Jupiter - freedom from ill health, happiness, honors from the king and joy. Mercury - happiness from wife, children and wealth, joy, increase in good fortune.**

विद्यावृद्धिमवाप्नोति स्त्रीसुखं व्याधिनाशनम्
सुहृत्सङ्गं मनःप्रीतिं मीनांशस्वांशगे विधौ ५०

बन्धुभिः कलहं चैव चौरभीतिं मनोव्यथाम्
स्थानभ्रंशमवाप्नोति मीनांशस्वांशगे रवौ ५१

रणे विजयमाप्नोति पशुभूमिसुतागमम्
धनवृद्धिश्च मीनांशे स्वांशयोर्बुधशुक्रयोः ५२

पित्तरोगं विवादञ्च स्वजनैरपि मानवः
शत्रुणां भयमाप्नोति मीनांशस्वांशगे कुजे ५३

धनवस्त्रकलत्राणां लाभो भूपसमादरः
प्रतिष्ठा बहुधा लोके मीनांशस्वांशगे गुरौ ५४

धननाशो मनस्तापो वेश्यादीनां च सङ्गमात्
देशत्यागो भवेद्वापि मीनांशस्वांशगे शनौ ५५

**50-55. Dasha of Pisces Aṅś. … Moon - increase in wisdom and educational attainments, happiness from wife, freedom from disease, association with friends, joy and happiness. Sun - quarrels with kinsmen, danger from thieves, mental agony, loss of position. Mercury and Venus - victory in war, birth of a son, gains of land and cattle, increase in wealth. Mars- bilious troubles, dissension with members of the family, danger from enemies. Jupiter - gain of wealth and grains, happiness from wife, honors from the king, name and fame. Saturn - loss of wealth, mental agony, abandonment of the homeland on account of associations with prostitutes.**

एवं प्राज्ञैश्च विज्ञेयं कालचक्रदशाफलम्
अन्तर्दशाफलं चैव वामर्क्षेऽप्येवमेव च ५६

इदं फलं मया प्रोक्तं धर्माऽधर्मकृतं पुरा
तत्सर्वं पाणिभिर्नित्यं प्राप्यते नाऽत्र संशयः ५७

सुहृदोऽन्तर्दशा भव्या पापस्यापि द्विजोत्तम
शुभस्यापि रिपोश्चैवमशुभा च प्रकीर्तिता ५८

**56-58. Mahārśi Parashara said to Maitreya. O Brahmin! The effects of Antar Dashas in the Kala Chakra, which have been described above, are based on Savya Chakra. The effects of Antar Dashas in the Dashas of the Rāśis in the Apsavya Chakra have to be assessed, after taking into account the benefic and malefic natures of the Lords of the Rāśis. People have to enjoy the good, or suffer the bad results, according to their good, or bad actions in the previous births. Everybody suffers, or enjoys accordingly. The peculi6thty in this respect is, that inauspicious results have been ascribed to malefics. But, if during the Antar Dasha the Planet concerned is a friend of the Lord of the Dasha, the results of the Antar Dasha will be favourable. If the Planet concerned is a benefic, but an enemy of the Lord of the Dasha, his Antar Dasha effects will not prove favourable. This is how the Antar Dasha effects have to be analyzed and conclusions arrived at.**

अथ कालचक्रनवांशदशाफलाध्यायः ६५
मेषे तु रक्तजा पीडा वृषभे धान्यवर्द्धनम्
मिथुने ज्ञानवृद्धिश्च कर्के धनपतिर्भवेत् १

सिंहभे शत्रुबाधा स्यात् कन्यायां स्त्रीजनात् सुखम्
तुलभे राजमन्त्रित्वं वृश्चिके मृत्युतो भयम् २

अर्थलाभो भवेच्चापे मेषस्य नवभागके
फलमेवं विजानीयाद्दशाकाले द्विजोत्तम ३

## Ch. 65. Effects of Dashas of Rāśis in the Ańśas of the Various Rāśis

**1-3. The following will be the effects in the Dashas of Rāśis in Aries Ańś. Aries - distress from diseases, caused by blood pollution, Taurus - increase in grain production, Gemini - dawn of knowledge (Gyanodaya), Cancer - increase in wealth, Leo - danger from enemies, Virgo - happiness from wife, Libra - ministership, Scorpio - danger of death, Sagittarius - gains of wealth.**

मकरे पापकर्माणि कुम्भे वाणिज्यतो धनम्
मीने सर्वार्थसिद्धिश्च वृश्चिके वह्नितो भयम् ४

तुलभे राजपूजा च कन्यायां शत्रुतो भयम्
कर्के पत्नीजने कष्टं सिंहभे नेत्रपीडनम् ५

**4-5. … Taurus Ańś. Capricorn - tendency to indulge in sinful actions, Aquarius - profits in business, Pisces - success in all ventures, Scorpio - danger from fire, Libra - honors from the king, Virgo - danger from enemies, Cancer - distress to wife, Leo - eye troubles, Gemini - danger from poison.**

मिथुने विषतो भीतिर्वृषस्य नवमांशके
वृषभे धनलाभः स्थान्मेषे तु ज्वरसंभवः ६

मीने च मातुलप्रीतिः कुम्भे शत्रुप्रवर्धनम्
मकरे चोरतो भीतिश्चापे विद्याविवर्धनम् ७

मेषे तु शस्त्रसंघातो वृषे तु कलहो भवेत्
मिथुने सुखमाप्नोति मिथुनांशे फलं त्विदम् ८

**6-8. … Gemini Ańś. Taurus - gains of wealth, Aries - fever, Pisces - affectionate relations with maternal uncle, Aquarius - increase in enemies, Capricorn - danger from thieves, Sagittarius - progress in education, Aries - assaults from enemies, Taurus - quarrels, Gemini - happiness.**

कर्कटे सुखमाप्नोति सिंहे भूपालतो भयम्
कन्यायां बन्धुतः सौख्यं तुलभे कीर्तिमाप्नुयात् ९

वृश्चिके च पितुः कष्टं चापे ज्ञानधनागमः

मकरे त्वयशो लोके कुम्भे वाणिज्यतः क्षतिः १०

**9-10. … Cancer Ańś. Cancer - enjoyments, Leo - danger from the king, Virgo - happiness from kinsmen, Libra - good reputation, Scorpio - distress from father, Sagittarius - gain of knowledge and wealth, Capricorn - disgrace in public, Aquarius - loss in business, Pisces - travels to distant lands.**

मीने सुखमवाप्नोति कर्कांशे फलमीदृशम्
वृश्चिके कलहः पीडा तुलभे सुखसम्पदः ११

कन्यायां धनधान्यानि कर्के पशुगणाद् भयम्
सिंहे सुखं च दुःखं च मिथुने शत्रुवर्धनम् १२

वृषे च सुखसम्पत्तिः मेषे कष्टमवाप्नुयात्
मीने तु दीर्घयात्रा स्यात् सिंहांशे फलमीदृशम् १३

**11-13. … in Leo Aṅś. Scorpio - quarrels, distress, Libra - gain of wealth, happiness, Virgo - increase in wealth and grains, Cancer - danger from animals, Leo - both happiness and sorrows, Gemini - increase in enemies, Taurus - gain of property, happiness, Aries - distress, Pisces - long journey.**

कुम्भभे धनलाभः स्यान्मकरेऽपि धनागमः
चापे भ्रातृजनात् सौख्यं मेषे मातृसुखं वदेत् १४

वृषभे पुत्रसौख्यं च मिथुने शत्रुतो भयम्
कर्के दारजनैः प्रीतिः सिंहे व्याधिविवर्धनम् १५

**14-15. … Virgo Aṅś. Aquarius - gain of wealth, Capricorn - increase in wealth, Sagittarius - happiness from brothers, Aries - happiness from mother, Taurus - happiness from sons, Gemini - danger from enemies, Cancer - affectionate relation with wife, Leo - increase in ill health, Virgo - birth of a son.**

कन्यायां च सुतोत्पत्तिः कन्यांशे फलमीदृशम्
तुलभे धनसम्पत्तिर्वृश्चिके भ्रातृतः सुखम् १६

पितृवर्गसुखं चापे मातृकष्टं मृगे वदेत्
कुम्भे वाणिज्यतो लाभं मीने च सुखसम्पदम् १७

वृश्चिके च स्त्रियाः पीडा तुले च जलतो भयम्
कन्यायां सुखसम्पत्तिस्तुलांशे फलमीदृशम् १८

**16-18. … Libra Aṅś. Libra - gain of wealth, Scorpio - happiness from brothers, Sagittarius - happiness from brothers and uncles, Capricorn - distress to mother, Aquarius - profits in business, Pisces - gain of property, happiness, Scorpio - distress to wife, Libra - danger from water, Virgo - increase in property and happiness.**

कर्कभे धनहानिः स्यात् सिंहे भूपालतो भयम्
मिथुने भूमिलाभश्च वृशभे धनसम्पदः १९

मेषे तु रक्तजा पीडा मीने च सुखमादिशेत्
कुम्भे वाणिज्यतो लाभो मकरे च धनच्चितः २०

**19-20. … Scorpio Aṅś. Cancer - loss of wealth, Leo - danger from government, Gemini - gain of lands, Taurus - increase in wealth, Aries - distress on account of blood pollution, Pisces - happiness, Aquarius - profits in business, Capricorn - loss of wealth, Sagittarius - gain of property, happiness.**

चापे च सुखसम्पत्तिर्वृश्चिकांशे फलं त्विदम्
मेषे च धनलाभः स्यात् वृषे भूमिविवर्द्धनम् २१

मिथुने सर्वसिद्धिः स्यात् कर्कभे सुखसम्पदः
सिंहे सर्वसुखोत्पत्तिः कन्यायां कलहागमः २२

तुले वाणिज्यतो लाभो वृश्चिके रोगजं भयम्
चापे पुत्रसुखं वाच्यं धनुरंशे फलं त्विदम् २३

**21-23. … Sagittarius Aṅś. Aries - gain of wealth, Taurus - gain of lands, Gemini - success in all ventures, Cancer - gain of property, happiness, Leo - all comforts, Virgo - quarrels, Libra - profits in business, Scorpio - danger from diseases, Sagittarius - happiness to sons.**

मकरे पुत्रलाभः स्यात् कुम्भे धनविवर्धनम्
मीने कल्याणमाप्नोति वृश्चिके पशुतो भयम् २४

तुलभे त्वर्थलाभः स्यात् कन्यायां शत्रुतो भयम्
कर्कटे श्रियमाप्नोति सिंहे शत्रु जनाद् भयम् २५

**24-25. … Capricorn Aṅś. Capricorn - birth of a son, Aquarius - increase in wealth, Pisces - well-being, Scorpio - danger from animals, Libra - gain of wealth, Virgo - danger from enemies, Cancer - gain of wealth, Leo - danger from enemies, Gemini - danger from poison.**

मिथुने विषतो भीतिर्मृगांशे फलमीदृशम्
वृशभे धनसम्पत्तिर्मेषे नेत्ररुजो भयम् २६

मीनभे दीर्घयात्रा स्यात् कुम्भे धनविवर्धनम्
मकरे सर्वसिद्धिः स्याच्चापे ज्ञानविवर्धनम् २७

मेषे सौख्यविनाशः स्यात् वृषभे मरणं भवेत्
मिथुने सुखसम्पत्तिः कुम्भांशे फलमीदृशम् २८

**26-28. … Aquarius Aṅś. Taurus - increase in wealth, Aries - eye troubles, Pisces - travels to distant lands, Aquarius - increase in wealth, Capricorn - success in all ventures, Sagittarius - increase in knowledge and learning, Aries - loss of happiness, Taurus - danger of death, Gemini - gains of property, happiness.**

कर्कटे धनवृद्धिः स्यात् सिंहे राजाश्रयं वदेत्
कन्यायां धनधान्यानि तुले वाणिज्यतो धनम् २९

वृश्चिके ज्वरजा पीडा चापे ज्ञानसुखोदयः
मकरे स्त्रीविरोधः स्यात् कुम्भे च जलतो भयम् ३०

मीने तु सर्वसौभाग्यं मीनांशे फलमीदृशम्

दशाद्यंशक्रमेणैव ज्ञात्वा सर्वफलं वदेत् ३१

**29-31. … Pisces Aṅś. Cancer - increase in wealth, Leo - assistance from the king, Virgo - increase in wealth and grains, Libra - profits in business, Scorpio - distress from fever, Sagittarius - increase in knowledge and wealth, Capricorn - antagonism with wife, Aquarius - danger from water, Pisces - all kinds of enjoyments.**

क्रूरग्रहदशाकाले शान्तिं कुर्याद् विधानतः
ततः शुभमवाप्नोति तद्दशायां न संशयः ३२

**32. There is no doubt, that observance of remedial measures in the form of prescribed Mahārṣi Yagyas destroys the evil effects of the inauspicious Dashas and yield happiness.**

अथाष्टकवर्गाध्यायः ६६

भगवन् भवताख्यातं ग्रहभावादिजं फलम्
बहुनामृषिवर्याणामाचार्याणां च सम्मतम् १

संकरात् तत्फलानां च ग्रहाणां गतिसङ्करात्
इत्थमेवेति नो सर्वे ज्ञात्वा वक्तुमलं नराः २

कलौ पापरतानां च मन्दा बुद्धिर्युतो नृणाम्
अतोऽल्पबुद्धिगम्यं यत् शास्त्रमेतद् वदस्व मे ३

तत्तत्कालग्रहस्थित्या मानवानां परिस्फुटम्
सुखदुःखपरिज्ञानमायुषो निर्णयं तथा ४

## Ch. 66. AshtakaVargaa

**1-4. Maitreya said: O Venerable Sage! You have described many kinds of effects, relating to the Planets and Houses, after incorporating the views of many sages and Acharyas, but it is not possible to say with certainty, if a particular effect is quite correct, after considering the contradictions in the effects by the movements of the various Planets. As because of sinful deeds, committed by people in Kaliyuga, their minds have become blunt, be kind enough to describe a method, which would enable even the shallow minded persons to ascertain their happiness and sorrows and determine their longevity on the basis of the positions of the Planets in transit.**

साधु पृष्टं त्वया ब्रह्मन् कथयामि तवाग्रतः
लोकयात्रापरिज्ञानमायुषो निर्णयं तथा ५

संकरस्याविरोधश्च शास्त्रस्यापि प्रयोजनम्
जनानामुपकारार्थं सावधानमनाः शृणु ६

**5-6. The sage replied: O Brahmin! You have put a very intelligent question. I will now describe the Shastra for the benefit of all, the Shastra, in which there will be no contradictions in judging the effects of happiness and sorrows and for determination of the longevity. You now listen to me carefully.**

लग्नादिव्ययपर्यन्तं भावा संज्ञानुरूपतः
फलदाः शुभसंदृष्टा युक्ता वा शोभना मताः ७

ते तूच्चादिभगैः खेटैर्न चास्तारिभनीचगैः
पापैर्दृष्टयुता भावाः कल्याणेतरदायकाः ८

तैरःतारिभनीचस्थैर्न च मित्रस्वभोच्चगैः

एवं समान्यतः प्रोक्तं होराशास्त्रज्ञसूरिभिः ९

मयैयत् सकलं प्रोक्तं पूर्वाचार्यानुवर्तिना
आयुश्च लोकयात्रां च शास्त्रस्यास्यते प्रयोजनम् १०

निश्चेतुं तन्न सक्नोति वसिष्ठो वा बृहस्पतिः
किं पुनर्मनुजास्तत्र विशेषात्तु कलौ युगे ११

**7-11. If the 12 Houses, including Lagna, are occupied by, or aspected by benefic Planets, they yield auspicious results, according to their characteristics, but this happens, where the Planets concerned are in their exaltation Rāśi, own Rāśi, or posited in a benefic House. There will be no good effects, if such Planets are in depression, or posited in an inauspicious House. Similarly the Houses, associated with, or aspected**

**by malefics in depression, or posited in malefic Houses, yield adverse results, according to their characteristics. If such Planets be in their exaltation Rāśi, the effects will not be adverse. This is how the general effects have been described by the Daivajnas. I have only repeated those effects. The main purposes of this Jyotishya Shastra are to determine the longevity and joys and sorrows of the people, but because the movements of the Planets are so subtle, even sages, like Vashista and Brihaspati, have not been able to be quite definite in this respect. Then how can a common man, particularly in Kaliyuga, do so.**

सामान्यांशो विशेषांशो ज्योतिःशास्त्रं द्विधोदितम्
प्रोक्तः सामान्यभागस्तु निश्चयांशस्तु कथ्यते १२

**12. There are two divisions, or parts of the Jyotishya Shastra, namely general and particular. I have already dealt with the general part. I now come to the other part, which deals with this subject in particular.**

यथा लग्नाच्च चन्द्राच्च ग्रहाणां भावजं फलम्
तथाऽन्येभ्योऽपि खेटेभ्यो विचिन्त्यं दैवविद्वरैः १३

अतो रव्यादिखेटानां सलग्नानां पृथक् पृथक्
अष्टानां सर्वभावोत्थं यथोक्तमशुभं शुभम् १४

ज्ञात्वादौ करणं स्थानं बिन्दुरेखोपलक्षितम्
क्रमादष्टकवर्गस्य वाच्यं स्पष्टफलं यथा १५

**13-15. As the effects of the twelve Houses are judged from Lagna and Moon, effects of the twelve Houses and the various Planets are judged in the same manner. Therefore the inauspicious places from the seven Planets, named, as Karan, beginning from Sun and Lagna (total 8), should be marked by dots (Bindus) and auspicious places, named, as Sthan, by small vertical lines (Rekhas) and on the basis of their assessment should the judgment of the horoscope and predictions be made.**

**Notes. The above arrangement is known, as AshtakaVargaa. The meaning of AshtakaVargaa is literally the group of eight things. In other words it is the combination of the good and bad positions of a Planet with reference to the seven Planets and Lagna. So it is the combination of the benefic and malefic marks (the Rekhas and the Bindus) in a planets chart with reference to the position of the eight Planets (here Lagna is to be treated, as a Planet).**

तनुस्वायुस्त्रिरिष्फेषु पञ्च कामे सुखेऽर्णवाः
अरौ भाग्ये त्रयः पुत्रे षट् करौ खे भवे च भूः १६

**16. Five Planets in 1st, 2nd, 8th, 3rd and the 12th Houses from Sun are Karanprad (dot significators). Similarly four Planets in the 7th and 4th, three Planets in the 6th and 9th, six Planets in the 5th, 2 Planets in the 10th and one Planet in the 11th are dot significators.**

लग्नेन्दुजीवशुक्रज्ञास्तनौ स्वे मरणेऽपि च
रविभौमार्कि चन्द्रार्या व्यये ज्ञेन्दुसितायकाः १७

सुखे होरेन्दुशुक्राश्च धर्मेऽर्कार्किकुजा अरौ
होराज्ञार्येन्दवः कामे भवे दैत्येन्द्रपूजितः १८

सहजेऽर्कार्किशुक्रार्यभौमाः खे गुरुभार्गवौ
सुतेऽर्कार्कीन्दुलग्नारशुक्राः स्युः करणं रवेः १९

**17-19. Thus Lagna, Moon, Jupiter, Venus and Mercury in the 1st, 2nd and 8th from Sun; Sun, Mars, Saturn, Moon and Jupiter in the 12th; Mercury, Moon, Venus, Jupiter in the 4th; Lagna, Moon, Venus in the 9th; Sun, Saturn and Mars in the 6th; Lagna, Mercury, Jupiter and Moon in the 7th; Venus in the 11th; Sun, Saturn, Venus, Jupiter and Mars in the 3rd; Jupiter and Venus in the 10th; Sun, Saturn, Moon, Lagna Mars and Venus in the 5th are Karanprad, or dot indicators.**

भाग्यस्वयोश्च षड् वेश्ममृतिहोरासु पञ्च च
मानदुश्चिक्ययोरेकः सुते वेदा अरिस्त्रियोः २०

त्रयो व्ययेष्टावाये च शून्यं शीतकरस्य तु
होरार्कारार्किभृगवोङ्गज्ञार्केन्द्वार्किभार्गवाः २१

जीवोर्कार्कीन्दुलग्नारा होरेन्दुगुरुभास्कराः
सितज्ञार्याः कुजतनुमन्दास्ते सितशीतगू २२

**20-22. In Moon's AshtakaVargaa 6 Planets in the 9th and the 2nd, 5 Planets in the 4th, 8th and the 1st, one Planet in the 10th and the 3rd, 4 Planets in the 5th, 3 Planets in the 6th and the 7th and 1st, eight in the 12th are Karanprad. Thus Lagna, Sun, Mars, Saturn and Venus, these five in the 1st; Lagna, Mercury, Sun, Moon, Saturn and Venus, these 6 in the 2nd; Jupiter in the 3rd; Sun, Saturn, Moon, Lagna and Mars, these 5 in the 4th; Venus, Mercury, Jupiter, these 3 in the 6th; Mars, Lagna and Saturn, these 3 in the 7th; Mars, Lagna, Saturn, Venus and Moon, these five in the 8th; Lagna, Sun, Mars, Saturn, Mercury and Jupiter, these 6 in the 9th; Saturn only in the 10th; none in the 11th; all the eight in the 12th from their own places are Karanprad. These Planets in the other Houses are Rekhaprad (line significators).**

होरार्कारार्किविज्ञीवाः शनिः खं सकलाः क्रमात्
व्ययवेश्मसुतस्त्रीषु षड् सप्त धनधर्मयोः २३

होरामृत्व्योः शरा वेदा विक्रमे खे त्रयः चते
द्वौ भवे शून्यमेवं स्यात् करणं भूमिजस्य तु २४

कुजस्यार्केन्दुविज्ञीवसिता लग्नशनी च तु
सितारगुरुमन्दाः स्युर्धर्मोक्तिषु कुजं विना २५

चन्द्रारगुरुशुक्रार्किलग्नानि कुजभास्करी
ज्ञेन्द्वर्कसितलग्नार्या एषु शुक्रं विना ततः २६

विना शनिं सप्त धर्मे सितेन्दुज्ञा वियत्ततः
अर्कार्किज्ञेन्दुलग्नाराः करणं प्रोच्यते क्रमात् २७

**23-27. In the AshtakaVargaa of Mars6 Planets in the 12th, 4th and 7th, 5 Planets in the 5th, 6 Planets in the 2nd, 7 Planets in the 9th, 5 Planets in the 1st and 8th, 4 Planets in the 3rd, 3 Planets in the 10th and 2 Planets in the 6th are Karanprad. In the 11th no Planet is Karanprad. In other words all the Planets in the 11th from their own places are Rekhaprad. Thus Sun, Moon, Mercury, Jupiter and Venus, these five in the 1st; Lagna, Sun, Moon, Mercury, Jupiter and Saturn, these 6 in the 2nd; Venus, Mars, Jupiter and Saturn, these 4 in the 3rd; Sun, Moon, Mercury, Jupiter, Venus and Lagna, these 6 in the 4th; Moon, Mars, Jupiter, Venus and Lagna, these 5 in the 5th; Mars and Saturn, these 2 in the 6th; Mercury, Moon, Sun, Venus, Jupiter and Lagna, these 6 in the 7th; Mercury, Moon, Sun, Lagna and Jupiter, these five in the 8th; Sun, Moon, Mars, Mercury, Jupiter, Venus and Lagna, these 7 in the 9th; Venus, Moon and Mercury, these 3 in the 10th; none in the 11th; Sun, Saturn, Mercury, Moon, Lagna and Mars, these 6 in the 12th from their own places are**

**Karanprad.**

तनुस्वगृहकर्मारिधर्मेष्वग्निर्मृतौ करौ
भ्रातृस्त्रियो रसा लाभे शून्यं पुत्रे व्यये शराः २८

बुधास्यर्केन्दुगुरवो गुरुसूर्यबुधाः क्रमात्
लग्नार्कारार्किचन्द्रार्या ज्ञार्कार्या हि बुधस्य तु २९

जीवारेन्द्वार्किलग्नानि शुक्रमन्नधरासुताः

ज्ञेन्दुलग्नार्कशुक्रार्या ज्ञार्कौ जीवेन्दुलग्नकाः ३०

**28-30. In the AshtakaVargaa of Mercury 3 Planets in the 1st, 2nd, 4th, 10th, 6th and 9th, 2 Planets in the 8th, 6 Planets in the 3rd and the 7th, none in the 11th, 5 Planets in the 5th and 12th are Karanprad. Thus Sun, Moon and Jupiter, these 3 in the 1st; Jupiter, Sun and Mercury, these 3 in the 2nd; Lagna, Sun, Mars, Saturn, Moon and Jupiter, these 6 in the 3rd; Mercury, Sun and Jupiter, these 3 in the 4th; Jupiter, Mars, Moon, Saturn and Lagna, these 5 in the 5th; Venus, Saturn and Mars, these 3 in the 6th; Mercury, Moon, Lagna, Sun, Venus and Jupiter, these 6 in the 7th; Mercury and Sun, these 2 in the 8th; Jupiter, Moon and Lagna, these 3 in the 9th; Sun, Jupiter and Venus, these 3 in the 10th; none in the 11th; Lagna, Moon, Mars, Saturn and Venus these 5 in the 12th from their own places are Karanprad.**

अर्कार्यशुक्रः शून्यं च होरेन्द्वारार्किभार्गवाः
रूपं धनाययोः खे द्वौ व्यये सप्त क्षतेऽर्णवाः ३१

मृतिविक्रमयो पञ्च गुरोः शेषेषु वह्नयः
लग्ने शुक्रेन्दुमन्दाः स्वे आये मन्दश्च विक्रमे ३२

लग्नारेन्दुज्ञभृगवः सुतेर्कार्यकुजा गृहे
शुक्रमन्देन्दवो द्यूने बुधशुक्रशनैश्चराः ३३

जीवारार्केन्दवः शत्रौ सर्वे मन्दं विना व्यये
कर्मणीन्दुशनी धर्मे मन्दारगुरवो मृगौ ३४

**31-34. In the AshtakaVargaa of Jupiter one Planet in the 2nd and 11th, 2 Planets in the 10th, 7 Planets in the 12th, 4 Planets in the 6th, 5 Planets in the 8th and 3rd, 3 Planets in the remaining Houses are Karanprad. Thus Venus, Moon and Saturn, these 3 in the 1st; Saturn in the 2nd and 11th; Lagna, Mars, Moon, Mercury and Venus, these 5 in the 3rd; Sun, Jupiter and Mars, these 3 in the 5th; Venus, Saturn and Moon, these 3 in the 4th; Mercury, Venus and Saturn, these 3 in the 7th; Jupiter, Mars, Sun and Moon, these 4 in the 6th; all except Saturn, these 7 in the 12th; Moon and Saturn, these 2 in the 10th; Saturn, Mars and Jupiter, these 3 in the 9th; Lagna, Saturn, Venus, Moon and Mercury, these 5 in the 8th from their own places are Karanprad.**

लग्नार्किसितचन्द्रज्ञाः करणं च गुरोरिदम्
सुतायुर्विक्रमेष्वग्नि तनुस्वव्ययखेष्विषुः ३५

अष्टौ स्त्रियामरौ षड् भूर्धर्मे मित्रेऽग्नि खं भवे
लग्ने स्वेऽर्कारविज्ञीवमन्दाः सर्वे च कामभे ३६

अर्कार्यौ विक्रमस्थाने सुतेऽर्कारौ शुभे रविः
सुखेऽकबुधजीवाः स्युर्भौमज्ञौ मृतिभे द्वज ३७

शुक्रार्केन्द्वार्किलग्नार्याः शत्रौ शून्यं भवे व्यये
होरार्किबुधशुक्रार्यास्तन्वारज्ञेन्द्विनाश्च खे ३८

**35-38. In the AshtakaVargaa of Venus 2 Planets in the 5th, 8th and 3rd, 5 Planets in the 1st, 2nd, 12th, 10th, 8 Planets in the 7th, 6 Planets in the 6th, one in the 9th, 3 in the 4th, none in the 11th are Karanpradas. Thus Sun, Mars, Mercury, Jupiter and Saturn, these 5 in the 1st and the 2nd; all the 8 Planets in the 7th; Jupiter and Sun, these 2 in the 3rd; Sun and Mars, these 2 in the 5th; Sun in 9th; Sun, Mercury and Jupiter, these 3 in the 4th; Mars and Mercury, these 2 in the 8th; Venus, Sun, Moon, Saturn, Lagna and Jupiter, these 6 in the 6th; none in the 11th; Lagna, Saturn, Mercury, Venus and Jupiter, these 5 in the 12th; Lagna, Mars, Mercury, Moon, Sun, these 5 in the 10th from their own places are Karanpradas.**

स्वस्त्रीधर्मेषु सप्ताङ्गं मृतिहोरागृहेषु च
आज्ञाभ्रातृव्यये वेदा रूपं शत्रौ सुते शराः ३९

आये शून्यं शनेरेवं करणं प्रोच्यते बुधैः
गृहे तनौ च लग्नार्कौ स्वस्त्रियोश्च रविं विना ४०

हित्वा धर्मे बुधं माने लग्नाररविचन्द्रजान्
ततो भ्रातरि जीवार्कबुधशुक्राः क्षते रविः ४१

व्यये लग्नेन्दुमन्दार्काः सितार्कन्दुज्ञलग्नकाः
सुते मृतौ बुधार्कौ च हित्वाये खं शनेर्विदः ४२

**39-42. In the AshtakaVargaa of Saturn 7 Planets in the 2nd, 7th, 9th, 6 Planets in the 8th, Lagna and 4th, 4 Planets in the 10th, 3rd and 12th, one Planet in the 6th, 5 Planets in the 5th, none in the 11th are Karanpradas. Thus Moon, Mars, Mercury, Jupiter, Venus and Saturn, these 6 in the 4th and the 1st; Moon, Mars, Mercury, Jupiter, Venus, Saturn and Lagna, these 7 in the 2nd and the 7th; Sun, Moon, Mars, Jupiter, Venus, Saturn and Lagna, these 7 in the 9th; Moon, Jupiter, Venus and Saturn, these 4 in the 10th; Jupiter, Sun, Mercury and Venus, these 4 in the 3rd; Sun in the 6th; Lagna, Moon, Saturn, Sun, these 4 in the 12th; Venus, Sun, Moon, Mercury and Lagna, these 5 in the 5th; Moon, Mars, Jupiter, Venus, Saturn and Lagna, these 6 in the 8th; none in the 11th from their own places are Karanpradas. The remaining places are Rekhapradas and are auspicious.**

उक्ताऽन्ये स्थानदातार इति स्थानं विदुर्बुधाः
अथ स्थानग्रहान् वक्ष्ये सुखबोधाय सुरिणाम् ४३

स्वायुस्तनुषु मन्दारसूर्या जीवबुधौ सुते
विक्रमे ज्ञेन्दुलग्नानि लग्नार्कार्किकुजा गृहे ४४

ते च ज्ञेन्दू खभे चाये सर्वे शुक्रं विना व्यये
लग्नशुक्रबुधाः शत्रौ ते च जीवसुधाकरौ ४५

**43-45. The sage said. Now I will describe the auspicious Houses for the benefit of the Acharyas. In the AshtakaVargaa of Sun: Saturn, Mars and Sun in the 2nd, 8th and 1st; Jupiter and Mercury in the 5th; Mercury, Moon and Lagna in the 3rd; Lagna, Sun, Saturn and Mars in the 4th; Lagna, Sun, Saturn, Mars, Mercury and Moon in the 10th; Sun, Moon, Mars, Mercury, Jupiter, Saturn and Lagna in the 11th; Lagna, Venus and Mercury in the 12th; Lagna, Venus, Mercury, Jupiter and Moon in the 6th; Sun, Mars, Saturn and Venus in the 7th; Sun, Mars, Saturn, Mercury and Jupiter in the 9th from their own places are Rekhapradas.**

द्यूनेऽर्कारार्किशुक्राश्च धर्मेर्कारार्किविद्गुरुः
ज्ञेन्दुजीवाः कुजार्यौ ज्ञार्केन्द्वारार्कितनूशनाः ४६

जीवशुक्रबुधा भौमबुधशुक्रशनैश्चराः
रवीन्द्वारार्किलग्नानि रवीन्द्वार्यज्ञभार्गवाः ४७

अर्कज्ञजीवाः शुक्रेन्दू ते च तौ लग्नभूसुतौ
सर्वे शून्यं क्रमात्प्रोक्तं स्थानं शीतकरस्य च ४८

**46-48. In the AshtakaVargaa of Moon: Mercury, Moon and Jupiter in the 1st; Jupiter and Mars in the 2nd; Mercury, Sun, Moon, Mars, Saturn, Venus and Lagna in the 3rd; Jupiter, Venus and Mercury in the 4th; Mars, Mercury, Venus and Saturn in the 5th; Sun, Moon, Mars, Saturn and Lagna in the 6th; Sun, Moon, Jupiter, Mercury and Venus in the 7th; Sun, Mercury and Jupiter in the 8th; Venus and Moon in the 9th; Sun, Mercury, Jupiter, Venus, Moon, Lagna and Mars in the 10th and all the 8 Planets in the 11th from their own places are Rekhapradas. No Planet is Rekhaprad in the 12th.**

लग्नमन्दकुजा भौमो होराज्ञेन्दुदिनाधिपाः
मन्दारौ ज्ञरवी ज्ञेन्दुजीवार्कतनुभार्गवाः ४९

मन्दारौ तौ सित श्चार्किः कुजार्कार्यार्किलग्नकाः
सर्वे गुरुसितौ स्थानं भौमस्यैवं विदुर्बुधाः ५०

**49-50. In the AshtakaVargaa of Mars: Lagna, Saturn and Mars in the 1st; Mars in the 2nd; Lagna, Mercury, Moon and Sun in the 3rd; Saturn and Mars in the 4th; Mercury and Sun in the 5th; Mercury, Moon, Jupiter, Sun, Lagna and Venus in the 6th; Saturn and Mars in the 7th; Saturn, Mars and Venus in the 8th; Saturn in the 9th; Mars, Sun, Jupiter, Saturn and Lagna in 10th; all in the 11th and Jupiter and Venus in the 12th from their own places are Rekhapradas.**

लग्नमन्दारशुक्रज्ञा लग्नारेन्दुसितार्कजाः

शुक्रज्ञौ लग्नचन्द्रार्किसितारा ज्ञार्कभार्गवाः ५१

जीवज्ञार्केन्दुलग्नानि भूमिपुत्रशनैश्चरौ
तौ च लग्नेन्दु शक्रार्या मन्दारार्कज्ञभार्गवाः ५२

**51-52. In the AshtakaVargaa of Mercury: Lagna, Saturn, Mars, Venus and Mercury in the 1st; Lagna, Mars, Moon, Venus and Saturn in the 2nd; Venus and Mercury in the 3rd; Lagna, Moon, Saturn, Venus and Mars in the 4th; Mercury, Saturn and Venus in the 5th; Jupiter, Mercury, Sun, Moon and Lagna in the 6th; Mars and Saturn in the 7th; Mars, Saturn, Lagna, Moon, Venus and Jupiter in the 8th; Saturn, Mars, Sun, Mercury and Venus in the 9th; Lagna, Saturn, Mars, Mercury and Moon in the 10th; all in the 11th and Jupiter, Mercury and Sun in the 12th from their own places are Rekhapradas.**

लग्नमन्दारविच्चन्द्राः सर्वे जीवज्ञभास्कराः
गुरोर्लग्ने सुखे जीव लग्नारार्कबुधा धने ५३

चन्द्रशुक्रौ च दुश्चिक्ये मन्दार्यार्काः शनिर्व्यये
सुते शुक्रेन्दुलग्नज्ञमन्दाश्चन्द्रं विना त्वरौ ५४

लग्नारार्याऽर्केन्दवोऽस्ते मृतौ जीवार्कभूसुताः
धर्मे शुक्रार्कलग्नेन्दुबुधा मन्दं विनायभे ५५

**53-55. In the AshtakaVargaa of Jupiter: Lagna, Mars, Sun and Mercury in the 1st and 4th; Jupiter, Lagna, Mars, Sun, Mercury, Moon and Venus in the 2nd; Saturn, Jupiter and Sun in the 3rd; Venus, Moon, Lagna, Mercury and Saturn in the 5th; Venus, Lagna, Mercury and Saturn in the 6th; Lagna, Mars, Jupiter, Sun and Moon in the 7th; Jupiter, Sun and Mars in the 8th; Venus, Sun, Lagna, Moon and Mercury in the 9th; Jupiter, Mercury, Mars, Sun, Venus and Lagna in the 10th; all except Saturn in the 11th and Saturn in the 12th from their own places are Rekhapradas.**

माने गुरुबुधारार्कशुक्रहोरास्तथा विदुः
लग्नशुक्रेन्दव स्ते ते ज्ञार्क्या रास्ते ज्ञवर्जिताः  ५६

सुतभे लग्नशशिजशशाङ्कार्यार्किभार्गवाः
ज्ञारौ शून्यं सिताऽर्केन्दुगुरुलग्नशनैश्चराः  ५७

सर्वे रविं विना शुक्रगुरुमन्दाश्च मानभे
सर्वे कुजेन्दुरवयः क्रमादभगसतस्य च  ५८

**56-58. In the AshtakaVargaa of Venus: Lagna, Venus and Moon in the 1st; Lagna, Venus and Moon in the 2nd; Lagna, Venus, Moon, Mercury, Saturn and Mars in the 3rd; Lagna, Venus, Moon, Saturn and Mars in the 4th; Lagna, Mercury, Moon, Jupiter, Saturn and Venus in the 5th; Mercury and Mars in the 6th; none in the 7th; Venus, Sun, Moon, Jupiter, Lagna and Saturn in the 8th; all except Sun in the 9th; Venus, Jupiter and Saturn in the 10th; all in the 11th; Mars, Moon and Sun in the 12th from their own places are Rekhapradas.**

शने रवितनू सूर्यो लग्नेन्दुकुजसूर्यजाः
लग्नार्कौ जीवमन्दाराः सर्वे सूर्यं विना च्ते  ५९

अर्कोऽर्कज्ञौ बुधोऽर्कारतनुज्ञाः सकलास्ततः
कुजज्ञगुरुशुक्राश्च क्रमात् स्थानमिदं विदुः  ६०

**59-60. In the AshtakaVargaa of Saturn: Sun and Lagna in the 1st; Sun in the 2nd; Lagna, Moon, Mars and Saturn in the 3rd; Lagna and Sun in the 4th; Jupiter, Saturn and Mars in the 5th; all except Sun in the 6th; Sun in the 7th; Sun and Mercury in the 8th; Mercury in the 9th; Sun, Mars, Lagna and Mercury in the 10th; all in the 11th; Mars, Mercury, Jupiter and Venus in the 12th from their own places are Rekhapradas.**

तनौ तुर्ये च वह्निः स्याद् दुश्चिक्ये द्वौ धने शराः
बुद्धिमृत्यंकरिःफेषु षट् खेशच्नतराशिषु  ६१

रूपंस्त्रियां गुरुं त्यक्त्वा लग्नस्य करणं त्विदम्
होरासूर्येन्दवो लग्ने लग्नारेन्द्विनसूर्यजाः  ६२

गुरुज्ञौ लग्नचन्द्रारा लसूचंमंबुसौरयः
च्ते शुक्रस्तथा चैकः कामे सर्वे गुरुं विना  ६३

मृगौ भृगुबुधौ त्यक्त्वा धर्मे गुरुसितौ विना
कर्मरायाये तथा शुक्रोव्यये सूर्येन्दुवर्जिताः  ६४

**61-64. In the AshtakaVargaa of Lagna 3 Planets in the 1st and 4th, 2 Planets in the 3rd, 5 Planets in the 2nd, 6 Planets in the 5th, 8th, 9th and 12th, one Planet in the 10th, 11th and 6th and all except Jupiter in the 7th are Karanpradas. Thus Lagna, Sun and Moon in the 1st; Lagna, Mars, Moon, Sun and Saturn in the 2nd; Jupiter and Mercury in the 3rd; Lagna, Moon, Mars, Mercury, Saturn and Sun in the 5th; Lagna, Moon and Mars in the 4th; Venus in the 6th; all except Jupiter in the 7th; Lagna, Sun, Moon, Mars, Jupiter and Saturn in the 8th; Lagna, Sun, Moon, Mars, Mercury and Saturn in the 9th; Venus in the 10th and 11th; Lagna, Mars, Mercury, Jupiter, Venus and Saturn in the 12th from their own places are Karanpradas.**

लग्नस्येदं तु संप्रोक्तं करणं द्विजपुङ्गव
अथ स्थानं प्रवक्ष्यामि लग्नस्य द्विजपुङ्गव   ६५

आर्किज्ञशुक्रगुर्वाराः सौम्यदेवेज्यभार्गवाः
हित्वा सौम्यगुरू शेषाः सूज्ञेज्यभृगुसूर्यजाः  ६६

तथा जीवभृगू बुद्धौ सर्वे शुक्रं विना च्ते
जीव एकस्तथा द्यूने मृतौ सौम्यभृगू तथा  ६७

धर्मे गुरुसितावेव खे भवे शुक्रमन्तरा
सूर्यचन्द्रौ तथा रिष्फे स्थानं लग्नस्य कीर्तितम्  ६८

**65-68. In the AshtakaVargaa of Lagna: Saturn, Mercury, Venus, Jupiter and Mars in the 1st; Mercury, Jupiter and Venus in the 2nd; Lagna, Sun, Moon, Mars, Venus and Saturn in 3rd; Sun, Mercury, Jupiter, Venus and Saturn in the 4th; Jupiter and Venus in the 5th; all except Venus in the 6th; Jupiter in the 7th; Mercury and Venus in the 8th; Jupiter and Venus in the 9th; all except Venus in the 10th; all except Venus in the 11th and Sun and Moon in the 12th from their own places are Rekhapradas.**

करणं बिन्दुवत् लेख्यं स्थानं रेखास्वरूपकम्
करणं त्वशुभदं प्रोक्तं स्थानं शुभफलप्रदम् ६९

**69. In the charts of AshtakaVargaa Karan is signified by a Bindu, or dot (0) and Sthan by a Rekhapradas, or line (1). Karan is inauspicious, while Sthan is auspicious.**

दशारेखा लिखेदूर्ध्वास्तिर्यग् रेखाश्चतुर्दश
नगेशकोष्ठसंयुक्तं चक्रमेवं प्रजायते ७०

तिर्यगष्टसु कोष्ठेषु विलग्नसहितान् खगान्
आद्येषूर्ध्वाधरेष्वेवं भावसंख्या लिखेद् बुधः ७१

यथोक्तं विन्यसेत् तत्र करणं स्थानमेव वा

ततः शुभाऽशुभं ज्ञात्वा जातकस्य फलं वदेत् ७२

**70-72. To identify the auspicious and inauspicious Houses in the AshtakaVargaa a chart should be prepared with 14 horizontal lines and ten vertical lines. The form of the chart so prepared will consist of 117 apartments. In this chart in the first line incorporates the names of the seven Planets and Lagna. In the first column write the numbers of all the 12 Houses. After this mark dots under the Planet and against the Karanprad Houses. By doing so the Karanprad Houses of all the 8 Planets, including Lagna, will become known clearly and whenever the AshtakaVargaa Planet will pass in transit the dot-marked Houses, he will yield unfavorable results. In his transit to other Houses he would give favourable effects.The following table shows the dots in the AshtakaVargaa of Sun.**

अथ त्रिकोणशोधनाध्यायः ६७

एवं सलग्नखेटानां विधायाष्टकवर्गकम्
त्रिकोणशोधनं कुर्यादादौ सर्वेषु राशिषु १

त्रिकोणं कथ्यते विप्र मेषसिंहधनूंष्यथ
वृषकन्यामृगास्याश्च युग्मतौलिघटास्तथा २

## Ch. 67. Trikona Shodhana in the AshtakaVargaa

**1-2. The sage said. O Brahmin! After preparing the AshtakaVargaa of all the Planets, including Lagna, Trikona Shodhana has to be done for each Rāśi. A Trikona is made of three Rāśis equidistant from each other. Thus Aries, Leo and Sagittarius, Taurus, Virgo and Capricorn, Gemini, Libra and Aquarius, Cancer, Scorpio and Pisces form the Trikonaas of the Rāśis.**

कर्कवृश्चिकमीनाश्च त्रिकोणाः स्युः परस्परम्
अधोऽधः सर्वराशीनामष्टवर्गफलं न्यसेत् ३

त्रिकोणेषु च यन्न्यूनं तत्तुल्यं त्रिषु शोधयेत्
एकस्मिन् भवने शून्यं तत् त्रिकोणं न शोधयेत् ४

समत्वे सर्वगेहेषु सर्वं संशोधयेद् बुधः
पश्चात् विपश्चिता कार्यमेकाधिपतिशोधनम् ५

**3-5. The Trikona Shodhana (rectification) should be done by writing the Rekhas in the AshtakaVargaas of Sun etc. under the Rāśis Aries etc. Amongst the Trikona Rāśis the Rāśi, which has lesser number of Rekhas, should be allotted Rekhas, arrived at by deducting its number of Rekhas from the greater number of Rekhas of the three Trikona Rāśis. No Trikona Shodhana is necessary, if any of the Trikona Rāśis has no Rekha. Shodhana should be done, if all the three of them have equal number of Rekhas, that is a zero should be written against all of them. Thereafter Ekadhipatya Shodana should be done in the same manner, described later. (For Shodhana of the AshtakaVargaa of a Planet the first thing to be done is to see, in which Rāśi the Planet is posited. Beginning from that Rāśi, the names of the 12 Rāśis should be written and then the names of the Planets, posited in them, should be mentioned against them. Thereafter the Rekhas, gained by that Rāśi, should be written below them and the number, achieved after Shodana, below it)**

अथैकाधिपत्यशोधनाध्यायः ६८

पूर्वं त्रिकोणं संशोध्य राशीनां स्थापयेत् फलम्
पृथक् पृथक् ततः कुर्यादिकाधिपतिशोधनम् १

क्षेत्रद्वये फलानि स्युस्तदा संशोधयेद् यथा
क्षीणेन सह चान्यस्मिन् शोधयेद् ग्रहवर्जिते २

उभयोर्ग्रहसंयोगे न संशोध्यः कदाचन्
ग्रहयुक्ते फलैर्हीने ग्रहाभावे फलाधिके ३

ऊनेन सममन्यस्मिन् शोधयेद् ग्रहवर्जिते
फलाधिके ग्रहैर्युक्ते चान्यस्मिन् सर्वमुत्सृजेत् ४

उभयत्र ग्रहभावे समत्वे सकलं त्यजेत्
सग्रहाग्रहयोस्तुल्ये सर्वं संशोध्यमग्रहे ५

**Ch. 68. Ekadhipatya Shodhana in the AshtakaVargaa**

**1-5. Ekadhipatya Shodana is done after writing the numbers for Rāśis, arrived at by Trikona Sho2nda. Ekadhipatya Shodhana is done, if both the two Rāśis, owned by a Planet, have gained a number after**

**Trikona Shodhana. Ekadhipatya Shodhana is not to be done, if one Rāśi has got a number and the other is bereft of any number. The following are the rules for Ekadhipatya Shodhana. If both the Rāśis are without a Planet and the Trikona Shodana numbers are different, both should be given the smaller number. If both the Rāśis are with Planets, no Shodana is to be done. If amongst the two Rāśis one is with a Planet and a smaller Trikona rectified number and the other is without Planet with a bigger number, deduct the smaller number from the bigger number and the number of the Rāśi with Planet should be kept unchanged. If the Rāśi with the Planet has a bigger number than that of the Rāśi without Planet, the Shodana should be done of the number of the Rāśi without Planet and the number of the Rāśi with Planet should be kept unchanged. If both the Rāśis are without Planets and possess the same numbers, Shodhana of both the numbers should be done and the rectified numbers should be reduced to zero. If one Rāśi is with Planet and the other is without any Planet, the number of the latter should be reduced to zero. Sun and Moon own one Rāśi only, their numbers should be kept unchanged.**

कुलीरसिंहयो राश्योः पृथक् क्षेत्रं पृथक् फलम्
संशोध्यैकाधिपत्यं हि ततः पिण्डं प्रसाधयेत्  ६

**4. After doing Ekadhipatya Shodana, Pinda Shodhana should be taken in hand.**

अथ पिण्डसाधनाध्यायः ६९

एवं शोध्यावशेषाङ्कं राशिमानेन वर्द्धयेत्
ग्रहयुक्ते च तद्राशौ ग्रहमानेन वर्द्धयेत् १

सर्वेषां च पुनर्योगः पिण्डाख्यः कथ्यते द्विज
गोसिंहौ दशभिर्गुण्यौ वसुभिर्युग्मवृश्चिकौ २

सप्तभिस्तुलमेषौ च मृगकन्ये च पञ्चभिः
शेषाः स्वसंख्यया गुण्या ग्रहमानमथोच्यते ३

जीवारशुक्रसौम्यानां दशाष्टनगसायकाः
पञ्च शेषग्रहाणां च मानं प्रोक्तमिदं क्रमात् ४

## Ch. 69. Pinda Shodana in the AshtakaVargaa

**1-4. The Sage said. O Brahmin! After completing the Trikona and Ekadhipatya Shodana in the AshtakaVargaas of all the Planets, the rectified number should be multiplied by the measure of the Rāśi. If there be any Planet in any Rāśi, the rectified number should be multiplied by the measure of the Planet also. Then, after multiplying the rectified number of each Rāśi, the products should be added up. The total so arrived at will be Pinda of that Planet. The multiples of Rāśis are 10 for Taurus and Leo, 8 for Gemini and Scorpio, 7 for Aries and Libra, 6 for Capricorn and Virgo. The multipliers of the remaining Rāśis are the same, as their numbers. (Rāśiman Chakra. Aries 7, Vris 10, Mith 8, Cancer 4, Leo 10, Kany 6, Libra 7, Vrsk 8, 2nd 9, Maka 5, Kumb 11, Mina 12) The multipliers of Planets are 10 for Jupiter, 3 for Mars, 7 for Venus, 6 for Mercury, Sun, Moon and Saturn. (Planetman Chakra. Sun 5, Moon 5, Mars8, Mercury 5, Jupiter 10, Venus 7, Saturn 5)**

अथाऽष्टकवर्गफलाध्यायः ७०

आत्मस्वभावशक्तिश्च पितृचिन्ता रवेः फलम्
मनोबुद्धिप्रसादश्च मातृचिन्ता मृगाङ्कतः १

भ्रातृसत्त्वं गुणं भूमिं भौमेनैव विचिन्तयेत्
वाणिज्यकर्म वृत्तिश्च सुहृदं च बुधेन तु २

गुरुणा देहपुष्टिश्च विद्या पुत्रार्थसम्पदः
भृगोर्विवाहकर्माणि भोगस्थान च वाहनम् ३

वेश्यास्त्रीजनसंयोगं शुक्रेण च निरीक्षयेत्
आयुश्च जीवनोपायं दुःखशोक भयानि च ४

सर्वक्षयं च मरणं मन्देनैव निरीक्षयेत्
तत्तद्भावफलाङ्केन गुणयेद् योगपिण्डकम् ५

सप्तविंशोधृतं शेषतुल्यर्क्षे याति भानुजः
यदा तदा तस्य तस्य भावस्यार्ति विनिर्दिशेत् ६

## Ch. 70. Effects of the AshtakaVargaa

**1-6. The matters to be considered from Sun and other Planets are, as follows. Sun - the soul (Atma), nature, physical strength, joys and sorrows and father. Moon - mind, wisdom, joy and mother. Mars- co-borns, strength, qualities and land. Mercury - business dealings, livelihood and friends. Jupiter - nourishment of the body, learning, son (children), wealth and property. Venus - marriage, enjoyments, conveyance, prostitution and sexual intercourse with women. Saturn - longevity, source of maintenance, grief, danger, losses and death. The following procedure should be adopted to ascertain the effects of a house. Multiply the number of Rekhas with the Yoga Pinda (Rāśi Pinda plus Planet Pinda), connected with the AshtakaVargaa of that Planet and divide the product by 27. The remainder will denote the number of the Nakshatra. During the transit of Saturn in that Nakshatra the House concerned will be harmed.**

अर्काश्रितर्क्षान्नवमो राशिः पितृ गृहं स्मृतम्
तद्राशिफलसंख्याभिर्वर्धयेद् योगपिण्डकम् ७

विभजेत् सप्तविंशत्या शेषर्क्षे याति भानुजः
यदा तदा पितृक्लेशो भवतीति न संशयः ८

तत्त्रिकोणगते वापि पिता पितृसमोऽपि वा
मरणं तस्य जानीयात् पीडां वा महतीं वदेत् ९

**7-9. The 9th house from Sun at the time of birth deals with father. The Rekhas of that Rāśi, as marked in Sun's AshtakaVargaa, should be multiplied by the Yoga Pinda and the product be divided by 27. The remainder will denote the number of Nakshatra. The father will be in distress, or he will otherwise suffer, when Saturn in transit passes through the Nakshatra. Even, when Saturn passes in transit the Trikona Nakshatras, father, or relatives, like father, may die, or suffer. Notes. By dividing the 27 Nakshatras in three equal parts, the 1st, 10th and 19th fall in Trikona from each other. Sun is PitraKarak (significator of father). Therefore all about father is ascertained from the Sun's AshtakaVargaa.**

गुणयेद् योगपिण्डं वा तद्राशिफलसंख्यया
अर्कोद्धृतावशेषर्क्षे यदा गच्छति भानुजः १०

तत्त्रिकोणर्क्षकं वापि पितृकष्टं तदा वदेत्
रिष्टप्रददशायां तु मरणं कष्टमन्यदा ११

**10-11. If the AshtakaVargaa Rekha number is multiplied by the Yoga Pinda and the product is divided by 12, the remainder will denote the Rāśi, through which, or through the Rāśis in Trikona to it, the transit of Saturn will cause harm, or unfavorable effects to father. Death of the father may occur, if the Dasa prevailing at that time be unfavorable. If the Dasa be favourable, father will face only adverse effects.**

अर्कात्तु तुर्यगे राहौ मन्दे वा भूमिनन्दने
गुरुशुक्रेक्षणमृते पितृहा जायते नरः १२

लग्नात् चन्द्राद् गुरुस्थाने याते सूर्यसुतेऽथवा
पापैर्दृष्टे युते वापि पितृनाशं वदेद् बुधः १३

लग्नात् सुखेश्वरारिष्टदशाकाले पितृक्षयः
अनुकूलदशाकाले नेति चिन्त्यं विचक्षणैः १४

**12-14. The death of the father may be expected, if Rahu, Saturn, or Marsare in the 4th from Sun at the time of transit of Saturn through any of the above three Rāśis (Trikona Rāśis). The death of the father will come to pass by such transit, if at that time Saturn, associated, or aspected by a malefic, be in the 9th from Lagna, or Moon and/or the Dasa of the Lord of the 4th from Lagna be in operation. The death does not take place, if a favourable Dasa be in force at the time of Saturn's transit. This should be kept in mind by the Jyotishyais, while making predictions.**

पितृजन्माष्टमे जातस्तदीशे लग्नगेऽपि वा

करोति पितृकार्याणि स एवात्र न संशयः १५

**15. If the Rāśi of Lagna of the native be the 8th Rāśi from Lagna of the father, or, if the Lord of the 8th from fathers Lagna be in Lagna of the native, he takes over all the responsibilities of his father after the latters death.**

सुखनाथदशायान्तु सुखप्राप्तेश्च संभवः
सुखेशे लग्नलाभस्थे चन्द्रस्थानाद् विशेषतः
पितृगेहसमायुक्ते जातः पितृवशानुगः १६

पितृजन्मतृतीयर्क्षे जातः पितृधनाश्रितः
पितृकर्मगृहे जातः पितृतुल्यगुणान्वितः १७

तदीशे लग्नसंस्थेऽपि पितृश्रेष्ठो भवेन्नरः
एवं पूर्वोक्तसामान्यफलं चात्रापि चिन्तयेत् १८

**16-18. The father enjoys happiness in the Dasa of the Lord of the 4th from Lagna. The native is obedient to his father, if the Lord of the 4th be in Lagna, or the 11th, or in the 11th, or 10th from Moon. If the birth be in the 3rd Rāśi from Lagna, or Moon of the father, the native makes proper use of the wealth, inherited from his father. If the birth be in the 10th Rāśi from Lagna, or Moon of the father, the native will inherit all the good qualities of his father. If the Lord of the 10th be in Lagna, the native will be more distinguished than his father.**

सूर्याष्टवर्गे यन्न्यून्यं तन्मासे वस्तरेऽपि च
विवाहव्रतचूडादि शुभकर्म परित्यजेत् १९

यत्र रेखाधिका तत्र मासे संवत्सरेऽपि च
अनिष्टेऽपि रवौ जीवे शुभकर्म समाचरेत् २०

**19-20. No auspicious functions, like marriage etc., should be performed in the month of Rāśis (that is, when Sun transits that Rāśi), which has more number of dots in Sun's AshtakaVargaa. The same applies to the Samvatsar of that Rāśi (that is, when the mean Jupiter transits that Rāśi). Auspicious functions should be performed, when Sun, or the mean Jupiter transits the Rāśi, which has more Rekhas in Sun's AshtakaVargaa.**

एवं चन्द्राष्टवर्गे च यत्र शून्यं भवेद् बहु
तत्र तत्र गते चन्द्रे शुभं कर्म परित्यजेत् २१

चन्द्राच्चतुर्थो मातृप्रासादग्रामचिन्तनम्
चन्द्रात् सुखफलात्पिण्डं वर्द्धयेद् भैश्च सम्भजेत् २२

शेषमृत्तं शनौ याते मातृहानिं विनिर्दिशेत्
तत्त्रिकोणगते चापि शनौ मातृरुजं वदेत् २३

**21-23. In the same manner no auspicious functions should be performed during the transit of Moon in the Rāśi, which has larger number of dots in Moon's AshtakaVargaa. Consideration, regarding mother, house and village, should be done from the 4th House from Moon. Therefore multiply the number of Rekhas in the AshtakaVargaa of Moon by the Yoga Pinda of that AshtakaVargaa and divide the product by 27. The death of, or distress to mother may be expected, when Saturn passes in transit through the Nakshatra, denoted by the remainder. Then divide the product by 12. The death of the mother may occur, when Saturn transits the Rāśi, denoted by the remainder. Distress to mother may be predicted, when Saturn transits the Nakshatras, or Rāśis in Trikona to Nakshatra and Rāśi, indicated above.**

भौमाष्टवर्गे संचिन्त्यं भ्रातृविक्रमधैर्यकम्
कुजाश्रितात् तृतीयर्त्ते बुधैर्भ्रातृगृहं स्मृतम् २४

त्रिकोणशोधनं कृत्वा यत्र स्यादधिकं फलम्

भूमेर्लाभोऽत्र भार्याया भ्रातॄणां सुखमुत्तमम् २५

भौमो बलविहीनश्चद् दीर्घायुर्भ्रातृको भवेत्
फलानि यत्र त्तीयन्ते तत्र भौमे गते त्ततिः २६

तृतीयर्त्तफलेनाथ पिण्डं सम्बर्ध्य पूर्ववत्
शेषमृत्तं शनौ याते भ्रातृकष्टं विनिर्दिशेत् २७

**24-27. Consideration of brothers (co-borns), valor and patience is done from Mars's Ashtaka Vargaa. If the number of Rekha is larger in any Rāśi after Trikona Sho2nda, there will be gains of land, happiness from wife and great happiness to brother, when Marspasses through that Rāśi in transit. If Mars be weak, the brothers will be short lived. There will be distress to brothers, when Marstransits a Rāśi without Rekhas. Here also the Yoga Pinda of Mars'should be multiplied by the number of Rekhas in the Ashtaka Vargaa and the product be divided separately by 27 and 12. The remainders will denote the Nakshatra and Rāśi. The brother will suffer, whenever Saturn transits that Nakshatra, or Rāśi (or the Trikona Nakshatras, or Rāśis).**

बुधात्तुर्ये कुटुम्बं च मातुलं मित्रमेव च
बुधे फलाधिके राशौ गते तेषां सुखं दिशेत् २८

बुधाष्टवर्गं संशोध्य शेषमृत्तं गते शनौ
कष्टं कुटुम्बमित्राणां मातुलानां च निर्दिशेत् २९

**28-29. Consideration in regard to family, maternal uncle and friends should be done from the 4th House from Mercury. The family etc. will enjoy happiness during the transit of Mercury's Ashtaka Vargaa. After performing Trikona and Ekadhipatya Shodana in Mercury's Ashtaka Vargaa, the happiness, or distress of the family should be predicted from the transit of Saturn through the resultant Nakshatra and Rāśi (and those in Trikona to them).**

जीवात् पञ्चमतो ज्ञानं धर्मं पुत्रं च चिन्तयेत्
तस्मिन् फलाधिके राशौ सन्तानस्य सुखं दिशेत् ३०

बृहस्पतेः सुतस्थाने फलं यत्संख्यकं भवेत्
शत्रुनीचग्रहं त्यक्त्वा तावती सन्ततिर्ध्रुवा ३१

सुतभेशनवांशैश्च तुल्या वा सन्ततिर्भवेत्
सुतभावफलेनैवं पिण्डं संगुण्य पूर्ववत् ३२

पुत्रकष्टं विजानीयात् शेषमृक्षं गते शनौ
एवं धर्मं च विद्यां च कल्पयेत् कालचित्तमः ३३

**30-33. All about knowledge, religious inclinations of the native and son (progeny) is to be ascertained from the 5th House from Jupiter. If the Rekhas in the 5th House from Jupiter are larger in number in the Ashtaka Vargaa, there will be great happiness in respect of progeny. If the dots are larger in number, the happiness in respect of progeny will be meager. The number of children are equal to the number of Rekhas in the 5th House (from Jupiter), provided it is not the Rāśi of debilitation of Jupiter, or his enemies Rāśi. In that case the number of children will be very limited. The number of children is also equal to the number of Navams, in which the Lord of the 5th from Jupiter is posited. Multiply the Yoga Pinda of Jupiter by the number of Rekhas in the AshtakaVargaa and divide the product separately by 27 and 12. The remainders will denote the Nakshatra and Rāśi. Transit of Saturn through that Nakshatra and its Trikona Nakshatras and of that Rāśi and its Trikona Rāśis will be inauspicious. During that period the knowledge, learning and religious activities of the native will also be adversely affected.**

शुक्रस्याकष्टवर्गं च निक्षिप्याकाशचारिषु
यत्र यत्र फलानि स्युर्भूयांसि किल तत्र तु ३४

वित्तं कलत्रं भूमिं च तत्तद्देशाद् विनिर्दिशेत्
शुक्राज्जामित्रतो दारलब्धिश्चिन्त्या विचक्षणैः ३५

जामित्रतत्त्रिकोणस्थराशिदिग्देशसम्भवा
सुखेदुःखे स्त्रियाश्चिन्त्ये पिण्डं सम्वर्ध्य पूर्ववत् ३६

**34-36. There will be gain of wealth, land and happiness and marriage, whenever Venus passes in transit through the Rāśis, which have larger number of Rekhas in the AshtakaVargaa of Venus. These gains will be from the directions of the 7th Rāśi from Venus and of its Trikona Rāśis. The effects should be judged in the manner, already explained earlier, after multiplying the Rekhas in the 7th House from Venus by the Yoga Pinda.**

शनैश्चराश्रितस्थानादष्टमं मृत्युभं स्मृतम्
तदेव चायुषः स्थानं तस्मादायुर्विचिन्तयेत् ३७

लग्नात्प्रभृति मन्दान्तं फलान्येकत्र कारयेत्
तद्योगफलतुल्याब्दे व्याधिं वैरं समादिशेत् ३८

एवं मन्दादिलग्नान्तं फलान्येकत्र योजयेत्
तत्तुल्यवर्षे जातस्य तस्य व्याधिभयं वदेत् ३९

द्वयोर्योगसमे वर्षे कष्टं मृत्युसमं दिशेत्
दशारिष्टसमायोगो मृत्युरेव न संशयः ४०

**37-40. The 8th House from Saturn signifies death, as well as longevity. Assessment about longevity should be made from that House through the AshtakaVargaa. Therefore predict distress to the native in the year, equal to the number of Rekhas in the AshtakaVargaa from Lagna up to Saturn. The year, equal to the number of Rekhas from Saturn up to Lagna, will also be of distress. If in the year, equal to the total of the above Rekhas, 6thshta Dasa be also in operation, there can be possibility of death of the native.**

पिराडं संस्थाप्य गुणयेत् शनेरष्टमगैः फलैः
सप्तविंशतिहृच्छेषतुल्यमृक्षं गते शनौ ४१

तत्त्रिकोणर्क्षगे वापि जातकस्य मृतिं वदेत्
अर्कहृच्छेषराशौ वा तत्त्रिकोणेऽपि तद् वदेत् ४२

**41-42. Multiply the Yoga Pinda by the number of Rekhas in the AshtakaVargaa and divide the product by 27. The death of the native will take place, when Saturn passes in transit through the Nakshatra, denoted by the remainder, or its Trikona Nakshatras. Again, divide the product by 12. The native will face danger of death, when Saturn passes in transit through the Rāśi, denoted by the remainder, or through its Trikona Rāśis.**

शनैश्चराष्टवर्गेषु यत्र नास्ति फलं गृहे
तत्र नैव शुभं तस्य यदा याति शनैश्चरः ४३

यत्र राशौ शुभाधिक्यं तत्र याते शनैश्चरे
जातकस्य ध्रुवं ज्ञेयं तस्मिन् काले शुभं फलम् ४४

**43-44. The results will be favourable, when Saturn passes in transit through Rāśis, which have larger number of Rekhas in Saturn's AshtakaVargaa. Saturn's transit through Rāśis, which have larger number of dots, will produce only evil effects.**

अथाऽष्टवर्गायुर्दायाध्यायः ७१

अथात्रायुः प्रवक्ष्येऽहमष्टवर्गसमुद्भवम्
दिनद्वयं विरेखायां रेखायां सार्धवासरम् १

दिनमेकं द्विरेखायां त्रिरेखायां दिनार्धकम्
वेदतुल्यासु रेखासु सार्धसप्तदिनं स्मृतम् २

द्विवर्षं पञ्चरेखासु षड्रेखासु चतुःसमा
षड्वर्षं सप्तरेखासु वसवोऽष्टासु वत्सराः ३

एवं यदागतायुः स्यात् सर्वखेटसमुद्भवम्
तदर्धं स्फुटमायुः स्यादष्टवर्गभवं नृणाम् ४

## Ch. 71. Determination of Longevity through the Ashtaka Varga

**1-4. The sage said. I will now describe the method of determining longevity from the Ashtaka Varga. For this purpose the AshtakaVargaas of Lagna and all the Planets have to be studied. The Rekhas in all the Rāśis have been allotted specific spans of life. The Rāśi, which has no Rekhas, has been allotted 2 days, that with one Rekha gets I days, one day for Rāśi with 2 Rekhas, half day for Rāśi with 3 Rekhas, 7 days for Rāśi with 4 Rekhas, 2 years for Rāśi with 5 Rekhas, 4 years for Rāśi with 6 Rekhas, 6 years for Rāśi with 7 Rekhas and 8 years for Rāśi with 8 Rekhas. In this manner the spans of life should be worked from Rekhas in all the AshtakaVargaas. Half of the sum total of all will be the longevity, based on Ashtaka Varga.**

अथ समुदायाष्टकवर्गाध्यायः ७२

द्वादशारं लिखेच्चक्रं जन्मलग्नादिभिर्युतम्
सर्वाष्टकफलान्यत्र संयोज्य प्रतिभं न्यसेत् १

समुदायाभिधानोऽयमष्टवर्गः प्रकथ्यते
अतः फलानि जातानां विज्ञेयानि द्विजोत्तम २

## Ch. 72. Aggregational AshtakaVargaas

**1-2. The sage said. O Brahmin! Write down a Rāśi Kundali with 12 Houses, including Lagna. Then insert the total of the Rekhas in all the AshtakaVargaas of the Planets in the Rāśi concerned. The Ashtaka Varga with such Rekhas is called the Samudaya Ashtaka Varga, or the aggregational Ashtaka Varga. From this should be judged good and adverse effects of the Rāśi Kundali.**

त्रिंशाधिकफला ये स्यू राशयस्ते शुभप्रदाः
पञ्चविंशादित्रिंशान्तफला मध्यफला स्मृताः ३

अतः क्षीणफला ये ते राशयः कष्टदुःखदा
शुभे श्रेष्ठफलान् राशीन् योजयेन्मतिमान्नरः ४

कष्टराशीन् सुकार्येषु वर्जयेद् द्विजसत्तम
श्रेष्ठराशिगतः खेटः शुभोऽन्यत्राऽशुभप्रदः ५

**3-5. In the aggregational Ashtaka Varga the Rāśi, which has more than 30 Rekhas, gives favourable effects, that, having between 25 and 30 Rekhas, produces medium effects and that Rāśi, who has less than 25 Rekhas, yields adverse effects. Auspicious functions, like marriage etc., should be performed, when the Planet, on whose basis the time and date of functions are performed, moves into the Rāśi with favourable effects. The Rāśi, which is productive of adverse effects should be avoided for these purposes. For example, the strength of Moon is generally acceptable for all auspicious functions. Therefore auspicious functions should be performed, or started, when Moon is in the Rāśi with maximum number of Rekhas. The Planet in the Rāśi with favourable number of Rekhas produces auspicious effects and the Planet in the Rāśi with unfavorable number of Rekhas yields evil results.**

तन्वादिव्ययपर्यन्तं दृष्ट्वा भावफलानि वै
अधिके शोभनं ज्ञेयं हीने हानिं विनिर्दिशेत् ६

**6-6. Amongst the 12 Houses more than 30 Rekhas advance the effects of a House, between 25 and 30 Rekhas produce medium effects and the effects of the House, which contains less than 25 Rekhas, get damaged.**

**Notes. From the above rules it can be interpreted, that, if there are less than 25 Rekhas in 6th, 8th and 12th House, their effects become favourable. The effects will become adverse, if these Houses contain more than 25 Rekhas.**

मध्ये मध्यफलं ब्रूयाद् तत्तद्भावसमुद्भवम्
मध्यात् फलाधिके लाभो लाभात् क्षीणगतोव्ययः ७

लग्नं फलाधिकं यस्य भोगवानर्थवान् हि सः
विपरीतेन दारिद्र्यं भवत्येव न संशयः ८

**7-8. If in a Rāśi Kundali there are larger number of Rekhas in the 11th than those in 10th and there are smaller number of Rekhas in the 12th than those in the 11th and Lagna contains largest number of Rekhas, the native will be wealthy and will enjoy all kinds of comforts and luxury.**

दशावदिह भावानां कृत्वा खंडत्रयं बुधः
पश्येत् पापसमारूढं खंडे कष्टकरं वदेत् ९

सौम्यैर्युक्तं शुभं ब्रूयान्मिश्रैर्मिश्रफलं यथा
क्रमाद् बाल्याद्यवस्थासु खंडत्रयफलं वदेत् १०

**9-10. Divide the 12 Houses in 3 sections. There will be sufferings and distress in that part of the life, which is represented by the section of the Rāśi Kundali with more malefics. There will be happiness etc., in the part of the life, represented by the section of the Rāśi Kundali, containing more benefics. There will be mixed results in that area of life, when the relative section of the Rāśi Kundali has equal number of benefics and malefics. The Houses from Lagna up to the 4th signify childhood, those from 5th to 8th youth and those from the 9th to 12th represent old age.**

रेखाभिः सप्तभिर्युक्ते मासेमृत्युभयं नृणाम्
सुवर्णं विंशतिपलं दद्यात् द्वौ तिलपर्वतौ ११

रेखाभिरष्टभिर्युक्ते मासे मृत्युबशो नरः
असत्फलविनाशाय दद्यात् कर्पूरजां तुलाम् १२

रेखाभिर्मवभियुक्ते मासे सर्पभयं वदेत्
अश्वैश्चतुर्भिः संयुक्तं रथं दद्याच्छुभाप्तये १३

रेखाभिर्दशभिर्युक्ते मासे शस्त्रभयं तथा
दद्याच्छुभफलावाप्तयै कवचं वज्रसंयुतम् १४

अभिशापभयं यत्र रेखा रुद्रसमा द्विज
दिक्पलस्वर्णघटितां प्रदद्यात् प्रतिमां विधोः १५

युक्ते द्वादशरेखाभिर्जले मृत्युभयं वदेत्
सशस्यभूमिं विप्राय दत्वा शुभफलं भवेत् १६

विश्वप्रमितरेखाभिर्व्याघ्रान्मृत्युभयं तथा
विष्णोर्हिरण्यगर्भस्य दानं कुर्याच्छुभाप्तये १७

शत्रप्रमितरेखाभिर्युक्ते मासे मृतेर्भयम्

वराहप्रतिमां दद्यात् कनकेन विनिर्मिताम् १८

तिथितिश्च नृपाद् भीतिर्दद्यात् तत्र गजं द्विज
रिष्टं षोडशभिर्दद्यात् मूर्तिं कल्पतरोस्तथा १९

सप्तेन्दुभिर्व्याधिभयं दद्यात् धेनुं गुडं तथा
कलहोऽष्टेन्दुभिर्दद्याद् रत्नगोभूहिरण्यकम् २०

अङ्केन्दुभिः प्रवासः स्याच्छान्तिं कुर्याद् विधानतः
विंशत्या बुद्धिनाशः स्याद् गणेशं तत्र पूजयेत् २१

रोगपीडैकविंशत्या दद्याद् धान्यस्य पर्वतम्
यमाश्विभिर्बन्धुपीडा दद्यादादर्शकं द्विज २२

त्रयोविंशतिसंयुक्ते मासे क्लेशमवाप्नुयात्
सौवर्णीं प्रतिमां दद्याद्रवेः सप्तपलैर्बुधः २३

वेदाश्विभिर्बन्धुहीनो दद्याद् गोदशकं नृपः
सर्वरोगविनाशार्थं जपहोमादिकं चरेत् २४

धीहानिः पञ्चविंशत्या पूज्या वागीश्वरी तदा
षड्विंशत्याऽर्थहानिः स्यात् स्वर्णं दद्याद्विचक्षणः २५

तथा च सप्तविंशत्या श्रीसुक्तं तत्र संजपेत्
अष्टविंशतिसंयुक्ते मासे हानिश्च सर्वथा २६

सूर्यहोमश्च विधिना कर्त्तव्यः शुभकांक्षिभिः
एकोनत्रिंशता चापि चिन्ताव्याकुलितो भवेत् २७

घृतवस्त्रसुवर्णानि तत्र दद्यात् विचक्षणः
त्रिंशता पूर्णधान्याप्तिरिति जातकनिर्णयः २८

**11-28. There will be danger of death in the month of the Rāśi (period of Sun's transit in that Rāśi), which has 7, or less than 7 Rekhas in the Samudaya Ashtaka Varga. To ward off this evil effect 20 Tolas of gold and 2 heaps of sesame seeds, resembling the shape of a mountain, should be given in charity. … possibility of death …, … 8. Tuladan of camphor is recommended to obtain relief from this evil effect. … danger of snakes …, … 9. A ch6thot with 7 horses should be given in charity …. … danger from weapons …, which contains 10 …. An armour together with Vajra should be given in charity to ward off …. … danger of disgrace for no cause …, … 11. An idol of the moon, made of 10 Tolas of gold, should be given in charity …. … danger of death from drowning …, … 12. Land full of crops should be given in charity …. … danger of death from wild and violent animals …, in which there are 13 …. A Shaligram Shila should be given in charity …. … danger of death …, … 14. A Varah Murti, made of gold, should be given in charity …. … danger of the wrath of the king …, … 15. An elephant should be given in charity …. … danger of 6thshta (calamity, disaster, or misfortune) …, … 16. A Kalpa Vriksha, made of gold, should be given in charity …. … danger from diseases …, that has 17 …. A cow and jaggery should be given in charity …. … danger of conflict …, … 18. A cow, jewels, land and gold should be given in charity …. … possibility of banishment from the homeland …, which has 19 …. Family deity should be worshipped …. … loss of intelligence …, … 20. Goddess Saraswati should be worshipped …. … distress from diseases …, that has 21 …. A heap of grains, shaped, like a mountain, should be given in charity …. … distress to kinsmen …, … 22. Gold should be given in charity …. The native will be in distress …, … 23. An idol of the sun, made of 7 Tolas of gold, should be given in charity …. … death of the kinsmen …, … 24. 10 cows should be given in charity …. … loss of wisdom …, … 25. Goddess Saraswati should be worshipped …. … loss of wealth …, … 26. Gold should be given in charity …. … loss of wealth …, …27. Sri Sukta Japa should be performed …. … losses in several ways …, … 28. Havana of Sun should be performed …. … anxieties all-round …, … 29. Ghī, clothes and gold should be given in charity …. … 30gains of wealth and grains etc. …, … .**

त्रिंशाधिकामी रेखाभिर्धनपुत्रसुखाप्तयः
चत्वारिंशाधिकाभिश्च पुण्यश्रीरुपचीयते २९

**29. There will be all-round increase in wealth, happiness in respect of children and enjoyments in the Samvatsar, month and Nakshatra of the Rāśi, which has more than 30 Rekhas. … increase in wealth, property, children and good reputation, if the Rāśi has more than 40 Rekhas.**

अष्टवर्गेण ये शुद्धास्ते शुद्धाः सर्वकर्मसु
अतोऽष्टवर्गसंशुद्धिरन्वेष्या सर्वकर्मसु ३०

तावद्गोचरमन्वेष्यं यावन्न प्राप्यतेऽष्टकम्
अष्टवर्गे तु सम्प्राप्ते गोचरं विफलं भवेत् ३१

**30-31. The Rāśi, which is auspicious in Ashtaka Varga Samudaya, is considered auspicious for all auspicious functions. Consequently the auspiciousness of Ashtaka Varga should be got checked before performing any function, like marriage etc. If a Rāśi is not auspicious in Ashtaka Varga, then its auspiciousness should be checked from transit effects. It is not necessary to check transit effects, if a Rāśi is auspicious in Ashtaka Varga. Thus the auspiciousness of the Rāśi in the Ashtaka Varga should be considered, as paramount.**

अथ रश्मिफलाध्यायः ७३

अथ रश्मीन् प्रवक्ष्यामि ग्रहाणां द्विजसत्तम
दिङ्नवेष्विषुसप्ताष्टशराः स्वोच्चे करो रवेः १

नीच खं चान्तरे प्रोक्ता रश्मयश्चानुपाततः
नीचोनं तु ग्रहं भार्धाधिकं चक्राद्विशोधयेत् २

## Ch. 73. Effects of the Rays of the Planets

**1-2. The sage said. O Brahmin! Now I am going to tell you about the number of rays of the Planets. When Sun etc. are in their deep exaltation point, their rays are: Sun 10, Moon 9, Mars5, Mercury 5, Jupiter 7, Venus 8 and Saturn 5. The rays are nil, when these Planets are in deep debilitation, the number of rays would be proportionate with the number of Rāśi. The following method is to be adopted for ascertaining the proportionate number of rays. Deduct the debilitation Rāśi etc. of the Planet, whose rays are to be ascertained, from his longitude. If the remainder is less than 6 Rāśis it should be multiplied by the number of rays of that Planet, mentioned above and the product should be divided by 6. The result will denote the number of rays of that Planet. In case after deduction the remainder is more than 6 Rāśis, then it should be deducted from 12. The other procedure will remain the same.**

स्वीयरश्मिहतं षड्भिर्भजेत् स्यू रश्मयः स्वकाः
अपरैरत्र संस्कारविशेषः कथितो यथा ३

स्वोच्चभे ते त्रिगुणिताः स्वत्रिकोणे द्विसंगुणाः
स्वमे त्रिघ्ना द्विसंभक्ता अधिमित्रगृहे तथा ४

वेदघ्ना रामसंभक्ता मित्रमे षड्गुणास्ततः
पञ्चभक्तास्तथा शत्रुगृहे चेद् दलिताः कराः ५

अधिशत्रुगृहे द्विघ्नाः पञ्चभक्ताः समे समाः
शनिशुक्रौ विना ताराग्रहा अस्ते गता यदि ६

विरश्मयो भवन्त्येवं ज्ञेयाः स्पष्टकरा द्विज
रश्मियोगवशादेवं फलं वाच्यं विचक्षणैः ७

**3-7. The Sage said. O Maitreya! Other Acharyas have recommended further correction of the number of rays, worked out in the manner described above. The corrections have to be made, as follows. If the Planet be in his exaltation Rāśi, the number of rays ascertained should be trebled. … Moolatrikona, … doubled. … own Rāśi, … multiplied by 3 and the product be divided by 2. … Rāśi of his Adhimitr (great friend), … multiplied by 4 and the product be divided by 3. … House of a friend, … multiplied by 6 and the product be divided by 5. The number of rays ascertained should be halved, if the Planet be in the House of his enemy. If he be in the House of his Adhi-Shatru (great enemy), the number of rays ascertained should be multiplied by 2 and the product be divided by 5. No correction is to be made, if the Planet is in the House of a neutral. The effects should be declared after computation of the net number of rays of each Planet.**

एकादि पञ्चपर्यन्तं रश्मिसंख्या भवेद्यदि
दरिद्रा दुःखसंतप्ता अपि जाताः कुलोत्तमे ८

परतो दशकं यावत् निर्धना भारवाहकाः
स्त्रीपुत्रगृहहीनाश्च जायन्ते मनुजा भुवि ९

अकादशस्वल्पपुत्राः स्वल्पवित्ताश्च मानवाः
द्वादशस्वल्पवित्ताश्च धूर्ता मूर्खाश्च निर्बलाः १०

चौर्यकर्मरता नित्यं चेत् त्रयोदश रश्मयः
चतुर्दशसु धर्मात्मा कुटुम्बानां च पोषकाः ११

कुलोचितक्रियासक्तो धनविद्यासमन्वितः
रश्मिभिः पञ्चदशभिः सर्वविद्यागुणान्वितः १२

स्ववंशमुख्यो धनवानित्याह भगवान् विधिः
परतश्च कुलेशाना बहुभृत्या कुटुम्बिनः १३

कीर्तिमन्तो जनैः पूर्णाः सर्वे च सुखिनः क्रमात्
पञ्चाशज्जनपालश्चेदेकविंशतिरश्मयः १४

दानशीलः कृपायुक्तो द्वाविंशतिसुरश्मिषु
सुखयुक् सौम्यशीलश्चेत् त्रयोविंशतिरश्मयः १५

आत्रिंशत् परतः श्रीमान् सर्वसत्त्वसमन्वितः
राजप्रियश्च तेजस्वी जनैश्च बहुभिर्वृतः १६

अत ऊर्ध्वं तु सामन्तश्चत्वारिंशत् करावधि
जनानां शतमारब्य सहस्रावधिपोषकः १७

अत ऊर्ध्वन्त् भूपालः पंचाशत् किरणावधि
तत ऊर्ध्वकरैर्विप्र चक्रवर्ती नृपो भवेत् १८

**8-18. The effects, produced by the number of rays of Planets, are given below. Between 1 and 5 poor and unhappy, even if born in an eminent family. Between 6 and 10 poor, carrier of loads and without wife and children. 11 meager wealth and few children. 12 meager wealth, idiot and wicked. 13 thief. 14 wealthy, protector and maintainer of several families, learned and observer of the traditions of the family. 15 head of the family, achieves proficiency in many kinds of learnings, good qualities. This is what Lord Brahma has said. 16 most distinguished in the family. 17 employer of many servants. 18 maintainer of large family. 19 possessor of name and fame. 20 blessed with a large family and kinsmen. 21 maintainer and protector of 50 persons. 22 ch6thtable and kind. 23 well cultured and happy. Between 24 and 30 healthy, powerful, favourite of the king, splendorous, possessor of a large family. Between 31 and 40 minister and maintainer and protector of 100 to 1000 persons. Between 40 and 50 king. 51 and above powerful sovereign.**

एवं प्रसूतिकालोत्थनभोगकरसम्भवम्
कुलक्रमानुसारेण जातकस्य फलं वदेत् १९

**19. The effects should be predicted, according to the number of rays of the Planets at the time of birth, after taking into account the status of the native.**

क्षत्रियश्चक्रवर्ती स्याद् वैश्यो राजा प्रजायते
शूद्रश्च सधनो विप्रो यज्ञकर्मक्रियारतः २०

**20. For example, if the rays are more than 50 in number, one born a Kshatriya kings family will become a powerful sovereign, one born in a Vaishya family will become a king (or high dignitary), one born in Sudra family will become wealthy and one born in a Brahmin family will become very learned and will observe all religious norms.**

उच्चाभिमुखखेटस्य कराः पुष्टफलप्रदाः
नीचाभिमुखखेटस्य ततो न्यूनफलप्रदाः २१

**21.The effects of the Planets, moving from their debilitation to exaltation, are full. The effects of the Planets, moving from their exaltation to debilitation, will be lesser than described above.**

सर्वेषामेव खेटानामेवं रश्मिवशाद्द्विज
शुभं वाऽप्यशुभं चापि फलं भवति देहिनाम् २२

रश्मिज्ञानं विना सम्यक् न फलं ज्ञातुमर्हति
तस्माद्रश्मीन् प्रसाध्यैव फलं वाच्यं विचक्षणैः २३

**22-23. Auspicious and inauspicious effects of all the Planets are according to the number of rays they possess. The prediction will not be correct without the knowledge of the effects of the rays. Therefore it is imperative, that in the judgment of Rāśi Charts and decl6thng results the effects of the number of rays of the Planets be taken into account.**

अथ सुदर्शनचक्रफलाध्यायः ७४

अथोच्यते मया विप्र रहस्यं ज्ञानमुत्तमम्
जगतामुपकाराय यत् प्रोक्तं ब्रह्मणा स्वयम् १

चक्रं सुदर्शनं नाम यद्वशात् प्रस्फुटं फलम्
नृणां तन्वादिभावानां ज्ञातुं शक्नोति दैववित् २

जन्मतो मृत्युपर्यन्तं वर्षमासदिनोद्भवम्
शुभं वाऽप्यशुभं सर्वं तच्छृणुष्वैकमानसः ३

## Ch. 74. Effects of the Sudarshana Chakra

**1-3. Mahārśi Parasara said to Maitreya. O Brahmin! Now I will impart to you the knowledge of a great secrecy and superior importance, which was communicated to me by Lord Brahma himself for the benefit of the world. This is a Chakra by the name of Sudarshana, through which Devajnas will be able to predict the favourable and unfavorable results for every year, every month and every day from the time of birth to the time of death of a person. Listen to this very intently.**

एककेन्द्रोद्भवं रम्यं लिखेद् वृत्तत्रयं द्विज
द्वादशारं च तत् कुर्याद् भवेदेवं सुदर्शनम् ४

**O Brahmin! Take a point and from it draw three circles. Within the circles draw 12 lines, so as to provide 12 Houses within each circle. This is how Sudarshana Chakra is drawn.**

तत्राद्यवृत्ते लग्नाद्या भावा लेख्याः सखेचराः

तदूर्ध्ववृत्ते चन्द्राद्य भावाः खेटसमन्विताः ५

तदूर्ध्ववृत्ते सूर्याद्य क्रमात् भावा ग्रहान्विताः
एवमेकैकभावेऽत्र भवेद्धानां त्रयं त्रयम् ६

**5-6. In the first circle (innermost) place the 12 Houses from Lagna with Planets, posited there. In the circle next to the innermost circle place the 12 Houses from the Rāśi of Moon with the Planets in them. In the third circle place the 12 Houses from the Rāśi of Sun with Planets in them. Thus there will be 3 Rāśis in each House of the Chakra.**

अत्र तु प्रथमो भावो लग्नेन्दुरविभिर्युतः
तं प्रकल्प्य तनुं त्वग्रे ज्ञेया भावा धनादयः ७

तत्र तत्र ग्रहस्थित्या ज्ञेयं तत्तत्फलं बुधैः
तनुभावे शुभः सूर्यो ज्ञेयोऽन्यत्राशुभप्रदः ८

पापोऽपि स्वोच्चराशिस्थो न भवत्यशुभप्रदः
एवं शुभाऽशुभं दृष्ट्वा तत्तद्भावफलं वदेत् ९

**7-9. The significant aspect of this Chakra is, that Lagna, Moon and Sun represent the first House. The 2nd, 3rd etc. up to 12th from Moon and Sun will deal with the same subject, as they do, when reckoned from Lagna. Then the results should be assessed, according to the Planets in each House. In this form of Rāśi Kundali Sun is considered auspicious in the first House and inauspicious, or malefic in other Houses. The malefics do not produce evil effects, if they are in their exaltation Rāśi. In this manner predictions should be made, after considering the benefic and malefic natures of the Planets, their disposition and aspects from and on them.**

यो भावः स्वामिसौम्याभ्यां युक्तो दृष्टोऽयमेधते
पापैर्दृष्टो युतो यो वा तस्य हानिः प्रजायते १०

**10. A House gets advancement, if it is occupied, or aspected by the Lord, or a benefic. The House, which is occupied, or aspected by a malefic, is harmed.**

ज्ञेयं सग्रहभावस्य ग्रहयोगसमं फलम्
अग्रहस्य तु भावस्य ग्रहदृष्टिसमं फलम् ११

शुभैरेव शुभं पापैर्शुभं मिश्रखेचरैः
शुभाधिके शुभं ज्ञेयमशुभं त्वशुभाधिके १२

एवं भावेषु खेटानां योगं दृष्टिं विलोक्य च
तारतम्येन वाच्यानि फलानि द्विजसत्तम १३

**11-13. The effects of a House will be in accordance with the Planet occupying it, or in accordance with the Planet aspected, if no Planet is in occupation of the House. The effects of a House, occupied by a benefic, will be auspicious and the House, occupied by a malefic, will be inauspicious. Effects of the aspects will be the same. If a House is influenced both by benefics and malefics, the results will depend on the majority amongst the benefics and malefics. If the number of benefics is larger than the number of malefics, the results will be auspicious. If reverse is the case, inauspicious, or evil effects may be expected. If there are equal number of malefics and benefics, those with greater strength will influence the results of that House. Mixed results should be declared, if there be no difference in the strength of malefics and benefics. The same would apply to aspects.**

यत्र नैव ग्रहः कश्चिन्न दृष्टि कस्यचिद् भवेत्
तदा तद्भावजं ज्ञेयं तत्स्वामिवशतः फलम् १४

**14. The effects should be declared, according to its Lord, if the House is neither occupied, nor aspected by a Planet.**

शुभोऽपि शुभवर्गेषु ह्यधिकेष्वशुभप्रदः
पापोऽपि शुभवर्गेषु ह्यधिकेषु शुभप्रदः १५

स्वभोच्चस्य शुभस्यात्र वर्गा ज्ञेयाः शुभवाहाः
शत्रोः क्रूरस्य नीचस्य षड्वर्गा अशुभप्रदाः १६

**15-16. A natural benefic loses his benevolence, if he is in more malefic Vargas. Similarly a natural malefic loses his malevolence, if he is in more benefic Vargas (SaptaVarga). A Planets own Rāśi, his exaltation Rāśi and benefic Vargas are considered auspicious. And malefic and the Vargas of an enemy and debilitated Rāśi are considered inauspicious.**

एवं सर्वेषु खेटेषु भवेष्वपि द्विजोत्तम
शुभाशुभत्वं सञ्चिन्त्य ततस्तत्फलमादिशेत् १७

**17. The sage said, that the results should be declared only after assessing the auspiciousness and inauspiciousness of all the Houses.**

यदा सुदर्शनादेव फलं सिद्ध्यति देहिनाम्
तदा किं मुनिभिः सर्वैर्लग्नादेव फलं स्मृतम् १८

**18. Maitreya asked. O Venerable sage! Kindly enlighten me on one point. If all the Houses are judged in accordance with the Sudarshana Chakra, why many learned sages have advocated declaration of effects from the Houses, reckoned from Lagna in Rāśi Kundali?**

इति म संशयो जातस्तं छेत्तुमर्हति
पृथग्भगौ यदाऽर्केन्दू लग्नादन्यत्र संस्थितौ १९

तदा सुदर्शनाच्चक्रात् फलं वाच्यं विचक्षणैः
एकभे द्वौ त्रयो वा चेत् तदा लग्नात् फलं वदेत् २०

**19-20. The sage replied. The results should be declared in accordance with the Sudarshana Chakra, only when Sun and Moon being in separate Rāśis different from the Rāśi of Lagna. If amongst Lagna, Sun and Moon, all the three, or two of them are in the same Rāśi, the judgment of effects should be made from the Rāśi Kundali only.**

अथ विप्र प्रवक्ष्येऽहं प्रतिवर्षादिजं फलम्
अस्मात् सुदर्शनादेव दशान्तरदशावशात् २१

तन्वाद्यैर्वर्षमास्सार्धद्विकधस्रान् प्रवर्तयेत्
भावेशादिद्वादशानां दशा वर्षेषु कल्पयेत् २२

तदाद्यन्तर्दशास्तद्वन्मासादौ तद्बलैः फलम्
तं तं भावं प्रकल्प्याङ्कं तत्तत्तन्वादिजं द्विज २३

**(21-23) The sage said. O Brahmin! Now I will tell you about the effects, produced every year and every month by the twelve Houses in their Dasas and Antardasas, according to Sudarshana Chakra. Under this system every one of the twelve Houses, beginning from the 1st, is allotted a Dasa period of one year. Thus every year in 12 years a House becomes Lagna of the year and the remaining become 2nd, 3rd and so on. Every year every House will have Antardasa of one month. By following the method of Lagna of the year here also, there will be a Lagna of the month. The first Antardasa will be of the first House and then will follow for 12 months the Antardasas of the other Houses, every House assuming the role of Lagna by turn. Every House gets Pratyantar Dasa of 2 days and Vidasa of 12 Ghatikas. The same method is to be adopted for judging the effects of Houses in Pratyantar Dasas and Vidasas.**

तत् तल्लग्नात् केन्द्रकोणाष्टमे सौम्याः शुभप्रदाः
यत्र भावे सैंहिकेयो भवेत् तद्भावहानिकृत् २४

पापा वा यत्र बहवस्तत्तद्भावविनाशनम्
विरिष्फारिशुभैः पापैस्त्रिषडायस्थितैः शुभम् २५

एवं प्रत्यब्दमासादौ भावानां फलचिन्तनम्

द्वादशानां दशावृत्त्या दशाश्चायुषि चिन्तयेत् २६

**24-26. At the time of commencement of a Dasa, if there be benefic in the 1st, 4th, 7th, 10th, 5th, 9th and 8th, favourable effects will be experienced in the concerned year, month etc. The House, which is occupied by only Rahu, or Ketu, becomes harmful. The same will be the fate of the House, which is occupied by a larger number of malefics. If there be benefics in Houses other than the 12th, or 6th, the House concerned will produce favourable effects. In other words, if the benefics be in the 12th, or 6th from the House concerned, unfavorable effects will be derived in the related year, month etc. If there be malefics in the 3rd, 6th and 11th from the House, assuming the role of Lagna, then these three Houses will produce auspicious results. The effects can be ascertained for every year, month etc. in this manner. The total number of years in Vimsott6th Dasa are 120 years. After every 12 years the same method of determining the Dasas, Antardasas etc. has to be repeated for Lagna and other Houses.**

एवं सुदर्शनाच्चक्राद् वर्षमासादिजं फलम्
ज्ञात्वा तथाष्टवर्गोत्थमुभाभ्यां फलनिर्णयः २७

उभयत्र समत्वे हि सम्पूर्णं तत् फलं वदेत्
विषमत्वे यदाधिक्यं तत्फलं च बलक्रमात् २८

**27-28. After ascertaining the effects of the years, months etc. in accordance with the Sudarshana Chakra, assessment of effects for the years, months etc. should be made on the basis of Ashtaka Varga. The benefic, or malefic effects will be full, if the assessment from both produces the same results. If they are different, the comparative strength of both should be taken into account to declare the final results.**

अथ पंचमहापुरुषलक्षणाध्यायः ७५

अथ वक्ष्याम्यहं पञ्चमहापुरुषलक्षणम्
स्वभोच्चगतकेन्द्रस्थैर्बलिभिश्च कुजादिभिः १

क्रमशो रुचको भद्रो हंसो मालव्य एव च
शशश्चैते बुधैः सर्वैर्महान्तः पुरुषाः स्मृताः २

## Ch.75. Characteristic Features of Panchmahapurushas

**1-2. The sage said. O Maitreya! Now I will relate to you the characteristic features of Panchmahapurushas. When Mars, Mercury, Jupiter, Venus and Saturn, being in their own, or exaltation Rāśi, be in Kendra to Lagna, they give rise to Ruchaka, Bhadra, Hamsa, Malavya and Sasa Yogas. These Yogas are called Panchmahapurusha Yogas and the persons, born in these Yogas, are known Panchmahapurushas.**

दीर्घाननो महोत्साहो स्वच्छकान्तिर्महाबलः
चारुभ्रूर्नीलकेशश्च सुरुचिश्च रणप्रियः ३

रक्तश्यामोऽरिहन्ता च मन्त्रविच्चोरनायकः
क्रूरोभर्ता मनुष्याणां क्षामाऽङ्घ्रिर्द्विजपूजकः ४

वीणावज्रधनुःपाशवृषचक्राङ्कितः करे
मन्त्राभिचारकुशली दैर्ध्ये चैव शतांगुलः ५

मुखदैर्घ्यसमं मध्यं तस्य विज्ञैः प्रकीर्तितम्
तुल्यस्तुलासहस्रेण रुचको द्विजपुङ्गव ६

भुनक्ति विन्ध्यसह्याद्रिप्रदेशं सप्ततिं समाः
शस्त्रेण वह्निना वापि स प्रयाति सुरालयम् ७

**3-7. The Ruchaka native possesses a long face, he is very enthusiastic, has spotless lustre, is powerful, has attractive brows, black hair and is fond of all things. He loves to fight wars, is of dark-red complexion, is victorious over enemies, is discriminating, is protector of thieves and has cruel temperament and slender thighs. He is a devotee of Brahmins, has marks of Veena, Varga, 2ndus, Pasha and Vrasha Rāśis in his hands along with Chakra Rekha. He is well versed in occult sciences. He is 100 Anguls in height, his waste has the circumference, equal to the length of his face and is 1000 Karshas in weight. He, as ruler of Sahyachala and Vindhya Pradesh, dies, after attaining the age of 70, by fire or weapons.**
**Notes. The old Rupee had the weight of 1 Karsha. 4 Karshas are equal to one Pala and 300 Palas make one Libra, according to Amarkosha. 20 Libras are equal to one Bhara.**

शार्दूलप्रतिभः पीनवक्षा गजगतिः पुमान्

पीनाजानुभुजः प्राज्ञश्चतुरस्रश्च योगवित् ८

सात्त्विकः शोभनांघ्रश्च शोभनश्मश्रुसंयुतः
कामी शङ्खगदाचक्रशरकुञ्जरचिह्नकैः ९

ध्वजलाङ्गलचिह्नैश्च चिह्नितांघ्रिकराम्बुजः
सुनासश्शास्त्रविद् धीरः कृष्णाकुञ्चितकेशभृत् १०

स्वतन्त्रः सर्वकार्येषु स्वजनप्रीणनक्षमः
ऐश्वर्यं भुज्यते चास्य नित्यं मित्रजनैः परैः ११

तुलया तुलितो भारप्रमितः स्त्रीसुतान्वितः
सक्षेमो भूपतिः पाति मध्यदेशं शतं समाः १२

**8-12. The Bhadra native is splendorous, like a lion, has very developed chest (or chest with well developed muscles), has the gait of an elephant, has long and thick arms, is learned in all respects. He is well versed in Yoga performance, is Sattva-Guni and has beautiful feet, moustaches and head. He is fond of luxuries and comforts and has marks of Sankha (conch), Chakra, Gada, arrow, elephant, Dhwaja (flag) and Hala (plough) in his hands and feet. He is well versed in Shastras, has black and curly hair, possesses independent nature and is protector of his family. His friends share in the enjoyment of his wealth. He is 20 Libras in weight. He lives happily with his wife and children and, as ruler of Madhya Desha, lives for one hundred years.**

हंसो हंसस्वरो गौरः सुमुखोन्नतनासिकः
श्लेष्मलो मधुपिङ्गाक्षो रक्तवर्णनखः सुधीः १३

पीनगण्डस्थलो वृत्तशिराः सुचरणो नृपः
मत्स्याऽङ्कुशधनुःशंखकञ्जखट्वाङ्गचिह्नकैः १४

चिह्नतांघ्रिकरः स्त्रीषु कामार्तो नैति तुष्टताम्
षण्णवत्यंगुलो दैर्घ्ये जलक्रीडारतः सुखी १५

गङ्गायमुनयोर्मध्यदेशं पाति शतं समाः
वनान्ते निधनं याति भुक्त्वा सर्वसुखं भुवि १६

**13-16. The Hamsa native has voice, like a Hamsa, has a handsome appearance and well developed nose. He is a king with phlegmatic temperament, honey-like tawny-coloured eyes, red-coloured nails, sharp intelligence, sturdy cheeks, round forehead and beautiful feet. He has marks of Matsya (fish), Ankush (the iron hook, with which elephants are driven), 2ndus (bow), Sankh, Kamal (lotus) in his hands and feet. He is very passionate and his lust remains unfulfilled. He is 96 Anguls in height. He is fond of swimming and playing games in watery places. He enjoys life fully and, as ruler of a land, situated between the Ganges and Yamuna, dies after attaining the age of 100 years.**

समौष्ठः कृशमध्यश्च चन्द्रकान्तिरुचिः पुमान्
सुगन्धो नातिरक्ताङ्गो न ह्रस्वो नातिदीर्घकः १७

समस्वच्छरदो हस्तिनाद ग्राजानुबाहुधृक्
मुखं विश्वांगुलं दैर्घ्ये विस्तारे च दशाङ्गुलम् १८

मालव्यो मालवाख्यं च देशं पाति ससिन्धुकम्
सुखं सप्ततिवर्षान्तं भुक्त्वा याति सुरालयम् १९

**17-19. The Malavya native has beautiful lips and a slender waist. He is lustrous, like Moon, and has fragrance in his body. He is of ordinary red complexion, has a medium stature and clean and beautiful teeth. His voice is like that of an elephant and his arms are long enough to reach up to his knees. His face is thirteen Anguls in length and ten Anguls in breadth. He lives happily for seventy years, as ruler of Sindhu and Malwa, and then leaves for his heavenly abode.**

तनुद्विजमुखः शूरो नातिह्रस्वः कृशोदरः
मध्ये क्षामः सुजंघश्च मतिमान् पररन्ध्रवित् २०

शक्तो वनाद्रिदुर्गेषु सेनानीर्दन्तुरः शशः
चंचलो धातुवादी च स्त्रीशक्तोऽन्यधानान्वितः २१

मालावीणामृदङ्गाऽस्त्ररेखाङ्कितकरांघ्रिकः
भूपोऽयं वसुधा पाति जीवन् खाद्रिसमाः सुखी २२

**20-22. The Sasa native has small sized teeth and face, but his body is not small. He is valorous. He has a slender waist and beautiful thighs. He is wise and enjoys wandering in forests and mountains. He is well versed in the loopholes of the enemy. He is lively, virile and fond of women. He usurps other peoples wealth. He has marks of Mala (garland), Veena, Mridanga (musical instruments) and weapons in his hands and feet. He rules happily over several parts of the earth and then leaves for his heavenly abode at the age of 70.**

अथ पंचमहाभूतफलाध्यायः ७६

अथ पञ्चमहाभूतच्छायाज्ञानं वदामि ते
ज्ञायते येन खेटानां वर्तमानदशा बुधैः १

## Ch. 76. Effects of the Elements

**1. The sage said. O Brahmin! Now I will tell you about the effects of the five elements: space, air, fire, water and earth. 2. Space, air, fire, water and earth are ruled by Jupiter, Saturn, Mars, Venus and Mercury. The effects are experienced in proportion to the intensity of the various elements.**

शिखिभूखाम्बुवातानामधिपा मङ्गलादयः
तत्तद्बलवशाज्ज्ञेयं तत्तद्भूतभवं फलम् २

सबले मङ्गले वह्निस्वभावो जायते नरः
बुधे महीस्वभावः स्यादाकाशप्रकृतिर्गुरौ ३

शुक्रे जलस्वभावश्च मारुतप्रकृतिः शनौ
मिश्रैर्मिश्रस्वभावश्च विज्ञेयो द्विजसत्तम ४

**3-4. The native will have temperament, according to the greater strength of the Planet at the time of birth. Jupiter, Saturn, Mars, Venus and Mercury will, respectively, give spacial (etheral), airy (windy), fiery, watery and earthy temperament. If all of them, or many of these Planets have equal strength, the temperament will be of a mixed character.**

सूर्ये वह्निस्वभावश्च जलप्रकृतिको विधौ
स्वदशायां ग्रहाश्छायां व्यंजयन्ति स्वभूतजाम् ५

**5. If Sun be endowed with strength, the native will have fiery temperament. If Moon be strong, the native will have watery temperament. All the Planets in course of their Dasa endow the native with bodily lustre, relating to their elements.**

क्षुधार्तश्चपलः शूरः कृशः प्राज्ञोऽतिभक्षणः
तीक्ष्णो गौरतनुर्मानी वह्निप्रकृतिको नरः ६

**6. The characteristic features of the person with fiery temperament are: distressed with hunger, restless, lean and thin body, learned, consumes a large quantity of food, sharp, fair-complexioned and proud.**

कर्पूरोत्पलगन्धाढ्यो भोगी स्थिरसुखी बली
क्षमावान् सिंहनादश्च महीप्रकृतिको नरः ७

**7. … earthy: emits fragrance of camphor and lotus, is fond of luxuries, comforts and enjoyments and is permanently happy, forgiving and has a deep voice, like a lion.**

शब्दार्थवित् सुनीतिज्ञो प्रगल्भो ज्ञानसंयुतः
विवृतास्योऽतिदीर्घश्च व्योमप्रकृतिसम्भवः ८

**8. … etheral: acquainted with semasiology, expert in diplomacy, brilliant, learned, unmasked face and long stature.**

कान्तिमान् भारवाही च प्रियवाक् पृथिवीपतिः
बहुमित्रा मृदुर्विद्वान् जलप्रकृतिसम्भवः ९

**9. … watery: is lustrous, can sustain burdens, is soft-spoken, king, has many friends and is learned.**

वायुतत्त्वाधिको दाता क्रोधी गौरोऽटनप्रियः
भूपतिश्च दुराधर्षः कृशाङ्गो जायते जनः १०

**10. … airy: charitable, full of anger, fair complexion, fond of wandering, victorious over enemies, king and has lean physique.**

स्वर्णदीप्तिः शुभा दृष्टिः सर्वकार्यार्थसिद्धिता
विजयो धनलाभश्च वह्निभायां प्रजायते ११

**11. When the fire element is predominant in a person, his face and body exhibit lustre, like gold and he has happy-looking eyes. He achieves success in all his ventures, is victorious over his enemies and gets gains of wealth.**

इष्टगन्धः शरीरे स्यात् सुस्निग्धनखदन्तता
धर्मार्थसुखलाभश्च भूमिच्छाया यदा भवेत् १२

**12. … earth, the body of the person emits various kinds of fragrances. His nails, hair and teeth are are clean. He gets gains of happiness and wealth and is religious-minded.**

स्वच्छा गगनजा छाया वाक्पटुत्वप्रदा भवेत्
सुशब्दश्रवणोद्भूतं सुखं तत्र प्रजायते १३

**13. … ether, the person is a clever conversationalist and becomes happy by learning to songs etc.**

मृदुता स्वस्थता देहे जलच्छाया यदा भवेत्
तदाभीष्टरसस्वादसुखं भवति देहिनः १४

**14. … water, the persons body is slender, he enjoys good health and tasty food and is happy on that account.**

मालिन्यं मूढता दैत्यं रोगाश्च पवनोद्भवाः
तदा च शोकसन्तापौ वायुच्छाया यदा भवेत् १५

**15. … air, the body is filthy. The person becomes an idiot and suffers from rheumatism, sorrows and agonies.**

एवं फलं बुधैर्ज्ञेयं सबलेषु कुजादिषु
निर्बलेषु तथा तेषु वक्तव्यं व्यत्ययाद् द्विज १६

**16. The sage said. O Brahmin! The effects of the elements, which I have described above, will be realized in full, if the Planets concerned are endowed with adequate strength. If they are weak, the effects will be reduced in proportion to their weakness.**

नीचशत्रुभगैश्चापि विपरीतं फलं वदेत्

फलाप्तिरबलैः खेटैः स्वप्नचिन्तासु जायते १७

**17. If the Planet concerned is in his debilitation Rāśi, or be placed in an inauspicious House, the elemental effects will be adverse, that is, opposite to the effects, described above. If a Planet is without strength, his elemental effects will be experienced only in imagination.**

तद्दुष्टफलशान्त्यर्थमपि चाज्ञातजन्मनाम्
फलपक्त्या दशा ज्ञेया वर्तमाना नभःसदाम् १८

**18. If a persons time, date and place of birth is not known, he should determine the Dasa of a Planet from the effects, mentioned above and, if he is facing evil effects, he should take appropriate remedial measures to appease the Planet concerned.**

अथ सत्त्वादिगुणफलाध्यायः ७७
अथो गुणवशेनाहं कथयामि फलं द्विज
सत्त्वग्रहोदये जातो भवेत्सत्त्वाधिकः सुधीः १

रजःखेटोदये विज्ञो रजोगुणसमन्वितः
तमःखेटोदये मूर्खो भवेज्ञातस्तमोऽधिकः २

गुणसाम्ययुतो जातो गुणसाम्यखगोदये
एवं चतुर्विधा विप्र जायन्ते जन्तवो भुवि ३

उत्तमो मध्यमो नीच उदासीन इति क्रमात्
तेषां गुणानहं वक्ष्ये नारदादिप्रभाषितान् ४

## Ch. 77. Effects of the Gunas

**1-4. The Great Sage Parasara said. O Brahmin! When the Sattva-Guni Planets are predominant, the person born is Sattva-Guni and of good character. When Rajo-Guna (passion of love and pleasure) is predominant, the person born is Rajo-Guna and intelligent. When the Tamo-Guna (attribute of darkness) is predominant, the person born is stupid. When at the time of birth all the Planets are of equal dominance, the person has a mixture of all the attributes. The persons (creatures) so born are classified, as Uttama (most excellent), Madhyama (of intermediate type), Adhama (despisable) and Udaseena (indifferent, or neutral) in that order. Thus there are four kinds of animate beings (Prani). I will relate their attributes, which have been described by Narada and other sages.**

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च
अलोभः सत्यवादित्वं जने सत्त्वाधिके गुणाः ५

**5. The natural attributes of persons, belonging to Uttam class, are possession of control over organs of perception and mind, simplicity, truthfulness, patience and satisfaction.**

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाऽप्यपलायनम्
साधूनां रक्षणं चेति गुणा ज्ञेया रजोऽधिके ६

**6. Valor, splendor, patience, cleverness, not retreating in war and protecting the holy men are the natural attributes of persons, belonging to Rajo-Guna.**

लोभश्चासत्यवादित्वं जाड्यमालस्यमेव च
सेवाकर्मपटत्वंच गुणा एते तमोऽधिके ७

**7. Greed, falsehood, idiocy, laziness and doing service of others are the inborn attributes of persons, who belong to Adham class.**

कृषिकर्मणि वाणिज्ये पटुत्वं पशुपालने
सत्यासत्यप्रभाषित्वं गुणसाम्ये गुणा इमे ८

**8. Engagement in agriculture and business, protection of cattle and speaking both truth and lies are inborn attributes of persons, belonging to Udaseena class.**

गतैश्च लक्षणैर्लक्ष्य उत्तमो मध्यमोऽधमः

उदासीनश्च विप्रेन्द तं तत्कर्मणि योजयेत् ९

**9. O Maitreya! Classify the people, as Uttama, Madhyama, Adhama and Udaseena after observation of the attributes, described above. A person should be considered appropriate for a job, according to his attributes.**

द्वाभ्यामेकोऽधिको यश्च तस्याधिक्यं निगद्यते
अन्यथा गुणसाम्यं च विज्ञेयं द्विजसत्तम १०

**10. If amongst Sattva, Rajas and Tamas any attribute is the most dominant, it is considered the most predominant of all. Otherwise all have equal effects.**

सेव्यसेवकयोरेवं कन्यकावरयोरपि
गुणैः सदृशयोरेव प्रीतिर्भवति निश्चला ११

**11. The affectionate relationship between an employer and employee and man and women will be inv6thable and stable, if they possess the same attributes.**

उदासीनोऽधमस्यैवमुदासीनस्य मध्यमः
मध्यमस्योत्तमो विप्र प्रभवत्याश्रयो मुदे १२

**12. O Maitreya! Amongst the above four classes of persons, if there is any kind of relationship of even Adhama with Udaseena, of Udaseena with Madhyama and of Madhyama with Uttama, there will be mutual affection and happiness.**

अतोऽवरा वरात् कन्या सेव्यतः सेवकोऽवरः
गुणैस्ततः सुखोत्पत्तिरन्यथा हानिरेव हि १३

**13. If the bridegroom has better attributes than the bride and the master has better attributes than the servant, there will be mutual affection (regard for each other) and happiness. If the bride or the servant possesses better attributes, the relationships will be full of bitterness.**

वीर्यं क्षेत्रं प्रसूतेश्च समयः सङ्गतिस्तथा
उत्तमादिगुणे हेतुर्बलवानुत्तरोत्तरम् १४

**14. The attributes of the native are dependent on his father and mother, his time of birth and the persons, he gets associated with. These are the root causes of Uttama etc. qualities, possessed by him. The attributes, endowed by the time of the birth and associations, are stronger than those, received from the parents.**

अतः प्रसूतिकालस्य सदृशो जातके गुणः
जायते तं परीक्ष्यैव फलं वाच्यं विचक्षणैः १५

**15. Consequently the person is embellished with the attribute Sattva, Rajas, or Tamas, whichever is predominant at the time of birth. The predictions should therefore be made after taking into account the time of birth.**

कालः सृजति भूतानि पात्यथो संहरत्यपि
इश्वरः सर्वलोकानामव्ययो भगवान् विभु १६

**16. The Supreme Lord of the Universe, who is indestructible and omnicient, is the Kal. He is the Creator, Protector and Destroyer of all movable and immovable.**

तच्छक्तिः प्रकृतिः प्रोक्ता मुनिभिस्त्रिगुणात्मिका
तथा विभक्तोऽव्यक्तोऽपि व्यक्तो भवति देहिनाम् १७

**17. These three faculties of Lord Kal are called nature. Divided by these faculties, the imperceptible Lord Kal is also perceptible.**

चतुर्धाऽवयवास्तस्य स्वगुणैश्च चतुर्विधः
जायन्ते ह्युत्तमो मध्ये उदासीनोऽधमः क्रमात् १८

**18. In accordance with the self-created qualities by the Perceptible form of Lord Kal, there are four kinds of limbs, namely Uttama, Madhyama, Udaseena and Adhama.**

उत्तमे तूत्तमो जन्तुर्मध्येऽङ्गे च मध्यमः
उदासीने ह्युदासीनो जायते चाऽधमेऽधमः १९

**19. From the Uttama, Madhyama, Udaseena and Adhama parts are created Uttama, Madhyama, Udaseena and Adhama types of creatures.**

उत्तमाङ्गं शिरस्तस्य मध्यमाङ्गमुरःस्थलम्
जंघाद्वयमुदासीनमधमं पदमुच्यते २०

**20. The Uttama part of Lord Kal is the head, Madhyama part both arms and chest, thighs form the Udaseena part and the feet fall in the Adhama part.**

एवं गुणवशादेव कालभेदः प्रजायते
जातिभेदस्तु तद्भेदाज्जायतेऽत्र चराचरे २१

**21. This is how a differentiation is made between classes of movables and immovables, according to attributes and the parts, from which the creations are made.**

एवं भगवता सृष्टं विभुना स्वगुणैः समम्
चतुर्विधेन कालेन जगदेतच्चतुर्विधम् २२

**22. The Chaturvidha (four sided) Lord Kal has thus created this Chaturvidha universe in consonance with his own attributes.**

अथ नष्टजातकाध्यायः ७८

जन्मकालवशादेवं फलं प्रोक्तं त्वया मुने
यज्जन्मसमयोऽज्ञातो ज्ञेयं तस्य फलं कथम् १

शुभं वाऽप्यशुभं वापि मनुजस्य पुराकृतम्
अस्ति कश्चिदुपायश्चेत् तं भवान् वक्तुमर्हति २

## Ch. 78. Lost Horoscopy

**1-2. Maitreya said. O Sage! You have so far described the auspicious and inauspicious effects to be enjoyed, or suffered by a person on the basis of the time of birth, but can the auspicious and inauspicious be ascertained, when the time of birth is not known? Kindly tell me, if there is any way to solve this problem.**

साधु पृष्टं त्वया विप्र लोकानुग्रहमानसा
कथयामि तव स्नेहात् फलमज्ञातजन्मनाम् ३

वर्षायनर्तुमासार्धतिथिनक्षत्रभादिषु
यदज्ञातं च तन्मानं ज्ञायते प्रश्नलग्नतः ४

**3-4. The Sage said. Your question is a good one and is for the benefit of the world at large. Considering your attachment, I will tell you about this problem also. If any, or all amongst the Samvatsar, Ayana, Ritu, month, Paksha, Tithi, Nakshatra, Lagna, Rāśi, or Amsas etc. of the birth are not known, these can be ascertained from Prasna Lagna (Query chart).**

प्रश्नाङ्गद्वादशांशर्क्षस्थिते जन्म वदेत् गुरौ
अयनं लग्नपूर्वार्धे सौम्यं याम्यं परार्धके ५

ऋतुर्लग्नदृकाणर्क्षस्वामिभिः शिशिरादयः
शनिशुक्रकुजेन्दुज्ञजीवैर्ग्रीष्मस्तु भानुना ६

**5-6. The Samvatsar of the birth of the querist will be the same, as that of the Rāśi in the Dwadasams, in which the Prasna Lagna falls (Jupiter will be in that Rāśi at birth). Saumyayan (Uttarayan - the northern course of Sun) will be in the first Hora of Lagna and Yamyayan (Dakshinayan - the southern course of Sun) will be in its second Hora. The Ritu (season) may be determined with reference to the Lord of the Drekkan, in which Lagna falls. Shishir will be indicated by the Drekkan of Saturn, Grishma by that of Sun and Mars, Vasanta by that of Venus, Varsha by that of Moon, Sharad by that of Mercury and Hemanta by that of Jupiter.**

अयनर्तुविरोधे तु परिवर्त्याः परस्परम्
बुधचन्द्र सुराचार्याः कुजशुक्रशनैश्चरैः ७

**7. If there be any contradiction in the Ayana and Ritu, the Ritu may be determined from Mercury in place of Mars, from Venus in place of Moon and from Saturn in place of Jupiter.**

मासो दृकाणपूर्वार्धेपूर्वोऽन्यस्तु परार्धके
अनुपातात् तिथिर्ज्ञेया भास्करांशसमा द्विज ८

तद्वशादिष्टकालो यो जन्मकालसमो हि सः
तत्र ग्रहांश्च भावांश्च ज्ञात्वा तस्य फलं वदेत् ९

**8-9. After the Ritu becomes known take the first part of the Drekkan, as its first month and latter part, as the next month of the Ritu. Then from the expired Amsas of the Drekkan determine proportionately the Tithi, or the Amsas of Sun. The Istakal, indicated by the Amsas (degrees) of Sun, will be the time of the birth of the querist. From the Istakal so calculated have to be worked out the longitudes of the Planets and Houses (Planet Spast and House Spast). Predictions should then be made in accordance with the dispositions of the Houses and Planets.**

गुरुर्द्वादशभिर्वर्षैः पुनस्तद्राशिगो भवेत्
तत् कस्मिन् पर्यये तस्य ज्ञेयः संवत्सरो मुने १०

**10. Maitreya asked. O Sage! Jupiter returns to the same Rāśi after every 12 years. Then from which circle of Jupiter should Samvatsar be determined.**

संवस्तरस्य सन्देहे प्रश्नकर्तुर्द्विजोत्तम
वयोऽनुमानतस्तत्र द्वादश द्वादश चिपेत् ११

तत्रापि संशये जाते गुरुर्लग्नत्रिकोणगः
कल्प्यो वयोऽनुमानेन वत्सरः पूर्ववत् ततः १२

**11-12. The Sage said in reply. O Maitreya! When there is any doubt about the Samvatsar, take the approximate age of the querist and add multiples of 12 to the difference between the Rāśi of the Jupiter at the time of query and his Rāśi at the time of birth. The figure so arrived at should be taken, as the possible number of years and the Samvatsar should be determined accordingly. If by adding 12 there may appear to be difference in age, the position of Jupiter should be fixed, according to guessed approximate age, in the Trikona Rāśi, 5th, or 9th of the Prasna Lagna, as may be found feasible. Then, taking that, as the Samvatsar, the Ayana, Ritu etc. should be worked out accordingly in the manner already explained.**

ज्ञात्वा मासं ससूर्यांशं कालज्ञानं कथं भवेत्
भगवन्निति मे ब्रूहि लोकानुग्रहचेतसा १३

**13. Maitreya asked again. O Sage! How will the time of birth be known after ascertaining the month and the Amsas etc. of Sun. Please explain this for the benefit of the people.**

सक्रान्तेरिष्टसूर्यांशतुल्येऽह्नि द्विजसत्तम
रविरौदयिकः साध्यस्तस्येष्टार्कस्य चान्तरम् १४

कलीकृत्य स्वषष्टिनघ्नं स्फुटार्कगतिभाजितम्
लब्धंघटयादिमानं यत् तावान् सूर्योदयात् परम् १५

पूर्वं जन्मेष्टकालो हि क्रमाज् ज्ञेयो विपश्चिता
साधितौदयिकादर्कादिष्टेऽर्केऽनिकहीनके १६

**14-16.The Sage said. After ascertaining the Rāśi, Amsas etc. of Sun at the time of birth, the longitude of Sun (Sun Spast) should be worked out for the next day after the number of days, taken by Sun after entering into the Rāśi, which will be equal to the expired Amsas of Sun. Then the difference between the longitudes of this rising Sun and Sun at the time of birth should be converted into Kalas and multiplied by 60. The product should be divided by Sun Spast, converted into Kalas. The Ghatikas etc. so becoming available will represent the Istakal of the birth before and after sunrise. If the longitude of the Ista Sun be more than that of the rising Sun, the Istakal of the birth will be so much after the sunrise. If the longitude of the Ista Sun be less than that of the rising Sun, the Istakal of the birth will be so much before the sunrise.**

अथ प्रव्रज्यायोगाध्यायः ७९
अथ विप्र प्रवक्ष्यामि योगं प्रव्रज्यकाभिधम्
प्रव्रजन्ति जना येन सम्प्रदायान्तरं गृहात् १

## Ch. 79. Ascetism Yogas

**1. The Sage said. O Brahmin! Now I will describe to you the Yogas, leading to ascetism, under the influence of which the persons give up their homes and become initiated in some holy order.**

चतुरादिभिरेकस्थैः प्रव्रज्या बलिभिः समाः
रव्यादिभिस्तपस्वी च कपाली रक्तवस्त्रभृत् २

एकदण्डी यतिश्चक्रधरो निर्ग्रन्थिकः क्रमात्
ज्ञेया वीर्याधिकस्यैव सबलेषु बहुष्वपि ३

**2-3. The Yoga for ascetism is formed, when four, or more Planets, possessed of strength, occupy a single House. The person born will become a Tapasvi, a Kapali, he will be we6thng a red robe, be one, who keeps a Danda (staff), Yati, he will be keeper of a Chakra, or he will be a naked Sanyasin, according to the Planet, which is the strongest of the group: Sun, Moon, Mars, Mercury, Jupiter, Venus, or Saturn. If a number of Planets are endowed with strength, the holy order of the one, strongest amongst them, is accepted.**

**Notes. There is a similar verse in Varahamihirs Brihat Jatak, which, translated into English reads, as under. If at birth, four, or more Planets, possessed of strength, occupy a single House, the person born will become a Sakya, Jeevika, Bhikshu, a Vriddha, or Jupiter, a Charak, a Nirgrantha, or Visava, a Vanyasana, or Vanaprastha, according to which of the Planets is the strongest Planet of the group: Mars, Mercury, Jupiter, Moon, Venus, Saturn, or Sun. If the strongest Planet be conquered in planetary war by another Planet, or Planets at the time of birth, the person will relinquish that stage of ascetic life and review to his previous condition of life. A Vanaprastha is a religious man, engaged in the practice of rigorous and devout penance (i.e. he will be a Tapasvi); a Vivas is a naked ascetic (that is dwelling in hills and forests). A Bhikshu is an illustrious ascetic with a single staff for his symbol, engaged ever and anon in the contemplation of truths of the sacred scriptures. A Charak is a religious mendicant, wandering over many countries. A Shakya is an ascetic of the Buddhist clan. A Jupiter is a celebrated teacher, endowed with royal splendor. A Jeevika is a garrulous and gluttonous mendicant.**

सूर्येणाऽस्तं गतास्ते चेदपि वीर्यसमन्विताः
अदीक्षितास्तदा ज्ञेया जनास्तद्गतभक्तयः ४

**4. If strong Planets, capable of leading to ascetism, be obscure by Sun's rays (that is they be combust), the person born, in spite of having reverence for the holy order, will not become initiated in that holy order. Notes. Brihat Jatak adds in this connection, that, if the Planets referred to above be overcome in planetary war and be aspected by other Planets, the person concerned will seek admission into the holy order without success.**

अस्तंगता निर्बलाश्चेत् सबलश्च रविर्यदा
तदा रविभवा ज्ञेया प्रव्रज्या द्विजसत्तम ५

**5. If the other Planets lose their strength (in spite of being in their exaltation Rāśis etc.), as a result of combustion with Sun, the native will enter the holy order, as signified by Sun, that is, he will become a Tapasvi.**

जन्मभेशोऽन्यखेटैश्चेददृष्टः शनिमीक्षते
तयोर्बलवशात्तत्र प्रव्रज्यामाप्नुयान्नरः ६

**6. If the Lord of the Rāśi, occupied by Moon (Janm Rāśi), having no aspect of other Planets on himself, aspects Saturn, the native gets initiated into the holy order of the Planet, who is stronger amongst the two.**

निर्बलो जन्मभेशश्चेत् केवलेनार्किणेक्षितः
तदा शनिभवमेव प्रव्रज्यां आप्नुयाज्जनः ७

**7. If the Lord of the Rāśi, occupied by Moon, be devoid of strength and is aspected only by Saturn, the native becomes initiated into the holy order, signified by Saturn (Nirgranthas, naked ascetics).**

शनिदृक्काणसंस्थे च शनिभौमनवांशके
शनिदृष्टे विधौ ज्ञेया प्रव्रज्या शनिसम्भवा ८

**8. If Moon be in the decanate of Saturn, or in the Navams of Saturn, or Mars and be aspected by Saturn, the native becomes an ascetic and enters the holy order, signified by Saturn.**

कुजादिषु जयी शुक्रः सौम्यगो याम्यगोऽपि वा
जयी सौम्यगतश्चान्यः परस्परयुतौ भवेत् ९

**9. There is planetary war, if Mars, Mercury, Jupiter, Venus and Saturn are together (within one degree of each other), Venus is the conquerer, whether he is in North, or South, but amongst the other four only one, who is in the North, is the conquerer and that in the South is considered defeated in the planetary war.**

प्रव्रज्याकारकः खेटो यद्यन्येन पराजितः
तदा लब्धां परिव्रज्यां परित्यजति तां पुनः १०

**10. If the Planet, who leads the native to ascetism, is conquered in planetary war by another Planet, or Planets at the time of birth, the person will relinquish the holy order, in which he becomes initiated.**

बहवो जन्मकाले चेत् प्रव्रज्याकारका ग्रहाः
बलतुल्यास्तदा तत्र प्रव्रज्या कतमा भवेत् ११

**11. Maitreya asked. O Venerable Sage! If there be many Planets, who are significators for ascetism, then, which holy order the native will get initiated into?**

बहवो बलिनश्चेत् स्युः प्रव्रज्याकारका ग्रहाः

तदा प्राप्नोति सर्वेषां तेषां प्रव्रज्यकां ध्रुवम् १२

**12. Mahārśi Parasara replied. O Brahmin! If all the Planets be possessed of strength, the native enters into the holy orders of all the Planets.**

तत्तद्ग्रहदशाकाले प्रव्रज्यां याति तद्भवाम्
त्यक्त्वा गृहीतपूर्वां तामन्यां प्राप्नोति मानवः १३

**13. The native gets initiated into the holy order of the Planet, whose Dasa gets into operation at first. Then he relinquishes this holy order of this Planet at the commencement of the Dasa of the next Planet and accepts the holy order, signified by him.**

दृष्टेष्विन्द्विज्यलग्नेषु शनिना नवमे गुरुः
राजयोगेऽत्र जातोऽसौ तीर्थकृन्नात्र संशयः १४

**14. When Jupiter, Moon and Lagna are aspected by Saturn and Jupiter occupies the 9th, the person, born in the Rajayog, will become a holy illustrious founder of a system of philosophy (holy order).**

धर्मस्थानगते मन्दे ग्रहदृष्टिविवर्जिते
राजयोगेऽत्र यो जातः स राजा दीक्षितो भवेत् १५

**15. When Saturn occupies the 9th from Lagna and is not aspected by any Planet, the person, possessed of Rajayog, will take himself to the holy order, before becoming a Lord of men. If there be no Rajayog the native becomes an ascetic (religious wanderer).**

अथ स्त्रीजातकाध्यायः ८०
बहुधा भवता प्रोक्तं यज्जातकफलं मुने
तन्नारीणां कथं ज्ञेयमिति मे कथयाऽधुना १

## Ch. 80. Female Horoscopy

**1. Maitreya asked. O Sage! You have described the effects of many kinds. Now be kind enough to throw light on Strī Jatak (female horoscopy).**

साधु पृष्टं त्वया विप्र तदपि प्रवदाम्यहम्
स्त्रीणां पुंभिः समं ज्ञेयं फलमुक्तं विपश्चिता २

विशेषस्तत्र यो दृष्टः संक्षेपात् कथयामि तत्
लग्ने देहफलं तस्याः पञ्चमे प्रसवस्तथा ३

सप्तमे पतिसौभाग्यं वैधव्यं निधने द्विज
स्त्रीणामसम्भवं यद्यत् तत्फलं तत्पतौ वदेत् ४

**2. Mahārśi Parasara replied. What a good question! Listen to what I am going to tell you about the Rāśi Charts of females. All the effects, that have been described till now in the case of male horoscopies, will apply to females also. Matters, relating to her physical appearance, should be determined from Lagna, those, relating to children, from the 5th House, fortune for the husband from the 7th and death of the husband (widowhood) should be deduced from the 8th. Those effects, which are impossible to ascribe to the female, should be declared to be applicable to her husband.**

**Excerpts from other scriptures:**

**Brihat Jataka. Of the effects, that have been described till now in the case of male horoscopes and those, that may be found in female horoscopes, suitable to females, should be declared, as applicable to them alone. The rest should be ascribed to their husbands. The death of the husband is to be deduced through the 8th place (from Lagna, or Moon, whichever is stronger). Matters, relating to her appearance, beauty etc., should be determined from Lagna and the Rāśi, occupied by Moon. It is from the 7th place (from Lagna, or Moon), that her welfare (happiness) and the nature of the husband should be ascertained.**

**Mantreswaras Phaldeepika. Whatever effects are declared for men, they are entirely applicable to women too. The womans prosperity and happiness have to be deduced from the 8th place (from Lagna, or Moon, whichever is stronger). Children should be declared from the 9th House and matters, relating to her appearance, beauty etc., should be determined from Lagna. It is from the 7th place, that her welfare (power of influencing her husband) and the nature of the husband should be ascertained, while her association and chastity should be predicted from an examination of the 4th House. Benefics in those Houses produce good results, while malefics in the above Houses are productive of evil, unless they happen to own the Houses, in which case the effects will be good.**

**Jatak Parijata. Whatever effects may accrue from the horoscopes of females, applicable only to men, should be ascribed to the husband. The good and evil, affecting their person, should be calculated from Moon and Lagna, whichever of them is stronger. It is from the 7th House from Lagna, or Moon, that all, that is worthy, or unworthy in the husband should be ascertained and the death of the husband is foretold through the 8th. All this should be well weighed by the strength, or weakness of the Planets, benefic and malefic. Before an announcement is made, of Lagna and Moon find, which is stronger. It is with reference to this, that the luck, beauty and strength of the women should be announced. Children and wealth in abundance should be declared through the 9th House there from. Wedded happiness, or otherwise should be gathered from the 8th and husbands fortune from the 7th. Some Jyotishyais opine, that the well-being, or the reverses of the husband can be determined from the 9th.**

लग्नेन्दू समभे यस्याः सा नारी प्रकृतिस्थिता
कन्योचितगुणोपेता सुशीला शुभलक्षणा ५

**5. If at the time of birth of a woman Lagna and Moon are in even Rāśis, the woman will be truly feminine in character. She will possess excellent qualities, be of steadfast character, beautiful and physically fit.**

शुभेक्षितौ सुरूपा च सदा देहसुखान्विता
विषमे पुरुषाकारा दुःशीला पापवीक्षितौ ६

**6. If Lagna and Moon are in odd Rāśis, she will be masculine in form and masculine in be6thng and, if they be associated with, or aspected by malefics, she will be devoid of good qualities and be sinful.**

पापाढ्यौ च गुणैर्हीना मिश्रे मिश्रफलं वदेत्

लग्नेन्द्वोर्यो बली तस्य फलं तत्र विशेषतः ७

**7. If amongst Lagna and Moon one be in an even Rāśi and the other be in an odd one, the woman concerned should be declared to partake the characteristics of both male and female. The qualities of Lagna, or Moon will be more predominant, according to their strength.**

लग्नेन्द्वोर्यो बली विप्र त्रिंशांशैस्तदधिष्ठितैः
ग्रहराशिवशाद् वाच्यं फलं स्त्रीणां विशेषतः ८

**8. O Brahmin! The effects in respect of women would particularly depend on the Rāśi and Trimsams of Lagna, or Moon, whichever is stronger.**

कन्यैवारगृहे दुष्टा भौमत्रिंशांशके भवेत्
कुचरित्रा तथा शौक्रे समाया बोधने स्मृता ९

जैवे साध्वी शनौ दासी ज्ञर्क्षे कौजे छलान्विता
शौक्रे प्रकीर्णकामा सा बौधेंऽशे च गुणान्विता १०

क्लीबार्क्यंशे सती जैवे कौजे दुष्टा सितर्क्षके
शौक्रे ख्यातगुणा बौधे कलासु निपुणा भवेत् ११

जैवे गुणवती मान्दे पुनर्भूश्चन्द्रभे ततः
स्वतन्त्रा कुजात्रिंशांशे शौक्रे च कुलपांसना १२

बौधे शिल्पकलाऽभिज्ञा जैवे बहुगुणा शनौ
पतिघ्नी चार्कभे कौजे वाचाला भार्गवे सती १३

बौधे पुंश्चेष्टिता जैवे राज्ञी मान्दे कुलच्युता
कौजे बहुगुणार्यर्क्षे शौक्रे चाप्यसती मता १४

बौधे विज्ञानसंयुता जैवेऽनेकगुणान्विता
मान्दे चाल्परतिः प्रोक्ता दासी कौजे तथार्किभे १५

सुप्रज्ञा च भवेच्छौक्रे बौधे दुःस्था तथा खला
जैवे पतिव्रता प्रोक्ता मान्दे नीचजनानुगा १६

**9-16. When Lagna, or Moon is in a Rāśi, belonging to Mars, the woman, born in a Trimsams of Mars, will have illicit relations with a man before marriage. If she be born in Trimsams of Venus, she will become unchaste after marriage; if of Mercury, she will be full of guile and adept in conjuration; if the Trimsams be of Jupiter, she will be worthy and virtuous; she will be menial, or slave, if birth be in a Trimsams of Saturn. … in a Rāśi, owned by Mercury, the female, born in a Trimsams of Mars, will be full of guile, will be a hard-worker; if the Trimsams be of Venus, will be possessed of good qualities; if of Mercury, will be of the nature of hermaphrodite; if of Jupiter, will be chaste. In a Rāśi, owned by Venus, a female, born in a Trimsams of Mars, will be deprived; if the Trimsams be of Venus, will be well known and possessed of excellent qualities; if of Mercury, will be skilled in all arts; she will be endowed with all good qualities, if born in a Trimsams of Jupiter; she will remarry, if born in a Trimsams of Saturn. When Lagna, or Moon happens to be in a Rāśi, owned by Moon and the Trimsams of birth is owned by Mars, the female born will be self-willed and uncontrolled; she will be unchaste and of loose character, if born in a Trimsams of Venus; will be skilled in arts and handiwork, if of Mercury; will be gifted with all excellent qualities, if of Jupiter; will become a widow, if of Saturn. …, owned by Sun and the Trimsams of birth be owned by Mars, the female born will be very talkative; she will be virtuous, if born in a Trimsams of Venus; will bear masculine features, if of Mercury; will be chaste and virtuous, if of Jupiter; will be unchaste, if of Saturn. When the rising Rāśi, or the Rāśi, occupied by Moon, is owned by Jupiter, the female, born in a Trimsams of Mars, will be endowed with many good qualities; she will be Punschali, if born in a Trimsams of Venus; will be well versed in many sciences, if of Mercury; will be endowed with all good qualities, if of Jupiter; will not indulge much in sexual intercourse, if of Saturn. When Lagna, or the Rāśi, occupied by Moon, belongs to Saturn, the female, born in a Trimsams of Mars, will be a maid-servant; she will be learned (barren, according to Brihat Jatak), if born in a Trimsams of Venus; will be cruel and immoral, if of Mercury; will be devoted to her husband, if of Jupiter; will be unchaste (addicted to men of low caste, according to Brihat Jatak), if of Saturn.**

मन्दे शून्ये शुभादृष्टे पतिः कापुरुषो भवेत्
चरभे च प्रवासी स्यात् क्लीवस्तत्र ज्ञमन्दयोः १७

सूर्येऽस्तभे पतित्यक्ता बाल्ये च विधवा कुजे
शनावशुभसन्दृष्टे याति कन्यैव वृद्धताम् १८

विधवास्तगतैः पापैः सौम्यैस्तु सधवा सती
मिश्रखेटैः पूनर्भूः सा ज्ञेया मिश्रफलान्विता १९

मिथोंऽशस्थौ सितारौ चेदन्यासक्ता तदाऽङ्गना
सप्तमे च स्थिते चन्द्रे तदा भर्तुरनुज्ञया २०

शुक्रभे शनिभे वापि सेन्दुशुक्रे च लग्नगे
मात्रा सह तदा नारी वन्धकी भवति ध्रुवम् २१

**17-21. If the 7th House be without a Planet (without strength) and without benefic aspect, the female born will have a coward and contemptible wretch for her husband. When the 7th House is a moveable Rāśi, the husband will always be away from home. If Mercury and Saturn be in the 7th House, the husband of the woman concerned will be impotent. If Sun occupies the 7th House, the woman concerned is abandoned by her husband. If Mars be in the 7th, the female concerned becomes a widow in her childhood. If Saturn be in the 7th, she lives to an old age, remaining unmarried. If there be a malefic, she becomes a widow, while young. If there be a benefic in the 7th, the female born will enjoy marital happiness and will be chaste. If there be both benefics and malefics in the 7th, both benefic and evil effects will be experienced. If Mars be in the Navams of Venus and Venus be in the Navams of Mars, the female concerned will have illicit relations with other men. If in this Yoga Moon be in the 7th, the female concerned enters into illicit connections at the instance of her husband.**

कुजर्क्षे वा तदंशेऽस्ते स्त्रीलोलः क्रोधनः पतिः
बौधर्क्षांशे तथा विद्वान् कलासु निपुणः सुधीः २२

जैवे सर्वगुणोपेतः पतिरस्ते जितेन्द्रियः
शौक्रे सौभाग्यसंयुक्तः कान्तः स्त्रीजनवल्लभः २३

सौरर्क्षे वाथ सौरांशे वृद्धो मूर्खश्च सप्तमे
अतीवामृदुरर्कांशे तदृक्षेवाऽतिकर्मकृत् २४

अस्ते कर्के तदंशे वा कान्तः कामी मृदुः पतिः
मिश्रे मिश्रफलं वाच्यं भांशयोश्च बलक्रमात् २५

**22-25. If at womans birth the 7th House, or the setting Navams be that of Mars, the husband will be fond of other women and will be of an irascible temper. If it be a Rāśi, or Navams of Mercury, her husband will be very learned and clever. If it be a Rāśi, or Navams of Jupiter, the husband of the woman concerned will be of great merit and will have passions under his control. If it be a Rāśi, or Navams of Venus, her husband will be fortunate, very good-looking and liked by women. If the Rāśi, or Navams belongs to Saturn, her husband will be an old man and a fool. If the Rāśi, or Navams be Leo, her husband will be exceedingly soft in his disposition and will be very hard-working. If the 7th House, or the setting Navams be a Rāśi, owned by Moon, the husband of the woman will be love-sick and gentle. If there be different Rāśis and Navamsas in the 7th, the effects will be of a mixed nature. The effects of the Rāśis and Navamsas will depend on their strength.**

सूर्येऽष्टमगते जाता दुःखदारिद्र्यसंयुता
क्षताङ्गी खेदयुक्ता च भवेद्धर्मपराङ्मुखी २६

चन्द्रेऽष्टमगते नारी कुभगा कुस्तनो कुदृग्
वस्त्राभरणहीना च रोगिणी चातिगर्हिता २७

कुजेऽष्टमगते बाला कृशाङ्गी रोगसंयुता

विधवा कान्तिहीना च शोकसन्तापदुःखिता २८

बुधेष्टमगते जाता धर्महीना भयातुरा
अभिमानधनैर्हीना निर्गुणा कलहप्रिया २९

**26-29. If in a females horoscope Sun be in the 8th, the native will be unhappy, poverty-stricken, of deformed limbs and without faith in religion. If Moon be in the 8th, the woman concerned will be of a defective vagina, will have ugly breasts, with sinister eyes, without robes, or ornaments, sickly and will be defamed in the society. If Mars, the native will be of weak constitution, sickly, widow, ugly-looking and full of sorrows and agonies. If Mercury, she will be without faith in religion, timid, devoid of wealth, self-respect and good qualities and she will be quarrelsome.**

गुरावष्टमगे बाला विशीला स्वल्पसन्ततिः
पृथुवादकरा पत्या त्यक्ता बह्वशना भवेत् ३०

शुक्रेऽष्टमगते जाता प्रमत्ता धनवर्जिता
निर्दया धर्महीना च मलिना कपटान्विता ३१

शनावष्टमगे जाता दुःस्वभावा मलिम्लुचा
प्रवंचनपरा नारी भवेत् पतिसुखोज्झिता ३२

राहावष्टमभावस्थे कुरूपा पतिवर्जिता
कठोरहृदया रोगैर्युक्ता च व्यभिचारिणी ३३

**30-33. If in a females horoscope Jupiter be in the 8th, the woman concerned will be shameless and without virtue, will have few children, fatty hands and feet, will be abandoned by her husband and be gluttonous. If Venus be in the 8th, she will be fond of pleasures, devoid of sympathy, religion, wealth, will be dirty and deceptive. If Saturn, the woman concerned will be of wicked disposition, dirty, deceptive and devoid of conjugal harmony. If Rahu, she will be ugly, without m6thtal happiness, cruel-hearted, sickly and unchaste.**

शशिशुक्रौ यदा लग्ने मन्दराभ्यां युतौ तदा
बन्ध्या भवति सा नारी सुतभे पापदृग्युते ३४

**34. The woman will be barren, if in her Rāśi Kundali Moon and Venus be associated with Saturn, or Mars and the 5th House be occupied, or aspected by a malefic.**

कुजांशेस्तगते सौरिदृष्टे नारी सरुग्भगा
शुभांशे सप्तमे ज्ञेया सुभगा पतिवल्लभा ३५

**35. If the 7th be in the Navams of Mars, the vagina will be diseased. If the 7th be the Navams of a benefic, she will have a well formed female organ and will be beloved by her husband.**

बुधभे लग्नगे सूतौ चन्द्रशुक्रयुते द्विज
ज्ञेया पितृगृहे नारी सा सर्वसुखसंयुता ३६

**36. If Gemini, or Virgo Lagna in a females horoscope is occupied by Venus and Moon, the woman concerned lives happily and is equipped with all kinds of comforts in her fathers house.**

लग्ने चन्द्रज्ञशुक्रेषु बहुसौख्यगुणान्विता
जीवे तत्रातिसम्पन्ना पुत्रवित्तसुखान्विता ३७

**37. If Moon, Mercury and Venus be in Lagna, the woman concerned is endowed with many good qualities and happiness. If Jupiter be in Lagna, she is happy, wealthy and has children.**

लग्नादष्टमगौ स्यातां चन्द्रार्कौ स्वर्क्षगौ तदा
बन्ध्याऽथ काकबन्ध्या चेदेवं चन्द्रबुधौ यदा ३८

**38. If the 8th House be Leo, or Cancer and Sun and Moon be both placed there, the woman concerned will be barren. If the 8th be Gemini, Virgo, or Cancer and Mercury and Moon be posited there, the female native will have only one child.**

शनिमङ्गलभे लग्ने चन्द्रभार्गवसंयुते
पापदृष्टे च सा नारी बन्ध्या भवति निश्चयात् ३९

**39. The woman concerned will be definitely barren, if Lagna be Aries, Scorpio, Capricorn, or Aquarius and Moon and Venus be posited there, aspected by malefics.**

सराहौ सप्तमे सूर्ये पञ्चमे पापसंयुते
शुक्रेज्यराहवो मृत्यौ मृतापत्या च सा भवेत् ४०

**40. The woman concerned will give birth to an already dead child, if the 7th be occupied by Rahu and Sun, or Jupiter and Rahu be in the 8th and the 5th be occupied by malefics.**

शुक्रेज्यावष्टमे सारौ सप्तमे वा कुजो भवेत्
शनिना दृग्युतो नारी गलद्गर्भा प्रकीर्तिता ४१

**41. The woman concerned will not be able to conceive, if Jupiter and Venus be associated with Mars in the 8th, or Mars be with Saturn in the 8th.**

पापकर्तरिके लग्ने चन्द्रे जाता च कन्यका
समस्तं पितृवंशं च पतिवंशं हिहन्ति सा ४२

**42. The woman concerned becomes a destructor of her husbands family and her fathers family, if at her birth Moon and Lagna be subjected to Papa Kart6th Yoga (direct malefics in 12th and retrograde malefics in 2nd).**

ससर्पाग्निजलेशर्क्षे भानुमन्दारवासरे
भद्रातिथौ जनुर्यस्याः सा विषाख्या कुमारिका ४३

**43. The woman, whose birth takes place under the following conditions, is named, as Visha Virgo. Day of birth Sunday, Nakshatra Aslesha, 2nd Tithi; Saturday, Krittika, 7th Tithi; Tuesday, Satabhisha, 12th Tithi.**

सपापश्च शुभो लग्ने द्वौ पापौ शत्रुभस्थितौ
यस्या जनुषि सा कन्या विषाख्या परिकीर्तिता ४४

**44. The woman will be Visha Virgo, if at birth Lagna be occupied by a malefic and a benefic and two Planets be in inimical Rāśis.**

विषयोगे समुत्पन्ना मृतवत्सा च दुर्भगा
वस्त्राभरणहीना च शोकसन्तप्तमानसा ४५

**45. Visha Virgo gives birth to a child already dead. She has a defective generative organ and is bereft of robes, ornaments etc.**

सप्तमेशः शुभो वापि सप्तमे लग्नतोऽथवा
चन्द्रतो वा विषं योगं विनिहन्ति न संशयः ४६

**46. The evil effects of Visha Virgo are destroyed, if the Lord of the 7th is a benefic, or a benefic Planet be in the 7th from Lagna, or Moon.**

लग्ने व्यये सुखे वापि सप्तमे चाऽष्टमे कुजे
शुभदृग्योगहीने च पतिं हन्ति न संशयः ४७

**47. The woman born becomes a widow, if Mars be in the 12th, 4th, 7th, or 8th from Lagna, without aspect by, or association with any benefic.**

यस्मिन् योगे समुत्पन्ना पतिं हन्ति कुमारिका
तस्मिन् योगे समुत्पन्नो पत्नीं हन्ति नरोऽपि च ४८

स्त्रीहन्त्रा परिणीता चेत् पतिहन्त्री कुमारिका
तदा वैधव्ययोगस्य भङ्गो भवति निश्चयात् ४९

**48-49. The Yoga, which causes the woman to become widow also causes a male native to become a widower. If the man and woman, possessing this Yoga, join in wedlock, the Yoga ceases to have any effect.**

मिथोंऽशस्थौ मिथोदृष्टौ सितार्की वा सितर्क्षके
घटांशे लग्नगे नारी प्रदीप्तं मदनानलम् ५०

संशान्तिं नयति स्त्रीभिः सुखीभिर्मदनातुरा
पराभिः पुरुषाकारस्थिताभिर्द्विजसत्तम ५१

**50-51. If at a womans birth the rising Rāśi be that of Venus and the rising Navams be of Saturn (Aquarius, according to Brihat Jatak) and, if Venus and Saturn aspect each other, or are occupying each others Navams, she will be afflicted with too much lust and will allay her fire of passion with the help of other females, acting the part of a male.**

कुजज्ञगुरुशुक्रैश्च बलिभिः समभे तनौ
कुशलाऽनेकशास्त्रेषु सा नारी ब्रह्मवादिनी ५२

**52. When Jupiter, Mars, Mercury and Venus are strong and, when the rising Rāśi is an even one, the woman born will be learned in Shastras and an expounder of the Vedanta Philosophy.**

क्रूरे सप्तमगे कश्चित् खेचरो नवमे यदि
सा प्रव्रज्यां तदाप्नोति पापखेचरसंभवाम् ५३

**53. When a malefic Planet is in the 7th and some Planet in the 8th, the woman concerned will become an ascetic.**

विलग्नादष्टमे सौम्ये पापदृग्योगवर्जिते
मृत्युः प्रागेव विज्ञेयस्तस्य मृत्युर्न संशयः ५४

**54. The woman dies before her husband, when in her nativity there is a benefic in the 8th, without aspect by, or association with a malefic.**

अष्टमे शुभपापौ चेत् स्यातां तुल्यबलौ यदा
सह भर्त्रा तदा मृत्युं प्राप्त्वा स्वर्याति निश्चयात् ५५

**55. If at the birth of a woman there are equal number of benefics and malefics and they possess the same strength, she without doubt will leave for her heavenly abode along with her husband.**

अथ अंगलक्षणफलाध्यायः ८१
बहुधा भवता प्रोक्तं जन्मकालात् शुभाशुभम्
श्रोतुमिच्छामि नारीणामङ्गचिह्नैः फल मुने १

शृणु विप्र प्रवक्ष्यामि नारीणामङ्गलक्षणम्
फलं यथाह पार्वत्यै भगवान् शङ्करस्तथा २

## Ch. 81. Effects of Characteristic Features of Parts of Womans body.

**1-2. Maitreya said. O Venerable Sage! I have been fully enlightened by the auspicious and inauspicious effects, described by you with reference to the Janm Lagna in a females horoscope. Now I request you to favour me with knowledge of auspicious and inauspicious effects with reference to the characteristic features of the various parts of a womans body. Mahārśi Parasara replied. O Brahmin! Now I will tell you what Lord Shiva narrated to Goddess Parvati in this regard.**

स्निग्धं पादतलं स्त्रीणां मृदुलं मांसलं समम्
रक्तमस्वेदमुष्णं च बहुभोगप्रदायकम् ३

विवर्णं परुषं रूक्षं खण्डितं विषमं तथा
सूर्पाकारञ्च शुष्कं च दुःखदौर्भाग्यदायकम् ४

**3-4. A woman, whose soles are even, smooth, soft, well developed, warm and shining in pink colour, without much perspiration, will be enjoying full happiness, befitting her sex. The one, whose soles are without pink colour, hard, dry, coarse, uneven, shaped, like a winnowing basket and bereft of flesh, will suffer misery.**

शङ्खस्वस्तिकचक्राऽब्जध्वजमीनातपत्रवत्
यस्याः पादतले चिह्नं सा ज्ञेया क्षितिपाङ्गना ५

भवेत् समस्तभोगाय तथा दीर्घोर्ध्वरेखिका
रेखाः सर्पाखुकाकाभा दुःखदारिद्र्यसूचिकाः ६

**5-6. The woman, who has marks of conch, Swastika, Chakra, lotus, flag, fish, umbrella and a long line, rising upwards in her soles, becomes a queen and enjoys great happiness and comforts. The one, who possesses marks, like those of snake, rat and crow, is bereft of wealth and suffers misery.**

रक्ताः समुन्नताः स्निग्धा वृत्ताः पादनखाः शुभाः
स्फुटिताः कृष्णवर्णाश्च ज्ञेया अशुभसूचकाः ७

**7. The girl, whose nails of toes are shining in pink colour, smooth, raised and round, enjoys great happiness and comforts. Blackish and torn nails denotes misery.**

उन्नतो मांसलोऽङ्गुष्ठो वर्तुलोऽतुलभोगदः
वक्रो ह्रस्वश्च चिपिटो दुःखदारिद्र्यसूचकः ८

**8. Raised, full, well developed, smooth and round great toe indicates happiness. The one, which is small, irregular in shape and flat, denotes misery.**

मृदवोऽङ्गुलयः शस्ता घना वृत्ताश्च मांसलाः
दीर्घाङ्गुलीभिः कुलटा कृशाभिर्धनवर्जिता ९

**9. The womans toes, which are soft, thick, round and well developed are considered auspicious. If the toes are long, she will be of loose morals. Thin toes indicate poverty.**

भवेद्ध्रस्वाभिरल्पायुर्विषमाभिश्च कुट्टनी
चिपटाभिर्भवेद्दासी विरलाभिश्च निर्धना १०

यस्या मिथः समारूढाः पादाङ्गुल्यो भवन्ति हि
बहूनपि पतीन् हत्वा परप्रेष्या च सा भवेत् ११

यस्या पथि चलन्त्याश्च रजो भूमेः समुच्छलेत्
सा पांसुली बह्वेन्नारी कुलत्रयविघातिनी १२

यस्याः कनिष्ठिका भूमिं गच्छन्त्या न परिस्पृशेत्
सा हि पूर्वपतिं हत्वा द्वितीयं कुरुते पतिम् १३

मध्यमाऽनामिका चापि यस्या भूमिं न संस्पृशेत्
पतिहीना च सा नारी विज्ञेया द्विजसत्तम १४

प्रदेशिनी भवेद्यस्या अंगुष्ठाद्व्यतिरेकिणी
कन्यैव दूषिता सा स्यात् कुलटा च तदग्रतः १५

उन्नतं पादपृष्ठं चेत् तदा राज्ञी भवेद्ध्रुवम्
अस्वेदमशिराढ्यञ्च मांसलं मसृणं मृदु १६

**10-16. Other effects about the toes are, as under. Short - short life. Short and long and irregular in shape - procurer and guileful. Flat - maid-servant. Spaced more than average - bereft of wealth. Toes, overlapping one over the other - widow and dependent on others. If dust is thrown up, when she walks - unchaste and brings defame to all the three families (her fathers, mothers and husbands). If the smallest toe does not touch the ground - she will destroy her husband and marry another; If the middle toe and the one next to it does not touch the ground - widow. First toe (next to great toe) longer than the great toe - she will develop illicit connection with a man before marriage and will be of loose morals.**

अन्यथा धनहीना च शिरालं चेत्तदाऽध्वगा
रोमाढ्यं चेद् भवेद्दासी निर्मांसं यदि दुर्भगा १७

**17. If the back of the feet of a woman is raised, without perspiration, soft and smooth, she will become a queen. If the indications are contrary, she will be poverty-stricken. She will be fond of travelling, if the back part of the feet be veined. Hair on that portion of feet denote, that she will be a maid servant. If the feet be bony, or without flesh, she will have a defective sexual organ.**

सुभगा समपार्ष्णिः स्त्री पृथुपार्ष्णिश्च दुर्भगा
कुलटोन्नतपार्ष्णिश्च दीर्घपार्ष्णिश्च दुःखिता १८

**18. If the heels are even, the woman concerned will have a well formed and desirable sexual organ. If the heels be stout, she will have a defective sexual organ. If the heels be high, she will be unchaste. Long heels indicate misery.**

अरोमे च समे स्निग्धे यस्या जंघ सुवर्तुले
विसिरे च सुरम्ये सा राजपत्नी भवेद्ध्रुवम् १९

**19. Legs (portion below knees). Even, smooth, evenly shaped, round, without hair, good looking and without veins showing up are Rāśis, that the woman will be a queen.**

वर्तुलं मांसलं स्निग्धं जानुयुग्मं शुभप्रदम्
निर्मासं स्वैरचारिरया निर्धनायाश्च विश्लथम्  २०

**20. Round, smooth, firm knees are auspicious indications. If the knees be bony, the woman concerned will be of loose moral character. If the knees be loose, she will be poverty-stricken.**

घनौ करिकराकारौ वर्तुलौ मृदुलौ शुभौ
यस्या ऊरू शिराहीनौ सा राज्ञी भवति ध्रुवम्  २१

**21. If the thighs are round, like the trunk of an elephant, close to each other, soft and without hair, the woman concerned will be a queen. If the thighs are flat and hairy, she will be poverty-stricken and a widow.**

चिपिटौ रोमशौ यस्या विधवा दुर्भगा च सा
चतुर्भिर्विशतियुतैरंगुलैश्च समा कटिः
समुन्नतनितम्बाढ्या प्रशस्ता स्यात् मृगीदृशाम्  २२

विनता चिपटा दीर्घा निर्मासा संकटा कटिः
ह्रस्वा रोमैः समायुक्ता दुःखवैधव्यसूचिका  २३

**22-23. Waist. Circumference equal to the width of 24 fingers with well developed hips indicate, that the woman will be fortunate. A waist, which is flat, long, without flesh, caved in, or hairy, forebodes widowhood and misery.**

नतिम्बः शुभदः स्त्रीणामुन्नतो मांसलः पृथुः
सुखसौभाग्यदः प्रोक्तो ज्ञेयो दुःखप्रदोऽन्यथा  २४

**24. Raised, fleshy and widespread hips in a woman are auspicious in effects. If they are contrary, they indicate inauspiciousness.**

स्त्रीणां गूढमणिस्तुङ्गो रक्ताभो मृदुरोमकः
भगः कमठपृष्ठाभः शुभोऽश्वत्थगलाकृतिः  २५

कुरङ्गखुररूपो यश्चुल्लिकोदरसंनिभः
रोमशो दृश्यनासश्च विवृत्तास्योऽशुभप्रदः  २६

वामोन्नतस्तु कन्याजः पुत्रजो दक्षिणोन्नतः
शङ्खावर्तो भगो यस्याः सा विगर्भाऽङ्गना मता  २७

**25-27. Sexual organ. Hidden clitoris, pink-coloured, curved, like the back of a tortoise, soft, hairy, shaped, like the leaf of a Pipal tree and smooth is highly auspicious. If shaped, like the feet of a deer, or opening of an oven with hard hair and with raised clitoris, it indicates evil. If the left side of the sexual organ of a woman is raised, she will beget more female children and, if the right side is raised, more boys. If the organ is shaped, like a conch, she will be barren.**

मृद्वी वस्तिः प्रशस्ता स्याद् विपुलाल्पसमुन्नता
रोमाढ्या च शिराला च रेखाङ्का न शुभप्रदा  २८

**28. Portion below the navel. A soft, spread out and slightly raised Vasti is auspicious. Hairy, veins, showing up and full of lines (folds, or wrinkles) indicates inauspiciousness.**

गम्भीरा दक्षिणावर्ता नाभिः सर्वसुखप्रदा
व्यक्तग्रन्थिः समुत्ताना वामावर्ता न शोभना  २९

**29. A navel deep with right turns is productive of good effects. The navel raised, with left turns and with knots is inauspicious.**

पृथुकुक्षिः शुभा नारी सूते सा च बहून् सुतान्
भूपतिं जनयेत् पुत्रं मराडूकाभेन कुक्षिणा ३०

उन्नतेन वलीभाजा सावर्तेन च कुक्षिणा
वन्ध्या संन्यासिनी दासी जायते क्रमशोऽबला ३१

**30-31. A stomach well spread indicates a well formed sexual organ and many sons. If the stomach of a woman resembles that of a frog, her son will become a king. If a woman has a raised stomach she will be childless. If the stomach is wrinkled, she will become an ascetic. If it has circular folds, she will become a maid-servant.**

समे समांशे मृदुले पार्श्वे स्त्रीणां शुभप्रदे
उन्नते रोमसंयुक्ते शिराले चाऽशुभप्रदे ३२

**32. If the portion, covering the ribs, is even, well developed and soft, auspicious effects may be expected. It will be inauspicious, if it is raised, hairy and full of veins.**

निर्लोभं हृदयं स्त्रीणां समं सर्वसुखप्रदम्
विस्तीर्णं च सलोमं च विज्ञेयमशुभप्रदम् ३३

**33. The chest of a woman, which is even and hairless is auspicious. Wide spread and hairy chest is inauspicious.**

समौ पीनौ घनौ वृत्तौ दृढौ शस्तौ पयोधरौ
स्थूलाग्रौ विरलौ शुष्कौ स्त्रीणां नैव शुभप्रदौ ३४

दक्षिणोन्नतवक्षोजा नारी पुत्रवती मता
वामोन्नतस्तनी कन्याप्रजा प्रोक्ता पुरातनैः ३५

नारीणां चूचुके शस्ते श्यामवर्णे सुवर्तुले
अन्तर्भग्ने च दीर्घे च कृशे चापि न शोभने ३६

**34-36. The breasts of a woman signify good luck, if they are of equal size, fleshy, round and firm, but close together. They are unlucky, if they are thick in front, are not close together and without flesh. Raised right breast indicates, that she will have sons. Raised left breast indicates, that she will have daughters. If the portion, surrounding the nipples, is round, good-looking and blackish, she will enjoy good luck. Pressed in and unusually small breasts indicate bad luck.**

स्त्रीणां स्कन्धौ समौ पुष्टौ गूढसन्धी शुभप्रदौ
रोमाढ्यावुन्नतौ वक्रौ निर्मांसावशुभौ स्मृतौ ३७

**37. Shoulders. Even, well built up and without joints showing up are Rāśis of good luck. Raised, hairy and without flesh are unlucky.**

सुसूक्ष्मरोमे नारीणां पुष्टे स्निग्धे शुभप्रदे
कक्षे शिराले गम्भीरे न शुभे स्वेदमेदुरे ३८

**38. The armpits, if soft, with thin hair, well developed and smooth are auspicious. Those, which are deep, without flesh, perspiring and with veins, showing up are inauspicious.**

गूढास्थी कोमलग्रन्थी विशिरौ च बिरोमकौ
सरलौ सुवर्तुलौ चैव भुजौ शस्तौ मृगीदृशाम्  ३९

निर्मांसौ स्थूलरोमाणौ ह्रस्वौ चैव शिराततौ
वक्रौ भुजौ च नारीणां क्लेशाय परिकीर्तितौ  ४०

**39-40. Arms, in which the bones do not show up and which are soft jointed, hairless without obvious veins, straight and round are auspicious. Those without flesh, hairy, small, with obvious veins and irregular in shape are inauspicious.**

सरोजमुकुलाकारो करांगुष्ठौ मृगीदृशाम्
सर्वसौख्यप्रदौ प्रोक्तौ कृशौ वक्रौ च दुःखदौ  ४१

**41. If the thumbs of the woman are shaped, like a lotus bud, they are auspicious. If they are without flesh and irregular in shape, they are inauspicious.**

स्त्रीणां करतलं रक्तं मध्योन्नतमरन्ध्रकम्
मृदुलं चाल्परेखाढ्यं ज्ञेयं सर्वसुखप्रदम्  ४२

विधवा बहुरेखेण रेखाहीनेन निर्धना
भिक्षुका च शिरोढ्येन नारी करतलेन हि  ४३

**42-43. If the palms of the woman are pink-coloured, raised in the middle, with fingers close together (with no holes between them), soft and have very few lines, she enjoys happiness and all comforts. If the palms are full of lines, she will become a widow. If there are no lines, she will be poverty-stricken. If the veins show up in the palms, she will live on alms.**

पाणिपृष्ठं शुभं स्त्रीणां पुष्टं मृदुविरोमकम्
शिरालं रोमशं निम्नं दुखदारिद्र्यसूचकम्  ४४

**44. If the backs of the hands of a woman are well built, soft and hairless, she will enjoy auspicious effects. It will be otherwise, if the backs of the hands are with veins, showing up, deep and hairy.**

यस्याः करतले रेखा व्यक्ता रक्ता च वर्तुला
स्निग्धा पूर्णा च गम्भीरा सा सर्वसुखभागिनी  ४५

मत्स्येन सुभगा ज्ञेया स्वस्तिकेन धनान्विता
राजपत्नी सरोजेन जननी पृथिवीपतेः  ४६

सार्वभौमप्रिया पाणौ नद्यावर्ते प्रदक्षिणे
शङ्खातपत्रकमठैर्भूपस्य जननी भवेत्  ४७

**45-47. Lines on the palm. A woman enjoys happiness and all comforts, if there is a clearly marked, pink-coloured, circular, smooth, full and deep line (perhaps line of life is meant). If there is mark of a fish, she will be very lucky. She will be wealthy with mark of Swastika. She will be a queen with mark of a lotus. She will be the mother of a king, if she has marks of conch, umbrella and tortoise.**

रेखा तुलाकृतिः पाणौ यस्याः सा हि बणिग्वधूः
गजवाजिवृषाभा वा करे वामे मृगीदृशः  ४८

रेखा प्रसादवज्राभा सूते तीर्थकरं सुतम्
कृषीवलस्य पत्नी स्याच्छकटेन युगेन वा  ४९

चामराङ्कुशचापैश्च राजपत्नी पतिव्रता
त्रिशूलाऽसिगदाशक्तिदुन्दुभ्याकृतिरेखया  ५०

**48-50. The woman, who has lines, forming the shapes of a balance, elephant, bull, or horse, becomes the wife of a businessman. The woman, who has lines, forming the shape of a house, or Vajra is lucky and gives birth to a son, who becomes learned in Shastras. The woman, who has lines, forming the shapes of a chariot, a plough, or a yoke, becomes the wife of a farmer. She will become a queen, if she has lines, forming the shape of Chamar, Ankush, trident, sword, mace, Shakti, or trumpet.**

अङ्गुष्ठमूलान्निर्गत्या रेखा याति कनिष्ठिकाम्
सा नारि पतिहन्त्री स्याद् दूरतस्तां परित्यजेत् ५१

काकमराडूकजम्बूकवृकवृश्चिकभोगिनः
रासभोष्ट्रविडालाभा रेखा दुःखप्रदाः स्त्रियाः ५२

**51-52. If in the palm of a woman there is a line, which, starting from the root of the thumb goes up to the root of the little finger, she becomes a widow. If there are lines, forming the shape of a crow, a frog, a jackal, a wolf, a scorpion, a snake, a donkey, a camel and a cat, the woman concerned suffers misery.**

मृदुलाश्च सुपर्वाणो दीर्घा वृत्ताः क्रमात् कृशाः
अरोमकाः शुभाः स्त्रीणामङ्गुल्यः परिकीर्तिताः ५३

अतिह्रस्वाः कृशा वक्रा विरला रोमसंयुताः
बहुपर्वयुता वाऽपि पर्वहीनाश्च दुःखदाः ५४

**53-54. If the fingers of a woman are tender with good-looking phalanges, tapering at the end and without hair, they are considered auspicious. If they are very small, without flesh, irregular, widely spaced, with hair and with more than usual phalanges, or without phalanges, they indicate misery.**

रक्तवर्णा नखास्तुङ्गा सशिखाश्च शुभप्रदाः
निम्ना विवर्णा पीता वा पुष्पिता दुःखदायकाः ५५

**55. If the nails of the fingers are pink-coloured, raised and shaped well at the top, they are auspicious. Depressed, dirty-looking, or yellow, or white-coloured nails, or nails with spots are inauspicious.**

अन्तर्निमग्नवंशास्थि पृष्ठं स्यान्मांसलं शुभम्

सशिरं रोमयुक्तं वा वक्रं चाऽशुभदायकम् ५६

**56. If the back of the woman is fleshy and well developed with flesh, it is auspicious. The back with hair, irregular in built and with veins showing up is inauspicious.**

स्त्रीणां कराथस्त्रिरेखाङ्कस्त्वव्यक्तास्थिश्च वर्तुलः
मांसलो मृदुलैश्चैव प्रशस्तफलदायकः ५७

स्थूलग्रीवः च विधवा वक्रग्रीव च किङ्करी
बन्ध्या च चिपिटग्रीवा लघुग्रीवा च निःसुता ५८

**57-58. The neck of a woman with three lines (folds), with bones not obvious, round, well developed and tender is auspicious. A thick necked woman becomes a widow. An irregularly built neck indicates, that the woman concerned will become a maid-servant. Flat necked woman will be barren. A woman with a small neck is childless.**

श्रेष्ठा कृकाटिका ऋज्वी समांसा च समुन्नता
शुष्का शिराला रोमाढ्या विशाला कुटिलाऽसुभा ५९

**59. A straight, well developed, somewhat raised throat is auspicious. One without flesh, with veins obvious, with hair and irregular in built is inauspicious.**

अरुणं मृदुलं पुष्टं प्रशस्तं चिबुकं स्त्रियाः
आयतं रोमशं स्थूलं द्विधाभक्तमशोभनम् ६०

**60. Pink-coloured, tender and firm chin is auspicious. A broad chin with hair and clefts is unlucky.**

कपोलावुन्नतौ स्त्रीणां पीनौ वृत्तौ शुभप्रदौ
रोमशौ पुरुषौ निम्नौ निर्मांसौ चाऽशुभप्रदौ ६१

**61. Raised, firm and round cheeks are auspitious. The ones, which are hard-skinned, depressed and without flesh are indicative of misfortune.**

स्त्रीणां मुखं समं पृष्ठं वर्तुलं च सुगन्धिमत्
सुस्निग्धं च मनोहारि सुखसौभाग्यसूचकम् ६२

**62. If the mouth of a woman is of normal size, firm, round, emitting fragrance, smooth and good-looking, it is indicative of good luck. If otherwise, it will be inauspicious.**

वर्तुलः पाटलः स्निग्धारेखाभूषितमध्यभूः
मनोहरोऽधरो यस्याः सा भवेद् राजवल्लभा ६३

निर्मांसः स्फुटितो लम्बो रूक्षो वा श्यामवर्णकः
स्थूलोऽधरश्च नारीणां वैधव्यक्लेशसूचकः ६४

रक्तोत्पलनिभः स्निग्ध उत्तरोष्ठो मृगीदृशाम्
किञ्चिन्मध्यौन्नतोऽरोमा सुखसौभाग्यदो भवेत् ६५

**63-65. If the lower lip of a woman is red, like a lotus, smooth, divided in the middle and good looking, she becomes a queen. If it be without flesh, coarse, long, dry and blackish, it is indicative of misery and widowhood. If the upper lip of a woman is pink-coloured, smooth and slightly raised in the middle, it is indicative of happiness and good fortune. If otherwise, it will be inauspicious.**

स्निग्धादुग्धनिभाः स्त्रीणां द्वात्रिंशद्दशनाः शुभाः
अधस्तादुपरिष्ठाच्च समाः स्तोकसमुन्नताः ६६

अधस्तादधिकाः पीताः श्यामा दीर्घा द्विपङ्क्तयः
विकटा विरलाश्चापि दशना न शुभाः स्मृताः ६७

**66-67. A woman, whose teeth are smooth, milk white, 32 in number and whose upper and lower teeth, though equal in size, are slightly raised, will be lucky. If lower teeth are more in number, are yellow, or black-coloured, fierce looking, widely spaced and double, they are indicative of misfortune.**

शोणा मृद्वी शुभा जिह्वा स्त्रीणामतुलभोगदा
दुःखदा मध्यसङ्कीर्णा पुरोभागेऽतिविस्तरा ६८

सितया मरणं तोये श्यामया कलहप्रिया
मांसलया धनैर्हीना लम्बयाऽभक्ष्यभक्षिणी ६९

**68-69. If the tongue of a woman is red and soft, she enjoys great happiness and comforts. Caved in the middle and spread out in front indicates misery. White tongue indicates death in water. Dark tongue indicates quarrelsome nature. Thick tongue denotes poverty. Long tongue denotes one, who is omnivorous. Long and broad tongue denotes lunacy.**

प्रमादसहिता नारी जिह्वया च विशालया
सुस्निग्धं पाटलं स्त्रीणां कोमलं तालुशोभनम्  ७०

श्वेते तालुनि वैधव्यं पीते प्रव्रजिता भवेत्
कृष्णे सन्ततिहीना स्याद्रूक्षे भूरिकुटुम्बिनी  ७१

**70-71. Palate red, like lotus, soft and smooth - good luck, white - widowhood, yellow - ascetism, black - barrenness, dry - large family.**

अलक्षितरदं स्त्रीणां किञ्चित्फुल्लकपोलकम्
स्मितं शुभप्रदं ज्ञेयमन्यथा त्वशुभप्रदम्  ७२

**72. When a woman laughs, if her cheeks are raised and teeth are not visible, she will be lucky. If it is otherwise, she will not be lucky.**

समवृत्तपुटा नासा लघुच्छिद्रा शुभप्रदा
स्थूलाग्रा मध्यनिम्ना वा न प्रशस्ता मृगीदृशाम्  ७३

रक्ताग्राकुञ्चिताग्रा वा नासा वैधव्यकारिणी
दासी सा चिपिटा यस्या ह्रस्वा दीर्घा कलिप्रिया  ७४

**73-74. If the nose of a woman is evenly round and has small nostrils, it is auspicious. If the nose is thick in its front part and flat in the middle, it is inauspicious. If the tip of the nose is red, or shrunken, widowhood is indicated. Flat nose indicates engagement in a menial job. Too small, or too large nose denotes quarrelsome nature.**

शुभे विलोचने स्त्रीणां रक्तान्ते कृष्णतारके
गोक्षीरवर्णे विशदे सुस्निग्धे कृष्णपक्ष्मिणी  ७५

उन्नताक्षी न दीर्घायुर्वृत्ताक्षी कुलटा भवेत्
रमणी मधुपिङ्गाक्षी सुखसौभाग्यभागिनी  ७६

पुंश्चली वामकाणाक्षी वन्ध्या दक्षिणकाणिका

पारावताक्षी दुःशीला गजाक्षी नैव शोभना  ७७

**75-77. Black pupils with cows milk like white portion of the eye, large and broad, smooth, with black eyelashes are lucky Rāśis. Raised eyes show short life. Round eyes denote loose moral character. Honey-coloured eyes indicate good fortune and happiness. The eyes, like those of a pigeon, indicate wickedness. Eyes, like those of an elephant, indicate misery. If the left eye is blind, adulterous tendency will manifest. Blindness of the right eye indicates barrenness.**

मृदुभिः पक्ष्मभिः कृष्णैर्घनैः सूक्ष्मैः सुभाग्ययुक्
विरलैः कपिलैः स्थूलैर्भामिनी दुखभागिनी  ७८

**78. A woman with soft, black, compact eyelashes with thin hair is fortunate. Eyelashes thick, scattered and with tawny-coloured hair indicate misery.**

वर्तुलौ कार्मुकाकारौ स्निग्धे कृष्णे असंहते
सुभ्रुवौ मृदुरोमाणौ सुभ्रुवां सुखकीर्तिदौ  ७९

**79. If the eyebrows of a woman are round, shaped, like a bow, smooth, black, not joined and with soft hair, she is blessed with happiness and fame.**

कर्णौ दीर्घौ शुभावर्तौ सुतसौभाग्यदायकौ
शष्कुलीरहितौ निन्द्यौ शिरालौ कुटिलौ कृशौ ८०

**80. Ears of a woman long with a round turn indicate children and happiness. Small, unevenly shaped, very thin, with veins, showing up, cause her misery.**

शिराविरहितो भालः निर्लोमाऽर्धशशिप्रभः
अनिम्नस्त्र्यङ्गुलस्त्रीणां सुतसौभाग्यसौख्यदः ८१

स्पष्टस्वस्तिकचिह्नश्च भालो राज्यप्रदः स्त्रियाः
प्रलम्बो रोमशश्चैव प्रांशुश्च दुःखदः स्मृतः ८२

**81-82. The forehead of a woman without veins, showing through, without hair, shaped, like a half-moon, even, with equal to three fingers are Rāśis of a fortunate woman, blessed with husband and children. Rāśi of Swastika on the forehead denotes a queen. Very long, highly raised and hairy forehead causes misery.**

उन्नतो गजकुम्भाभो वृत्तो मूर्धा शुभः स्त्रियाः
स्थूलो दीर्घोऽथवा वक्रो दुःखदौर्भाग्यसूचकः ८३

**83. Head of a woman high and round, like that of an elephant, is indicative of happiness. A head, which is spread out, flat, big and uneven, indicates misery.**

कुन्तलाः कोमलाः कृष्णाः सूक्ष्मा दीर्घश्च शोभना
पिङ्गलाः पुरुषा रूक्षा विरला लघवोऽशुभाः ८४

पिङ्गला गौरवर्णाया श्यामायाः श्यामलाः शुभाः
नारीलक्षणतश्चैवं नराणामपि चिन्तयेत् ८५

**84-85. The hair of a woman are indicative of good fortune. If they are soft, black, long, thin and yellow, they indicate misfortune. But honey-coloured hair of a fair complexioned woman and black hair of a dark complexioned woman are also considered auspicious. Most of the characteristic features, described in this chapter, apply to men also.**

अथ तिलादिलांछनफलाध्यायः ८२
अथाऽहं देहजातानां लांछनानां फलं ब्रुवे
आवर्तानां तिलानां च मशकानां विशेषतः १

## Ch. 82. Effects of Moles, Marks, Signs etc. for Men and Women

**1. Mahārṡi Parasara said. O Maitreya! Now I will describe to you the effects of moles, marks, spots and signs, found on the body of women and men.**

अङ्गनानां च वामांगे दक्षिणाङ्गे नृणां शुभम्
रक्ताभं तिलकाभं वा लोम्नां चक्रमथापि वा २

तिलादिलांछनं स्त्रीणां हृदि सौभाग्यसूचकम्
यस्या दक्षिणवक्षोजे रक्ते तिलकलांछने ३

**2-3. A mole, spot, or figure, formed by hair on the left side of a woman and right side of a man is auspicious. If there is mole on the chest of a woman, she will be fortunate. A woman, who has a red mark, like a mole etc., on her right breast, begets many children and she is blessed with all kinds of enjoyments and comforts.**

सा सन्तिततिं सूते सुखसौभाग्यसंयुताम्
रक्ताभं तिलकं यस्याः स्त्रिया वामे स्तने भवेत् ४

**4. The woman, who has a red mark (mole) on her left breast, begets only one son.**

एक एव सुतस्तस्या भवतीत विदो विदुः
पुत्रीपुत्रयुता ज्ञेया तिलके दक्षिणे स्तने ५

**5. The woman, who has a mole on her right breast, begets many daughters and sons.**

भ्रुवोर्मध्ये ललाटे वा लांछनं राजसूचकम्
कपोले मशको रक्तो नित्यं मिष्ठान्नदायकः ६

**6. There will be gain, or acquisition of a kingdom, if there, as is a red mole etc. on the forehead, or in the middle of (between) the eyebrows. The person will enjoy sweetish preparations, if there is such a mark on the cheeks.**

भगस्य दक्षिणे भागे लांछनं यदि योषितः
सा हि पृथ्वीपतेः पत्नी सूते वा भूपतिं सुतम् ७

नासाग्रे लाञ्छने रक्तं राजपत्न्याः प्रजायते
कृष्णवर्णं तु यस्याः सा पुंश्चलि विधवाऽथ वा ८

नाभेरधो नृणां स्त्रीणां लाञ्छनं च शुभप्रदम्
कर्णे गण्डे करे वाऽपि कण्ठे वाऽप्यथ लाञ्छनम् ९

प्राग्गर्भे पुत्रदं ज्ञेयं सुखसौभाग्यदं तथा
तिलादि लाञ्छनं विप्र गुल्फगेशे च दुःखदम् १०

**7-10. The woman, who has a red mark (mole etc.) on her nose, becomes consort of a king. If the mark be blackish, the woman concerned becomes an adulteress, or widow. All the marks below the navel are auspicious for both men and women. If there be moles etc. on the ears, cheeks, or neck of a man, his first issue will be male and he will enjoy good fortune and happiness. The man, who has moles etc. in the thighs, suffers misery.**

त्रिशूलाकृति चिह्न च ललाटे यदि जायते
नारी राजप्रिया ज्ञेया भूपतिश्च नरो भवत्  ११

**11. The woman, who has the sign of trident on her forehead, becomes a queen. Such a mark on the forehead of a man makes him a king.**

लोम्नां प्रदक्षिणावर्तो हृदि नाभौ करे श्रुतौ

दक्षपृष्ठे शुभो वस्तौ वामावर्तोऽशुभप्रदः  १२

**12. A right-turned circular hair formation on heart, navel, hands, right part of the back and in the portion between sex organ and navel is auspicious. Left-turned formation is inauspicious.**

कटयां गुह्येऽथवावर्तो स्त्रीणां दौर्भाग्यसूचकः
उदरे हन्ति भर्तारं मध्यपृष्ठे च पुंश्चली  १३

कण्ठे ललाटे सीमन्ते मध्यभागे च मूर्धनि
आवर्तो न शुभः स्त्रीणां पुसां वाऽपि द्विजोत्तम  १४

**13-14. Such a hair formation on the waist and private parts proves inauspicious. If such a formation be on the stomach, the woman concerned will become a widow. If it be in the center of the back she will become an adulteress. It will be inauspicious, if it be on the neck, forehead, or center of the head.**

सुलक्षणा सुचरिता अपि मन्दायुषं पतिम्
दीर्घायुषं प्रकुर्वन्ति प्रमदाश्च मुदास्पदम्  १५

**15. A man with indications of short life will get his longevity prolonged by marrying a woman with auspicious, or lucky marks/symbols.**

अथ पूर्वजन्मशापद्योतनाध्यायः ८३

महर्षे भवता प्रोक्तं फलं स्त्रीणां नृणां पृथक्
अधुना श्रोतुमिच्छामि त्वत्तो वेदविदांवर १

अपुत्रस्य गतिर्नास्ति शास्त्रेषु श्रूयते मुने
अपुत्रः केन पापेन भवतीति वद प्रभो २

जन्मलग्नाच्च तज्ज्ञानं कथं दैवविदां भवेत्
अपुत्रस्य सुतप्राप्तेरुपायं कृपयोच्यताम् ३

## Ch. 83. Effects of Curses in the Previous Birth

**1-3. Maitreya said. O Venerable Sage! You have acquainted me with effects, experienced by men and women in a number of ways. According to Shastras, the soul of a person does not rest in peace after his death, if he is not blessed with a son. What sin does a person commit to remain without a son? And what are the remedial measures to be adopted by him to get a son? Kindly enlighten me about this.**

साधु पृष्टं त्वया विप्र कथ्यते हि तथा मया
यथोमया हि पृष्टेन शिवेन कथितं पुरा ४

**4. Mahārśi Parasara replied. I will now tell you, whatever Lord Shiva told Goddess Parvati in this respect.**

केन योगेन पापेन ज्ञायतेऽपत्यनाशनम्
तेषां च रक्षणोपायं कृपया नाथ मे वद ५

**5. Goddess Parvati said to Lord Shiva. O my Lord! What is the sin, which causes destruction of children amongst men. Please tell me, what are the Yogas for such an effect and what are the remedial measures to protect the children?**

साधु पृष्टं त्वया देवि कथयामि तवाऽधुना
सन्तानहानियोगांश्च तद्रक्षोपायसंयुतान् ६

**6. Lord Shiva replied: O Devi! You have asked a very relevant question. Now I will tell you the Yogas for loss of children and the requisite remedial measures.**

गुरुलग्नेश दारेशपुत्रस्थानाधिपेषु च

सर्वेषु बलहीनेषु वक्तव्या त्वनपत्यता ७

**7. A person will be without a son, if Jupiter, the Lord of Lagna and the Lord of the 5th are all devoid of strength.**

रव्यारराहुशनयः सबलाः पुत्रभावगाः
तदाऽनपत्यता चेत् स्युरबलाः पुत्रकारकाः ८

**8. The same will happen, if Sun, Mars, Rahu and Saturn, endowed with strength, be in the 5th and the significator for children, namely Jupiter and Lord of the 5th etc. be bereft of strength.**

पुत्रस्थानगते राहौ कुजेन च निरीक्षिते
कुजक्षेत्रगते वाऽपि सर्पशापात् सुतक्षयः ९

पुत्रेशे राहुसंयुक्ते पुत्रस्थे भानुनन्दने
चन्द्रेण संयुते दृष्टे सर्पशापात् सुतक्षयः १०

कारके राहुसंयुक्ते पुत्रेशे बलवर्जिते
लग्नेशे कुजसंयुक्ते सर्पशापात् सुतक्षयः ११

कारके भौमसंयुक्ते लग्ने च राहुसंयुते
पुत्रस्थानाधिपे दुःस्थे सर्पशापात् सुतक्षयः १२

भौमांशे भौमसंयुक्ते पुत्रेशे सोमनन्दने
राहुमान्दियुते लग्ने सर्पशापात् सुतक्षयः १३

पुत्रभावे कुजक्षेत्रे पुत्रेशे राहुसंयुते
सौम्यदृष्टे युते वाऽपि सर्पशापात् सुतक्षयः १४

पुत्रस्था भानुमन्दाराः स्वभानुः शशिजोऽङ्गिराः
निर्बलौ पुत्रलग्नेशौ सर्पशापात् सुतक्षयः १५

लग्नेशे राहुसंयुक्ते पुत्रेशे भोमसंयुते
कारके राहुयुक्ते वा सर्पशापात् सुतक्षयः १६

**9-16. There will be no male issue, due to the curse of a serpent, if at birth Rahu is in the 5th, aspected by Mars; the Lord of 5th is associated with Rahu and Moon is in the 5th and is aspected by Saturn; the significator for children (Jupiter) is associated with Rahu, the Lord of the 5th is devoid of strength and the Lord of Lagna is with Mars; the significator for children is associated with Mars, Lagna is occupied by Rahu and the Lord of the 5th is in 6th, 8th, or 12th; Mercury, as Lord of the 5th, being in the Navamsa of Mars, is associated with Mars and Lagna is occupied by Rahu and Gulikaa; the 5th is Aries, or Scorpio and the Lord of the 5th is associated with Rahu, or Mercury; the 5th is occupied by Sun, Saturn, Mars, Rahu, Mercury and Jupiter and the Lords of the 5th and Lagna are devoid of strength; the Lord of Lagna, or Jupiter is associated with Rahu and the Lord of the 5th is in conjunction with Mars.**

ग्रहयोगवशेनैवं नृणां ज्ञात्वानपत्यता
तद्दोषपरिहारार्थं नागपूजां समारभेत् १७

स्वगृह्योक्तविधानेन प्रतिष्ठां कारयेत् सुधीः
नागमूर्तिं सुवर्णेन कृत्वा पूजां समाचरेत् १८

गोभूतिलहिरण्यादि दद्याद् वित्तानुसारतः
एवं कृते तु नागेन्द्रप्रसादात् वर्धते कुलम् १९

**17-19. Remedial measures should be adopted to obtain protection from the evil effects of the above Yogas. These are getting an idol of Naga (serpent) Raja, made in gold and, after worshipping it in accordance with prescribed procedure, giving in charity a cow, some land, sesame seeds and gold etc. By adopting these measures the Lord of Serpents will be gratified and by his beneficence the person concerned will be blessed with a son and the lineage of his family will be prolonged.**

पुत्रस्थानं गते भानौ नीचे मन्दांशकस्थिते
पार्श्वयोः क्रूरसम्बन्धे पितृशापात् सुतक्षयः २०

पुत्रस्थानाधिपे भानौ त्रिकोणे पापसंयुते
क्रूरान्तरे पापदृष्टे पितृशापात् सुतक्षयः २१

भानुराशिस्थिते जीवे पुत्रेशे भानुसंयुते
पुत्रे लग्ने च पापाढ्ये पितृशापात् सुतक्षयः २२

लग्नेशे दुर्बले पुत्रे पुत्रेशे भानुसंयुते
पुत्रे लग्ने पापयुते पितृशापात् सुतक्षयः २३

पितृस्थानाधिपे पुत्रे पुत्रेशे वापि कर्मगे
पुत्रे लग्ने च पापाढ्ये पितृशापात् सुतक्षयः २४

पितृस्थानाधिपे भौमः पुत्रेशेन समन्वितः
लग्ने पुत्रे पितृस्थाने पापे सन्ततिनाशनम् २५

पितृस्थानाधिपे दुःस्थे कारके पापराशिगे
सपापौ पुत्रलग्नेशौ पितृशापात् सुतक्षयः २६

लग्नपञ्चमभावस्था भानुभौमशनैश्चराः
रन्ध्रे रिष्फे राहुजीवौ पितृशापात् सुतक्षयः २७

लग्नादष्टमगे भानौ पुत्रस्थे भानुनन्दने
पुत्रेशे राहुसंयुक्ते लग्ने पापे सुतक्षयः २८

व्ययेशे लग्नभावस्थे रन्ध्रेशे पुत्रराशिगे
पितृस्थानाधिपे रन्ध्रे पितृशापात् सुतक्षयः २९

रोगेशे पुत्रभावस्थे पितृस्थानाधिपे रिपौ
कारके राहुसंयुक्ते पितृशापात् सुतक्षयः ३०

**20-30. There will be no male issue, as a result of the curse of the father in the previous birth, if at birth of the native Sun in his debilitation Rāśi and in the Navamsa of Saturn is hemmed in between malefics in the 5th House; Sun, as Lord of the 5th, posited in a Trikona with a malefic, is hemmed in between malefics and is also aspected by a malefic; Jupiter occupies the Rāśi of Sun, the Lord of the 5th is with Sun and Lagna and the 5th are occupied by malefics; Lord of Lagna, devoid of strength, is in the 5th and the Lord of the 5th is combust and Lagna and the 5th are occupied by malefics; there is exchange of Houses between Lords of the 5th and the 10th and Lagna and the 5th are occupied by malefics; Mars, as the Lord of the 10th, is associated with the Lord of the 5th and Lagna, the 5th and the 10th are occupied by malefics; Lord of the 10th is in the 6th, 8th, or 12th, Jupiter is in a malefic Rāśi and the Lord of Lagna and the 5th are associated with malefics; Sun, Mars and Saturn are in Lagna and the 5th and Rahu and Jupiter are in the 8th and the 12th; Sun is in the 8th, Saturn in the 5th, the Lord of the 5th is associated with Rahu and Lagna is occupied by a malefic; Lord of 12th is in Lagna, Lord of 8th in 5th and Lord of 10th in 8th; Lord of 6th is in 5th, Lord of 10th in 6th and Jupiter is associated with Rahu.**

तद्दोषपरिहारार्थं गयाश्राद्धं च कारयेत्
ब्राह्मणान् भोजयेदत्र अयुतं वा सहस्रकम्   ३१

अथवा कन्यकादानं गोदानं च समाचरेत्
एवं कृते पितुः शापान्मुच्यते नाऽत्र संशयः   ३२

वर्धते च कुलं तस्य पुत्रपौत्रदिभिः सदा
ग्रहयोगवशादेवं फलं ब्रूयात् विचक्षणः   ३३

**31-33. To get deliverance form the curse of the father the remedial measures are performance of Shraddha at Gaya; to feed ten thousand, one thousand, or 100 Brahmins, as one can afford; Virgodana (to perform the marriage of a girl); giving a cow in charity. By observing these remedial measures, the person concerned becomes free from the curse and the family lineage is prolonged by the birth of sons, grandsons etc.**

**Note. In this chapter, where the words childlessness and issue-lessness are used, they should be interpreted to mean want of male issue, because it is the male issue, who by performing the last rites of his father and mother ensures eternal peace to their souls.**

पुत्रस्थानाधिपे चन्द्रे नीचे वा पापमध्यगे
हिबुके पञ्चमे पापे मातृशापात् सुतक्षयः   ३४

लाभे मन्दसमायुक्ते मातृस्थाने शुभेतरे
नीचे पञ्चमगे चन्द्रे मातृशापात् सुतक्षयः   ३५

पुत्रस्थानाधिपे दुःस्थे लग्नेशे नीचराशिगे
चन्द्रे च पापसंयुक्ते मातृशापात् सुतक्षयः   ३६

पुत्रेशेऽष्टारिरिष्फेस्थे चन्द्रे पापांशसंगते
लग्ने पुत्रे च पापाढ्ये मातृशापात् सुतक्षयः   ३७

पुत्रस्थानाधिपे चन्द्रे मन्दराह्वारसंयुते
भाग्ये वा पुत्रभावे वा मातृशापात् सुतक्षयः   ३८

मातृस्थानाधिपे भौमे शनिराहुसमन्विते
चन्द्रभानुयुते पुत्रे लग्ने वा सन्ततिक्षयः ३९

लग्नात्मजेशौ शत्रुस्थौ रन्ध्रे मात्रधिपः स्थितः
पितृनाशाधिपौ लग्ने मातृशापात् सुतक्षयः ४०

षष्ठाष्टमेशौ लग्नस्थौ व्यये मात्रधिपः सुते
चन्द्रजीवौ पापयुक्तौ मातृशापात् सुतक्षयः ४१

पापमध्यगते लग्ने क्षीणे चन्द्रे च सप्तम
मातृपुत्रे राहुमन्दौ मातृशापात् सुतक्षयः ४२

नाशस्थानाधिपे पुत्रे पुत्रेशे नाशराशिगे
चन्द्रमातृपतौ दुःस्थे मातृशापात् सुतक्षयः ४३

चन्द्रक्षेत्रे यदा लग्ने कुजराहुसमन्विते
चन्द्रमन्दौ पुत्रसंस्थौ मातृशापात् सुतक्षयः ४४

लग्ने पुत्रे मृतौ रिष्फे कुजो राहू रविः शनिः
मातृलग्नाधिपौ दुःस्थौ मातृशापात् सुतक्षयः ४५

नाशस्थानं गते जीवे कुजराहुसमन्विते
पुत्रस्थाने मन्दचन्द्रौ मातृशापात् सुतक्षयः ४६

एवं योगं बुधैदृष्ट्वा विज्ञेया त्वनपत्यता
ततः सन्तानरक्षार्थं कर्त्तव्या शान्तिरुत्तमा ४७

सेतुस्नानं प्रकर्तव्यं गायत्रीलक्षसंख्यका
रौप्यमात्रं पयः पीत्वा ग्रहदानं प्रयत्नतः ४८

ब्राह्मणान् भोजयेत्तद्वदश्वत्थस्य प्रदक्षिणम्

कर्तव्यं भक्तियुक्तेन चाष्टोत्तरसहस्रकम् ४९

एवं कृते महादेवि शापान्मोक्षो भविष्यति
सुपुत्रं लभते पश्चात् कुलवृद्धिश्च जायते ५०

**34-50. A person will be without a male issue, as a result of curse of the mother, if at birth Moon, as Lord of the 5th is in her debilitation Rāśi, or is hemmed in between malefics and 4th and 5th are occupied by malefics; Saturn is in 11th, 4th is occupied by malefics and Moon is posited in the 5th in her debilitation Rāśi; Lord of 5th is in 6th, 8th, or 12th, Lord of Lagna in his debilitation Rāśi and Moon is associated with malefics; Lord of 5th is in 8th, 6th, or 12th, Moon in a malefic Navamsa and there are malefics in Lagna and in 5th; Lord of 5th and Moon, associated with Saturn, Rahu and Mars, are in 5th, or 9th; Mars, as Lord of 4th is associated with Saturn and Rahu and 5th and Lagna are occupied by Sun and Moon, respectively; Lords of Lagna and 5th are in 6th, Lord of 4th in 8th and Lagna is occupied by Lord of 8th and 10th; Lagna is occupied by the Lords of 6th and 8th, Lord of 4th is in 12th and Moon and Jupiter, associated with malefics, are in the 5th; Lagna is hemmed in between malefics, waning Moon is in 7th and 4th and 5th are occupied by Rahu and Saturn, respectively; there is exchange of Houses between Lords of 5th and 8th and the Lord of 4th and Moon are in 6th, 8th, or 12th; Cancer Lagna is occupied by Mars and Rahu and Moon and Saturn are in 5th; Mars, Rahu, Sun and Saturn are in Lagna, 5th, 8th and 12th, respectively, and the Lords of Lagna and 4th are in 6th, 8th, or 12th; Mars, Rahu and Jupiter are in 8th and Saturn and Moon are in 5th. For release from this curse and to beget a male issue the person concerned should take bath in the sea with bridge of rocks between India and Sri Lanka, recite one Lakh Gayatri Mantras, give in charity things, connected with evil Planets, feed Brahmins and go round a Pipal tree 1008 times. By performing these remedial measures, he will not only beget a son, the lineage of family will also be prolonged.**

अथो योगान् प्रवक्ष्यामि भ्रातृशापसमुद्भवान्
यज्ज्ञात्वाऽपत्यरक्षार्थं यत्नं कुर्याद् विचक्षणः ५१

भ्रातृस्थानाधिपे पुत्रे कुजराहुसमन्विते
पुत्रलग्नेश्वरौ रन्ध्रे भ्रातृशापात् सुतक्षयः ५२

लग्ने सुते कुजे मन्दे भ्रातृपे भाग्यराशिगे
कारके नाशभावस्थे भ्रातृशापात् सुतक्षयः ५३

भ्रातृस्थाने गुरुर्नीचे मन्दः पञ्चमगते यदि
नाशस्थाने तु चन्द्रारौ भ्रातृशापात् सुतक्षयः ५४

तनुस्थानाधिपे रिष्फे भौमः पञ्चमगो यदि
रन्ध्रे सपापपुत्रेशे भ्रातृशापात् सुतक्षयः ५५

पापमध्यगते लग्ने पापमध्ये सुतेऽपि च
लग्नेशपुत्रपौ दुःस्थौ भ्रातृशापात् सुतक्षयः ५६

कर्मेशे भ्रातृभावस्थे पापयुक्ते तथा शुभे
पुत्रगे कुजसंयुक्ते भ्रातृशापात् सुतक्षयः ५७

पुत्रस्थाने बुधक्षेत्रे शनिराहुसमन्विते
रिष्फे विदारौ विज्ञेयो भ्रातृशापात् सुतक्षयः ५८

लग्नेशे भ्रातृभावस्थे भ्रातृस्थानाधिपे सुते
लग्नभ्रातृसुते पापे भ्रातृशापात् सुतक्षयः ५९

भ्रात्रीशे मृत्युभावस्थे पुत्रस्थे कारके तथा
राहुमन्देयुते दृष्टे भ्रातृशापात् सुतक्षयः ६०

नाशस्थानाधिपे पुत्रे भ्रातृनाथेन संयुते
रन्ध्रे आरार्किसंयुक्ते भ्रातृशापात् सुतक्षयः ६१

**51-61. A person will be without a male issue, as result of the curse of the brother, if at birth Lord of 3rd with Rahu and Mars is in 5th and Lords of Lagna and 5th are in 8th; Lagna and 5th are occupied by Mars and Saturn, respectively, the Lord of 3rd is in 9th and Mars, the significator for brothers, is in 8th; Jupiter in his debilitation Rāśi is in 3rd, Saturn in 5th and Moon and Marsare in 8th; Lord of Lagna is in 12th, Mars in 5th and Lord of 5th, associated with a malefic, in 8th; Lagna and the 5th are hemmed in between malefics and the Lord of Lagna and 5th are in 6th, 8th, or 12th; the 3rd is occupied by the Lord of 10th along with a malefic and a benefic is with Mars in 5th; the 5th in a Rāśi of Mercury is occupied by Saturn and Rahu and Mercury and Marsare in 12th; the 3rd is occupied by the Lord of Lagna, the Lord of 3rd occupies the 5th and Lagna, 3rd and 5th are with malefics; Lord of 3rd is in 8th and Jupiter is associated with Saturn in 5th; Lord of 8th is in 5th along with the Lord of 3rd and Mars and Saturn are in 8th.**

भ्रातृशापविमोक्षार्थं वंशस्य श्रवणं हरेः
चान्द्रायणं चरेत् पश्चात् कावेर्य्यां विष्णुसन्निधौ ६२

अश्वत्थस्थापनं कुर्याद् दशधेनूश्च दापयेत्
पत्नीहस्तेन पुत्रेच्छुर्भूमिं दद्यात् फलान्विताम् ६३

एवं यः कुरुते भक्त्या धर्मपत्न्या समन्वितः
ध्रुवं तस्य भवेत् पुत्रः कुलवृद्धिश्च जायते ६४

**62-64. The person concerned will, without doubt, get release from the curse, will be blessed with a son and the prolongation of his family lineage will be ensured, if the following remedial measures are adopted. He should observe the Moonyana fast after listening to H6thbansa Puran. He should plant a sapling of Pipal in front of Saligram on the banks of the Caveri river, or on the Ganga, or Mahanadi and offer prayers to it. He should give 10 cows in charity through his wife. He should give in charity land with mango trees, planted on it.**

पुत्रस्थाने बुधे जीवे कुजराहुसमन्विते
लग्ने मन्दे सुताभावो ज्ञेयो मातुलशापतः ६५

लग्नेपुत्रेश्वरौ पुत्रे बुधभौमार्किसंयुतौ
ज्ञेयं मातुलशापत्वाज्जनस्य सन्ततिक्षयः ६६

लुप्ते पुत्राधिपे लग्ने सप्तमे भानुनन्दने
लग्नेशे बुधसंयुक्ते तस्यापि सन्ततिक्षयः ६७

ज्ञातिस्थानाधिपे लग्ने व्ययेशेन समन्विते
शशिसौम्यकुजे पुत्रे विज्ञेयः सन्ततिक्षयः ६८

**65-68. A person will be without a male issue, as a result of the curse of the maternal uncle, if at birth the 5th is occupied by Mercury, Jupiter, Mars and Rahu and Saturn is in Lagna; the 5th is occupied by the Lords of Lagna and of 5th along with Saturn, Mars and Mercury; Lagna is occupied by a combust Lord of 6th, Saturn is in 7th and Lord of Lagna is associated with Mercury; Lords of Lagna and 4th are in Lagna and Moon, Mercury and Marsare in 5th.**

तद्दोषपरिहारार्थं विष्णुस्थापरमाचरेत्
वापीकूपतडागादिखननं सेतुबन्धनम् ६९

पुत्रवृद्धिर्भवेत्तस्य संपद्वृद्धिः प्रजायते

इति योगवशादेवं शान्तिं कुर्याद् विचक्षणः ७०

**69-70. To get release from the curse and for being blessed with a son and for ensuring the prolongation of the lineage of the family the following remedial measures are to be adopted. Installation of an idol of Lord Vishnu. Construction of a deep, or ordinary well, dam, or reservoir, or all of them.**

बलगर्व्वेन यो मर्त्यो ब्राह्मणानवमन्यते
तद्दोषाद् ब्रह्मशापाच्च तस्य स्यात् सन्ततिक्षयः ७१

गुरुक्षेत्रे यदा राहुः पुत्रे जीवारभानुजाः
धर्मस्थानाधिपे नाशे ब्रह्मशापात् सुतक्षयः ७२

धर्मेशे पुत्रभावस्थे पुत्रेशे नाशराशिगे
जीवारराहुभिर्युक्ते ब्रह्मशापात् सुतक्षयः ७३

धर्मभावाधिपे नीचे व्ययेशे पुत्रभावगे
राहुयुक्तेक्षिते वापि ब्रह्मशापात् सुतक्षयः ७४

जीवे नीचगते राहौ लग्ने वा पुत्रराशिगे
पुत्रस्थानाधिपे दुःस्थे ब्रह्मशापात् सुतक्षयः ७५

पुत्रभावाधिपे जीवे रन्ध्रे पापसमन्विते
पुत्रेशे सार्कचन्द्रे वा ब्रह्मशापात् सुतक्षयः ७६

मन्दांशे मन्दसंयुक्ते जीवे भौमसमन्विते
पुत्रेशे व्ययराशिस्थे ब्रह्मशापात् सुतक्षयः ७७

लग्ने गुरुयुते मन्दे भाग्ये राहुसमन्विते
व्यये वा गुरुसंयुक्ते ब्रह्मशापात् सुतक्षयः ७८

**71-78. If a person, mad with power and wealth, insults a Brahmin, he remains without a male issue in the next birth. A person will be without a male issue, as a result of the curse of a Brahmin, if at birth Rahu is in Jupiter's Rāśi and Jupiter in 5th; Lord of 9th is in 5th and Lord of 5th in 8th along with Jupiter, Mars and Rahu; Lord of 9th is in his debilitation Rāśi and Lord of 12th, associated with Rahu, is in 5th; Jupiter is in his debilitation Rāśi, Rahu in Lagna, or 5th and Lord of 5th in 6th, 8th, or 12th; Lord of 5th and Jupiter, associated with malefics, are in 8th, or the Lord of 5th, associated with Sun and Moon, is in 8th; Jupiter, being in the Navamsa of Saturn, is associated with Saturn and Mars and the Lord of 5th is in 12th; Jupiter is associated with Saturn in Lagna and Rahu is in 9th, or Rahu is with Jupiter in 12th. These are Yogas, which reveal the curse of Brahmin in the previous birth.**

तस्य दोषस्य शान्त्यर्थं कुर्याच्चान्द्रायणं नरः
ब्रह्मकृच्छ्रत्र्यं कृत्वा धनुं दद्यात् सदक्षिणाम् ७९

पञ्चरत्नानि देयानि सुवर्णसहितानि च
ब्राह्मणान् भोजयेत् पश्चाद्यथाशक्ति द्विजोत्तम ८०

एवं कृते तु सत्पुत्रं लभते नाऽत्र संशयः
मुक्तशापो विशुद्धात्मा स नरः सुखमेधते ८१

**79-81. To obtain relief from the evil effects of the above Yogas the remedial measures are to observe Moonayana fast and to do penance three times and to give in charity a cow and five gems with gold, after feeding Brahmins, according to ones means and giving them presents in cash. Then the person will be released from the curse and will be endowed with happiness.**

दारेशे पुत्रभावस्थे दारेशस्यांशपे शनौ
पुत्रेशे नाशराशिस्थे पत्नीशापात् सुतक्षयः ८२

नाशसंस्थे कलत्रेशे पुत्रेशे नाशराशिगे
कारके पापसंयुक्ते पत्नीशापात् सुतक्षयः ८३

पुत्रस्थानगते शुक्रे कामपे रन्ध्रमाश्रिते
कारके पापसंयुक्ते पत्नीशापात् सुतक्षयः ८४

कुटुम्बे पापसंयुक्ते कामपे नाशराशिगे
पुत्रे पापग्रहैर्युक्ते पत्नीशापात् सुतक्षयः ८५

भाग्यस्थानगते शुक्रे दारेशे नाशराशिगे
लग्ने सुते च पापढ्ये पत्नीशापात् सुतक्षयः ८६

भाग्यस्थानाधिपे शुक्रे पुत्रेशे शत्रुराशिगे
गुरुलग्नेशदारेशा दुःस्थाश्चेत् सन्ततिक्षयः ८७

पुत्रस्थाने भृगुक्षेत्रे राहुचन्द्रसमन्विते
व्यये लग्ने धने पापे पत्नीशापात् सुतक्षयः ८८

सप्तमे मन्दशुक्रौ च रन्ध्रेशे पुत्रभे रवौ
लग्ने राहुसमायुक्ते पत्नीशापात् सुतक्षयः ८९

धने कुजे व्यये जीवे पुत्रस्थे भृगुनन्दने
शनिराहुयुते दृष्टे पत्नीशापात् सुतक्षयः ९०

नाशस्थौ वित्तदारेशौ पुत्रे लग्ने कुजे शनौ
कारके पापसंयुक्ते पत्नीशापात् सुतक्षयः ९१

लग्नपञ्चमभाग्यस्था राहुमन्दकुजाः क्रमात्
रन्ध्रस्थौ पुत्रदारेशौ पत्नीशापात् सुतक्षयः ९२

**82-92. A person does not beget a male issue, as a result of the curse of the wife, if at birth Lord of Lagna is in 5th, Saturn in the Navamsa of Lord of 7th and Lord of 5th in 8th; Lord of 7th is in 8th, Lord of 12th in 5th and Jupiter is associated with a malefic; Venus is in 5th, Lord of 7th in 8th and 5th is occupied by a malefic; the 2nd and 5th are occupied by a malefic and Lord of 7th is in 8th; Venus is in 9th, Lord of 7th in 8th and Lagna and 5th are occupied by malefics; Venus is Lord of 9th, Lord of 5th is in an inimical Rāśi and Lord of Lagna and 7th and Jupiter are in 6th, 8th, or 12th; the 5th is Taurus, or Libra, occupied by Sun and Moon and 12th, Lagna and 2nd are occupied by malefics; Saturn and Venus are in 7th, Lord of 8th is in 5th and Lagna is occupied by Sun and Rahu; Marsoccupies 2nd, Jupiter is in 12th and Venus and Rahu are in 5th; Lords of 2nd and 7th are in 8th, Mars and Saturn occupy 5th and Lagna, respectively, and Jupiter is associated with a malefic; Rahu is in Lagna, Saturn in 5th, Mars in 9th and Lords of 5th and 7th are in 8th.**

शापमुक्त्यै च कन्यायां सत्यां तद्दानमाचरेत्
कन्याभावे च श्रीविष्णोर्मूर्तिं लक्ष्मीसमन्विताम् ९३

दद्यात् स्वर्णमयीं विप्र दशधेनुसमन्विताम्
शय्यां च भूषणं वस्त्रं दम्पतिभ्यां द्विजन्मनाम् ९४

**93-94. The person concerned gets release from the curse and is blessed with a son, if he performs the marriage of an unmarried girl, or, if such a girl is not available, a gold idol of the Lakshminarayana, fertile cow, a bed, ornaments and garments to a Brahmin couple.**

**Notes. According to our view, Virgodana does not mean giving a girl in charity, but helping in the performance of the marriage of an unmarried girl, not his own daughter.**

ध्रुवं तस्य भवेत् पुत्रो भाग्यवृद्धिश्च जायते
कर्मलोपे पितृणां च प्रेतत्वं तस्य जायते ९५

तस्य प्रेतस्य शापाच्च पुत्राभावः प्रजायते
अतोऽत्र तादृशान् योगात् जन्मलग्नात् प्रवक्ष्यहम् ९६

पुत्रस्थानौ मन्दसूर्यौ क्षीणचन्द्रश्च सप्तमे
लग्ने व्यये राहुजीवौ प्रेतशापात् सुतक्षयः ९७

पुत्रस्थानाधिपे मन्दे नाशस्थे लग्नगे कुजे
कारके नाशभावे च प्रेतशापात् सुतक्षयः ९८

लग्ने पापे व्यये भानौ सुते चारार्किसोमजाः
पुत्रेशे रन्ध्रभावस्थे प्रेतशापात् सुतक्षयः ९९

लग्ने स्वर्भानुना युक्ते पुत्रस्थे भानुनन्दने
गुरौ च नाशराशिस्थे प्रेतशापात् सुतक्षयः १००

लग्ने राहौ सशुक्रेज्ये चन्द्रे मन्दयुते तथा
लग्नेशे मृत्युराशिस्थे प्रेतशापात् सुतक्षयः १०१

पुत्रस्थानाधिपे नीचे कारके नीचराशिगे
नीचस्थग्रहदृष्टे च प्रेतशापात् सुतक्षयः १०२

लग्ने मन्दे सुते राहौ रन्ध्रे भानुसमन्विते
व्यये भौमेन संयुक्ते प्रेतशापात् सुतक्षयः १०३

कामस्थानाधिपे दुःस्थे पुत्रे चन्द्रसमन्विते
मन्दमान्दियुते लग्ने प्रेतशापात् सुतक्षयः १०४

वधस्थानाधिपे पुत्रे शनिशुक्रसमन्विते
कारके नाशराशिस्थे प्रेतशापात् सुतक्षयः १०५

**95-105. If the person, whose duty is to do so, does not perform Shraddha of his father, or mother in his previous birth, the departed soul is formed into an evil spirit and he is deprived of a male issue in the next birth. This is revealed by the following Yogas at birth. Saturn and Sun in 5th, waning Moon in 7th and Rahu and Jupiter in 12th; Saturn, as Lord of 5th in 8th, Mars in Lagna and Jupiter in 8th; Malefics are in Lagna, Sun in 12th, Mars, Saturn and Mercury are in 5th and the Lord of 5th is in 8th; Rahu is in Lagna, Saturn in 5th and Jupiter in 8th; Venus, Jupiter and Rahu are in Lagna, associated with Moon and Saturn and the Lord of Lagna are in 8th; Lord of 5th and Jupiter are in their debilitation Rāśis, aspected by debilitated Planets; Saturn is in Lagna, Rahu in 5th, Sun in 8th and Mars in 12th; Lord of 7th is in 6th, 8th, or 12th, Moon is in 5th, Saturn and Gulikaa are in Lagna; Lord of 8th along with Saturn and Venus is in 5th and Jupiter is in his debilitation Rāśi.**

अस्य दोषस्य शान्त्यर्थं गयाश्राद्धं समाचरेत्
कुर्याद्रुद्राभिषेकञ्च ब्रह्ममूर्तिं प्रदापयेत् १०६

धेनुं रजतपात्रं च तथा नीलमणिं द्विज
ब्राह्मणान् भोजयेत् पश्चात् तेभ्यश्च दक्षिणां दिशेत् १०७

एवं कृते मनुष्यस्य शापमोक्षा प्रजायते
पुत्रोत्पत्तिर्भवेत्तस्य कुलवृद्धिश्च जायते १०८

**106-108. The person concerned gets release from the curse and is blessed with a son, if he undertakes the following remedial measures. Performance of a Pinda Dana, Rudra Abhisheka, giving in charity a gold idol of Brahma, a cow, a vessel, made of silver and a Neelamani, feeding Brahmins and giving them presents in cash.**

तथा ज्ञशुक्रजे दोषे पुत्राप्तिः शम्भुपूजनात्
जीवचन्द्रकृते विप्र मन्त्रयन्त्रौषधादितः १०९

राहुजे कन्यकादानात् सूर्यजे हरिकीर्तनात्
गोदानात् केतुजे दोषे रुद्रजापात् कुजार्किजे ११०

सर्वदोषविनाशाय शुभसन्तानलब्धये
हरिवंशकथा भक्त्या श्रोतव्या विधिना द्विज १११

**109-111. If a person is deprived of a male issue, as a result of malevolence of Planets at birth, he will be blessed with a son, if he undertakes the following remedial measures. Worshipping Lord Shiva, if the harm is, as a result of the malevolence of Mercury and Venus; reciting of Santan Gopal Mantra, we6thng and worshipping appropriate Yantra and taking suitable medicines, if the childlessness is a result of the malevolence of Jupiter and Moon; Virgo Dana, if the childlessness is due to malevolence of Rahu; worshipping of Lord Vishnu, if it is due to malevolence of Sun; Rudriya Japa, if it is due to the malevolence of Mars and Saturn. Listening with devotion to H6thbansh Puran removes all kinds of blemishes and blesses the person concerned with a son.**

अथ ग्रहशान्त्यध्यायः ८४

## Ch. 84. Remedial Measures from the Malevolence of Planets

ग्रहाणां दोषशान्त्यर्थं तेषां पूजाविधिं वद
मानवानां हितार्थाय संक्षेपात् कृपया मुने १

**1. Maitreya said. O Venerable Sage! Please describe for the good of mankind the remedial measures for appeasement of the malevolent Planets.**

ग्रहा सूर्यादयः पूर्वं मया प्रोक्ता द्विजोत्तम
जगत्यां सर्वजन्तूनां तदधीनं सुखाऽसुखम् २

**2. The Sage replied. I have already described the names and characteristic features and qualities of the Planets. Joys and sorrows of all the creatures in the world are dependent on these Planets. Therefore persons desirous of peace, wealth and prosperity, rainfall, good health and longevity should worship the Planets (by prayers, recitation of Mantras, charity etc.).**

तस्मात् सुशान्तिकामो वा श्रीकामो वा सुचेतसा
वृष्टायायुः पुष्टिकामो वा तेषां यज्ञं समाचरेत् ३

ताम्राच्च स्फटिकाद्रक्तचन्दनात् स्वर्णकादुभौ
रजतादयसः सीसात् कांस्यात् कार्याः क्रामद् ग्रहाः ४

पूर्वोक्तैः स्वस्ववर्णैर्वा पटे लेख्या द्विजोत्तमैः
स्वस्वोक्तदिग्विभागेषु गन्धाद्यैर्मण्डनेषु वा ५

**3-5. For the purpose of worshipping them the idols of Sun, Moon, Mars, Mercury, Jupiter, Venus, Saturn, Rahu and Ketu should be made of copper, Sphatika (rock crystal), red sandal wood, gold (both Mercury and Jupiter), silver, iron, glass and bell metal, respectively. Alternatively the sketches of all the above Planets should be drawn in the colours, belonging to them, on a piece of cloth by sandal etc. and they should be placed in their own directions.**

पद्मासनः पद्महस्तः पद्मपत्रसमद्युतिः
सप्ताश्वरथसंस्थश्च द्विभुजश्च दिवाकरः ६

**6. Contemplate of Sun well adorned with two arms, seated on a lotus, with a lotus flower in one hand, red-coloured, like lotus and aboard a ch6thot of seven horses.**

श्वेतः श्वेताम्बरो देवो दशाश्वः श्वेतभूषणः
गदाहस्तो द्विबाहुश्च विधातव्यो विधुर्द्विज ७

**7. Contemplate of Moon white-coloured, dressed in white robes, with two arms, carrying a mace in one hand and a Vara in the other, adorned with white-coloured ornaments and aboard a ch6thot of ten horses.**

रक्तमाल्याम्बरधरो शक्तिशूलगदाधरः
वरदस्तु चतुर्बाहुर्मङ्गलो मेषवाहनः ८

**8. Contemplate of Mars with a red necklace, dressed in red-coloured robes, with four arms, carrying Shakti, Shoola, Gada (mace) and Vara and mounted on a lamb.**

पीतमाल्याम्बरधरः कर्णिकारसमद्युतिः
खड्गचर्मगदापाणिः सिंहस्थो वरदो बुधः ९

**9. Contemplate of Mercury with a yellow-coloured garland, dressed in yellow robes, with four arms, carrying a sword, a shield, a mace and Vara, mounted on a lion.**

गुरुशुक्रौ क्रमात् पीतश्वेतवर्णौ चतुर्भुजौ
दण्डिनौ वरदौ कार्यौ साक्षसूत्रकमण्डलू १०

**10. Contemplate of Jupiter, as yellow complexion and Venus of fair complexion, both with four arms, carrying a Danda, Akshasutra, Kamandal and Vara.**

इन्द्रनीलद्युतिः शूली वरदो गृध्रवाहनः

वाणवाणासनधरो विज्ञेयोऽर्कसुतो द्विज ११

**11. O Maitreya! Contemplate of Saturn with the lustre, like that of Indraneela, with four arms, carrying Shoola, bow, arrow and Vara, mounted on a donkey.**

करालवदनः खड्गचर्मशूली वरप्रदः
सिंहस्थो नीलवर्णश्च राहुरेवं प्रकल्प्यते १२

**12. Contemplate of Rahu with a hideous face, with four arms, carrying a sword, a shield, a Shoola and a Vara, blue-coloured and mounted on a lion.**

धूम्रा द्विबाहवः सर्वे गदिनो विकृताननाः
गृध्रासना नित्यं केतवः स्युर्वरप्रदा १३

**13. There are many Ketus. All of them are of smoky colour, with two arms, carrying a mace and a Vara, with a hideous face and mounted on a donkey.**

सर्वे किरीटिनः कार्या ग्रहा लोकहितप्रदाः
स्वांगुलेनोच्छ्रिता विज्ञैः शतमष्टोत्तरं सदा १४

**14. All the idols should be so made, that they are 108 fingers tall by ones own fingers.**

**Notes. Such a measurement is taken from the middle finger.**

यथावर्णं प्रदेयानि पुष्पाणि वसनानि च
गन्धो दीपो बलिश्चैव धूपो देयश्च गुग्गुलुः १५

यस्य ग्रहस्य यद्द्रव्यमन्नं यस्य च यत् प्रियम्
तच्च तस्यै प्रदातव्यं भक्तियुक्तेन चेतसा १६

**15-16. Dedicate with devotion to the Planet concerned the flowers and garments of the colour, belonging to him, sandal, Deep, Guggul etc., his metal and the grains, dear to him and distribute all these things to Brahmins to appease the Planet.**

आकृष्णेन इमं देवा अग्निर्मूर्धा दिवः ककुत्
उद्बुध्यस्वेति मन्त्रांश्च जपेदथ बृहस्पते १७

अन्नात् परिश्रुतश्चेति शन्नो देवीरभीष्टये
कया नश्चित्र इत्येवं केतु कृण्वन्निमांस्तथा १८

सप्त रुद्रा दिशो नन्दा नवचन्द्रा नृपास्तथा
त्रिपक्षा अष्टचन्द्राश्च सप्तचन्द्रास्तथैव च १९

इमाः संख्याः सहस्रघ्ना जपसंख्याः प्रकीर्तिताः
क्रमादर्कादिखेटानां प्रीत्यर्थं द्विजपुङ्गव २०

**17-20. The Mantras of all the Planets and the prescribed number of their recitation are given below. The recitation of Mantras should be done after worshipping the Planets, as indicated in verses 15-16. Planet Mantra prescribed number: Sun 7000, Moon 11000, Mars11000, Mercury 9000, Jupiter 19000, Venus 16000, Saturn 23000, Rahu 18000, Ketu 17000.**

अर्कः पलाशः खदिरस्त्वपामार्गस्तु पिप्पलः
उदुम्बरः शमी दुर्वा कुशाश्च समिधः क्रमात् २१

होतव्या मधुसर्पिभ्यां दध्ना क्षीरेण वा युताः
एकैकस्य त्वष्ट शतमष्टाविंशतिरेव वा २२

**21-22. Havan should be performed with Aak, Palash, Khair, Chirchiri, Pipal, Goolar, Shami wood pieces, Doob and Kush, for Sun, Moon, Mars, Mercury, Jupiter, Venus, Saturn, Rahu and Ketu, respectively, mixed with honey, Ghī, curd, or milk. The number of offerings to the sacred fire is 108, or 28.**

गुडौदनं पायसं च हविष्यं क्षीरषाष्टिकम्
दध्योदनं हविश्चूर्णं मांसं चित्रान्नमेव च २३

दद्याद् ग्रहक्रमादेवं विप्रेभ्यो भोजनं द्विज
शक्तितो वा यथालाभं देयं सत्कारपूर्वकम् २४

**23-24. To appease Sun and the other eight Planets Brahmins should be fed with (cream) of rice cooked with jaggery, rice cooked in milk, Havishya, paddy cooked in milk, curd and rice, rice with Ghī, rice cooked with powder of sesame seeds, rice cooked with meat, rice cooked with cereals, respectively.**

धेनुः शङ्खस्तथाऽनड्वान् हेम वासो हयः क्रमात्
कृष्णा गौरायसं छाग एता रव्यादिदक्षिणाः २५

**25. To appease Sun and other Planets the things to be given in charity are cow with calf, conch, bullock, gold, robes, horse, black cow, weapons made of iron and goat, respectively.**

यस्य यश्च यदा दुःस्थः स तं यत्नेन पूजयेत्
एषां धात्रा वरो दत्तः पूजिताः पूजयिष्यथ २६

मानवानां ग्रहाधीना उच्छ्रायाः पतनानि च
भावाऽभावौ च जगतां तस्मात् पूज्यतमा ग्रहाः २७

**26-27. The Planet, who is the cause of adverse effects to a person at any time, should be handled by worship and appeasing (of the benevolent ones), because Brahma has blessed the Planets with the boon Do to the persons, who worship you. And the development and progress and downfall of the people and the creation and destruction of the universe are all under the administration and authority of the Planets. Therefore they are most venerable**

अथऽशुभजन्मकथनाध्यायः ८५

अथाऽन्यत् संप्रवक्ष्यामि सुलग्ने सुग्रहेष्वपि
यदन्यकारणेनापि भवेज्जन्माऽशुभप्रदम् १

दर्शे कृष्णाचतुर्दश्यां विष्ट्यां सोदरभे तथा
पितृभे सूर्यसंक्रान्तौ पातेऽर्केन्दुग्रहे तथा २

व्यतीपातादिदुर्योगे गण्डान्ते त्रिविधेऽपि वा
यमघण्टेऽवभे दग्धयोगे त्रीतरजन्म च ३

प्रसवस्य विकारेऽपि ज्ञेयं जन्माऽशुभप्रदम्
शान्त्या भवति कल्याणं तदुपायं च वच्म्यहम् ४

## Ch. 85. Inauspicious Births

**1-4. The Venerable Sage said. O Maitreya! Now I will describe to you the circumstances, in which the births are inauspicious in spite of Lagna and the Planets being well disposed. Although Lagna may be well disposed, births will be inauspicious, if they take place on Amavasya (last day of the Krishna Paksha), on Chaturdasi (14th Tithi), in Krishna Paksha (dark half of the month), in Bhadra Karan, in the Nakshatra of the brother, in the Nakshatras of father and mother, at the time of entry of Sun in a Rāśi, the time of Pata, at the time of solar and lunar eclipses, at the time of Vyati Pata, in Gandantas of all the three kinds, in Yamaghant, Tithikshaya, in Dagdha Yoga etc. The birth of a son after three daughters and birth of a daughter after three sons and the birth of a freak are inauspicious. But there are remedial measures for obtaining relief from the evil effects of such births, which are being described in the following chapters.**

अथ दर्शजन्मशान्त्यध्यायः ८६

मैत्रेय दर्शजातानां मातापित्रोर्दरिद्रता
तद्दोषपरिहाराय शान्तिं कुर्याद् विचक्षणः १

कलशस्थापनं कृत्वा प्रथमं विधिपूर्वकम्
उदुम्बरवटाश्वत्थचूतानां पल्लवांस्तथा २

सनिम्बानां च मूलानि त्वचस्तत्र विनिक्षिपेत्
पंचरत्नानि निक्षिप्य वस्त्रयुग्मेन चेष्टयेत् ३

सर्वे समुद्र इति चापोहिष्ठादित्र्यृचेन च
आमन्त्र्य कलशे तच्च स्थापयेद् वह्निकोणके ४

दर्शस्य देवयोश्चाऽथ चन्द्रभास्करयोः क्रमात्
प्रतिमां स्वर्णजां नित्यं राजतीं ताम्रजां तथा ५

आप्यायस्वेति मन्त्रेण सविता पश्चात्तमेव च
उपचारैः समाराध्य ततो होमं समाचरेत् ६

समिधश्च चरुं विद्वान् क्रमेण जुहुयाद् व्रती
भक्त्या सवितृमन्त्रेण सोमो धेनुश्च मन्त्रतः ७

अष्टोत्तरशतं वापि अष्टाविंशतिरेव वा
अभिषेकं तथा कुर्यात् दम्पत्योश्च सुपुत्रयोः ८

हिरण्यं रजतं चैव कृष्णधेनुश्च दक्षिणा
ब्राह्मणान् भोजयेत् शक्त्या ततः क्षेममवाप्नुयात् ९

## Ch. 86. Remedies for Amavasya Birth

**1-9. The Sage Parasara said. O Maitreya! The person, born on Amavasya, is always poverty stricken. It is therefore essential to adopt remedial measures to obtain relief from the evil effects of such births, which are, as follows. Take a Kalash (water vessel) and then put in it fresh leaves of Goolar (wild fig), Vata (banyan), Pipal, mango and Neema (mango) trees and cover it with two pieces of cloth. Then install the Kalash in the South-West direction after reciting … etc. and … etc. Mantras. Then worship the idols of Sun and Moon, ruling deities of Amavasya, made of gold and silver, mixed with copper, respectively, by recitation of … etc. Mantras for Sun and … etc. Mantras for Moon 16, or 5 times. Thereafter perform Havan with 108, or 28 oblations of the mixture of prescribed fuels (…) and cooked food (Charu) with recitation of Mantras of Sun and Moon. Later sprinkle the water on the child, that is born and his parents and offer in charity gold, silver and a black cow together with feeding the Brahmins, according to ones means. By performing these remedial rites the child born gains freedom and protection from the evil effects of the birth on Amavasya.**

अथ कृष्णचतुर्दशीजन्म शान्त्यध्यायः ८७

कृष्णपक्षचतुर्दश्याः षड्भागेषु फलं क्रमात्
जन्म चेत् प्रथमे भागे तदा ज्ञेयं शुभं द्विज १

द्वितीये पितरं हन्ति मातरं च तृतीयके
चतुर्थे मातुलं चैव पञ्चमे वंशनाशनम् २

षष्ठे तु धननाशः स्यादात्मनो नाश एव वा
तद्दोषपरिहारार्थं शान्तिं कुर्यात्प्रयत्नतः ३

## Ch. 87. Remedies from Birth on Krishna Chaturdashi

**1-3. The Sage said. Divide the span of Chaturdashi in 6 parts. The birth in the first part is auspicious. Second part causes destruction, or death of father. Third part causes death of the mother. Fourth part takes away the maternal uncle. Fifth part destroys the entire family (Khula - generation). Sixth part causes loss of wealth, or destruction (death) of the native. Therefore it is essential to take immediate remedial measures to escape these evil effects.**

शिवस्य प्रतिमां कुर्यात् सौवर्णीं कर्षसम्मिताम्
तदर्धार्धमितां वाऽपि यथावित्तं मनोहराम् ४

बालचन्द्रकिरीटाञ्च श्वेतमाल्याम्बरान्विताम्
त्रिनेत्रां च वृषासीनां वराभयकरामथ ५

**4-5. Have an idol of Lord Shiva, made of one Karsha (equal in weight to the former silver Rupee) of gold, or of weight one can afford. The idol should have a New Moon on the forehead, have a white garland round the neck, have three eyes (one being on the forehead), be dressed in white robes, be seated on a bull, be two-armed and carry Vara and Abhaya.**

त्रयम्बकं चेति मन्त्रेण पूजां कुर्यादतन्द्रितः
आवाह्य वारुणैर्मन्त्रैराचार्यो मन्त्रतत्त्ववित् ६

इमं मे वरुणे त्येवं तत्त्वा यामी त्यृचा पुनः
त्वन्नो अग्ने इत्यनया सत्वं नो इत्यृचापि च ७

आग्नेयं कुम्भमारभ्य पूजयेद् भक्तितः क्रमात्
आ नोभद्रेति सूक्तं च भद्रा अग्नेश्च सूक्तकम् ८

जप्त्वा पुरुषसूक्तं च कन्द्रुद्रेति तथा जपेत्
शङ्करस्याऽभिषेकं च ग्रहपूजां च कारयेत् ९

समिदाज्यचरूंश्चैव तिलमाषांश्च सर्षपान्
अश्वत्थप्लक्षपालासखादिराः समिधः शुभाः १०

अष्टोत्तरशतं वह्नौ जुहुयाद् विधिपूर्वकम्
अष्टाविंशतिसंख्या वा होमं कुर्यात् पृथक पृथक ११

मन्त्रेण त्र्यम्बकेनाथ तिलान् व्याहृतिभिस्तथा
ग्रहहोमं च विधिवत् कुर्याद् क्षेमं ततो भवेत् १२

अभिषेकं च जातस्य तत्पित्रोश्चापि मन्त्रवित्
कुर्यात् ततो यथाशक्ति ब्राह्मणान् भोजयेत् सुधीः १३

**6-13. Then after invocation with Varun Mantra worship should be performed by chanting … etc. Mantras. Thereafter a Kalash should be placed in the North-East direction with chanting of Imah Mai Varun, Tan Tva Yami, Tvan Nai Agni Mantras, followed by Japa of … etc. and Bhadra Agni … Suktas and the chanting of … Mantra. Then, after sprinkling water over the idol of Lord Shiva (Abhisheka), the nine Planets should be worshipped. This should be followed by Havan, by using Ghī, powder of sesame seeds, Urda, Sarson and wood pieces of Pipal, Pakar, Palas and Khadir trees. 108, or 28 oblations should be made separately for the nine Planets. Thereafter, along with chanting of … etc. Mantras, Havan should be performed with sesame seeds for the nine Planets. Lastly the water of the Kalash should be sprinkled on the native and his parents and the Brahmins should be fed, according to means.**

अथ भद्रावमदुर्योगशान्त्यध्यायः ८८

अथाऽहं संप्रवक्ष्यामि भद्रायामवमे तथा
व्यतीपातादिदुर्योगे यमघण्टादिके च यत् १

जन्माशुभफलं प्रोक्तं तस्य शान्तिविधिं द्विज
प्राप्ते प्रसूतिदुर्योगे शान्तिं कुर्याद् विचक्षणः २

## Ch. 88. Remedies from Birth in Bhadra and Inauspicious Yogas

**1-2. The Sage said. O Brahmin! Now I am going to describe the remedial measures for relief from the evil effects of birth in Bhadra, Tithi Kshaya, Vyatipata, P6thdha, Vajra etc. inauspicious Yogas and Yamaghants etc. The remedial rites should be performed on the day, when the same inauspicious Yoga operates again.**

दैवज्ञैर्दर्शिते वाऽपि सुलग्ने सुदिने गृही
पूजनं देवतानां च ग्रहाणां यजनं तथा ३

शङ्करस्याऽभिषेकं च घृतदीपं शिवालये
आयुर्वृद्धिकरं कुर्यादश्वत्थस्य प्रदक्षिणम् ४

हवनं विष्णुमन्त्रेण शतमष्टोत्तरं सुधीः
ब्राह्मणान् भोजयेत् शक्त्या ततः कल्याणमाप्नुयात् ५

**3-5. The remedial rites are to be performed in the following order by the parents of the child in the above inauspicious Yogas. Puja of Lord Vishnu and other deities on an auspicious day and auspicious Lagna on the advice of a proficient astrologer, burning of Deep with Ghī in a Shiva temple, Abhisheka of Lord Shiva, going round a Pipal tree 108 times prolongs longevity and perform Havan with 108 oblations along with the recital of Vaisneh Raratmachityadhi Mantra of Lord Vishnu and feeding Brahmins to the best of ones means. The observance of these remedial measures will give deliverance to the native from all the evil effects of his inauspicious birth and he will enjoy happiness.**

अथैक नक्षत्र जातशान्त्यध्यायः ८९

अथ यद्येकनक्षत्रे भ्रात्रोर्वा पितृपुत्रयोः
प्रसूतिश्च तयोर्मृत्युरथवैकस्य निश्चयः १

तत्र शान्तिं प्रवक्ष्यामि गर्गादिमुनिभाषितम्
सुदिने शुभनक्षत्रे चन्द्रताराबलान्विते २

रिक्ताविष्टिविवर्ज्ये च समय शान्तिमाचरेत्
शनेरीशानदिग्भागे नक्षत्रप्रतिमां शुभाम् ३

तन्नक्षत्रोक्तमन्त्रेण पूजयेत् कलशोपरि
रक्तवस्त्रेण संछाद्य वस्त्रयुग्मेन वेष्टयेत् ४

स्वस्वशाखोक्तमार्गेण कुर्यादग्निमुखं तथा
पुनस्तेनैव मन्त्रेण हुनेदष्टोत्तरं शतम् ५

प्रत्येकं समिदन्नाज्यैः प्रायश्चित्तान्तमेव हि
अभिषेकं ततः कुर्यादाचार्यश्च द्वयोरपि ६

ऋत्विग्भ्यो दक्षिणां दद्यादाचार्याय विशेषतः
ब्राह्मणान् भोजयेद् भक्त्या वित्तशाठ्यविवर्जितः ७

## Ch. 89. Remedies from Nakshatra Birth

**1-7. The Sage Parasara said. O Maitreya! If the birth takes place in the Nakshatras of the brother and the parents, death takes place, without doubt, of the brother and the father, or mother, or they have to undergo death-like suffering. Therefore I am going to describe the remedial measures to be adopted to escape from these evil effects. The remedial rites should be performed in a Muhurta, when Moon and stars are favourable on a day, on which there is no Rikta-Bhadra Dosha. The remedial rites should be performed in the following order. Instal an idol of the Janm Nakshatra on a Kalash in the North-East direction from the fire. Cover it with a red piece of cloth and then warp two pieces of cloth round it. Worship the idol by chanting the Mantras of the Janm Nakshatra. According to ones Gotra, perform Havan 108 times with the recitation of the same Mantra, facing the fire, with Ghī and other Havan material. Then the priest, performing the Puja, should sprinkle water on the parents and brother (whoever is concerned). Give presents in cash (Dakshena) to the priest and his colleagues, associated with the ceremony, to the best of ones means and then feed the Brahmins to the best of ones means.**

अथ संक्रान्तिजन्मशान्त्यध्यायः ९०

घोराध्वांक्षीमहोदर्यो मन्दा मन्दाकिनी तथा
मिश्रा च राक्षसी सूर्यसंक्रान्तिः सूर्यवासरात् १

संक्रान्तौ च नरो जातो भवेद् दारिद्र्य दुःखभाक्
शान्त्या सुखमवाप्नोति ततः शान्तिविधि ब्रुवे २

## Ch. 90. Remedies from Sankranti Birth

**1-2. The Sage said. O Brahmin! The names of the Sankranti on the seven days of the week, beginning from Sunday, are Ghora, Dhavankshi, Mahod6th, Manda, Mandakini, Mishra and Rakshasi. The person, born at the Sankranti (entry of Sun in a new Rāśi), is poor and unhappy, but he becomes well-to-do and happy, if remedial measures are undertaken. I am now going to describe the remedial measures to nullify these evil effects.**

नवग्रहमखं कुर्यात् तस्य दोषोपशान्तये
गृहस्य पूर्वदिग्भागे गोमयेनोपलिप्य च ३

स्वलंकृतप्रदेशे तु ब्रीहिराशिं प्रकल्पयेत्
पञ्चद्रोणमितं धान्यैस्तदर्धं तण्डुलैस्तथा ४

तदर्धं च तिलैः कुर्याद्राशिं च द्विजसत्तम
पृथक् त्रितयराशौ तु लिखेदष्टदलं बुधः ५

पुण्याहं वाचयित्वा तु आचार्यं वृणुयात् पुरा
धर्मज्ञं मन्त्रतत्त्वज्ञं शान्तिकर्मणि कोविदम् ६

**3-6. The Yagya of the nine Planets should be performed to obtain relief from the evil effects of the birth at Sankranti. A clean spot in the eastern part of the house should be purified by besme6thng with cow dung. Then prepare three separate heaps of the following: 5 Dronas (80 Seers) of paddy (Sadhi), 2 Dronas (40 Seers) of rice, 1 Dronas (20 Seers) of sesame seeds (Til). On these heaps of grains make a figure of lotus with eight leaves (Ashtamdhal) and then decorate them with flowers. After doing this, select and invite a priest, who is well versed in the performance of religious rites and recitation of Mantras.**

राशिषु स्थापयेत् कुम्भानव्रणान् सुमनोहरान्
तीर्थोदकेन सम्पूर्य समृदौषधपल्लवम् ७

पंचगव्यं क्षिपेत्तत्र वस्त्रयुग्मेन वेष्टयेत्
कुम्भोपरि न्यसेत् पात्रं सूक्ष्मवस्त्रेण वेष्टितम् ८

प्रतिमां स्थापयेत् तत्र साधिप्रत्यधिदैवताम्
अधिदैवं भवेत् सूर्यश्चन्द्रः प्रत्यधिदैवतम् ९

चन्द्रादित्याकृती पार्श्वे मध्ये संक्रान्तिमर्चयेत्
प्रतिमां पूजने पूर्वं वस्त्रयुग्मं निवेदयेत् १०

ततो व्याहृतिपूर्वेण तत्तन्मन्त्रेण पूजयेत्
त्रैयम्बकेण मन्त्रेण प्रधानप्रतिभां पूजयेत् ११

उत्सूर्य इति मन्त्रेण सूर्यपूजां समाचरेत्
आप्यायस्वेति मन्त्रेण चन्द्रपूजां समाचरेत् १२

उपचारैः षोडशभिर्यद्वा पञ्चोपचारकैः
मृत्युंजयेन मन्त्रेण प्रधानप्रतिमां स्पृशन् १३

अष्टोत्तरसहस्त्रं चाऽप्यष्टोत्तरशतं जपेत्
अथाऽष्टाविंशतिं वापि जपेन्मन्त्रं स्वशक्तितः १४

कुम्भेभ्यः पश्चिमे देशे स्थण्डिलेऽग्निं प्रकल्पयेत्
स्वगृह्योक्तविधानेन कारयेत् संस्कृतानलम् १५

त्रयम्बकेन मन्त्रेण समिदाज्यचरून् हुनेत्
अष्टोत्तरसहस्त्रं वा अष्टोत्तरशतं यथा १६

अष्टविंशतिमेवापि कुर्याद् होमं स्वशक्तितः

मृत्युंजयेन मन्त्रेण तिलहोमश्च कारयेत् १७

ततः स्विष्टकृतं हुत्वाभिषेकं च कारयेत्
ब्रह्मणान् भोजयेत् पश्चादेवं शान्तिमवाप्नुयात् १८

**7-18. The religious rites are then to be performed in the following order. Install Kalashas without any holes on all the three heaps and put in each of them water from holy places, Saptamrattika, Shataushadhi, Panchapallava and Panchagavya. Then wrap the Kalashas with pieces of cloth. Place small earthen pots, wrapped with thin cloth, on the Kalashas. Then install the idol of Sankranti along with the idol of Adhideva and Pratyadhideva. (Here Sun is Adhideva and Moon Pratyadhideva). Their idols should be placed on either side of the main idols of Sankranti. Two robes may be given, as offering to each of the idols. Perform worship of all the three idols, according to the prescribed procedure. The main idol should be worshipped with the chanting of Trayambakam, Yajam Hai etc., the idol of Sun with Mantra Ut Sun and the idol of Moon with Mantra Apayayashava etc. The worship should be performed with Shodshopchar, or Panchopchar, as may be possible. After touching the main idol, Mrityunjaya Japa should be recited 1008, 108, or 28 times, as may be possible. Make a small platform in the West of the installed Kalashas, kindle fire on it and perform the prescribed rites. Then perform Havan 1008, 108, or 28 times with Samidha, Ghrit (Ghī) and Charu (powder of Til) within ones means along with chanting of Trayambakam etc. Mantra. 8) Again perform Havan, first with the fuel of sesame seeds along with recitation of Mrityunjaya Mantra. After performing another Svistkrita Havan, sprinkle the holy water on the child born and his parents. Lastly feed as many Brahmins, as one can afford. By performing the remedial rites, described above, the evil effects are nullified and the native and his parents enjoy happiness.**

अथ ग्रहणजातशान्त्यध्यायः ६१

सूर्येन्दुग्रहणे काले येषां जन्म भवेद् द्विज
व्याधिः कष्टं च दारिद्र्यं तेषां मृत्युभयं भवेत् १

अतः शान्तिं प्रवक्ष्यामि जनानां हितकाङ्क्षया
सूर्यस्येन्दोश्च ग्रहणं यस्मिनृक्षे प्रजायते २

तन्नक्षत्रपते रूपं सुवर्णेन प्रकल्पयेत्
सूर्यग्रहे सूर्यरूपं सुवर्णेन स्वशक्तितः ३

चन्द्रग्रहे चन्द्ररूपं रजतेन तथैव च
राहुरूपं प्रकुर्वीत सीसकेन विचक्षणः ४

शुचौ देशे समं स्थानं गोमयेन प्रलेपयेत्
तत्र च स्थापयेद् वस्त्रं नूतनं सुमनोहरम् ५

त्रयाणामेव रूपाणां स्थापनं तत्र कारयेत्
सूर्यग्रहे प्रदातव्यं सूर्यप्रीतिकरं च यत् ६

रक्ताक्षतं रक्तगन्धं रक्तमाल्याम्बरादिकम्
चन्द्रग्रहे प्रदातव्यं चन्द्रप्रीतिकरं च यत् ७

श्वेतगन्धं श्वेतपुष्पं श्वेतमाल्याम्बरादिकम्
राहवे च प्रदातव्यं कृष्णपुष्पाम्बरादिकम् ८

दद्यान्नक्षत्रनाथाय श्वेतगन्धादिकं तथा
सूर्यं सम्पूजयेद्धीमानाकृष्णेति च मन्त्रतः ९

तथा चन्द्रं इमे देवा इति मन्त्रेण भक्तितः
दूर्वाभि पूजयेद्राहुं कया न इति मन्त्रतः १०

सूर्येन्द्वोरर्कपालाशमिद्भिर्जुहुयात् क्रमात्
तथा च राहोः प्रीत्यर्थं दूर्वाभिर्द्विजसत्तम ११

ब्रह्मवृक्षसमिद्भिश्च भेशाय जुहुयात् पुनः
अभिषेकं ततः कुर्यात् जातस्य कलशोदकैः १२

आचार्यं पूजयेद्भक्त्या सुशान्तो विजितेन्द्रियः
ब्राह्मणान् भोजयित्वा तु यथाशक्ति विसर्जयेत् १३

एवं ग्रहणजातस्य शान्तिं कृत्वा विधानतः
सर्वविघ्नं विनिर्जित्य सौभाग्यं लभते नरः १४

## Ch. 91. Remedies for Birth in Eclipses

**1-14. The Sage said. O Brahmin! A person, whose birth takes place at the time of solar, or lunar eclipse, suffers from ailments, distress and poverty and faces danger of death. Therefore I am going to describe for the benefit of the mankind the remedial measures, required to be undertaken to nullify the above evil effects. The remedial rites are to be performed in the following order. The following idols should be got prepared, according to ones means: in gold an idol of the deity of the Nakshatra, in which the eclipse takes place (regarding deities of Nakshatras, see notes of verse 18, Ch. 3, Vol. I); in gold an idol of Sun, if the birth takes place during solar eclipse; in silver an idol of Moon, if the birth takes place during lunar eclipse; in lead an idol of Rahu. Besmear a clean spot on the ground (in the house) with cow dung, cover it with a new (unused) beautiful piece of cloth and install the three idols on it. Make offerings of the following to the idols: in case of birth during solar eclipse all things dear to Sun and red-coloured Akshat (Akshata - rice), red sandal, a garland of red-coloured flowers, red clothes etc.; in case of birth during a lunar eclipse all things dear to Moon and white sandal, white flowers, white clothes etc.; for Rahu blackish clothes, blackish flowers etc.; white flowers for the deity of the Nakshatra, in which the eclipse takes place. The worship should be performed, as follows: of Sun with the chanting of Akrishnim etc. Mantra; of Moon with the chanting of Imadeva etc. Mantra; of Rahu with Durva (a kind of grass) and with the chanting of Kayanshicatra etc. Mantra. Thereafter Havan should be performed, as follows: with the fuel of Aak wood pieces for Sun; with the fuel of Palas tree wood pieces for Moon; with Durva for Rahu; with Pipal tree wood pieces for the deity of the Nakshatra. Sprinkle the holy water of the Kalash on the child born (and his parents). Offer worshipful regards to the priest, performing the remedial rites and lastly feed as many Brahmins, as possible within ones means. By performance of the remedial rites in the manner described above, evil effects of the inauspicious birth are wiped and the native enjoys happiness and is blessed with good fortune.**

अथ गण्डान्तजातशान्त्यध्यायः ९२
तिथिनक्षत्रलग्नानां गण्डान्तं त्रिविधं स्मृतम्
जन्मयात्राविवाहादौ भवेत्तन्निधनप्रदम् १

## Ch. 92. Remedies from Gandanta Birth

**1. The Sage said. O Brahmin! Gandanta is of three kinds, namely of Tithi, Nakshatra and Lagna. Birth, travelling and performance of auspicious functions, like marriage etc., during Gandanta are likely to cause death of the person concerned.**

पूर्णानन्दाख्ययोस्तिथ्योः सन्धौ नाडीचतुष्टयम्
अध ऊर्ध्वं च मैत्रेय तिथिगण्डान्तमुच्यते २

**2. O Maitreya! The last 2 Ghatikas of Purna Tithi (5th, 10th, 15th) and the first 2 Ghatikas of Nanda Tithi (1st, 6th, 11th) are known, as Tithi Gandanta.**

रेवतीदास्रयोः सार्पमघयोः शाक्रमूलयोः
सन्धौ नक्षत्रगण्डान्तमेवं नाडीचतुष्टयम् ३

**3. Similarly the last two Ghatikas of Revati and first two Ghatikas of Ashvini, the last two Ghatikas of Aslesha and first two Ghatikas of Magha and the last two Ghatikas of Jyeshtha and first two Ghatikas of Mula are known, as Nakshatra Gandanta.**

मीनाजयोः कर्किहर्योर्लग्नयोरलिचापयोः
सन्धौ च लग्नगण्डान्तमधऊर्ध्वं घटीमितम् ४

**4. The last half Ghatika of Pisces and first half Ghatika of Aries, the last half Ghatika of Cancer and first half Ghatika of Leo, the last half Ghatika of Scorpio and first half Ghatika of Sagittarius are known, as Lagna Gandanta.**

एषु चाभुक्तमूलाख्यं महाविघ्नपदं स्मृतम्
इन्द्रराक्षसयोः सन्धौ पञ्चाष्टघटिकाः क्रमात् ५
अथ गण्डान्तजातस्य शिशोः शान्तिविधिं ब्रुवे
गण्डान्तकालजातस्य सूतकान्त्यदिने पिता ६

शान्तिंशुभेऽह्नि वा कुर्यात् पश्येत् तावन्न तं शिशुम्
वृषभं तिथिगण्डान्ते नक्षत्रे धनुमेव च ७

काञ्चनं लग्नगण्डान्ते दद्यात्तद्दोषप्रशान्तये
आद्यभागे प्रजातस्य पितुश्चाप्यभिषेचनम् ८

**6-8. Now I will tell you the remedial measures to be adopted to release the child, born during Gandanta, from its evil effects. The father should see the child born only on the morning next to the end of the days of Sutaka, or on any auspicious day after the performance of the remedial measures. The remedial measures are giving a bullock in charity in the case of Tithi Gandanta, giving a cow with calf in charity in the case of Nakshatra Gandanta, giving gold in charity in the case of Lagna Gandanta, performing Abhisheka of the child along with father, if the birth is in the first part of Gandanta and along with mother, if the birth is in the second part of Gandanta.**

द्वितीये तु शिशोर्मातुरभिषेकं च कारयेत्
सुवर्णेन तदर्धेण यथावित्तं द्विजोत्तम
तिथिभेषादिरूपं च कृत्वा वस्त्रसमन्वितम् ९

उपचारैर्यथाशक्ति कलहोपरि पूजयेत्
पूजान्ते समिदन्नज्यैर्होमं कुर्याद्यथाविधि १०

ब्राह्मणान् भोजयेत् पश्चादेवं दोषात्प्रमुच्यते
आयुरारोग्यमैश्वर्यं सम्प्राप्नोति दिने दिने ११

**9-11. Performance of Puja on the holy Kalash of the idol of the deities of Tithi (in case of Tithi Gandanta), Nakshatra (in case of Nakshatra Gandanta) and Lagna (in case of Lagna Gandanta), made of 16 Masas, 8 Masas, or 4 Masas of gold, as may be possible, followed by Havan and Abhisheka, according to procedure already described earlier. At the end as many Brahmins, as may be possible within ones means, should be fed. These remedial measures will ensure long life, good health and prosperity for the child.**

**Notes. Unless one is himself fully conversant with the performance of religious rites, the remedies, recommended in this chapter, earlier and later chapters, should be got performed by and under the directions of a learned priest, because the full effects will be derived, if the rites are performed correctly and according to the procedure, prescribed in the religious scriptures on this subject.**

अथ अभुक्तमूलशान्त्यध्यायः ९३

ज्येष्ठामूलमयोर्यस्मादधिपाविन्द्रराक्षसौ
महावैरात् तयोः सन्धिर्महादोषप्रदः स्मृतः १

अभुक्तमूलजं पुत्रं पुत्रीं वाऽपि परित्यजेत्
अथवाऽब्दाष्टकं तातस्तन्मुखं न विलोकयेत् २

## Ch. 93. Remedies for Abhukta Mula Birth

**1-2. The Sage Parasara said. The ruling deity of Jyeshtha is Indra and the ruling deity of Mula is Rakshasa. As both the deities are inimical to each other, this Gandanta is considered, as the most evil. A boy, or girl, born during the period of Abhukta Mula, should either be abandoned, or the father should not see the face of the child for 8 years. Now I shall describe the remedial measures to obtain deliverence from the evil effects of birth during this extremely inauspicious period.**

तद्दोषपरिहारार्थमथ शान्तिविधिं ब्रुवे
तत्रादौ दोषबाहुल्यान् मूलशान्तिर्निगद्यते ३

जन्मतो द्वादशाहे वा तदृक्षे वा शुभे दिने
जातस्य वाऽष्टमे वर्षे शान्तिं कुर्याद् विधानतः ४

**3-4. In view of the extremely inauspicious effects of birth during Abhukta I shall first describe the remedial measures to obtain relief from Mula. The religious remedial rites should be performed after the 12th day after the birth, the next Janm Nakshatra day, or on an auspicious day, when Moon and the stars are favourable.**

सुसमे च शुभे स्थाने गोमयेनोपलेपिते
मण्डपं स्वगृहात् प्राच्यामुदीच्यां वा प्रकल्पयेत् ५

चतुर्द्वारसमायुक्तं तोरणाद्यैरलङ्कृतम्
कुण्डं ग्रहादियज्ञार्थं तद्बहिश्च प्रकल्पयेत् ६

सुवर्णेन तदर्धेन तदर्धार्धेन वा पुनः
नक्षत्रदेवतारूपं कुर्याद् वित्तानुसारतः ७

श्यामवर्णं महोग्रं च द्विशिरस्कं वृकाननम्
खड्गचर्मधरं तद्वद् ध्येयं कुणपवाहनम् ८

**5-8. Erect a canopy (Mandap) with four arched gateways, embellished with festoons, on a sacred spot, besmeared with cow dung paste, to the East, or North of the house. Prepare there a pit (Kund), or place there a square vessel of clay, or metal for performing Havan. Then, according to ones means, prepare, or get prepared an idol of Rakshasa of 16, 8, or 4 Masas of gold, as may be possible within ones means. The idol should be with a horrible-looking face, black in colour, with two heads, two arms, carrying a sword and a shield and seated on a dead body.**

सुवर्णस्य च मूल्यं वा स्थापयित्वा प्रपूजयेत्
सुवर्णं सर्वदैवत्यं यतः शास्त्रेषु निश्चितम् ९

**9. In the absence of an idol a piece of gold of the weight, mentioned above, should be used for worship, as gold is dear to all the deities.**

आचार्यं वरयेत् पश्चात् स्वस्तिवाचनपूर्वकम्
कलशस्थापनं कुर्यात् स्वगृह्योक्तविधानतः १०

पञ्चगव्यादिकं क्षेप्यं कलशे तीर्थवारि च
शतौषध्यादिकं तत्र शतच्छिद्रघटे क्षिपेत् ११

वंशपात्रं च संस्थाप्य तत्र वै पश्चिमामुखम्
अर्चयेन्निर्ऋतिं देवं शुक्लवस्त्राक्षतादिभिः १२

इन्द्रं तदधिदेवं च जलं प्रत्यधिदैवतम्
स्वस्वशाखोक्तमन्त्रेण प्रधानादीन्प्रपूजयेत् १३

देवाधिदेवप्रीत्यर्थं होमं कुर्याद्यथाविधि

अष्टोत्तरं सहस्रं वा शतं वा नियतेन्द्रियः १४

मृत्युप्रशमनार्थं च मन्त्रं त्रयम्बकं जपेत्
प्रार्थयेच्च ततो देवमभिषेकार्थमादरात् १५

भद्रासनोपविष्टस्य सस्त्रीपुत्रस्य मन्त्रवित्
आचार्यो यजमानस्य कुर्यात् प्रीत्याभिषेचनम् १६

वस्त्रान्तरितकुम्भाभ्यां स्नापयेत्तदनन्तरम्
शुक्लाम्बरधरस्तद्वत् श्वेतगन्धानुलेपनः १७

धेनुं पयस्विनीं दद्यादाचार्याय च शक्तितः
ऋत्विग्भ्यो दक्षिणां दद्याद् ब्राह्मणांश्चापि भोजयेत् १८

यत्पापं यच्च मे दौःस्थ्यं सर्वगात्रेष्ववस्थितम्
तत्सर्वं भक्षयाज्य त्वं लक्ष्मीं पुष्टिं च वर्धय १९

अनेनैव तु मन्त्रेण सम्यगाज्यं विलोकयेत्
मूलमण्डोद्भवस्यैवं सर्पपापं प्रणश्यति २०

**10-20. Thereafter the remedial rites should be performed in the following order. Select a learned priest to perform the religious rites, according to the prescribed procedure. Install a Kalash and put in it Panchagavya (five articles, yielded by a cow, namely milk, curd, Ghī, dung and urine), Shataushadhi and water of the holy river (Ganga etc.). Then install the idol of the Rakshasa of Mula, facing West, on an earthen pot (Dhata) with one hundred tiny holes. After placing bamboo leaves on it, perform the worship of the idol by offering it white flowers, sandal and clothes etc. Also perform worship of its Adhideva Indra and Pratyadhideva Jal. Then perform Havan to appease the deities. According to ones means, 1008, or 108 oblations should be offered in the Havan. After this to obtain deliverence from death Mrityunjaya Mantra etc. should be recited and prayers offered to all the deities for the purpose of Abhisheka. The father, mother and the child should thereafter take bath from the water of the two Kalashas. Then the parents, dressed in white clothes and with white sandal paste, besmeared on their foreheads, should give a cow with calf, as a Dakshina to the chief priest and feed the other priests and Brahmins, according to ones means. Lastly, after reciting the Yatapapan etc. (see verse 19) Mantra, the father, mother and the child should see the reflection of their faces in the (melted) Ghī. By the performance of the remedial rites in the manner described all evil effects of the birth during Abhukta Mula are completely wiped out**

अथ ज्येष्ठादि गण्डशान्त्यध्यायः ९४

ज्येष्ठागण्डान्तजातस्तु पितुः स्वस्य च नाशकः
तस्य शान्तिविधिं वक्ष्ये सर्वविघ्नोपशान्तये १

मूलशान्तिसमं सर्वमात्रापि मण्डपादिकम्
इन्द्रोऽत्र देवता तद्वदधिदेवोऽनलस्तथा २

विज्ञेयं च तथा विप्र रक्षः प्रत्यधिदैवतम्
यथाशक्ति सुवर्णेन कुर्यादिन्द्रस्वरूपकम् ३

वज्राङ्कुशधरं दिव्यं गजराजोपरिस्थितम्
शालितण्डुलसंयुक्तकुम्भस्योपरि पूजयेत् ४

स्वस्वगृह्योक्तमन्त्रेण गन्धपुष्पाक्षतादिभिः
अभिषेकं च होमं च कुर्याद् ब्राह्मणभोजनम् ५

## Ch. 94. Remedies from Jyeshtha Gandanta Birth

**1-5. The Sage said. O Maitreya! Now I will describe to you the remedial measures to be adopted to ensure relief from the evil effects of Jyeshtha Gandanta. The erection of a canopy (Mandhup), installation of Kalash, selection of a priest etc. will be done in the same manner, as has been recommended for the Abhukta Mula in the previous chapter. In this ceremony Indra will be the deity-in-chief, Adhideva will be Agni and the Pratyadhideva will be Rakshasa.**

इन्द्रसूक्तं जपेद् भक्त्या मन्त्रं मृत्युञ्जयं तथा
प्रार्थयेदिन्द्रदेवं च ततः शान्तिमवाप्नुयात् ६

**6. Then the remedial rites should be performed in the following order. Install on a Kalash, full of paddy rice, an idol of gold with Indra, seated on Airavat with Vajra Ankusha in his hands. Perform worship of the chief deity Indra along with that of the Adhideva and the Pratyadhideva with the recitation of their appropriate Mantras. Perform Havan, Abhisheka and then feed the Brahmins in accordance with ones means. In addition to the above, after doing Indrasukta and Mrityunjaya Japas, prayers may be offered to Indra. These measures will wipe out the evil effects of the Gandanta.**

अथ वा शक्त्यभावे तु कुर्याद् गोदानमेव हि
यतः समस्तभूदानाद् गोदानमतिरिच्यते ७

**In case the performance of remedial rites, described above, is beyond the means of any person, he should give a cow in charity. This will also appease the deities and promote relief from the evil effects of the Gandanta. Because the giving of a cow in charity has been considered a superior remedial measure than giving in charity all the lands, belonging to a person.**

मूलेन्द्राहिमघागण्डजाते दद्याद् गवां त्रयम्
गोयुग्मं पौष्णदास्रोत्थे गण्डान्ते च द्विजन्मने ८

अन्यगण्डे च दुर्योगे गामेकां हि प्रदापयेत्
गोरभावे च विप्राय दद्यात् तन्मूल्यमेव हि ९

**8-9. According to prescribed remedial measures, 3 cows are to be given in charity in the case of Jyeshtha-Mula and Aslesha-Magha Gandantas, 2 cows in Revati-Ashvini Gandantas and 1 cow in other Gandantas, or in any inauspicious Yoga. If cow, or cows are not available, their actual value should be given in cash to a Brahmin.**

ज्येष्ठानक्षत्रजा कन्या विनिहन्ति धवाग्रजम्
विशाखान्त्यपदोत्पन्ना कन्या देवरघातिनी १०

**10. A girl, born in Jyeshtha Nakshatra, destroys (is the cause of death of) the elder brother of her husband and a girl, born in fourth quarter of Vishaka Nakshatra, destroys her husbands younger brother. Therefore a cow should be given in charity at the time of the marriage of such girls to wipe out the above-mentioned evil effects.**

तस्याः प्रदानकालेऽतो गोदानमपि कारयेत्
आश्लेषान्त्यत्रिपादोत्थौ मूलाद्यत्रिपदोद्भवौ ११

कन्यासुतौ हतः श्वश्रूं श्वशुरञ्च यथाक्रमम्
तयोर्विवाहकालेऽतः शान्तिं कुर्याद् विचक्षणः १२
तत्तदोषविनाशाय यथावित्तानुसारतः
धवाग्रजद्यभावे तु न दोषाय प्रजायते १३

**11-13. A boy, or girl, born in the 2nd, 3rd, or 4th quarter of Aslesha Nakshatra, destroys his/her mother-in-law and a boy, or a girl, born in 1st, 2nd, or 3rd quarter of Mula Nakshatra, becomes the destroyer of his/her father-in-law. Therefore suitable measures, as may be possible within ones means, should be taken at the time of the marriage of such boys and girls. There will be no evil effect, if the husband has no elder brothers.**

अथ त्रीतरजन्मशान्त्यध्यायः ९५

अथाऽन्यत् संप्रवक्ष्यामि जन्मदोषप्रदं द्विज
सुतत्रये सुताजन्म तत्त्रये सुतजन्म चेत् १

तदाऽरिष्टभयं ज्ञेयं पितृमातृकुलद्वये
तत्र शान्तिविधिं कुर्याद् वित्तशाठ्यविवर्जितः २

## Ch. 95. Remedies from Birth of a Daughter after Three Sons

**1-2. The Sage said. O Brahmin! I will now tell you about other kinds of inauspicious births. The birth of a daughter after the birth of three sons, or the birth of a son after the birth of three daughters is ominous for both the maternal and paternal families of such children. Therefore remedial measures, described below, may be taken to get deliverance from these evil effects.**

सूतकान्तेऽथ वा शुद्धे समये च शुभे दिने
आचार्यमृत्विजो वृत्वा ग्रहयज्ञपुरस्सरम् ३

ब्रह्मविष्णु महेशेन्द्रप्रतिमाः स्वर्णजाः शुभाः
पूजयेद् धान्यराशिस्थकलशोपरि भक्तितः ४

चत्वारि रुद्रसूक्तानि शान्तिसूक्तानि सर्वशः
विप्र एको जपेद् होमकाले च सुचिसंयतः ५

आचार्यो जुहुयात्तत्र समिदाज्यतिलांश्चरुम्
अष्टोत्तरं सहस्रं वा शतं वाऽष्टौ च विंशतिम् ६

ब्रह्मादिसर्वदेवेभ्यः स्वस्वगृह्योक्तमन्त्रतः
ततः स्विष्टकृतं हुत्वा बलिं पूर्णाहुतिं पुनः ७

अभिषेकं च जातस्य सकुटुम्बस्य कारयेत्
ऋत्विग्भ्यो दक्षिणां दद्याद् ब्राह्मणांश्चापि भोजयेत् ८

कांस्याज्यवीक्षणं कृत्वा दीनानाथांश्च तर्पयेत्
एवं शान्त्या च मैत्रेय सर्वारिष्टं विलीयते ९

**3-9. The rites should be performed on the morning next to the last day of Sutak, or on any other auspicious day in the following order. After selecting a priest and some Brahmins to perform the remedial religious rites, the priest, after paying obeisance to the nine Planets, should install four Kalashas on a heap of paddy, place the idols of Brahma, Vishnu, Mahesha and Indra, made of gold, on them and perform their worship in the prescribed manner. A Brahmin (an assistant of the priest), after taking bath etc., should recite four Rudra Suktas and the whole of Shanti Sukta. The priest should perform Havan with Samidha, Ghī and sesame seeds 1008, 108, or 28 times with the recitation of the prescribed Mantras of Brahma, Vishnu, Mahesha and Indra. Svistkrata and Purnahuti and Abhisheka of the child with his family should be done and presents in cash should be given to the priest and his assistants, according to ones means. The Brahmins should be fed. The father and the mother of the child should see their reflections in the Ghī, kept in a bronze vessel. Lastly grains and clothes should be distributed to the poor and the needy. By the performance of the above remedial rites the evil effects are wiped out and the child and his parents etc. enjoy happiness.**

अथ प्रसवविकारशान्त्यध्यायः ९६

अथाऽहं सम्प्रवक्ष्यामि विकारं प्रसवोद्भवम्
येनाऽरिष्टं समस्तस्य ग्रामस्य च कुलस्य च १

अत्यल्पे वाऽधिके काले प्रसवो यदि जायते
हीनाङ्गोवाऽधिकाङ्गो वा विशिरा द्विशिरास्तथा २

नार्या पश्वाकृतिर्वापि पशुष्वपि नराकृतिः
प्रसवस्य विकारोऽयं विनाशायोपजायते ३

## Ch. 96. Remedies from Unusual Delivery

**1-3. The Sage said. O Brahmin! I will now tell you about inauspicious and unusual deliveries by women, which are ominous for the village, town and the country. These may be of the following kinds. Delivery of a child 2, 3, or 4 months earlier, or later from the approximate due date. Delivery of a child without hands, feet, or any other limbs, without head, or with two heads. Delivery of an animal-shaped being by a woman, or a human-shaped being by an animal.**

यस्य स्त्रियाः पशुनां वा विकाराः प्रसवोद्भवः
अनिष्टं भवने तस्य कुलेऽपि च महद् भवेत् ४

तद्दोषपरिहारार्थं शान्तिः कार्या प्रयत्नतः
स्त्री वा गौवंडवा वापि परित्याज्या हितार्थिना ५

**4-5. Deliveries of these kinds by women, or cows etc. in a house are ominous for all the members of the family, living there. Therefore remedial measures are essential for obtaining relief from their evil effects. The best remedial measure will be to abandon (turn out from the House) such women and animals (cows, mares etc.).**

नार्याः पञ्चदशे वर्षे जन्मतः षोडशोऽपि वा
गर्भो वा प्रसवो वाऽपि न शुभाय प्रजायते ६

सिंहराशिस्थितेऽर्के गौनक्रस्थे महिषी तथा
प्रसूता स्वामिनं हन्ति स्वयं चापि विनश्यति ७

ब्राह्मणाय प्रदद्यात् तां शान्तिं वापि समाचरेत्
ब्रह्मविष्णुमहेशानां ग्रहाणां चैव पूजनम् ८

सर्वं होमादिकं कर्म कुर्यात्त्रीतरशान्तिवत्
ततो गृहो सुखी भूत्वा सर्वपापैः प्रमुच्यते ९

**6-9. It is considered inauspicious for a girl to become pregnant, or to deliver a child in her 15th, or 16th year from birth. If a cow delivers, when Sun is in Leo, or a female buffalo delivers, when Sun is in Capricorn, they are disasterous to their owner and the person, who looks after them. Therefore either such cow, or buffalo should be given away to a Brahmin, or suitable remedial measures should be taken to escape from the above-mentioned evil effects. The remedial measures to be adopted are the same, as given in verses 3-9 in Ch. 95.**

एवं त्वरिष्टे सम्प्राप्ते नरः शान्तिं करोति यः
सर्वान् कामानवाप्नोति चिरजीवी सुखी च सः १०

**10. Thus, whenever there is any kind of 6thstha, adoption of appropriate remedial measures will ensure long life, happiness and prosperity for the person concerned**

अथोपसंहाराध्यायः ९७

यच्छास्त्रं ब्रह्मणा प्रोक्तं नारदाय महात्मने
तदेव शौनकादिभ्यो नारदः प्राह सादरम् १

ततो मया यथा ज्ञातं तुभ्यमुक्तं तथा द्विज
नासूयकाय दातव्यं परनिन्दारताय वा २

जडाय दुर्विनीताय नाज्ञाताय कदाचन
देयमेतत्सुरिलाय भक्ताय सत्यवादिने ३

मेधाविने विनीताय सम्यग् ज्ञातकुलाय च
पुण्यदं ज्यौतिषं शास्त्रमग्र्यं वेदाङ्गमुत्तमम् ४

## Ch. 97. Conclusion

**1-4. Mahārśi Parasara said. O Brahmin! I have described to you the Jyotishya Shastra, as narrated by Lord Brahma to the Sage Narada and by Narada to Shaunaka and other Sages, from whom I received the knowledge of this Shastra. I have narrated the same Jyotishya Shastra, which I learnt from them. Do not impart the knowledge of this Shastra to one, who is insignificative, slanders, or calumniates others, nor to one, who is not intelligent, is wicked and unknown to you. Teach this supreme Vedanga Jyotishya Shastra only to one, who is gentle and amiable, devoted, truthful, brilliant and well known to you.**

जानाति कालमानं यो ग्रहर्क्षाणां च संस्थितिम्
होराशास्त्रमिदं सम्यक् स विजानाति नाऽपरः ५

होराशास्त्रार्थतत्त्वज्ञः सत्यवाग् विजितेन्द्रियः
शुभाऽशुभं फलं वक्ति सत्यं तद्वचनं भवेत् ६

**5-6. Only that person, who possesses adequate knowledge of time and the positions of Planets and Nakshatras, can understand this Hora Shastra. Only that person, who has complete knowledge of the Hora Sastra and who is truthful, can make correct favourable, or unfavorable predictions.**

ये सुशास्त्रं पठन्तीदं ये वा शृण्वन्ति भक्तितः
तेषांमायुर्बलं वित्तं वृद्धिमेति यशः सदा ७

**7. One, who reads, or listens with attention and devotion to this most excellent Hora Shastra, becomes long-lived and is blessed with increase in his strength, wealth and good reputation.**

इत्थं पराशरेणोक्तं होराशास्त्रं चमत्कृतम्
नवं नवजनप्रीत्यै विविधाध्यायसंयुतम् ८

श्रेष्ठं जगद्धितायेदं मैत्रेयाय द्विजन्मने
ततः प्रचरितं पृथ्व्यामादृतं सादरं जनैः ९

**8-9. Thus was narrated by Mahārśi Parāśara to Maitreya this novel Horāśāstra, containing invaluable and uncommon material from ancient scriptures on Jyotishya, for the benefit of the world at large. Afterwards it came into usage on the earth and received reverence from all.**

ग्रन्थेऽस्मिन् पृथगध्यायैर्विषया विनिवेशिताः
सृष्टिक्रमोऽवताराश्च गुणाः खेटस्य भस्य च १०

विशेषलग्नं वर्गाश्च तद्विवेकश्च राशिदृक्
अरिष्टं तद्विभङ्गश्च विवेको भावजस्तथा ११

भावानां च फलाध्यायो भावेशोत्थफलं तथा
अप्रकाशफलं स्पष्टखेटदृष्टिप्रसाधनम् १२

ततः स्पष्टबलाध्यायः इष्टकष्टप्रसाधनम्

पदं चोपपदं तद्वदर्गला त्वथ कारकाः १३

कारकांशफलं योगकारकाध्याय एव च
नाभसा विविधा योगाश्चन्द्रयोगोऽर्कयोगकः १४

राजयोगस्ततः प्रोक्तो राजसम्बन्धयोगकः
विशेषधनयोगाश्च योगा दारिद्र्यकारकाः १५

आयुर्मारकभेदाश्च ग्रहावस्थाः फलान्विताः
नानाविधदशाध्यायास्तत्फलाध्यायः संयुताः १६

अन्तःप्रत्यन्तरप्राणसूक्ष्मसंज्ञाश्च तद्भिदाः
सूर्याद्यष्टकवर्गश्च त्रिकोणपरिशोधनम् १७

एकाधिपत्यसंशुद्धिस्ततः पिण्डप्रसाधनम्
ताताश्चाष्टकवर्गाणां प्रस्फुटानि फलानि च १८

ततोऽप्यष्टकवर्गायुःसाधनं च ततः परम्
समुदायाष्टवर्गोत्थफलाध्यायः परिस्फुटः १९

ग्रहरश्मिफलाध्यायः सुदर्शनफलं तथा
महापुरुषचिह्नानि महाभूतफलानि च २०

गुणत्रयफलाध्यायस्ततोऽप्यज्ञातजन्मनाम्
जन्मलग्नादिविज्ञानं प्रव्रज्यालक्षणानि च २१

स्त्रीणां च फलवैशिष्ट्यमङ्गलक्ष्मफलानि च
पूर्वपापोत्थशापोत्थयोगा वैपुत्र्यकारकाः २२

सत्पुत्रप्राप्त्युपायाश्च सहैव प्रतिपादिताः
जन्मन्यनिष्टलग्नर्क्षतिथ्यादिप्रतिपादनम् २३

तत्तच्छान्तिविधिश्चैव संक्षेपेण प्रदर्शितः
प्रसवस्य विकाराश्च कथिताः शान्तिसंयुताः २४

एवं जातकवर्येऽत्र निविष्टा विषयाः शतम्
विज्ञाय विबुधास्त्वेतान् प्राप्नुवन्तु यशः श्रियम् २५

**10-25. In these verses have been described the subject matters of all the chapters, contained in this book and their importance. This information has been given in detail in the Table of Contents of this book.**

**Om Tat Sat**

**Total 117158 words in English in this Book**